CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

7.2 V2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

n Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-C

uru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jal

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

प्रसन्न राघवम्

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'मास्टर' मणिमालायाः १९० संख्यको मणिः (नाटकविभागे ४)

महामहोपाध्यायपक्षधरमिश्रापरनामकश्रीजयदेवकविविरचितं

प्रसन्नराघवम्

नाम

नाटकरत्नम्

मुजफ्फरपुरस्थ-राजकीय—
धर्मसमाजसंस्कृतमहाविद्यालये वेदान्त-दर्शनाध्यापकेन व्याकरण-वेदान्त-साहित्या-
चार्यादिपदवीप्रसाधिना मैथिल-पण्डितश्रीरामचन्द्रमिश्रशर्मणा
विरचितया 'प्रकाश' नामिकया संस्कृतव्याख्यया,
'सरला' नामिकया हिन्दी-टीकया च सहितम् ।

तच्च
काशीस्थ 'संस्कृत-बुकडिपो' इत्यस्याऽधिपैः—
मास्टर खेलाड़ीलाल ऐण्ड सन्स, इत्येतैः
स्वीये 'मास्टर प्रिण्टिङ्गवर्क्स' नाम्नि
मुद्रणागारे मुद्रयित्वा प्रकाशितम् ।

—❀—

प्रथमं संस्करणम्]   सन् १९४७ ई०   मूल्यम् ३)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकाशकः—
जे. एन. यादव, प्रोप्राइटर,
मास्टर खेलाड़ीलाल ऐण्ड सन्स,
कचौड़ीगली, बनारस सिटी।

[अस्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः]

मुद्रकः—
मास्टर प्रिण्टिङ्ग वर्क्स,
बुलानाला, बनारस सिटी

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

टीकाकारः—



पण्डितश्रीरामचन्द्रमिश्रः

व्याकरण-वेदान्त-साहित्याचार्यः,

अध्यापकः—धर्मसमाज-संस्कृतमहाविद्यालयः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मम कथमिह टीकाकरणे प्रवृत्तिः ।

बहूनि वर्षाणि व्यतिगतानि, सिद्धान्तकौमुदीमधीयानेन मया
श्रीगुरुचरणानां मुखादश्रावि

'मन्दोदरीकुटिलकुन्तलकेशभार-
मन्दारदाम-मकरन्दरसं पिबन्तः ।
वीणानिनादमधुरध्वनिमुद्गिरन्तो
मद्विक्रमं मधुकरा अपि कीर्त्तयन्ति' ।। इति ।

तदा स्वाभाविकरूपेण कस्य ग्रन्थस्य कवेश्च पद्यमिदमिति जिज्ञासायां मया प्रकाशितायां श्रीगुरुदेवैः कृतेन 'पक्षधरमिश्रापरनामकश्रीजयदेवकृते प्रसन्नराघवे नाम नाटकरत्ने पद्यमिदमिति' समाधानेनैव समतूतुषमात्मानम् । परतस्त्रिचतुरैर्दायनैः प्रौढिङ्गतेऽर्थावबोधप्रभुत्वे बुद्धिभाजि चामरगवीनिबद्धकाव्यनाटकादिग्रन्थपठनाभिलाषे 'प्रसन्नराघवस्य' पुस्तकमेकमुपलभ्य तत् पठितुमारभमाणो यदात्मानं व्यस्मार्षं, तदधुनाऽपि स्मृतं सदन्तः प्रसादयति । परं सोऽपि समयो न चिरादेवापसृतः, कथमपि समाप्तप्रायमेव तत्पुस्तकं तदधिपतिनाऽनीयत, तदाऽस्य पुस्तकस्यैकाधिकाऽऽवृत्तिर्न विधातुमशाकि ।

अथाविरतप्रवाहशीलेन कालचक्रेण तदेव नाटकरत्नं साहित्याचार्यपरीक्षापाठ्यग्रन्थरूपेण निर्वाचितमिति प्रमाय परं प्रसादं प्रापं, पश्चाच्च प्रबन्धमिममध्यापयन्नेतेन सह पुरःप्रतिपादितं प्राचीनं सम्बन्धं चात्मनोऽन्तेवासिवर्गेभ्यः समभ्यधाम् , अध्यापनावसरेऽनेकत्रस्थलेषु च्छात्राणां हृदयङ्गममर्थं स्वयमुक्त्वापि तदवस्थापनसाधनमनुपलभमानः कियद्व्यषदञ्च । तस्मिन्नेव समये कथाप्रसङ्गतः कतिपयसुहृद्भिरस्य नाटकस्य मूलमात्रं, सत्यामप्येकस्यां व्याख्यायां तस्या मूलासहचरतां चोपलभ्य खिद्यमानानां छात्राणामुपकाराय टीकां निर्मातुमुदसाहिषि, निजासमर्थतां प्रकाश्य चाहमिमं भारमपाकृषि । बहुशो विहितानामाग्रहाणामन्तराले काञ्चन परमात्मप्रेरणामिव परतः सम्भाव्य निजामशक्तिं विश्वस्तभावेन विदन्नपि नाटकस्यास्य व्याख्यां विधातुं समकल्पिषि, इयञ्च १९४२ खीष्टाब्दीयपरार्द्धभागस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कथा । अथाऽस्या व्याख्यायाः प्रारम्भैऽह्यश्वः कुर्वंत एव मम मासचतुष्टयमगमत् । प्रारब्धमपि व्याख्याकार्यं द्वित्रपत्रपर्यन्तमेव प्रसृत्य—पारिवारिकोपप्लवपरम्परापराभूतस्य मम दुरदृष्टेन तथा प्रत्यबध्यत, यथाऽहमिदमसुपूरं—कर्त्तुमशक्यमेव वा बोद्धुमारप्सि । अथ प्राक्तनसुकृतसमुद्रेकेण, सुहृदां स्नेहानुबद्धेनानुरोधने च स्मारित। सूक्तिरियम्—

'विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति ।'

अर्थतोऽनुसन्धाय चेमां कार्यान्तरव्यासक्तचित्ततयाऽनपनोदनीयस्वभावप्रभवालस्य पारवश्येन च बाधितोऽपि यथाऽवकाशमायस्य समापितापीयं 'प्रकाश' व्याख्या युद्धे सन्नद्धतया धूतसाधारणदशस्यास्य संसारस्य कतमामावश्यकतां पूरयिष्यति येन प्रकाशनपथातिथित्वमुपैष्यतीतीवास्या निरर्थकतामिवान्तराधाय मुद्रणोपयोगिपत्राद्यलाभेन चासादितशिथिलभावो यावदुदासितुं प्रावर्त्तिषि, तावदेव पूज्यपण्डितप्रवरश्रीयुतबदरीनाथझाशर्ममहाशयानामकम्पयाऽनुकम्पया लब्धोऽस्याः प्रकाशनस्याऽवसरः ।

तदियता परिकरेण प्रसन्नराघवस्य प्रकाशाभिधामिमां व्याख्यां प्रकाशनप्रक्रान्तां पश्यन् प्रमोदमनुविन्दामि । अस्य सटीकानुवादसंस्करणस्य सम्पादने प्रारब्धे मया प्रसन्नराघवनाटकस्य तट्टीकायाश्च मिलित्वा पुस्तकत्रितयमधिगतम् ।

१—१९०७ तमेशवीयवर्षे निर्णयसागराख्ययन्त्रालये मुद्रितं, द्वितीयं संस्करणम्

२—१८९८ तमेशवीयवर्षे स्व० गोविन्ददेवशास्त्रिणा संस्कृत्य मेडिकलहाल-नामकयन्त्रालये मुद्रयित्वा प्रकाशितम् ।

३—१९०६ तमेशवीयवर्षे स्व० सर गङ्गानाथझा *D. L. H.* महोदयेन विरचय्य प्रकाशितं टीकामात्रम् ।

सम्प्रति प्रसन्नराघवप्रणयनयशस्विनो जयदेवस्य कः परिचय इति प्रक्रान्ते चिन्तनेऽस्य नाटकनिवहमौलिमाणिक्यभूतस्य ग्रन्थस्य निर्माता कतममन्वयमभिजनञ्च जन्मनाऽलङ्कृतेति विचारणायां ये मतभेदास्ताननुपन्यस्य न शक्यतेऽभीष्टोऽर्थः सम्यगवगमयितुमिति तानुपस्थापयामि । प्रथमं कति 'जयदेवाः' इति विविच्यते, तत्र—

१—एको 'मुकुट'व्याख्यात 'च्छन्दश्शास्त्र'नामकपुस्तकप्रणेता च्छन्दोविशे-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञतयाऽभिनवगुप्तपादैः 'अभिनवभारती' नामके स्वग्रन्थे सादरं स्मृतः, तेन तस्य तृतीयस्यां द्वितीयस्यां वा शताब्द्यां स्थितिमनुमिन्वन्ति विद्वांसः।

२—अपरश्च पीयूषवर्षोपाधि 'श्चन्द्रालोक' संज्ञकालङ्कारनिबन्धप्रणयनयशस्वी। अयं महादेवतनयः सुमित्रागर्भसम्भवश्चेति तद्ग्रन्थस्य निम्नोद्धृतादंशादुन्नयन्ति विपश्चितः "महादेवः सत्रप्रमुखमखविद्यैकरसिकः, सुमित्रातद्भक्तिप्रणिहितमतिर्यस्य पितरौ" एतत् प्रणीतो द्वितीयो ग्रन्थः 'सीताविहार' नामा 'पिटरसन्' महोदयेन स्वीकृतः, परं सम्प्रति नोपलभ्यते।

३—तृतीयो विल्वमङ्गलावतारतया प्रथितो 'भोजदेव' 'भामादेवी'प्रभवः 'वीरभूम' मण्डलान्तर्वाहिन्या 'अजया' नामनद्यास्तीरवर्त्तिनि 'किन्दुविल्व' (केण्डुली) नामके ग्रामे वासी 'गीतगोविन्द' नामकमधुरगीतकाव्यनिर्मातृतया परिचितः।

४—चतुर्थः 'प्रसन्नराघव' चिन्तामण्यालोकयोः' कर्त्ता 'सोदरपुरिये दिगौन' वंशाम्बुनिधिशीतभानुर्मिथिलावासी न्यायशास्त्रनिष्णातप्रतिभः प्रौढकविश्च। अयमपि स्वग्रन्थे महादेवसुमित्राभिधानौ पितरौ कौण्डिन्यगोत्रं च स्मरति।

तत्र चतुर्थ एव मद्व्याख्येयनाटककर्त्तेति निश्चयेन वक्तुं पारयामः, एतेन हि स्वपितृव्यहरिमिश्रेभ्यो न्यायशास्त्रमधीतं तदुक्तमेतेन स्वयमयालोकप्रारम्भे—

अधीत्य जयदेवेन हरिमिश्रात् पितृव्यतः। इति

अयं हि जयदेवः सकृदाकर्णितं पक्षं न व्यस्मार्षीत्तदयं पक्षधर इत्यभिख्यां गतः। मिथिलायामतिप्रसिद्धा चेयं वार्त्ता यदस्यैव पक्षधरमिश्रस्य सकाशान्न्यायनिबन्धानाजहार रघुनाथशिरोमणिर्यदुपज्ञोऽयं न्याये नव्यप्रवाहः।

यदपि पीयूषवर्षपित्रोर्जयदेवसुमित्राभिधानतोल्लेखादेतद्ग्रन्थस्यापि स एव पीयूषवर्षजयदेवः प्रणेतेति, तदपि नामसाम्यस्याकस्मिकतया समाधेयम्, पीयूषवर्ष इति प्रसिद्धं प्रियं चोपाधि, यं पुरस्कृत्य स नामापि नाजगणत्, एकत्रग्रन्थे सगर्वमुल्लिखन्नपरस्यां बृहत्यां कृतौ तमेकदापि नोदलिखदिति हि तयोरेकत्वं शिथिलमूलतां लम्भयति। यदि हि सरसपदवैदग्धीसुप्रसिद्धः पीयूषवर्षः प्रसिद्धदार्शनिकजयदेवादभिन्नोऽभविष्यदवश्यमेव चन्द्रालोकेऽपि क्वचिदात्मनस्तमभिमानं व्याञ्जयिष्यत्। उभयोर्ग्रन्थयोः कविताशैली तु तथा भिद्यते यथा शेमुषीजुषो मानान्तरान्वेषणप्रयासमपि वृथैव समर्थयन्ते। यच्च केचित् 'कौण्डिन्य' गोत्रस्य साम्प्रतिकमिथिलापञ्जीप्रबन्धाप्रसिद्धतया प्रसन्नराघवकर्त्तुर्मिथिलाभिजनतां प्रति संशेरते, न तदपि प्रबलयुक्तिकं, सन्तति-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ह्रासवशात् पुमपत्यशून्यतामागतायां कस्यापि गोत्रस्य सर्वथोच्छेदावस्थाया अ-सम्भवशालितया कस्यापि तथाविधस्य तद्देशवासितायाः एवापह्नवस्यानुचितत्वात् 'सोदरपुरिये दिगौन' मूलकतया प्रसिद्धेः सङ्गतिभाजः "कवीन्द्रः शाण्डिल्यः" इति पाठस्य म० म० परमेश्वरशर्मभिरूहनाच्च । न्यायशास्त्रीयनिबन्धेषु मिश्रमतत्वे-नोपन्यस्ता विषया एतदालोकगता एव आलोकग्रन्थश्च सम्प्रत्यपि प्राचीनतमलिपिरूपेण मिथिलायामेवोपलभ्यत इत्यपि कवेरस्य मिथिलाभिजनतां प्रमापयति ।

प्रसन्नराघवप्रणेता प्रसिद्धो दार्शनिको जयदेव एवेति को भवतामाग्रहः ? किमिति स पीयूषवर्ष एव नाङ्गीक्रियते ? इतीदृशपर्यनुयोगे 'येषां कोमलकाव्यकौशलकला-लीलावती भारती तेषां कर्कशतर्कवक्रवचनोद्गारेऽपि किं हीयते' इति प्ररूढप्रचारं पद्यमेवोद्धरन् कृतित्वमाशासे । एतावता सन्दर्भेणैतदायातं यदेतन्निबन्धा चतुर्थो जयदेवो मिथिलायां जन्माग्रहीदिति । इदं पुनरवशिष्यते निर्णेतुं यदयं कस्यां शताब्द्यां प्रादुरभूदिति ?

१—कविकोकिलो विद्यापतिरस्य सहाध्यायी, यदसावपि स्वगुरुं हरिमिश्रमेव स्मरति तदुक्तं श्रीयुतपण्डितशिवनन्दनठक्कुर एम० ए० व्या० ती० महोदयेन स्वीये 'विद्यापति' ग्रन्थे । एकदा तदतिथिशालायामुदासीनवदासीनस्यास्य समुचितसत्का-रमकृतं पश्यता तत्त्रुटिमार्जनकुतूहलशालिनेव विद्यापतिना सहासमिदमयमुक्तः—

'प्राघुणो घुणवत्कोणे सूक्ष्मत्वान्नोपलक्षितः ।'

तदाकर्ण्य सहाधीतवद्दुपयुक्तोपहासपूर्वकमुत्तरितं पक्षधरमिश्रेणेत्थम्:—

'नहि स्थूलधियः पुंसः सूक्ष्मो भवति गोचरः' इति ।

विद्यापतिश्च १४८३ तमेशवीयवर्षे भुवमिमामरहयत्, तदनेन विद्यापतिसम-समयोद्भूतताऽस्य प्रत्याय्यते ।

२—साहित्यदर्पणस्य चतुर्थपरिच्छेदे ध्वनिप्रभेदपरिगणनावसरे—"कदली कदली करभः करभः" इत्यादिपादोऽतिप्रसिद्धः प्रसन्नराघवस्य (३ अ० ३४ श्लोकः) समुद्धृत उदाहरणतया श्लोकः, साहित्यदर्पणप्रणेता च विश्वनाथः सकलैरपि तत्कालनिर्णयप्रवृत्ति-मद्भिः खीष्ट्रीयचतुर्दशशताब्दीमध्यभागसमुद्भूततयैव समर्थितः तदिदमपि पक्षधर-मिश्रस्य तच्छताब्दीमध्यवर्त्तितां प्रमापयति तावतैव कालेन पक्षधरमिश्रकृतेः प्रसन्न-राघवस्य कथमियती प्रसिद्धिरजायत, यथा तदन्तःपाती पद्यविशेषस्तत्समकालभवेन श्रीविश्वनाथमहापात्रेणाऽष्टादशभाषावारविलासिनीभुजङ्गभावमात्मनः साटोपमुद्घोषय-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

साऽपि स्वकृतावुदाहियत, समविद्या हि परस्परयशःपुरो भागा एव भवन्तीति पर्यनुयुञ्जानं प्रति पक्षधरमिश्रस्य तदपेक्षयाऽवस्थया विद्यया च प्रतिष्ठितत्त्वं, कृतेरमुष्याश्च बलवत्सहृदयहृदयावर्जकत्वं विश्वनाथमहापात्रस्य निष्पक्षपातप्रतिभत्वञ्च पुरत उपस्थापनीयम्। पक्षधरमिश्रमहोदयानां वंशवृक्षोऽपि तत्समयविषये कामपि दिशं प्रकाशयेदिति।

एतेन समुदितेन चतुर्दशशताब्दी प्रसन्नराघवप्रणेतुः काल इति प्रमापितं, एतट्टीकासु महामहोपाध्याय-डाक्टरगङ्गानाथशर्मकृता व्याख्या केवला मया दृष्टा, स च नातिप्राचीन इति तद्विषये समयनिरूपणपरिचयप्रदानादिकं नावश्यकं, श्रूयते चैकाऽपरापि व्याख्या, परं तस्या दृशोरविषयतया न तद्विषयेऽपि किमपि वक्तुमिष्यतेऽथ चेश्यते।

सम्प्रति ग्रन्थस्यास्य यानि पुस्तकानि मयाऽधिगतानि, तदाधारीकृत्य प्रारब्धे सम्पादने यदनुभूतं तद्विषयेऽपि किमपि निवेदये।

प्रायः प्राचीनमुद्रिताऽमुद्रितसकलपुस्तकानां पाठभेदा लेखकमुद्रकसंशोधकमतिवैश्वरूप्याज्जायन्ते, जायमानाश्च ते टीकाकृतां मतिं मुद्रयन्ति ततश्च ते यथारुचि कमप्येकं पाठमवलम्ब्य तमेव व्याख्यान्ति, कतिपये पुनष्टीकाकृतो व्याख्याय पाठमेकमन्यान् पाठभेदानुपन्यस्यन्ति, स्वविचारानुसारेण तत्र टिप्पणीरङ्कयन्ति च कतमः पुनरत्र पाठः प्रणेतुरिति को वा सर्वमनोहर इति वा न मनागपि ध्यायन्ति, न वा तद्विषये स्वविचारानुपस्थापयितुमात्मानमुत्तरदायिनं मन्वते। कारणैरेभिरस्यापि नाटकस्य तिसृष्वपि प्रतिषु प्रचुरः पाठभेदः प्रवृत्तः। पाठभेदा अपि समयस्यातिदीर्घतया पाठकरुचिवैचित्र्येणार्थावबोधवैधुर्येण च लेखकानां नानाविधा भवन्ति यथा—'घर्मेतरांशुमिव वक्रतयाऽतिरम्यम्' इत्यस्य स्थाने 'घर्मेतरांशुरिवं वक्रतयातिरम्यम्' इति, रघुपतिशरश्रेणिदलितान् इत्यस्य स्थाने 'रघुपतिशिरश्रेणिदलिता'निति। ईदृशेषु पाठभेदेषु जागरूकेषु यानहमर्थतः स्वरसतः प्रवाहतश्च सङ्गच्छमानानवाधारयं तानेव सन्न्यवेशयम् व्याख्याकालेऽनूहिता अपि पश्चादनुध्याताः पाठभेदाः पृथक् सूचिताः।

टीकायां—प्रायशस्त एवार्था निवेशिता यानन्तरेण मूलग्रन्थो न बोधविषयः स्यात्, त एव विषया आलोचिता याननालोच्य कविहृदयमनालोकितमेव पर्यवस्येत्, तान्येव शास्त्रान्तरतत्त्वानि समुद्धृतानि यानि नोक्तानि तत्प्रकरणमेव तमसि मज्जयेयुः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

टीकाया अस्या अन्ते समग्रस्यास्य नाटकस्य हिन्दीगद्यानुवादोऽपि मया निवेशितो येन प्रविविक्षवः कथासारं क्वचित् क्वचिदर्थं च यथोपयोगं बुध्येरन्, संस्कृतरसिका भाषान्तरज्ञाश्चैतत्साहाय्येन नाटकरत्नस्याऽस्य रसस्रोतसि सस्नेहं मज्जनं कुर्वन्तः स्वं हृदयमानन्दातिरेकेणाप्याययितुं प्रभवेयुः। तदियती सम्भारसामग्री, समीहे सहृदयानां मनांसि समावर्जयेदिति। ग्रन्थस्य दुरूहतया टीकान्तरदौर्लभ्येन च नातिक्षुण्णेऽदसीय-टीकानिर्माणे प्रवृत्तस्य ममं त एव बन्धवः सहाया येषामनुरोधेन यदुपकार बुद्धिं च मनसिकृत्य कृतोऽत्र मया परिकरः।

टीकाया अस्या अवसाने—

'ये धन्याः प्रतिभाजुषः प्रतिदिनं व्याख्या न वा स्तन्वते,
येवा पण्डितमानिनो मतिलवेनाऽन्यं तृणं मन्वते।
मा प्रक्षैप्सुरिह स्वदृष्टिनिकरं ते ते नचातो वृथा,
यत्नो मे बहवो हि सन्त्यधिजगन्माध्यस्थ्यभाजो बुधाः॥

—इति पण्डितप्रकाण्डखुद्दीशर्मोपज्ञं पद्यं समुद्धृत्य लघूकृतभारो भवेयम्

'उत्पत्स्यते तु मम कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी' इति वा भवभूतिभाषितमुपनिबद्ध्य कृतित्वमाकलयेयमिति चिन्तयताऽपि मया 'सर्वानिन्दितकीर्त्तिलाभसुभगं भाग्यं कुतोऽस्मादृशाम्' इत्युक्त्वैव सन्तोषः कृतः।

अन्तेऽस्याः प्रस्तावनायाः प्रार्थये परमात्मानं यदस्याष्टीकायाः साहाय्येन परिक्षार्थिबन्धवो यथोपयुक्तमुपकारँय्यथा गृह्णीयुस्तेन च मां सफलश्रमं विदध्युस्तथा कुर्यादिति।

२००३ संवत्,
शारदीयनवरात्रम्
मुजफ्फरपुरम्

प्रश्रयावनतः—

रामचन्द्रमिश्रः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रसन्नराघवं नाम नाटकम्

[श्रीरामचन्द्रमिश्रकृतप्रकाशव्याख्यासहितम्]

[प्रथमोऽङ्कः]

चत्वारः प्रथयन्तु विद्रुमलतारक्ताङ्गुलिश्रेणयः,
श्रेयः शोणसरोजकोरकरुचस्ते शार्ङ्गिणः पाणयः ।
भालेष्वब्जभुवो लिखन्ति युगपद्ये पुण्यवर्णावलीः
कस्तूरीमकरीः पयोधरयुगे गण्डद्वये च श्रियः ॥ १ ॥

श्रेयः स मे दिशतु कोऽपि नवीनपीन—भव्याम्बुदप्रभतनुर्जनवन्दनीयः ।
बद्धाहुपाशकलिता-ललिताननश्री राधा घनं प्रविशतीव तडिद्विभाति ॥१॥
श्रद्धानतेन शिरसा पितरं 'मधुसूदनम्' प्रसूं 'जयमणिं' चाहं प्रणमामि पुनःपुनः ॥२॥
प्रसन्नपदगम्यार्थ—प्रसन्नाखिलपाठके ।
'प्रसन्नराघवे' टीका 'प्रकाशः' स्तात् प्रियो विदाम् ॥३॥

अथ सरसपदविन्यासवैदग्धीसुप्रसिद्धः श्रीजयदेवकविः शिष्टाचारानुमित-स्मृतितर्कितश्रुतिबोधितकर्त्तव्यताकं द्वादशपदनान्द्यात्मकं मङ्गलं विघ्नविघाताय व्याख्यातृश्रोतॄणामनुषङ्गतो मङ्गलाय च ग्रन्थतो निबध्नाति—चत्वार इति ।

विद्रुमस्य=प्रवालस्य लता इव रक्ता=रक्तवर्णा अङ्गुलिश्रेणयः=अङ्गुलि-समुदया येषां ते तथोक्ताः, शोणं=लोहितवर्णं यत् सरोजं=कमलं तस्य कोरकः=कलिका तस्येव रुक्=कान्तिर्येषां ते, शार्ङ्गिणो=जनार्दनस्य ते=प्रसिद्धा-श्चत्वारः=चतुःसङ्ख्याकाः पाणयो=हस्ताः (सामाजिकानाम्) श्रेयः=कल्याणं प्रथयन्तु=विपुलयन्तु बर्द्धयन्त्विति यावत् । ये पाणयः युगपत्=तुल्य-कालम् अब्जभुवो=ब्रह्मणो भालेषु=ललाटफलकेषु पुण्याः=धन्याक्षराः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपि च—

आकल्पं मुरजिन्मुखेन्दुमधुरोन्मीलन्मरुन्माधुरी-
धीरोदात्तमनोहरः सुखयतु त्वां पाञ्चजन्यध्वनिः ।
लीलालङ्घितमेघनादविभवो यः कुम्भकर्णव्यथा-
दायी दानवदन्तिनां दशमुखं दिक्चक्रमाक्रामति ॥ २ ॥

वर्णावलीः = अक्षरपङ्क्तीः, श्रियो = लक्ष्म्याः, पयोधरयुगे = स्तनयुगे गण्डद्व = कपोलयुग्मे च कस्तूरीमकरीः = मृगमदनिर्मितविलासिसमुचितचित्राणि लिखन्ति = निर्मान्ति । अत्र जनार्दनकरचतुष्टयी चतुःसंख्यकब्रह्मकपालप स्तनद्वयकपोलयुगलयोश्च युगपत्तत्तत्कार्यकर्तृतयोत्प्रेक्ष्यत इति करगतं चतु सोपयोगतया समर्थितम् । विद्रुमलतासादृश्येन ब्रह्मकपालेषु तादृशवर्णाव विन्यासशक्तिशालिता, सरोजकोरकोपमया च मृदुत्वहेतुकं चित्रनिर्माणोपयुक्त ध्वन्यते । शार्दूलविक्रीडितं वृत्तम् । "सूर्याश्वैर्मसजस्ततः सगुरवः शार्दू विक्रीडितम्" । आर्थीसमासगोपमालङ्कारः ॥ १ ॥

अङ्गवर्णनमङ्गिवर्णनपर्यवसायि, ततोऽपि वा सौष्ठवेन तत्कार्यकरं भवती पाञ्चजन्यध्वनिं प्रार्थयते—**आकल्पमिति** । मुरजितो = मुरारेर्मुखमेवेन्दु = श स्ततो मधुरं = स्वादून्मीलन् = बहिर्भवन् यो मरुत् = वायुस्तस्य माधुरी = म रिमा तया धीरोदात्तो = गम्भीरसुन्दरोऽत एव मनोहरः = चित्तग्राही पाञ्च न्यस्य = श्रीकृष्णशङ्खस्य ध्वनिः = शब्दस्त्वामाकल्पं = कल्पावसानसमयाव सुखयतु = सुखिनं करोतु । कल्पो = ब्रह्मदिनम्, तत्परिमाणं च विष्णुपुराणे "कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् । प्रोच्यते तत्सहस्रं तु ब्रह्मणो दिन च्यते" । ध्वनिमेव विशिनष्टि—लालेति । लीलया = ऽनायासेन लङ्घि = अतिशयितः मेघस्य = वारिदस्य नादो = गर्जितं तस्य विभवो = महत्त्वं तथा, किञ्च दानवाः = राक्षसा एव दन्तिनो = गजास्तेषां कुम्भा = मस्तक कर्णाः = श्रुतिविवराणि च तेषां व्यथादायी = पीड़ाप्रदो यः पाञ्चजन्यध्व दशमुखं = दशधाभिन्नं दिक्चक्रं = दिङ्मण्डलम् आक्रामति = व्याप्नोति । भगवन्मुखचन्द्रनिर्गतसमीरसम्भृतध्मातपाञ्चजन्यस्य राक्षसानां चेतसि भ

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नाभीपद्मवसच्चतुर्मुखमुखोद्गीतस्तवाकर्णन-
प्रोन्मीलत्कमनीय-लोचनकलाखेलन्मुखेन्दुद्युतिः ।
सक्रोधं मधु-कैटभौ सकरुणस्नेहं सुतामम्बुधेः
सोत्प्रासप्रणयं सरोजवसतिं पश्यन् हरिः पातु वः ॥ ३ ॥

ध्वारकत्वं, मेघगर्जितातिशायिस्वनवत्त्वं, तेन दिगवकाशव्यापकत्वञ्चावेद्यते । 'धीरोदात्तमनोहर' इति विशेषणेनाऽत्र नाटके धीरोदात्तो रामो नायकः, लङ्घित-मेघनादविभव इति मेघनादपराजयः, कुम्भकर्णव्यथादायीति कुम्भकर्णविनिपातः, दशमुखमिति निपातनीयः प्रतिनायको रावणश्चेति नाटकीयं वस्तुजातं सूच्यते । तेन नान्दीलक्षणसङ्गतिः । तदुक्तं नाट्यप्रदीपे—नान्दीलक्षणप्रस्तावे "आशीर्न-मस्क्रियावस्तुनिर्देशान्यतमा मता" इति । प्रागुक्तमेव वृत्तम् ॥ २ ॥

नाभिपद्मेति । नाभ्यां=नाभिकुहरे यत् पद्मं=कमलं तत्र वसन्=वासं कुर्वन् यश्चतुर्मुखो=ब्रह्मा तस्य मुखैः=आननैः उद्गीतो=गीतो यः स्तवः =स्तुतिवाक्यं तस्य आकर्णनेन=श्रवणेन प्रोन्मीलत्=विकसत् यत् कमनीयं =सुन्दरं लोचनं तस्य कला=कान्तिस्तया (सहेति शेषः) खेलन्ती=क्रीडन्ती मुखमेवेन्दुः=चन्द्रस्तस्य द्युतिः=कान्तिर्यस्य सः, मधु-कैटभौ=तन्नामानौ =राक्षसौ सक्रोधं=सकोपं (किञ्च) अम्बुधेः=समुद्रस्य सुतां=लक्ष्मीम् सकरुणस्नेहं=दयाप्रेमसहितं सरोजवसतिं=ब्रह्माणञ्च सोत्प्रासं=सहासविस्रम्भं पश्यन्=वीक्षमाणः हरिः=भगवान् वो=युष्मान् पातु=रक्षतु । अत्र भगवतः पात्रविशेषानुरोधिदृग्व्यापारभेदकथनेन यथोचितानुध्यायिताव्यज्यते । मधुकैटभ-दर्शनेन ब्रह्मा भीत इति तत्र हासः सृष्टिकर्तृत्वेन स्नेहश्च, लक्ष्म्यां भीतायामपि तस्यां स्त्रीत्वेन दयाया सह स्नेहः, मधुकैटभयोश्च निरर्थकोपद्रवकारितया क्रोध इति यथायथं बोध्यम् । एकदा विष्णुकर्णमलोद्भूतौ मधुकैटभनामानौ राक्षसौ हन्तुं योगनिद्रां गतं विष्णुं जागरयितुं ब्रह्मा तं तुष्टाव स्तूयमान उद्बुद्धश्च भगवान् तौ जघानेति मार्कण्डेयपुराणगता कथाऽत्रानुसन्धेया । अविपरीतं वृत्तम् । अत्र द्वादशपदानान्दी पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुतेति स्मरणात् । पदशब्दः श्लोकपादपरः । श्लोकत्रयेण द्वादशपदतापूर्त्तिः । अत्र माङ्गल्यसरोजचन्द्रसूचना च नान्दीलक्षणानुकूला कृता ॥ ३ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain: Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(नान्द्यन्ते)

सूत्रधारः—(परितो विलोक्य । सहर्षम्) अये, कथममी निजवदनशारदारविन्दनर्त्तितगिरिनन्दिनीनयनखञ्जनस्य निखिलमुनिजनहृदयरञ्जनस्य विकटजटापटलोत्सङ्गताण्डवितगङ्गातरङ्गनिकरस्य मन्दाकिनीचन्दनललाटिकायमानमुकुटोपनीतनूतनसुधाकरस्य त्रिभुवननलिननिर्माणनूतनविसाङ्कुरस्य भगवतः शङ्करस्य यात्रायां परिमिलिता एव पारिषदाः । तदेतानुपगम्य निजकलाविलोकनप्रसादाय तावदभ्यर्थयामि । (विमृश्य) अथवा किमभ्यर्थनया । यतः—

नान्द्यन्त—इति । उक्तलक्षणा नान्दी तस्या अन्ते समाप्तौ ।

सूत्रधार—इति । "नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात्सबीजकम्, रङ्गदैवतपूजाकृत्सूत्रधार उदीरितः" भरतनाट्ये । नाटकीयककथासूत्रं प्रथमं येन सूच्यते, रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते" इति च तत्रैव । नान्दीपाठः सूत्रधारेण क्रियतेऽन्येन वा नटेनाऽत्र विषये केचित्तस्यान्यनटकर्त्तव्यतां 'नान्द्यन्ते सूत्रधारः' इत्येतत्स्वरसादिच्छन्ति । सूत्रधारः पठेन्नान्दीमिति नाट्याचार्यभरतमतम् । लोकाचारस्तु पूर्वपक्षमेव द्रढ़यति । वस्तुतस्तु नान्दीसूत्रधारकृतैव भवति, वाद्यादिसाहायकं परैः क्रियते, तदन्ते च नाट्यादिनिवृत्तौ सूत्रधारः कथामवतारयति ।

निजनयनेति । निजं=स्वीयं वदनमेव शारदारविन्दं=शरत्समयकमलं तेन नर्त्तितं प्रसन्नतया प्रवृत्तनृत्तं कृतं पार्वत्या नयनमेव खञ्जनः येन तस्य पार्वतीप्रियस्येति यावत् । साङ्गरूपकमलङ्कारः । निखिलमुनिजनहृदयरञ्जनस्य=प्रसादकस्य, विकटं=भयानकं यत् जटापटलं=जटासमूहस्तस्योत्सङ्गे=क्रोडे मध्य इति हृदयम् । ताण्डवितो=नर्त्तितः प्रवाहितो गङ्गातरङ्गनिकरः=जाह्नवीवीचिनिचयो येन तस्य, मन्दाकिनी=गङ्गा तस्याश्चन्दनललाटिकायमानः=चन्दननिर्मितललाटभूषणवदाचरितो मुकुटोपनीतः=किरीटतां प्रापितः नूतनः=बालः सुधाकरः=चन्द्रो यस्य तस्य, त्रिभुवनं=जगत्त्रयमेव कमलं तस्य निर्माणे=रचनायां निर्मलविसाङ्कुरस्य=विमलकमलनालतुल्यस्य, एतेन जगदाधारता, रजतधवलता च शिवस्य प्रत्याय्यते । भगः=सामर्थ्यं सोऽस्यास्तीति भगवान् तस्य शङ्करस्य यात्रायां परिमिलिताः=सङ्गताः । निजकला=स्वाभ्यासः, तस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आकारेणैव चतुरास्तर्कयन्ति परेङ्गितम् ।
गर्भस्थं केतकीपुष्पमामोदेनेव षट्पदाः ॥ ४ ॥

(विलोक्य । सहर्षम्) नूनमेतदभिसन्धानादेव सामाजिक-समाजादितोऽभिवर्त्तते सखा मे रङ्गतरङ्गः ।

(प्रविश्य)

नटः—भाव ! इदं मन्मुखेनैव भवन्तमुदीरयन्ति सामाजिकाः । यत् किल 'अये भरताधिराज—' (इत्यर्धोक्ते ।)

सूत्रधारः—(कर्णौ पिधाय) अहह । असमञ्जसम् असमञ्जसम् । भवतु । कार्यं तावदाकर्णयामि ।

नटः—भाव ! अधुना मयैव भवत्सकाशादाकर्णनीयं किमिदमसमञ्जसमिति ।

सूत्रधारः—नन्विदमेव । यत् किल नन्दति ज्यायसि कनीयसि राजपदमुपन्य-

---

विलोकनेन प्रसादो=ऽनुग्रहस्तस्मै । ललाटस्थालङ्कारो ललाटिका । 'कर्णललाटात् कनलङ्कारे' ४।३।६५ इति कन् ।

आकारेणेति । चतुराः=कुशलाः आकारेण=स्वरूपेण एव (वस्त्वन्तरमनपेक्ष्यैवेति भावः) परस्य इङ्गितं=हृदयगतं भावं तर्कयन्ति जानन्ति षट्पदाः=भ्रमराः गर्भस्थं=कोशगतं केतक्याः, पुष्पं=कुसुमम् आमोदेन=सुगन्धेन इव । यथा भ्रमरा गर्भगतमपि केतकीपुष्पमाकारेणोहन्ति तथैव चतुरा आकारेणैव परकीयं भावं जानन्तीति तात्पर्यम् । दृष्टान्तोऽलङ्कारः । स्मर्यतेऽत्र नैपधीयम्—"झटितिपराशयवेदिनो हि विज्ञाः" ॥ ४ ॥

एतदभिसन्धानात्—चतुराः परेङ्गितमाकारेण तर्कयन्तीति ज्ञानादेव ।

मन्मुखेनैव । ते मामुक्तवन्तोऽहं च तुभ्यं वदामीति विवक्षा । दृश्यते चेद्दृशः प्रयोगो नैपधे—"विनिर्यदाकर्णय मन्मुखाध्वना" ।

असमञ्जसम् । अनुचितम्, अन्यायः, 'अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जस'मित्यमरः । सम्यक् अञ्जः अत्रेति बहुव्रीहिविग्रहः । अच्प्रत्यन्ववेत्यत्राजिति योगविभागादच् ।

नन्दति । जीवति अविपन्ने योग्ये चेत्यर्थः । भावे सप्तमी ।

राजपदभाजनम् । भरताधिराज इति सम्मानस्य भाजनं पात्रम् । अहं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्यते । अहं हि भरतमात्रक एव । मम पुनरग्रजन्मा गुणारामनामा राजपद-भाजनम् ।

नटः—कीदृग्गुणस्ते गुणारामः ? ।

सूत्रधारः—ननु नाम्नैव दत्तोत्तरम् ।

नटः—(विहस्य) कथं नाम्नैव गुणावगमः ।

सूत्रधारः—अथ किम् ।

गुणग्रामाविसंवादि नामापि हि महात्मनाम् ।
यथा सुवर्णश्रीखण्डरत्नाकरसुधाकराः ॥ ५ ॥

अपि च । किमिदं गुणारम्भे कथं नाम्नैव गुणावगम इत्युच्यते । यः खलु रति-जनकस्य राज्ञः सदसि हरचापारोपणं नाम रूपकमभिनीय परितुष्टेन राज्ञा समर्पितां रङ्गविद्याधराख्यातिं प्रियामिव समासादितवान् ।

तु केवलं = भरतमात्रकः ।

नाम्ना । गुणाराम इति संज्ञया गुणानां शीलविद्यादीनामारामो विश्रान्ति-भवनमिति सङ्केतः ।

गुणग्रामेति । महात्मनां = महासत्त्वानां नामापि = अभिधानमपि गुणा-नां शीलविद्यादीनाम् अविसंवादि = अविरुद्धं न प्रतिकूलं भवति । "विसंवादो विरोधिता" उदाहरति 'यथा सुवर्णेत्यादि । सुवर्णं = काञ्चनं श्रीखण्डं = मलय-चन्दनं, रत्नाकरः = समुद्रः, सुधाकरः = चन्द्रः ते आदयो येषान्त इति बहु-व्रीहिः । सुवर्णपदं प्रकृष्टवर्णवत्पदार्थप्रतिपादकं, श्रीखण्डपदं शोभातिशयशालि-वाचकं, रत्नाकरपदं रत्नराशिसमृद्धसमुद्रवाचकं सुधाकरपदं च अमृतधामवा-चकं तद्वद्गुणारामपदमपि सकलगुणाकरपुरुषविशेषवाचकमेव सम्भवतीति साधूक्तं "नाम्नैव दत्तोत्तर"मिति भावः ॥ ५ ॥

रूपकम् । तन्नामकं दृश्यकाव्यप्रभेदम् । **अभिनीय** — अभिनयं कृत्वा प्रदर्श्येति भावः ।

रङ्गविद्याधराख्यातिम् । रङ्गविद्या = नाट्यविद्या तस्या धरः = धर्त्ता ज्ञातेति, **आख्यातिं** = प्रशस्तिं प्रियां = पत्नीमिव समासादितवान् = प्राप्तवान् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नटः—स पुनः सम्प्रति कं देशमभिनन्दयति ।

सूत्रधारः—केनापि दाक्षिणात्येन नटापसदेन ममैवेदं गुणारामेति नामेति वदता रङ्गविद्याधराख्यातिरपहृता । तदाकर्ण्य गुणारामस्तामेव दिशं प्रचलितः । अधुना च श्रुतमस्माभिः यत् किल सुकण्ठनाम्ना गायकेन सह मैत्रीं विधाय दाक्षिणात्यानां भूभुजां सदसि तेन सह रङ्गसङ्गरमुपसङ्क्रान्तवानिति ।

नटः—अहो ! महानुपक्रमः ।

सूत्रधारः—उचितमिदम् । यतः—

कीर्त्तिं मृणालकमनीयभुजामनिद्र—चन्द्राननां स्मितसरोरुहचारुनेत्राम् ।
ज्योत्स्नास्मितामपहृतां दयितामिव स्वां, लब्धुं न कः परमुपक्रममातनोति ॥६॥

तत्कथय कार्यम् ।

नटः—इदमेव । यत् किल त्वयाभिनीयमानमवलोकयाम इति ।

अभिनन्दयति—सनाथीकुरुते ।

नटापसदेन—दुष्टनटेन, रङ्गविद्याधराख्यातिः = तदात्मिकाप्रशस्तिः । अपहृता = स्वायत्तीकृता ।

दाक्षिणात्यानाम्—दक्षिणदिगवस्थितानाम्, भूभुजाम्—राज्ञाम् सदसि—सभायाम् ।

रङ्गसङ्गरम्—रङ्गे = ऽभिनयविद्यायां सङ्गरं = युद्धम्, शास्त्रार्थमिति यावत् ।

महानुपक्रमः—दीर्घः = प्रयासः । अत्र नटसूत्रधारवार्तालापे रतिजनकस्य राज्ञः, हरचापारोपणं, प्रियाम्, गुणारामः, दाक्षिणात्यः, सुकण्ठ इति पदैः क्रमशः जनक, शिवधनुः, सीता, राम, रावण, सुग्रीवाः सूच्यन्त इति भाविकथा निर्देशः कृतो बोध्यः ।

कीर्त्तिमिति । मृणालः = कमलदण्ड इव कमनीयः = सुन्दरो भुजो = बाहुः यस्याः सा ताम्, अनिद्रः = प्रकटप्रकाशो यश्चन्द्रः = शशी तद्वद् आननं = मुखं यस्याः सा ताम्, स्मितं = विकसितं यत् सरोरुहं = कमलं तथा चारु = सुन्दरं नेत्रं = नयनं यस्याः सा ताम्, स्वां = निजां दयितामिव = स्त्रियमिव परै = रन्यैरपहृतां = चोरितां कीर्त्तिं = ख्यातिं लब्धुं पुनः प्रत्यावर्त्तयितुं कः परं महान्तं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain: Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रत्यङ्कमङ्कुरितसर्वरसावतारं—नव्योल्लसन् कुसुमराजिविराजिबन्धम् ।
घर्मेतरांशुमिव वक्रतयातिरम्यं नाट्यप्रबन्धमतिमञ्जुलसंविधानम् ॥७॥

सूत्रधारः—तत् कथं पुनरवधारणीयं किन्नामधेयं नाटकमिति । (विमृश्य सहर्षम्) अये, कथमहं निजशिरःशेखरशयाल्वपि नीलोत्पलं रत्नाकरचपलवीचिमालापरिसरे विचारयामि । नन्विहैव श्लोकेऽष्टपङ्क्तिक्रमाल्लिखिते स्फुटमस्ति 'प्रसन्नराघवं नाम' इति ।

(सर्वविधम्) उपक्रमम् = प्रयासं न आतनोति = विदधाति । परैरपहृताया दयिताया इव कीर्त्तेरधिगतौ सर्वस्यापि प्रयासः सार्थक इति भावः । अत्र क क्वा सर्वोऽपि तादृशं प्रयासं विदधातीति प्रत्याय्यते । अत्र वक्रोक्तिरलङ्कार इति तु न युक्तम्, परोक्तेरन्यथाकार एव तत् प्रसरात् । दयितात्र कीर्त्तेरुपमानमुपमा चात्राऽलङ्कारः । अर्थांशे श्लिष्टतया विशेषणानामुभयत्र समन्वयः । वसन्ततिलकं वृत्तम्, उक्तं वसन्ततिलकं त-भ-जा जगौ ग इति तल्लक्षणात् । दयितापहारोपन्यासेन भाविजानकीहरणं परमुपक्रममित्युक्त्या च महान् रामप्रयत्नः सूच्यते । प्रस्तावनायां भाविवस्तुसूचनं हि साम्प्रदायिकम् ॥ ६ ॥

प्रत्यङ्कमिति । अङ्केऽङ्क इति—प्रत्यङ्कं वीप्सायामव्ययीभावः, अङ्कुरितः = प्ररूढः सर्वेषां = नवानां शृङ्गारादीनां रसानामवतारः = समुद्भवो यत्र तम्, नव्यं = नूतनम् उल्लसत् = विकसत् कुसुमम् = पुष्पम् तस्य राजिः = पङ्क्तिः सेव विराजी = शोभमानः (सुकुमारः, अशिथिलश्च) बन्धः = पदविन्यासो यत्र तम्, घर्म = उष्णस्तदितरः = शीतः अंशुः = करो यस्य तम् इव चन्द्रमित्यर्थः वक्रतया = अरालतया (नाटकपक्षेऽसुगमतया) अतिरम्यं = सुन्दरं अतिमञ्जुलसंविधानम् = अत्यन्तसुन्दरकथावस्तुनिर्वाहम् नाट्यप्रबन्धम् = अभिनयम् (अवलोकयाम इति पूर्वोक्तस्य कर्म सम्पूर्णं पद्यम्) उपमाऽत्राऽलङ्कारः । वसन्ततिलकं वृत्तम् ॥ ७ ॥

निजशिरःशेखरशयालु—मस्तकस्थितम्, शयालुशब्दप्रयोगोऽत्रार्थे नैषधे यथा—"तदप्यवेहि स्वशयेशयालु" रत्नाकरस्य = सिन्धोः चपला = चञ्चला या वीचिमाला = तरङ्गनिकरः तत् परिसरे तत्पर्यन्तभुवि "परिसरः पर्यन्तभूः" इति कोषः । स्वसमीपस्थितमपि दूरे गवेषयामीति प्रघट्टकार्थः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नटः—(तमेव श्लोकं पठित्वा । सहर्षम्) अहो, देव्याः कविकुलकुमुदविकासचन्द्रिकायाः प्रसादमहिमा सरस्वत्याः, यत्प्रसादादेवंविधाः कवीनां विचित्रमधुराः सूक्तयः समुल्लसन्ति ।

सूत्रधारः—एवमेतत् । नन्वनेनैव कविनोक्तम्—

वाणि त्वत्पदपद्मरेणुकणिका या स्वान्तभूमिं सतां
सम्प्राप्ता कवितालता परिणता सैवेयमुज्जृम्भते ।
त्वत्कर्णेऽपि चिराय यत् किसलयं सूक्तापदेशं शिरः-
कम्पभ्रंशितपारिजातकलिकागुच्छे विधत्ते पदम् ॥ ८ ॥

कविकुलं = कविसमुदाय एव कुमुदं = कैरवं तस्य चन्द्रिकायाः = विकासिकाया इति तात्पर्यम्, कविहृदयाह्लाददायिन्या इति भावः ।

विचित्रमधुराः—विचित्रा मधुराश्च पङ्क्त्यन्धवत्समासः । अष्टपङ्क्तिक्रमाल्लेखेनाभिधेयनामनिर्देशाद्वैचित्र्यम्, नाटकीयगुणप्रतिपादनेन सह चन्द्रोपमामुखेनानन्ददायिशब्दार्थसमर्पकत्वेन माधुर्यं चेति बोध्यम् ।

वाणीति । वाणि = सरस्वति या त्वत्पदपद्मरेणुकणिका = त्वच्चरणरजोलवः सतां = निर्मलमनसां स्वान्तमेव भूमिस्तां = हृदयदेशं सम्प्राप्ता = गता सैव (त्वत्पदधूलिरेव) परिणता = अवस्थाविशेषमासाद्यरूपान्तरिता कवितालता समुज्जृम्भते = कवितावल्लीनाम्ना विकासं लभते । सूक्तापदेशं = सूक्तिसंज्ञकं यत् किसलयं यस्याः कवितालतायाः पल्लवः शिरसो = मस्तकस्य कम्पनेन = विधूननेन भ्रंशितो = नीचैः पातितः पारिजातकलिकायाः = मन्दारतरुकोरकस्य गुच्छः = स्तवको येन तादृशे त्वत्कर्णेऽपि = तावके श्रुतिदेशेऽपि चिराय = बहुकालपर्यन्तं पदं = स्थानं विधत्ते = कुरुते, वसतीत्यर्थः । त्वत्पदरेणुः सतां मनसि गत्वा कवितालताभावमासाद्य यत्सूक्तिनामकं किसलयं प्रसूते, तदीयसौरभमाधुरीहृतचित्ता पारिजातकुसुमभूषितशिरास्त्वं शिरःकम्पनेन तदभिनन्दसि, तेन च तत् पारिजातकुसुमं त्वदीयात् कर्णात् च्यवते इदं च सूक्तपल्लवं त्वं कर्णावतंसीकुरुषे इति भावः । शार्दूलविक्रीडितं वृत्तम्, लक्षणं प्रागुक्तमेव । उत्प्रेक्षात्रालङ्कारः ॥ ८ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(पुनर्विभाव्य) मम पुनः कविकमलसद्मनि मुनौ वल्मीकजन्मनि मनः कौतुकितं यस्यैकमपि वदनारविन्दमासाद्य चतुर्मुखकमलवनविहारविनोदमनुभवति भारती नाम राजहंसी ।

नटः—एवमेतत् । त्रिभुवनाभोगेऽपि हि—

भास्वद्वंशवतंस-कीर्त्तिरमणी-रङ्गप्रसङ्गस्वनद्
वादित्रप्रथमध्वनिर्विजयते वल्मीकजन्मा मुनिः ।
पीत्वा यद्वदनेन्दुमण्डलगलत्काव्यामृताब्धेः किम-
प्याकल्पं कविनूतनाम्बुदमयी कादम्बिनी वर्षति ॥ ९ ॥

चतुर्मुखस्य—ब्रह्मणो मुखमेव कमलं = सरोजं तस्य वनं = काननं समुदाय इति तात्पर्यम् । तत्र विहारः = यथेच्छभ्रमणं तेन विनोदः = विश्रमस्तम् । एकत्र मुखेऽध्युष्य मुखराशिवाससम्भवमानन्दं भारती प्राप्नोतीति कथनेन ब्रह्ममुखकमलापेक्षया वाल्मीकिमुखकमलस्याधिक्यं कथितम् ।

भास्वद्वंशेति । भास्वतः = सूर्यस्य वंशो = ऽन्ववायः तत्र वतंसः = अलङ्कारभूतो रामचन्द्रस्तस्य कीर्त्तिः = यशःपताकैव रमणी = नटीति तात्पर्यम् तस्याः रङ्गप्रसङ्गो = नृत्यारम्भस्तत्र वादित्रं = वाद्यं मृदङ्गादि तस्य प्रथमध्वनिः = आद्यझङ्कारशब्दः (तत्स्वरूपः) वल्मीकात् = वामलूरात् जन्मप्रभवो यस्य स = वाल्मीकिः मुनिः = तपस्वी जयति = सर्वोत्कर्षेण वर्त्तत इति आद्यपादद्वयार्थः । सूर्यवंशभूषणभगवद्रामचन्द्रकीर्त्तिप्रथमग्रन्थनशिल्पी वाल्मीकिर्जयतीति भावः । यद्वदनेन्दोः = यद्वाल्मीकिमुखचन्द्रस्य मण्डलं तस्मात् गलत् = च्यवमानं यत् काव्यमेव अमृतं = सुधा तस्य अब्धेः = समुद्रस्य किमपि = तुच्छतमं भागं पीत्वा = ऽऽस्वाद्य कवय एव नूतनाः = नवाः अम्बुदाः = मेघास्तन्मयी = तत्स्वरूपा कादम्बिनी = मेघमाला वर्षति = वृष्टिं करोति। यदीयां कवितामाधारीकृत्य कवयः काव्यानि निर्मान्तीति वक्तव्यांशः । मेघो हि समुद्रादुद्धृत्य पयः प्रयच्छति तद्वत् कवयोऽपि वाल्मीकिकवितामुपजीव्य कवितानिर्माणे प्रवर्त्तन्त इति बोध्यम् । 'कादम्बिनी मेघमाला' 'पीयूषममृतं सुधा' 'यशः कीर्त्तिः समज्ञा च' इत्यमरः । अत्र परम्परितरूपकमलङ्कारः, वाल्मीके-र्वादित्रध्वनित्वरूपणे कीर्त्तेर्नटीत्वमवश्यरूपणीयम् । एवं वाल्मीकिमुखं चन्द्र

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(विमृश्य) मम तु रामचन्द्र एव निर्भरमानन्दितोऽयं चित्तचकोरः, यत् कीर्त्तिचन्द्रिकाचुम्बितोऽयं वाल्मीकेरपि सारस्वतसागरः समुल्ललास ।

सूत्रधारः—इत्थमिदम् ।

चन्द्रे च रामचन्द्रे च नारीणां च दृगञ्चले ।
नीलोत्पलसुहृत्कान्तौ कस्य नाऽऽमोदते मनः ॥१०॥

अपि च—

झगिति जगतीमागच्छन्त्याः पितामहविष्टपा-
न्महति पथि यो देव्या वाचः श्रमः समजायत ।

रूपयित्वैव कवितायाः अमृतत्त्वरूपणं सम्भवतीति । तल्लक्षणं यथा—यत्र कस्यचिदारोपः परारोपणकारणम् 'तत्परम्परितम्' साहित्यदर्पणे ॥ ९ ॥

सारस्वतसागरः—सरस्वत्या अयं सारस्वतो = वाङ्मयः सागरः = समुद्रः समुल्ललास = ववृधे यथा चन्द्रिकाभिरेधते पाथोनिधिस्तथैव वाल्मीकेरपि सारस्वतः सागरो रामचन्द्रकीर्त्तिचन्द्रिकामालम्ब्यैव समुपोढ़महिमेति तात्पर्यम् ।

चन्द्रे चेति । चन्द्रे = चन्द्रमसि रामचन्द्रे = दशरथज्येष्ठसुते नारीणां = वनितानां दृगञ्चले = दृष्टिकोणे कटाक्षे च कस्य मनः = चित्तं न आमोदते = प्रसीदति । चन्द्ररामचन्द्रदृगञ्चलसाधारणविशेषणमाह—नीलोत्पलसुहृत्कान्ताविति । नीलोत्पलं = श्यामकमलं तस्य सुहृत् = मित्रं सूर्यस्ततः कान्तिः = प्रकाशो यस्येति, चन्द्रपक्षे विशेषणार्थः । रामचन्द्रनारीदृगञ्चलयोस्तु पक्षयोः नीलोत्पलसुहृत्कान्तिर्यस्येत्यर्थो बोध्यः, सादृश्ये सौहृदोपचारात् । अत्र चन्द्रमसः प्रकाशो न स्वीयः किन्तु सूर्यकृतः तथाह भास्कराचार्यः सिद्धान्तशिरोमणौ—"तरणिकिरणसङ्गादेपपानीयपिण्डो दिनकरदिशिचन्द्रश्चन्द्रिकाभिश्चकास्ति" इति । दीपकालङ्कारः, अप्रस्तुतयोश्चन्द्रनारीदृगञ्चलयोः प्रस्तुतस्य रामचन्द्रस्य च हर्षजनकत्त्वधर्मेऽन्वयात् । तथा चोक्तं तल्लक्षणम्—अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते ॥१०॥

झगितीति । पितामहस्य = ब्रह्मणो विष्टपात् = लोकात् ब्रह्मलोकं परित्यज्येत्यर्थः । ल्यब्लोपे पञ्चमीह । जगतीम् = मर्त्यलोकमिति विवक्षा झगिति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपि कथमसौ मुञ्चेदेनं न चेदवगाहते
रघुपतिगुणग्रामश्लाघासुधामयदीर्घिकाम् ॥११॥

नटः—कथं पुनरमी कवयः सर्वे रामचन्द्रमेव वर्णयन्ति ।

सूत्रधारः—नाऽयं कवीनां दोषः । यतः—

स्वसूक्तीनां पात्रं रघुतिलकमेकं कलयतां
कवीनां को दोषः ? स तु गुणगणानामवगुणः ।
यदेतैर्निश्शेषैरपरगुणलुब्धैरिव जग—
त्यसावेकश्चक्रे सततसुखसंवासवसतिः ॥१२॥

= त्वरया आगच्छन्त्याः देव्याः वाचः = सरस्वतीदेव्याः महति = दूरव्यापि पथि = मार्गे यः श्रमः = क्लमः शरीरकष्टं समजायत = अभवत्, असौ = सरस्व एनं = पथिजातं श्रमं कथं = केन प्रकारेण मुञ्चेत् = त्यजेत् = शमयेदित्याशयः चेत् = यदि रघुपतेः = रामचन्द्रस्य गुणानां दयादाक्षिण्यसत्यसन्धत्त्वादीनां ग्रामः = समुदायस्तस्य श्लाघा = प्रशंसा एव सुधामयदीर्घिका = अमृतवापिका तां न अवगाहते = प्रविशति आलोडयतीति भावः । अन्योऽपि पथि श्रान्तो जन शीतलजलां सरसीमवगाह्य स्वं श्रमं शिथिलयति । शीतलजलावगाहो मार्ग चलनश्रममपाकरोतीति सरस्वतीकर्तृकरामकीर्त्तिचर्चारूपामृतवापीप्रवेशस्य तच्छ्र श्रमशमकत्त्वं सूपपन्नम् । रामचन्द्रयशोवर्णनस्य सरस्वतीश्रमहरत्वमुत्प्रेक्ष्यते हरिणीवृत्तम्—नसमरसलागः षड्वेदैर्हयैर्हरिणी मतेति लक्षणम् । लोको विष्ट भुवनं जगत्' "वापी तु दीर्घिका" इति चाऽमरः ॥११॥

स्वसूक्तीनामिति । एकं रघुतिलकं = रघुश्रेष्ठं रामचन्द्रं स्वसूक्तीनां = स्वी यवाग्विलासानां पात्रं = विश्रामस्थानं वर्णनीयमिति यावत् । कलयतां = जानत = कवीनां को दोषः ? न कोऽपीति भावः । स तु (सर्वे कवयो राममेव वर्णयन्तीति तु) गुणगणानां = दयादाक्षिण्यादिगुणराशीनामवगुणः = दोषः गुणानां दोषमेव समर्थयति—यदिति । यत् = यस्मात् निःशेषैः = सकलैरेतैः = गुणै रपरेषु गुणेषु लुब्धैः साभिलाषैरिव स्वातिरिक्तगुणलाभलालसाशालिभिरिवेति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपि च । भोः,

बीजं यस्य चिरार्जितं सुचरितं प्रज्ञा नवीनोऽङ्कुरः
काण्डः पण्डितमण्डलीपरिचयः काव्यं नवः पल्लवः ।
कीर्त्तिः पुष्पपरम्परा परिणतः सोऽयं कवित्वद्रुमः
किं वन्ध्यः क्रियते विना रघुकुलोत्तंसप्रशंसाफलम् ॥१३॥

नटः—कः पुनरस्य कविः ?

भावः । जगति=संसारे एकः = सजातीयद्वितीयरहितः असौ = रामः सततं = सर्वदा (कालापरिच्छेदेन) यः सुखसंवासः = सानन्दनिवासः तस्य वसतिः = आस्पदं चक्रे = विहितः । इतरगुणलिप्सयेव गुणा रामचन्द्रे सततं कृताधिवासाः, गुणिनं च कवयः स्तुवन्तीति सर्वेषां रामचर्चाप्रवृत्तिर्गुणानामेवाऽपराधो न तत्र प्रवृत्तानां कवीनामिति भावः । अपरगुणलुब्धैरिवेति हेतूत्प्रेक्षा । शिखरिणीवृत्तम् 'रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी'ति तल्लक्षणात् ॥१२॥

बीजं यस्येति । यस्य (कवित्वद्रुमस्य) बीजं = कारणम् चिरार्जितं = चिरकालोपार्जितम्, अनेकजन्मपरम्परासञ्चितमिति भावः, सुचरितं = पुण्यम् नवीनः = प्रत्यग्रोऽचिरोत्पन्नोऽङ्कुरः = प्ररोहः प्रज्ञा = काव्यजननी नवनवोन्मेषशालिनी प्रतिभा । पण्डितमण्डलीपरिचयः = काव्यज्ञपरिचयः काव्यज्ञशिक्षयाऽभ्यास इति हृदयम् । काण्डः = तरुस्कन्धः । काव्यं = सरससंदृब्धवाक्यावलिः पल्लवः = किसलयम् पुष्पपरम्परा = पुष्पसमूहः कीर्त्तिः = ख्यातिः (दिगवकाशवासनात्) परिणतः = सर्वथा समृद्धः सोऽयं कवित्वद्रुमः = कविकर्मतरुः रघुकुलोत्तंसस्य = रघुवंशभूषणस्य प्रशंसा = वर्णना एव फलं तत् विना किं = कस्य हेतोः बन्ध्यः = निष्फलः क्रियते । कवित्वद्रुमस्य सर्वावयवसम्पत्तौ पुष्पितस्य च रामगुणवर्णनेनैव साफल्यसम्भावनेति तद्विहाय वैफल्यविधाने सर्वथाऽनिष्टमिति सारांशः । चिरकालार्जितपुण्यप्रज्ञापण्डितमण्डलीपरिचयानां कवित्वजनकत्वमिति कविना विवक्षितम् । साङ्गपरम्परितरूपकमलङ्कारः । शार्दूलविक्रीडितं छन्दः ॥ १३ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूत्रधारः—(सप्रणयकोपम्)

विलासो यद्वाचामसमरसनिष्यन्दमधुरः
कुरङ्गाक्षीबिम्बाधरमधुरभावं गमयति ।
कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो-
रयासीदातिथ्यं न किमिह महादेवतनयः ॥१४॥

अपि च—

लक्ष्मणस्येव यस्याऽस्य सुमित्राकुक्षिजन्मनः ।
रामचन्द्रपदाम्भोजे भ्रमद्भृङ्गायते मनः ॥१५॥

सप्रणयकोपम्—प्रणयो जिज्ञासुतया स्वाभिनयकलाप्रशंसकत्वेन कोपश्च सुप्रसिद्धकविविषयकाज्ञानेन ।

विलास इति । यद्वाचां यस्य = जयदेवकवेर्वाचां = वचनानाम् असम = अतुलस्य रसस्य = शृङ्गारादेर्निष्यन्देन = प्रवाहेण मधुरो = मिष्टः (शृङ्गारा रसप्रवाहजनितचमत्कारातिशयजनक इत्यर्थः) विलासः = विभ्रमः आस इति यावत् । कुरङ्गस्य = मृगस्य अक्षि इव अक्षि यस्यास्तस्या मृगनयनाया = र स्याः बिम्बमिवाधर = ओष्ठस्तस्य मधुरभावं = माधुर्यं गमयति=दूरं नयति प्रत चष्टे इति तात्पर्यम् । स = पूर्वोक्तपरिचयो महादेवतनयः = कौण्डिन्यः तदा वंशालङ्कारो जयदेवः = तन्नामा कवीन्द्रः = कविमुख्यः इह = अस्मिन्देशे (त शोडिण्डिमसुखरितेऽत्र भूभागे) तव (अभिनेयकथाप्रसङ्गपरिशीलनपटोः श्रवणयोः = कर्णयोरातिथ्यं = विषयतां न अयासीत् = अगमत् किम् ? मह श्चर्यमेतद्यत् नाटकनिर्माणनिपुणः ख्यातनामा चाऽत्रत्यः कविमुख्यो नाट भिनयजीविकेनात्रत्येन नटान्यतमेन न श्रुतपूर्व इति । शिखरिणीवृत्त तल्लक्षणमुक्तपूर्वम् । 'गोत्रं नाम च बध्नीयादिति' भरतोक्त्या नाटकादौ नामगो निर्देशः कर्त्तव्य इति तद्द्वयमत्र कविना निबद्धम् ॥ १४ ॥

लक्ष्मणस्येति । सुमित्रा = तन्नाम्नी जयदेवकविजननी दशरथपत्नी च तस्य कुक्षिः = गर्भाशयः तस्मात् जन्म = प्रभवो यस्य जयदेवस्य तस्य एतत्प्रबन्धकर्तुं लक्ष्मणस्य = दशरथतृतीयतनयस्य इव भ्रमत् = नानाविषयसञ्चरिष्णु मनः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नटः—कथमविदितचन्द्रमसश्चकोरकिशोरकस्य चरितमनुसृतोऽस्मि । तेन हि मम हस्ते निजनाटकमर्पयित्वेदमुक्तोऽस्मि—'रक्षणीयमिदं सूक्तिरत्नं चोरेभ्यः' इति । स च मया सविनयमिदमुक्तः—

कर्णे निधाय च पिधाय च कण्ठपीठे धृत्वा च मूर्धनि नते हृदये च कृत्वा ।
चौरापहारचकितेन चिरं मयैष त्वत्सूक्तिमौक्तिकगणः परिरक्षणीयः ॥१६॥

सूत्रधारः—केयमलीकशङ्का तस्य कवेः ?

सुललितवदनामुदारवृत्तां कृतिमथवा युवतिं परस्य हृत्वा ।
तटमपि परमर्णवस्य गत्वा वद कतरः सुखभाजनं जनः स्यात् ॥१७॥

चित्तं रामचन्द्रस्य पदसेवाम्भोजं = कमलं तत्र भृङ्गायते = भ्रमरवदाचरति । लक्ष्मणोऽपि = सुमित्रातनयो रामपरायणश्चायमपि च कविः सुमित्रागर्भसम्भवो रामचरणकमलचञ्चरीकश्चेति द्वयोरुपपन्नं सादृश्यम् ॥ १५ ॥

कथमिति । यथा चकोरपोतः स्वहृदयाह्लादजनकं चन्द्रं न जानाति तथैवाऽहमपि स्वप्रियं जयदेवकविं विस्मृतवानिवास्मीति । सूक्तिरत्नम्—एतन्नाटकरूपम् ।

कर्णे निधायेति । चोरापहारचकितेन = चौरकर्तृकापहरणसावधानेन मया एष त्वत्सूक्तिमौक्तिकगणः, सुभाषितरत्ननिचयः चिरं = बहुकालं कर्णे निधाय = धृत्वा (श्रुत्वेति भावः) कण्ठपीठे पिधाय = गोपायित्वा मूर्द्धनि = शिरोदेशे च धृत्वा = अवस्थाप्य नते = नम्रीभूते हृदये = मनसि च कृत्वा परिरक्षणीयः । अन्योऽपि चौरकर्तृकापहरणसकर्णः किमपि रक्षणीयं वस्तु बहुषु स्थलेषु स्थापयन् रक्षति । तथाऽयं नटोऽपि कविकृतिं रक्षितुं प्रयतितेति तदाशयः । वसन्ततिलकं वृत्तम् । तभजा जगौ ग इति लक्षणात् ।

अलीकशङ्का—मिथ्यासंभावना ।

सुललितेति । सुललितम् = अतिरमणीयम् मुखम् = आमुखम् अन्यत्र वदनम् यस्याः सा, ताम् उदारं = प्रसिद्धगुणम् वृत्तं = चरितं कथाभागो यस्यास्ता-मन्यत्र उदारं = निर्मलम् वृत्तम् = चरित्रम् परस्य = अन्यस्य कृतिं = रचनाम् अथवा युवतिं = रमणीम् हृत्वा = चौर्येणाऽपनीय परम् = चरमम् अर्णवस्य = समुद्रस्य पारं = तटदेशं गत्वा = प्राप्याऽपि कतरः—किं जातीयो जनः = पुरुषः सुख-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नटः—एवमेतत् । नन्वयं प्रमाणप्रवीणोऽपि श्रूयते । तदिह चन्द्रिकाचण्डात-पयोरिव कवितातार्किकत्वयोरेकाधिकरणतामालोक्य विस्मितोऽस्मि ।

सूत्रधारः—क इह विस्मयः ?

येषां कोमलकाव्यकौशलकलालीलावती भारती
तेषां कर्कशतर्कवक्रवचनोद्गारेऽपि किं हीयते ? ।
यैः कान्ताकुचमण्डले कररुहाः सानन्दमारोपिता-
स्तैः किं मत्तकरीन्द्रकुम्भशिखरे नारोपणीयाः शराः ॥१८॥

स्य = हर्षस्य भाजनं = पात्रं स्यात् = भवेदिति वद । परकीयां कृतिं युवतिं च हृत्वा समुद्रस्य परं पारमासाद्यापि जनो न प्रसीदति का कथा पुनस्तस्य तत्रस्थस्य सुखावाप्तेरिति सारांशः । पुष्पिताग्रावृत्तम् । "अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" इति लक्षणम् । इदं च पताकास्थानकम् । तल्लक्षणं यथा—"प्रस्तुतागन्तुभावस्य भाविनोऽन्योक्ति सूचनम् । पताकास्थानकं तुल्यसंविधानविशेषणम्" दशरूपके । अनेन श्लोकेन रावणकृतजानकीहरणतन्मरणादिवस्तुजातं सूचितमिति बोध्यम् ॥ १७ ॥

प्रमाणम्—तर्कशास्त्रम् । तत्र प्रवीणो = निपुणः । न्यायाभिमतपदार्थेषु प्रमाणस्य प्रथमपरिगृहीततया तच्छास्त्रस्यैव प्रमाणशास्त्रत्वेन व्यपदेशः प्रचलित इति प्रतिभाति । पदवाक्यप्रमाणपारावारीणेत्यादि विशेषणे सर्वत्र प्रमाणपदस्याऽयमेवार्थो बोध्यः ।

येषामिति । येषां = कवीनां भारती = वाणी कोमलं = प्रसन्नमधुरं यत्काव्यं = कविकर्म तत्र कला = चातुर्यं तस्याः लीला = विलासः साऽस्यास्तीति तथा काव्यनिर्माणकलानिपुणेति भावः (यद्यपि लाघवमूलकात् "न कर्मधारयान् मत्वर्थीयो वहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः" इति न्यायाल्लीलान्ताद्बहुव्रीहेरिह मतुब् नोचितस्तथापि "असुव्वतः" इति भाष्यप्रयोगेण क्वचिल्लाघवानादरोऽपि प्रचलितप्रायः) तेषां = कवीनां कर्कशः = कठिनः परिपक्वबुद्धिमात्रप्रवेश्यो यस्तर्कः = प्रमाणशास्त्रं तस्य वक्रं = नानाविधवाग्भङ्गिकुटिलं वचनं = वाक्यविन्यासः तस्य उद्गारे-प्रकटीकरणे किं हीयते न किमपि त्रुटितं भवतीति तात्पर्यम् । तत्र दृष्टान्तमाह—यैः कान्तानां = सुन्दरीणां रमणीनां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नटः—अपि नाम स्वयमेव कविताकोविदाः पारिषदा अस्य सूक्तिभिर्विनोदिष्यन्ते ।

सूत्रधारः—नन्वनेनैवोक्तम्—

अपि मुदमुपयान्तो वाग्विलासैः स्वकीयैः
परभणितिषु तोषं यान्ति सन्तः कियन्तः ।
निजघन–मकरन्द–स्यन्द–पूर्णालवालः
कलशसलिलसेकं नेहते किं रसालः ? ॥१९॥

कुचयोः=स्तनयोर्मण्डलं=परिसरस्तस्मिन् कररुहाः=नखाः (पुनर्भवः कररुहो नखोऽस्त्रीत्यमरः) सानन्दं=सहर्षं (सपुलकोदयम्) आरोपिताः=स्थापिताः तैः मत्ताः=मदस्रुतिशालिनः करीन्द्राः=वारणमुख्यास्तेषां कुम्भो=मस्तकं तस्य शिखरे=उपरितने भागे किं शराः=बाणाः नारोपणीयाः=न निक्षेपणीयाः ? । काकुवशादवश्यं निक्षेपणीया इत्यर्थः फलति । प्रमोदमेदुरावस्थायां नारीकुचमण्डले करमाधाय नखक्षतविधानरसिका अपि परिस्थितिपरिवर्त्तने माद्यद्द्विपदर्पदमनशरशतासारवर्षणप्रगल्भभुजा भवन्ति तदिह—कोमलकाव्यरचनाचातुरीविदग्धा अपि तार्किका भवितुमर्हन्ति तेन चन्द्रिकाचण्डातपयोरिव कवितातार्किकत्वयोः समानदेशवासितादर्शनेन न विस्मयस्यावकाश इति प्रघट्टकार्थः । सधर्मवस्तुप्रतिबिम्बनाद् दृष्टान्तोऽलङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥१८॥

अपि मुदमिति । स्वकीयैः=निजैः वाग्विलासैः=वाचां चमत्कारैः मुदं=प्रसादम् उपयान्तः=लभमाना अपि कियन्तः=कतिपये सन्तः=सज्जनाः परभणितिषु=अन्यदीयरचनासु तोषं=तृप्तिं यान्ति=लभन्ते स्वीयरचनारससम्भृतस्वान्ता अपि परकीयाः कृतीरभिनन्दयन्तीति तात्पर्यम् । उदाहरणमाह—निजेति । निजः=स्वीयो घनः=सान्द्रो यो मकरन्दः=पुष्परसस्तस्य स्यन्दः=प्रवाहस्तेन पूर्ण आलवालो वृक्षाधोभागे निर्मितः पयोदानाय गर्त्तविशेषो यस्य स रसालः=आम्रवृक्षः कलशस्य सलिलं=जलं तेन सेकम्=अभ्युक्षणं नेहते=नाभिलषति किम् ? ईहत इति काकुवशात् प्रतीतिः । मकरन्दसम्भृतालवालस्यापि रसालतरोर्यथा कुम्भपयःप्राप्तिलालसा तद्वत् स्वयं कवयितुरपि परकीयकवितया

२

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नटः—अहो अस्य कवेः सूक्तीनां सरलता कोमलता च ।

सूत्रधारः—क्वचिद्वक्रता कठिनता च ।

नटः—कथमेते अपि रमणीये ? ।

सूत्रधारः—अथ किम्—

निन्द्यन्ते यदि नाम मन्दमतिभिर्वक्राः कवीनां गिरः
स्तूयन्ते न च नीरसैर्मृगदृशां वक्राः कटाक्षच्छटाः ।
तद्वैदग्ध्यवतां सतामपि मनः किं नेहते वक्रतां
धत्ते किं न हरः किरीटशिखरे वक्रां कलामैन्दवीम् ॥२०॥

सन्तोषः सम्भवतीति तात्पर्यम् । दृष्टान्तोऽलङ्कारः । मालिनीवृत्तम्—ननम
ययुतेयं मालिनीभोगिलोकैरिति तल्लक्षणम् ॥१९॥

सरलता—स्फुटार्थता । कोमलता—मधुराभिधेयतेति भेदः ।

वक्रता—अर्थप्रतिपादनभङ्गीकौटिल्यम् । कठिनता—दृढबन्धतेत्यर्थ
रुक्तयम् ।

एते—वक्रता–कठिनते ।

निन्द्यन्ते इति । यदि नाम=यदि चेत् (नामप्रकाश्यसम्भाव्यक्रोधोपग
कुत्सने, इत्यमरः) मन्दा=अचतुरा मतिः=बुद्धिः येषां तैः पामरैरित्यर्थः, कवी
गिरः = काव्यानि निन्द्यन्ते=अधिक्षिप्यन्ते नीरसैः=रसास्वादसामर्थ्यविधुरैः मृ
दृशां=हरिणनयनानां वक्राः=कूणितप्रान्ताः कटाक्षच्छटाः=नेत्रत्रिभागविभ्रमाः
स्तूयन्ते=न प्रशस्यन्ते । यथैव हि नीरसानां रमणीकटाक्षविभ्रमा अचेतोहरास्त
मुग्धमतीनां न प्रसादकं गूढपदं काव्यमिति तात्पर्यम् । तद्वैदग्ध्यवतां=कवि
मृतानुभवचातुरीपरिचितानां सतां=सज्जनानां मनः=चित्तमपि वक्रतां=का
गतां कठिनतां नेहते=नाभिलष्यति किम् ? । किं हरः=शिवः किरी
शिखरे=मुकुटाग्रभागे वक्रां=कुटिलामिन्दोः=चन्द्रस्येमामैन्दवीं कलां=लेखां
धत्ते=न धारयति ? यथा वक्रामपि चन्द्रकलां शङ्करः शिरसाऽऽधत्ते त
कठिनामपि परकीयां रचनां रसिकाः साधु सम्मानयन्तीति भावः । निदर्श
लङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥२०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपि च—

अमृतजलधेः पायंपायं पयांसि पयोधरः
किरति करकास्ताराकारा यदि स्फटिकावनौ ।
तदिह तुलनामानीयन्ते क्षणं कठिनाः पुनः
सततममृतस्यन्दोद्गारा गिरः प्रतिभावताम् ॥२१॥

नटः—नूनमस्य कवेः किमपि कौतुकप्रमोदमेदुरमन्तःकरणं यदेवंविधाः सरसशीतलाः सूक्तयः समुल्लसन्ति ।

सूत्रधारः—उचितमिदम् ।

यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो
भासोहासः कविकुलगुरुः कालिदासो विलासः ।

अमृतजलधेरिति । पयोधरो=मेघः अमृतजलधेः=सुधासमुद्रस्य पयांसि=जलानि पायंपायं=पीत्वा यदि स्फटिकावनौ=स्फटिकमयभूमौ ताराकाराः =नक्षत्रप्रतिमाः करकाः=वर्षोपलान् किरति=क्षिपति—तदिह=तदाऽत्र क्षणं=कियन्तं कालं कठिनाः=दृढ़बन्धतयाऽसुगमाः पुनः=सदा कृते अमृतस्यन्दः=सुधास्रावी उद्गारः=उदाहारो यासां ताः प्रतिभावतां = प्रौढ़मतीनां कवीनां गिरः=वाचः तुलनां=सादृश्यमानीयन्ते=प्राप्यन्ते । अमृतजलधेः पयः पीत्वा करकास्थूलान् जलबिन्दून् यदि वारिदः स्फटिकमयभूमौ पातयेत्तदा प्रतिभावतां सरसकठिना वाचस्तैर्वर्षोपलैरुपमीयेरन् इति तात्पर्यम् । स्फटिकावनौ इत्यनेन स्थानकृत-मालिन्याभावः, क्षणं कठिना इत्यनेन च करका यथा प्राक् कठिनाः सत्योऽपि स्वयं द्रवन्ति तथैव प्रतिभावतां वाचोऽपि बन्धदार्ढ्यवशात् पूर्वं कठिनवदाभा-समाना अपि स्वतः स्वदितुं प्रवर्त्तन्त इति च वेद्यते । "नसमरसलागः षड्वे-दैर्हयैर्हरिणी मता" इति लक्षितं हरिणीवृत्तम् । असम्बन्धे सम्बन्धरूपाति-शयोक्तिश्चाऽलङ्कारः ॥ २१ ॥

कौतुकम्=कुतूहलम् प्रमोदो=हर्षश्चाभ्यां मेदुरं=व्याप्तं सान्द्रस्निग्धम् । सरसत्वं रससमर्पकपदपदार्थतया, शीतलत्वं चेतःप्रसादकार्थवत्त्वेन चेति सरसशीतलाः ।

यस्याश्चोर इति । चोरः=तन्नामकश्चौरपञ्चाशिकानामकग्रन्थकर्त्ता कवि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः
केषां नैषा कथय कविताकामिनी कौतुकाय ॥२२॥

अपि च—

न ब्रह्मविद्या न च राजलक्ष्मी–स्तथा यथेयं कविता कवीनाम् ।
लोकोत्तरे पुंसि निवेश्यमाना पुत्रीव हर्षं हृदये करोति ॥२३॥

यस्याः (कविताकामिन्याः) चिकुरनिकरः=केशपाशः (तत्स्थानीयः) मयू[रः]=सूर्यशतकप्रणेता कविमुख्यः कर्णपूरः=कर्णाभरणविशेषस्थानीयः भासः=स्वप्[न]वासवदत्तादिनाटकरचनायशस्वी कविवरो हासः=हसितप्रतिनिधिः कविकु[ल]गुरुः=कविसमुदयश्रेष्ठः कालिदासः=प्रत्यक्षपरिचयः कविवरः विलासः=विभ्र[म]हर्षः=नैषधीयचरितप्रबन्धा हर्षः=प्रमोदरूपः वाणः=कादम्बरीनिर्माता हृद[य]वसतिः=हृद्देशवासी पञ्चवाणः=कन्दर्पः एषा=पूर्वोक्तपरिचया कविता एव कामि[नी] वनिता केषां कौतुकाय=विस्मयाय (रसोद्बोधदशानुभूतचित्तविस्फाररूप[ाय] भावविशेषाय) न भवति=जायते ? तं भावविशेषं न केषां चेतसि जागरयती[ति] भावः । अपि तु सर्वेषां चेतसि तं भावं जनयतीति काकुः । "मन्दाक्रान्ताम्[्बु]धिरसनगैर्मोभनौ तौ गयुग्मम् ।" इति लक्षितं मन्दाक्रान्तावृत्तम् ॥२२॥

न ब्रह्मविद्येति । ब्रह्मविद्या=आध्यात्मिकतत्त्वसाक्षात्कारशास्त्रम् राज्ञो=भू[पा]लस्य लक्ष्मीः=सम्पत्तिर्वा न तथा=तादृशी यथा=यादृशी इयं=पूर्वप्रदर्शि[त]परिचया कवीनां=रससिद्धगिरां कविता (आनन्ददायिनी भवतीति भावः) (इयं कविता) लोकोत्तरे असाधारणे पुंसि=पुरुषे निवेश्यमाना=नियुज्यमा[ना] दीयमाना च पुत्रीव=कन्येव हृदये हर्षं तनोति=हृदयं मदयति । यथा सुपात्र[े] दत्ता कन्या हृदयं प्रसादयति तथैव लोकोत्तरपुरुषचरितकृतार्था कविता प्रस[ादं] जनयति पितुः कवयितुश्चेति बोध्यम् । उपमात्राऽलङ्कारः । इन्द्रवज्रावृत्तम्- 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति तल्लक्षणात् । जनकस्य कन्यादानव्या[पा]पक्तचित्ततासूचनपरेयमुक्तिः सूत्रधारस्य । इदं च नाटकीयं वीजम् । अल्पमा[त्रं] समुद्दिष्टं बहुधा यद्विसर्पति, फलस्य प्रथमो हेतुर्वीजमित्यभिधीय[ते] इत्युक्तेः ॥२३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(नेपथ्ये)

साधु भोः, कुशीलवोत्तंस, साधु ।

सूत्रधारः—कथमयं भगवतो याज्ञवल्क्यस्य प्रियोऽन्तेवासी दाल्भ्यायन इत एवाभिवर्त्तते । तदस्याऽनवलोकनीयचतुर्थवर्णस्य पुरतः स्थातुमनुचितमस्माकम् । तदेहि । परतो गच्छावः ।

(इति निष्क्रान्तौ)

इति प्रस्तावना

—*—

(प्रविश्य)

दाल्भ्यायनः—(तमेव श्लोकं पठित्वा) (साकूतम्) साधूक्तमनेन । तथाहि—भूपतिरयं जनकोऽपि सकललोकलोचनारविन्दे[1] क्वचिदपि पुरुष-

अभिवर्त्तते=आगच्छति अनवलोकनीयचतुर्थवर्णस्य=प्रतिषिद्धशूद्रदर्शनस्य । नटाः=संस्कारच्युतक्षत्रियेभ्यः शूद्रासूत्पन्नाः शूद्राः, ब्रह्मचारिणां च शूद्रदर्शन-निषेधेन तदागमनवर्त्मनो वहिर्गन्तुं व्यग्राः ।

[प्रस्तावना] नटो विदूषको वाऽपि पारिपार्श्वक एव वा, सूत्रधारेण सहिताः संलापं यत्र कुर्वते । चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः, आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा । प्रस्ताव्यते उद्भाव्यत इति वृत्तमनया प्रस्तावना बाहुलकात् करणे युच्, अथवा भाव एवास्तु सः प्रस्तावनं सूचनमि-त्यनर्थान्तरम् । अत्र च नटसूत्रधारयोर्वार्त्तालापेन प्रस्ताव्यविषय उद्भाव्यते । प्रस्तावना पञ्चविधा तत्रेयं कथोद्घातरूपा द्वितीया, सूत्रधारस्य वाक्यं वा समा-दायार्थमेव वा, भवेत् पात्रप्रवेशश्चेत् कथोद्घातः स उच्यते, इति तल्लक्षणम् । अत्र सूत्रधारोक्तवाक्यार्थमादायैव दाल्भ्यायनप्रवेशः ॥

तमेव श्लोकं=न ब्रह्मविद्येत्यादि श्लोकम् । सकलानां=समस्तानां लोकानां

१ सकललोकलोचनारविन्दमार्तण्डे—इत्यपि पाठो बहुषु पुस्तकेषु । तस्मिन् पाठे लोकानां लोचनान्येवारविन्दानि कमलानि तेषां मार्तण्डे=सूर्ये प्रकाशके, इति भावः । मम तु मते 'अरविन्दे' इत्येव पाठो ज्यायान् । तावता रूपकेण निरूढस्य सौन्दर्यशीतलत्वादिनेत्रप्रसादक-गुणगणसमर्पणस्य मार्तण्डरूपके विकासमात्रफलकेऽलाभात् । पाठद्वयमपि साधु । सुधीभिरेवा-ऽन्तरं बोध्यम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकाण्डे निजां कन्यां समर्पयितुकामोऽस्मद्गुरूपदिष्टायां ब्रह्मविद्यायां कुलक्रमागतायां राजलक्ष्म्यां च शिथिलादरः संवृत्तः । (पुनः कर्णं दत्त्वा) कथमयमाकाशे वीणाध्वनिः श्रूयते । तन्नूनमस्मद्गुरुमभ्यागच्छता समीरसंघट्टनकलक्वणद्वल्लकीगुणेन देवर्षिणा नारदेन भवितव्यम् । (विलोक्य) कथं ध्वनिसादृश्येन प्रतारितोऽस्मि । नन्वयं गगनतलावलम्बिनोर्मधुकरयोरेव ध्वनिराकर्ण्यते । (पुनः कर्णं दत्त्वा, सहर्षविस्मयम्) अहो, भगवतो योगीश्वरस्य प्रसादमहिमा येनाऽहमेवंविधानामपि वचनावबोधमधुरां सिद्धिमासादितवानस्मि । तदाकर्णयामि—किमेतावालपतः ? (कर्णं दत्त्वा) एकः किमाह—सखे कलालाप, कुत आगतोऽसि अपरः किमाह—वयस्य, मधुरप्रिय, सन्ततविकस्वराच्चन्द्रमौलिमन्दाकिनीकुमुदकाननात् । अहो अनयोश्चतुरालापपेशलता रुचिरनामधेयता च । (पुनः कर्णं दत्त्वा) किमाह-मधुरप्रियः—अस्ति नवीनः कोऽपि वृत्तान्तः ? किमाह कलालापः—अस्ति । अचिरमेव कदापि खलु बलिनन्दनो बाणासुरः कमलमालया भगवन्तमिन्दुमौलिमभ्यर्च्य सविनयमिदमूचिवान् । यत् किल भगवन्—

कैलासाधिकसारं किमस्ति वस्तु महातले ।
यस्मिन्सफलतामेति मम दोर्दण्डमण्डलम् ॥२४॥

=जनानां लोचनानां=नेत्राणामरविन्दे=कमलवदानन्दजनके । पुरुषप्रकाण्डे=नररत्ने । शिथिलः=मन्दः आदरो यस्य सः । योग्याय वराय तनया प्रदेया वरान्वेषणव्यग्रमनसा ब्रह्मविद्याराजलक्ष्म्यौ न पूर्ववदनुशील्येते इति भावः । समीरेण=वायुना यः सङ्घट्टः=सङ्घर्षणं तेन कलम्=अस्फुटमधुर क्वणन्=शब्दायमानः वल्लक्याः=वीणायाः गुणः=सूत्रं यस्य सः तेन । योगीश्वरस्य=याज्ञवल्क्यस्य प्रसादमहिमा=अनुग्रहप्रभावः, एवंविधानाम्=साधारणमनुजदुरवबोधवाचाम् वचनस्यावबोधो=ज्ञानं तेन मधुरां=रुचिराम् । सन्ततं=सर्वदा विकस्वरात्=विकासशीलात् चन्द्रमौलेः=शिवस्य मन्दाकिनी=गङ्गा तस्याः कुमुदकाननात्=कैरववनात् । अत्र चन्द्रमौलिमन्दाकिनीकुमुदकाननस्य सततविकस्वरत्वं बोधयितुमेव 'चन्द्रमौलीति पदम्' चन्द्रसत्त्वे तेषां सङ्कोचासम्भवात् चतुरः=दक्षिणो य आलापो=वार्त्तालापस्तत्र पेशलता=दक्षता ।

कैलासाधिकसारं किमिति । महीतले=पृथिव्यां कैलासाद्=हरपर्वतात्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततश्च विहस्येदमाह च भगवानिन्दुमौलिः —

अस्ति मे कार्मुकं दिव्यं न्यस्तं जनकभूभुजि ।
यस्य बाणानले तिस्रः पुरः प्राप्ताः पतङ्गताम् ॥२५॥

तदाकर्ण्य च तत्कार्मुकं विलोकयितुं स तत्र गतः। अहमिहागतः। कुतः स्त्वमिह ? कथय, कीदृशो वा तत्र नवीनो वृत्तान्तः ? इति। किमाह मधुर-यः—अहमागतोऽस्मि नन्दनवनात्। अथ च तत्र मया लङ्केश्वरानुचरस्य जितमाकर्णितम्—आः कथं रे, नन्दनवनस्य रक्षिणः ! अनर्चितचन्द्रचूड एव शाचरचक्रवर्त्तिनि लूनसकलप्रसूनं नन्दनवनमिति। ततस्तैरिदमुक्तो निशाचरः—

धिकसारं=प्रभूततदृढांशं किं=किंजातीयं वस्तु पदार्थः अस्ति=विद्यते यस्मिन् (गुरुतरभारवति वस्तुनि) वस्तुनि दोषः = बाहूवः—एव दण्डाः (दीर्घसारल्य-युक्तं रूपकम्) तेषां मण्डलं=समुदायः सफलतां=सार्थक्यमेतु=लभताम्। लासमनायाससमुत्तोलितवतो मम भुजवनस्य तदधिकसारवद्वस्तुलाभ एव दुत्तोलनया सार्थक्यसम्भावनेति जिज्ञासोदयः। स्वबाहुवीर्यावसेकदृप्तस्योक्तौ स्त्वन्तरानुपलम्भने बाहुवनैरर्थक्यमुखेन वीररसस्थाय्युत्साहः प्रतीयते।

विहस्य=स्मित्वा शिवस्य हासश्च तदीयबलापलेपस्याज्ञानविजृम्भि-त्वबुद्ध्या।

अस्ति मे कार्मुकमिति। मे दिव्यं=विशालं बहुभारशालि च कार्मुकं=धनुः नकभूभुजि=विदेहराजे न्यस्तं=न्यासीकृतं रक्षयेत्यभिधाय स्थापितं=निसृष्टमिति वत्। यस्य मम कार्मुकस्य बाणः=शर एवाऽनलः=वह्निस्तत्र तिस्रः=त्रिस-ख्याकाः पुरः=नगराणि पतङ्गतां=शलभतां प्राप्ताः=याताः दग्धा इति भावः। पुरदाहावसरे मयोपादीयमानं सम्प्रति जनकस्य राज्ञः समीपेऽवस्थापितं दीयं कार्मुकं त्वादृशजनबाहुबलावलेपमार्जनोपयुक्तं विद्यते, इति शिवाभि-न्धिः। पतङ्गानलदृष्टान्तेन तिसृणामपि पुरामनायासदाहः प्रतीयते॥ २५॥

अनर्चितः=न पूजितश्चन्द्रचूडः=शिवो येन तादृशेऽकृतशिवपूज इत्यर्थः। निशा-चक्रवर्त्तिनि=निशाचरराजे लूनानि=छिन्नानि अवचितानि सकलानि=समस्तानि नानि=पुष्पाणि यस्य तादृशम्। जनकराजस्य=विदेहभूभुजः कन्यका=पुत्री नकी तस्याः वीरस्वयंवरः=स्वयंकृतवीरपतिनिर्वाचनम् तत्र कुतुकितः=सञ्जा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"क्षन्तव्यमेतत् । अद्य हि जनकराजकन्यकावीरस्वयंवरविलोकनकुतुकितसकल लोकविमानमण्डनाय महान् कुसुमोपयोगः" । तदाकर्ण्य चेममेव वृत्तान्तमुप नीकरोमि लङ्केश्वरस्येति प्रचलितो निशाचरः । अहमपि कौतुकादिहागतोऽस्मि (सविषादम्) अहो महाननर्थाङ्कुरोद्भेदो यदयं बाणरावणयोः कर्णान्तिक विश्रान्तः सीतास्वयंवरवृत्तान्तः । अथवा । अलमतिकातरतया । भ्रमारोपिताः भ्रमरोक्तयः संभवन्ति । (विमृश्य) कुतो वा भ्रमरसम्भावना ।

मकरन्दरसस्यन्द–सुन्दरोद्गारधारिणौ ।
श्रवणानन्दिनावेतौ बन्दिनाविव राजतः ॥२६॥

(नेपथ्ये)

साधु भगवन्, विज्ञातं, वन्दिनावेव खल्वावां, नानादिगन्तसमागतनृ चक्रवर्णनाय जनकेन समादिष्टौ ।

तकुतुकः=कुतूहली यः सुरलोकः=देवगणः तस्य विमानं=रथः तस्य मण्डनाय= ङ्करणाय । कुसुमोपयोगः=पुष्पव्ययः । इममेव वृत्तान्तम्=सीतास्वयवरवृत्तान्त महान्=दीर्घः (दारुणः) अनर्थः=अनिष्ट एवाङ्कुरः=प्ररोहः । तस्योद्भेदः=उद् कर्णान्तिकं=श्रुतिसमीपम् विश्रान्तः=गतः (सीतास्वयंवरवृत्तान्तः) अधुना बलात् सीतां हरिष्यत इति चिन्तानिदानम् ।

भ्रमारोपिताः=अयथाज्ञानमूलाः ।

मकरन्दरसात । मकरन्दस्य=पुष्परसस्य स्यन्दः=प्रवाहः स सुन्दरो=रमणीय उद्गारः=उक्तिः तस्य धारिणौ=धर्त्तारौ एतौ (भ्रम ज्ञायमानौ) श्रवणानन्दिनौ=कर्णतर्पकौ वन्दिनौ=चारणाविव राजतः= एतयोः कथा वन्दिगीतमिव श्रुतये स्वदत इति तात्पर्यम् । उपमाऽलङ्कारः ॥

इदं च प्रवृत्तकन्नाम नाट्याङ्गम्, 'कालसाम्यसमाक्षिप्तप्रवेशः स्यात्प्रवृ इति दशरूपकम् ।

नाना=बहुसङ्ख्यकेभ्यो दिगन्तेभ्यः=दिगवकाशेभ्यः समागतस्य (स्वयम्वरसमुपस्थितस्य) नृपतीनां=राज्ञां चक्रस्य मण्डलस्य वर्णनाय= कस्य देशस्य राजा ? किङ्गुणकश्चेत्यादिप्रख्यापनाय जनकेन समादिष्टौ जीर्णकाष्ठखण्डादौ कीटैर्भक्षण आरब्धे आकस्मिकी वर्णाकारा रेखासृष्टि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दाल्भ्यायनः—अहो घुणाक्षरन्यायो यदिदं भ्रमरद्वयं प्रति मयोक्तं वन्दिद्वयं प्रति फलितं वचः। भवतु। तदिदं भ्रमरवृत्तान्तमस्मद्गुरवे निवेदयामि।

(इति निष्क्रान्ताः)

इति विष्कम्भकः।

+ ++ +

(ततः प्रविशति वन्दिद्वयम्)

एकः—वअस्स मञ्जीरअ, पेक्ख पेक्ख। गइन्द-दसण-सिणिद्ध-सलाआसहस्सणिम्मिदेसु मञ्चएसु आसीणा इमे कुङ्कुमकअङ्गराआ राआणो अमलफडिअपासाअसिहरासङ्गिणो कणअसिंहा विअ रेहन्ति। अमुद्धदुद्धसाअरलहरिसिहरावलम्बिणो अभिणवुग्गमन्तणिसाअरविम्बपडिविम्बा विअ सोहन्ति।

[वयस्य मञ्जीरक, पश्य पश्य। गजेन्द्रदशनस्निग्धशलाकासहस्रनिर्मितेषु मञ्चेष्वासीना इमे कुङ्कुमकृताङ्गरागा राजानोऽमलस्फटिकप्रासादशिखरासङ्गिनः कनकसिंहा इव राजन्ते। अमुग्धदुग्धसागरलहरीशिखरावलम्बिनोऽभिनवोद्गच्छन्निशाकरविम्बप्रतिविम्बा इव शोभन्ते]

तत्र यथा कीटैरन्यार्थं क्रियमाणेयत्ने वस्त्वन्तरमापतति तथैवान्यस्मिन् प्रस्तूयमाने शब्दसाम्यादिवशादन्योयं वर्णित इति न्यायसाम्येन विवक्षितोऽर्थः। इत्येवाऽत्र घुणाक्षरन्यायः।

विष्कम्भक इति। तल्लक्षणं यथा—"वृत्तवर्त्तिष्यमाणानां कथाङ्गानां निदर्शकः, संक्षेपोक्तिः स विष्कम्भः", इति दशरूपके। एष च शुद्धसङ्कीर्णभेदेन द्विविधो भवति। तत्रेह शुद्धः। संस्कृतेन, मध्यमपात्रेण च प्रयोजितत्वात्। असूचितस्य पात्रस्य प्रवेशो नैव युज्यते, इति संगीतकल्पतरूक्त्या चास्यावश्यकत्वम्। अत्र च वन्दि-प्रवेशाय निष्कम्भकावतारः।

गजेन्द्रेति। गजेन्द्राणां=करिवराणां दशनानि=दन्ताः, तेषां स्निग्धाः=चिक्कणाः याः शलाकाः तासां सहस्रं तेन। अमलाः=स्वच्छाः=स्फटिकाः तैर्निर्मिताः प्रासादाः तेषां शिखरेषु=उपरिभागेषु आसङ्गिनः कनकसिंहा इव राजन्ते=शोभन्ते। कान्त्या स्वर्णसिंहोपमा प्रभावातिशयेन च सिंहसादृश्यम्। अमुग्धः=प्रौढः (महान्) दुग्धसागरः=क्षीरसमुद्रः तस्य लहरीणां शिखरेषु अवलम्बिनः=स्थिताः अभिनवोद्गच्छन् निशाकरप्रतिविम्बाः=नवोदय-चन्द्रप्रतिकृतय इव लक्ष्यन्ते।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मञ्जीरकः—सखे नूपुरक, पश्य पश्य ।

स्वां स्वां दिशं श्रितवतां निवहेन राज्ञां
मञ्चावलीवलय-माकलितं विभाति ।
सीतास्वयंवर-विलोकन-कौतुकेन
पुञ्जीकृताकृति दिशामिव चक्रवालम् ॥२७॥

अपि च—

नटति नरकराग्रव्यग्रसूत्राग्रलग्न—
द्विपदशनशलाकामञ्चपाञ्चालिकेयम् ।
त्रिपुरमथनचापारापणोत्कण्ठताना—
मतिरभसवतीव क्षमाभृतां चित्तवृत्तिः ॥२८॥

स्वां स्वामिति । स्वां=स्वां निजां—निजत्वेनाध्यवसितामिति यावत् । दिशं=दिग्विभागं पूर्वाद्यन्यतमां दिशामिति भावः । श्रितवताम्=आश्रयेण कृतार्थयतां राज्ञां=भूभुजां निवहेन=समुदायेन आकलितम्=शोभितम् मञ्चानां=आसनोपयुक्तचतुष्किकाद्याकारककाष्ठादिनिर्मितस्थलविशेषाणाम् आवली = पङ्क्तिस्तस्या-वलयं=मण्डलं विभाति=शोभते किमिव शोभत इत्याह—सीतास्वयंवरविलोकन-कौतुकेन जनकजास्वयंपतिवरणदर्शनोत्कण्ठया = पुञ्जीकृता = एकत्र समाहृता आकृतिः=मूर्त्तिः यस्य तथाभूतं दिशां चक्रवालं=मण्डलं समूह इवेति । अत्र पूर्वादिदिगवच्छिन्नदेशावनीपालाः स्वाधीनदिगवस्थापिताः सन्तो मञ्चाव-लीमलङ्कुर्वाणाः स्वपालनीयदिग्भागप्रतिनिधित्वमिव कुर्वन्ति, तद्राजरूपेण तद्दिश एव सीतास्वयंवरदिदृक्षयात्रागता इति उत्प्रेक्षया प्रतिपद्यते । उत्प्रेक्षाऽलङ्कारः । वसन्ततिलकं वृत्तम् ॥ २७ ॥

नटतीति । इयं, नराणां=राजकर्मचारिणां कराणां=हस्तानामग्रे=पुरोभागे व्यग्रं=त्वरयाऽव्यवस्थितं सूत्रं=सञ्चालनरज्जुः तत्र लग्ना=सम्बध्यमाना या द्विपानां=हस्तिनां दन्ताः=दशनानि तेषाम् (निर्माणेन सम्बन्धस्तदर्थात्र षष्ठी) शला-काभिः मञ्चः तद्रूपापाञ्चालिका=पुत्तलिका नटति नृत्यति—कथमिवेत्याह—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नूपुरकः—वअस्स मञ्जीरअ, को इमो सीताकरग्गहवासनात्रसन्तलच्छीविल-त्तपुलअमुउलजालमण्डिदं णिअभुअसहआरसाहिजुअलं पुलोवन्ता चिट्ठदि ?

[वयस्य मञ्जीरक, कोऽयं सीताकरग्रहवासनावसन्तलक्ष्मीविलसत्पुलकमुकुल-लमण्डितं निजभुजसहकारशाखियुगलं विलोकयंस्तिष्ठति ?]

मञ्जीरकः—स एष निजयशःपरिमलप्रमोदितचारणचञ्चरीकचयकोलाहल-खरितदिक्चक्रवालक्ष्मापालकुन्तलालङ्कारो मल्लिकापीडो नाम ।

त्रिपुरमथनस्य=त्रिपुरारेः शिवस्य यश्चापो=धनुस्तस्यारोपणे=उत्तोलने उत्कण्ठि-तानां=कामनावशंवदतया स्वस्य प्रथमं प्रवृत्तिमिच्छतां क्ष्माभृताम्=अवनि-पालानाम् अतिरभसवती=प्रकामचपला चित्तवृत्ति-र्मनोदशेव । अत्र पद्ये पूर्वार्द्धे राजपुरुषकरगतसूत्रसन्दृब्धा गजदन्तनिर्मिता मञ्चस्वरूपा पुत्तलिका राजकीय-पुरुषेच्छया यथानियोगं नृत्यति, इत्यर्थो विवक्षितः द्वितीयार्धेन च स एवार्थ उपमीयते चापारोपणसतृष्णराजकुलमनोदशया । पूर्वार्द्धे रूपकम्, उत्तरार्धे वोपमालङ्कारौ । मालिनीवृत्तम्, तल्लक्षणं पूर्वमुक्तम् । पाञ्चालिका पुत्रिका-स्याद्वस्त्रदन्तादिभिः कृतेत्यमरः ॥ २८ ॥

सीताकरग्रहेति । सीतायाः करग्रहः—तया सह परिणयस्तस्य वासनाऽभि-लाषः, स एव वसन्तलक्ष्मीः=मधुमाससमृद्धिः तया विलसन्ति=विकसन्ति पुल-कानि=रोमोद्गमास्त एव मुकुलानि=किञ्चिदुद्भिन्नपुष्पाणि तेषां यज्जालं=समूहः तेन मण्डितं—निजः=स्वीयो भुजो=बाहुरेव सहकारशाखी=आम्रवृक्षस्तस्य युगलं =द्वयं विलोकयन्=पश्यन् तिष्ठति=वर्त्तते । सीताविवाहविषयकाभिलापजनित-रोमोद्गमालङ्कृतं स्वं बाहुं (यत्साध्यसाफल्योऽयमभिलाषस्तम्) पश्यन् क इति नूपुरकस्य जिज्ञासा ।

निजयशः परिमलेति । परिमलः=सुगन्धः चारणाः=यशोगायका एव चञ्चरीकाः=भ्रमराः तेषां चयः=समूहस्तस्य कोलाहलेन (यशोगानजन्येन) मुखरितं=शब्दितम् दिशां चक्रवाल=मण्डलं येन तादृशः क्ष्मापालानां=नृपाणां कुन्तलालङ्कारो=मुकुटभूषणः=श्रेष्ठ इति विवक्षा । केचित्तु कुन्तलस्य=देशविशेष-स्याऽलङ्कार इत्यर्थः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नूपुरकः—इमो उण कदमो जो किल दूरावसारिअकडअप्पअडिअघणुगु किणकसणलेहामण्डले भुअदण्डे पुलोवन्तो चिट्ठदि ?।

[अयं पुनः कतमो यः किल दूरापसारितकटकप्रकटितधनुर्गुणकिणकृष्णले मण्डले भुजदण्डे विलोकयँस्तिष्ठति]

मञ्जीरकः—सोऽयं कुबेरदिगङ्गनाललाटतटविलासलम्पटः काश्मीरतिल

नूपुरकः—इमो उण को णिअपडावदिणअरुग्गमपुव्वगिरिसिहरसह दक्खिणभुअदण्डमुन्नामिअ वट्टदि ?

[अयं पुनः को निजप्रतापदिनकरोद्गमपूर्वगिरिशिखरसहचरं दक्षिणभु दण्डमुन्नमय्य वर्त्तते]

मञ्जीरकः—स एष निजप्रतापप्रभापटलपिञ्जरितमलयाचलनितम्ब काञ्चीमण्डनो वीरमाणिक्यनामा नृपतिः ।

नूपुरकः—को इमो हरसुल्लसन्तपुलअविसंठुलकपोलत्थलच्चलकुण्डलस निवेसणावदेसेण पअडिअहरसरासणकण्णऊरमनोरहो रहेदि ? [कोऽयं हर्षोल्लस

दूरापसारितेति । दूरम्=अपसारितं=पृथक्कृतं कटकं=भुजालङ्कारविशे ऽतश्च प्रकटितः=प्रकाशीभूतो यः किणः=शुष्कव्रणचिह्नम् स एव कृष्णा=श्या लेखा=रेखा सैव मण्डलं ययोस्ते इत्यर्थः। वीराणां किणैरेव शोभाबाहु कटकैरिति भावः ।

कुबेरदिगङ्गनेति । कुबेरदिगङ्गना=उत्तरदिशानायिका तस्या ललाट =परिसरभूमौ विलासलम्पटः=क्रीडारसिकः । उत्तरदेशाधिपतिरिति भावः तिलकत्वेन राज्ञो रूपणे ललाटविलासिता कथनमावश्यकं सहि तत्रैव द्योतते।

निजप्रतापेति । प्रतापाख्यदिनकरः=सूर्यस्तस्योद्गमाय=उदयाय पू गिरिः=उदयाचलः तस्य शिखरस्य=उपरिभागस्य सहचरं=सखायम् (सादृश्ये सख्योपचारः)

पिञ्जरितः । पीततां गमितः, मलयाचलस्य नितम्बतटः=अधोदे येन तथा ।

हर्षोल्लसदिति । हर्षेण उल्लसत्=उदयमानं यत् पुलकं=रोमाञ्चः ते विसंष्ठुलं=निम्नोन्नतीकृतं यत् कपोलस्थलं तत्र चलितं कुण्डलं तस्य सद्गशनि (

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लकविसंष्ठुलकपोलस्थलचलितकुण्डलसद्दर्शनिवेशनापदेशेन प्रकटितहरशरासनकर्ण-पूरमनोरथो राजते]

मञ्जीरकः—सोऽयमसमरणमहार्णवैकमकरो मत्स्यराजः ।

नूपुरकः—इमो उण को अमलमलयजरसधवलिअभुअदण्डविडम्बिअभुअग-रायसिरी सिरीसकुसुमसुउमारं माररिपुसरासणं कल अन्तो विप्फुरदि ? [अयं पुनः कोऽमलमलयजरसधवलितभुजदण्डविडम्बितभुजगराजश्रीः शिरीषकुसुम-सुकुमारं माररिपुशरासनं कलयन् विस्फुरति ?]

मञ्जीरकः—स एष विमलमुक्तावलीविराजमानवक्षस्तटतुङ्गभुजतरङ्गः सिन्धु-राजः । तदलमनेन प्रकृतं तावदुपक्रमामहे । (परिक्रम्य उच्चैः)

शनं=यथास्थानस्थापनम् तस्यापदेशेन=छलेन (कुण्डलस्थिरीकरणव्याजेन) हरशरासनस्य=शिवचापस्य कर्णपूरमनोरथः=कर्णपूरीकरणाभिप्रायः । कोऽपि धनुर्नमयन् तात्कर्णपूरमिव कुरुते कुण्डलस्पर्शेन च समनोरथो व्यज्यते ।

असमरणेति । असमः=निरुपमो रणः=युद्धं स एव महार्णवः=महास-मुद्रस्तत्र एकमकरो=ऽद्वितीयो ग्राहः=(ग्राहरूपणेन समुद्रारोपणेन च समुद्रस्य दुर्गमतां मकरस्य सुखसञ्चारक्षमतां चाह)।

अमलेति । अमलेन=स्वच्छेन मलयजरसेन=चन्दनद्रवेण धवलितः=स्वच्छी-भूतो यो बाहुदण्डः=भुजयष्टिस्तेन विडम्बिता=अनुकृता भुजगराजस्य=शेषनागस्य श्रीर्येन सः । मारस्य=कामस्य रिपोः=शत्रोः (शिवस्य) शरासनं=धनुः कलयन्=सम्भावयन् (कलतिः कामधेनुरिति मल्लिनाथः) तथा सम्भावनं च स्वेन तदुत्तोलनं सुकरं व्यनक्ति ।

विमलेति । मुक्तावली=मुक्तामाला तया विराजमानं वक्षःस्थलम्=उरोदेशो यस्य सः पुनः तुङ्गः=उन्नतः भुजः=बाहुरेव तरङ्गो=वीचिर्यस्य सः, सिन्धुराजे =राजनि मुक्तातरङ्गौ=मुक्तामालाबाहू साधु निरूढौ ।

प्रकृतमिति । प्रसङ्गागतम् (निजं करणीयम्) उपक्रमामहे=प्रारभामहे, (प्रारम्भेऽनयोस्तुल्यार्थतेति कौमुदी)।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अहो राजानः, आकर्णयताकर्णयत ।

आकर्णान्तं त्रिपुरमथनोद्दण्डकोदण्डनद्धां
मौर्वीमुर्वीवलयतिलकः कोऽपि यः कर्षतीह ।
तस्याऽऽयान्ती परिसरभुवं राजपुत्री भवित्री
कूजत्काञ्चीमुखरजघना श्रोत्रनेत्रोत्सवाय ॥२९॥

(पुनः सकौतुकम्) सखे, दृश्यताममी—

कामारिकार्मुकविकर्षणकौतुकोर्मि-
रोमाञ्चितद्विगुणपीवरबाहुदण्डाः ।
सीताकरग्रहमिलत्कुतुकातिमात्र-
विस्तीर्यमाणहृदयाः परितो नरेन्द्राः ॥३०॥

आकर्णान्तमिति । इह यः कोऽपि ऊर्वीवलयतिलकः=पृथ्वीमण्डलालङ्कारः त्रिपुरमथनस्य=शिवस्य उद्दण्डे=महाभयानके कोदण्डे=चापे नद्धां=स… मौर्वीं=शिञ्जिनीं गुणमित्यर्थः, आकर्णान्तं=कर्णदेशपर्यन्तं कर्षति=समाक… परिसरभुवं=समीपम् आयान्ती = आगच्छन्ती कूजन्ती या काञ्ची=रशना… मुखरं=सशब्दं जघनं यस्याः सा राजपुत्री सीता श्रोत्र-नेत्रोत्सवाय=कर्णयोर्नेत्र… हर्षाय भवित्री भविष्यति, यः शिवधनुः कर्णपर्यन्तं नमयिष्यति तस्मै … सीता प्रदास्यत इति प्रतिज्ञार्थः । परिसरभुवमायान्तीत्यनेन नेत्रोत्सवाय … ष्यतीति कूजत्काञ्चीमुखरजघनेत्यनेन च श्रोत्रोत्सवः समुज्जीवितः विशे… साभिप्रायत्वमूलकः परिकरोऽलङ्कारः । 'मन्दाक्रान्तावृत्तम्' । 'मौर्वीज्या शि… नीगुणः' इति, 'पर्यन्तभूः परिसरः' इति चाऽमरः ॥ २९ ॥

कामारीति । कामारेः=शिवस्य कार्मुकं=धनुस्तस्य विकर्षणं=नम… रोपणमिति भावः, तत्र यत्कौतुकम्=उत्कटो रागः तस्य ऊर्मिः=तरङ्गः (आ… क्यमत्र सः) तया रोमाञ्चिताः=पुलकिताः द्विगुणपीवराः=द्विगुणमांसलाश्च … दण्डाः=भुजदण्डाश्च येषां ते । (एवं) सीतायाः करग्रहः=पाणिपीडनम् तेन … लत्=तद्विषयकम् कुतुकम्=उत्कण्ठा तेन अतिमात्रं प्रचुरं विस्तीर्यमाणं=प्रस…

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(पुनः सहर्षम्) अये कथमुच्चलितमेव समसमयसञ्चरणमिलत्कपोलतलसङ्घट्टमसृणरणन्मणिकुण्डलेन राजमण्डलेनं ।

नूपुरकः—पुलोवेहि पुलोवेहि, इमाणं अण्णोण्णसङ्घट्टन्तकेयूरसमुच्चलन्तकणअकणमिसेण पआवाग्गिणो विप्फुलिङ्गा विअ दीसन्ति [विलोकय विलोकय, एषामन्योन्यसङ्घट्टमानकेयूरसमुच्चलत्कनककणमिषेण प्रतापाग्नेर्विस्फुलिङ्गा इव दृश्यन्ते]

मञ्जीरकः—(विहस्य)

पश्य पश्य सुभटैः स्फुटभावं भक्तिरेव गमिता न तु शक्तिः ।
अञ्जलिर्विरचितो न तु मुष्टिर्मौलिरेव नमितो न तु चापः ॥३१॥

(उच्छूनम्) हृदयं येषां ते । परितः=सर्वतः नरेन्द्राः=राजानः सन्ति । तान् पश्येति वक्तुरनुरोधः । राज्ञां स्थितेर्वर्णनमिदम् । असम्बन्धे सम्बन्धरूपातिशयोक्तिः । वसन्ततिलकं छन्दः ॥३०॥

समसमयेति । समसमयं=तुल्यकालं सञ्चरणं=चलनम् तेन मिलतां=सङ्गच्छमानानाम् कपोलतलानां=गण्डप्रदेशानां सङ्घट्टः=परस्परोपमर्दः तेन मसृणम्=अकटु रणत्=शब्दायमानम् कुण्डलम्=कर्णभूषणम् यस्य तेन । परस्परसमुत्पीडितकपोलप्रदेशानां हि राज्ञां सङ्घृष्यमाणानि कुण्डलानि मधुरं शब्दायन्त इति भावः ।

अन्योन्येति । अन्योन्यं=परस्परं सङ्घट्टमानः=उपमृद्यमानः केयूरः=करभूषणविशेषः ततः समुच्चलतः=निर्गच्छतः कनककणस्य=स्वर्णरजसः मिषेण=छलेन प्रतापाग्नेः विस्फुलिङ्गाः=अग्निकणा इव दृश्यन्ते । 'स्फुलिङ्गोऽग्निकणाः स्मृताः' इति कोषः ।

पश्य पश्येति । सुभटैः=वीरत्वाभिमानशालिभिः (सोत्प्रासेयमुक्तिः) भक्तिरेव स्फुटभावं=प्रकाशतां गमिता=प्रापिता शक्तिस्तु न तथा, अञ्जलिः=प्रणाममुद्राविशेषः रचितः न तु मुष्टिः=आकर्षणमुद्रा, मौलिः=मूर्द्धा एव नमितः=नम्रीकृतः चापस्तु न नमितः=आकृष्ट इति भावः । (एतत्) पश्य पश्य । वाक्यार्थः कर्म । ससम्भ्रमे द्विरुक्तिः । शिरोनमनं लज्जातिरेकात् । स्वागतावृत्तं तल्लक्षणं यथा—"स्वागतेति रनभाद् गुरुयुग्मम्" ॥ ३१ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नूपुरकः—कहं आरम्भरमणिज्जो जेव्व इमाणं संरम्भः
[कथमारम्भरमणीय एव एषां संरम्भः]

मञ्जीरकः—(सविषादम्)

आद्वीपात् परतोऽप्यमी नृपतयः सर्वे समभ्यागताः
कन्येयं कलधौतकोमलरुचिः कीर्त्तिश्च लाभास्पदम् ?
नाकृष्टं न च टात्कृतं न नमितं स्थानाच्च न त्याजितं
केनापीदमहो धनुः किमधुना निर्वीरमुर्वीतलम् ॥ ३२ ॥

(नेपथ्ये)

आः, कोऽयमलीकवैतालिको धनुर्मात्रकेऽपि नमयितव्ये निर्वीरमुर्वीत-मुपदिशति ? ।

नूपुरकः—वअस्स, कस्स इमो महीअलचलन्तराहुरहचक्करवकक्कसो कण्ठ-सुणी अदि ? [वयस्य, कस्याऽयं महीतलचलद्राहुरथरवकर्कशः कण्ठध्वनिः श्रूय-

---

आद्वीपादिति । परतोऽपि=अन्यस्मादपि द्वीपात्=भूभागात् आ—अ-व्याप्येत्यर्थः, सर्वे नृपतयः=राजानः समभ्यागताः=प्राप्ताः । नन्वागतानामपि तुच्छलाभप्रदेऽत्र धनुर्नमनकर्मणि न प्रवृत्तिस्तदपासयति—कन्येयम्. इति कलधौत=सुवर्णं तद्वत् कोमला=रमणीया रुचिः=कान्तिः यस्याः सा इयं (सरमायान्ती) कन्या (तादृश्येव) कीर्त्तिश्च (शिवधनुर्नमनजन्यं यशः) लाभास्पदम्=प्राप्तिस्थानम् । अतो न लभ्यवस्तुतुच्छताप्रयुक्ताऽप्रवृत्तिरुचिता (किन्त्वेवं स्थितावपि) केनापि इदं महत् धनुः न आकृष्टं=न चलितगुणं कृ न टात् कृतं=न वा शिञ्जिनीशब्दवत् कृतं, न नमितं=नारोपितं स्थानात् त्याजितं=न चालितम्—अहो !=खेदः ! अधुना किमुर्वीतलं=भूमण्डलं निर्वीरम्=सर्वथा रहितम् ? । अत्र अन्यस्मादपि द्वीपादित्यपि शब्देन जम्बूद्वीपगतराज-कानामुपस्थितिरर्थादापतिता । शार्दूलविक्रीडितं वृत्तमोजो गुणः ॥३२॥

अलीकवैतालिकः=मिथ्यावैतालिकः (दुर्वृत्तमलीकत्वाभिप्रायमिदम् राहोः=ग्रहविशेषस्य रथस्य रवः=शब्दस्तद्वत् कर्कशः=कर्णकटुर्भीमश्च ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मञ्जीरकः—मयाऽप्ययमपरिचितः । तदेनं पृच्छामि तावत् । (परिक्रम्य) हो, कः खलु भवान्यः सकलदेशदर्शिनो ममाऽपि न विख्यातः ?

(प्रविश्य)

पुरुषः—(साक्षेपं परिक्रम्य) (सक्रोधम्) आः पाप, वैतालिकापसद, तिपयग्रामटिकापर्यटनदुर्विदग्ध, कथं मामपि दश—(इत्यर्धोक्ते स्वगतम्) कथं वरणीयं विवरितुमुपक्रान्तोऽस्मि । भवतु । इदमेव तावन्निर्वाहयामि । कथं मामपि शादिग्विलासिनीकर्णपूरीकृतकीर्त्तिपल्लवं त्रिभुवनवीरनामधेयं कूपमण्डूक इव गरमविख्यातमपदिशसि । तत्कथय, क्व तावत्कर्णान्तिकनिशम्यगुणं कन्यारत्नं ार्मुकं च ।

मञ्जीरकः—इदं तावत्कार्मुकम्, कन्या तु चरमं लोचनपथमवतरिष्यति ।

पुरुषः—(ससंरम्भम्) धिङ् मूर्ख, कथं रे, राशिनक्षत्रपाठकानां गोष्ठीं न ष्टवानसि । तेऽपि कन्यामेव प्रथमं प्रकटयन्ति, चरमं धनुः ।

मञ्जीरकः—(स्वगतम्) कथमयं वाचाटतां प्रकटयति । भवतु । अनयैव

वैतालिकापसद = दुष्टवैतालिक, कतिपयानां=स्वल्पसङ्ख्यानां ग्रामटिकानाम् क्षुद्रपरिमाणग्रामाणाम् यत् पर्यटन=भ्रमणं तेन दुर्विदग्ध, चातुर्याभावेऽपि दभिमानीति तात्पर्यम् ।

संवरणीयं=गोपनीयम् । दशदिश एव वारविलासिन्यो=गणिकास्ताभिः र्णपूरीकृतं=कर्णाभरणतां नीतं=कीर्त्ति-यश एव पल्लवं यस्य स तम् । दशदिग्-ख्यातयशसमिति भावः । कर्णान्तिकेन=कर्णप्रान्तेन निशम्यः श्रवणीयो गुणः न्दर्यचातुर्यादिर्यस्येति कन्यापक्षे, कार्मुकपक्षे च कर्णान्तिके = तत्प्रदेशे निशम्यः प्राप्यो गुणो मौर्वी यस्य तत् ।

चरमम्=पश्चात् त्वया धनुरारोपणे विहिते तद्दर्शनं कर्तुं शक्यमिति त्प्रासोक्तिः । राशिनक्षत्रपाठकानाम्=शिशुबोधादिपठनपराणाम् ज्योतिषप्रारम्भ-ाले ध्येयग्रन्थव्युत्पत्तिमपि नार्जितवानसीति परिहासः । कन्यामेव प्रथमम् मेषवृषादिक्रमेण गणनायां प्रथमं कन्या ततो धनुरायातीति भावः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तावदेनं निवारयामि । (प्रकाशम्) अये, एतावति वीरमण्डले त्वमेव नक्ष विद्याकुशलः ।

पुरुषः—(सक्रोधम्) आः, कथं रे, अहमेव क्षत्रविद्यायामकुशलः ?

मञ्जीरकः—तत्कथं कार्मुकमन्तरेणैव कन्याविलोकनायोत्कण्ठसे ।

पुरुषः—(साटोपम्, परिक्रम्य) कथं ममापि चापारोपणे संशयः ।

मञ्जीरकः—अथ किम् ?

पुरुषः—तदेष ममाभिसंभाव्यते, यदि—

विनैवाम्भोवाहं बहुलरुचिलिप्ताम्बरतला-
त्तडिल्लेखा हेमद्युतिविततिरम्या विलसति ॥

यदि वा—

विनैव स्वर्गङ्गां नभसि रभसोन्मुद्रशफरी-
परीवर्त्तैः साकं स्फुरति नवनीलोत्पलवनम् ॥ ३३ ॥

"नक्षत्रविद्याकुशलः"—इति पदे नेति पृथक् कृते क्षत्रविद्यायां न कुश इति पारिहासिकोऽर्थः ।

विनैवेति । यदि बहुलरुचिः=ग्रहनक्षत्रादेः प्रचुरः प्रकाशस्तया लिप्तं रितं यदम्बरतलं=व्योमप्रान्तस्तस्मात् हेमद्युतिः=सौवर्णविभा तस्याः विततिः= स्तारस्तद्वत् रम्या=रमणीया तडिल्लेखा=विद्युल्लता अम्भोवाहं=मेघं विना= न्तरैव विलसति=समुदयते । यदि भास्करकरनिकरविद्योतितादाकाशदेशा घमालाया अभावेऽपि कनककान्तिकमनीया विद्युदुदयते तदेति समुदिता सम्भावनान्तरमाह—

यदि वा । स्वर्गङ्गां=(स्वर्ग) मन्दाकिनीं विनैव रभसेन मनसस्तर उन्मुद्राश्चञ्चला याः शफर्यः=क्षुद्राकारा मत्स्यविशेषास्तासां परीवर्त्तैः=प्रचल साकम्=सह नवनीलोत्पलवनम्=अभिनवनीलकमलमाला नभसि=आक स्फुरति=विकसति । आकाशदेशे वियद्गङ्गाया अन्यत्र शफरीलोलली भावसनाथीकृतनूतननीलकमलविकासो यदि सम्भवति तदैव मयाऽत्र धनुर्न कर्मणि वैफल्यमाप्येतेति ब्रुवाणो निजामवश्यभाविनीं सफलतां विश्व

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(विलोक्य, सविषादम्) कथमरमत् प्रतिज्ञाभङ्गाय विपरीतं सृष्टिनैपुणं प्रणीतवान् विधिः । नन्विदं तथैव पश्यामि । (विमृश्य) क एष विधिरपि मद्विरोधाय ।

मयि क्षीरोदन्वन्निभृतसुरजिन्नाभिनलिनीं
निजक्रीडावापीजलकमलिनीं कर्त्तुमनसि ।
पदभ्रंशाशङ्की मधुरमधुरालापचतुरै-
श्चतुर्भिः स्वैर्वक्त्रैरनुनयपरोऽभूदयमपि ॥ ३४ ॥

(पुनर्निपुणं निरूप्य) अये, सादृश्येन प्रतारितोऽस्मि ।

तडिल्लेखा नेयं विलसति परं सौधशिखरे
वसन्त्याः कस्याश्चित कनकरुचिरा गात्रलतिका ।

लवद् भाययति । "उभौ यदि व्योम्नि" इति माघश्लोक इवात्रासम्बन्धे सम्बधरूपातिशयोक्तिरलङ्कारः । शिखरिणीवृत्तम् । परीवर्त्तः=परिवर्त्तनम् भावे ञ् । 'उपसर्गस्य घञीति परेरिकारस्य दीर्घः ॥ ३३ ॥

प्रणीतवान्=कृतवान् ।

मयीति—मयि=रावणे क्षीरोदन्वति = क्षीरसमुद्रे निभृतस्य = प्रच्छन्नस्य भयेन) सुर-जितः=विष्णोः नाभिनलिनीं=नाभिकमलिनीं निजस्य=स्वस्य या ीडावापी=विलासदीर्घिका तत्र कमलिनीं=तत्रत्यपद्मिनीं कर्त्तुमनसि=विधातुमिच्छति, 'यस्य च भावेने'ति सप्तमी, दुग्धाम्भोनिधिमध्यशायिविष्णुनाभिकमलमुपाट्य, 'तुंकाममनसो'रिति मलोपः । तेन स्वक्रीड़ासरोऽलञ्चिकीर्षति मयि इत्यर्थः, दभ्रंशाशङ्की=स्वस्थानच्युतिचिन्ताचुम्बितचित्तः अयमपि (यमधुना स्वप्रतिकूलहमुत्प्रेक्षे) (विधिः) मधुरमधुरालापचतुरैः=अतिमिष्टभाषिताऽनिपुणैः चतुर्भिः तत्सङ्ख्याकैः स्वैः=निजैः वक्त्रैः=मुखैः अनुनयपरः=(मैवं कार्षीः) इति प्रार्थनापरः अभूत् । विष्णुनाभिकमलोत्पाटने विधातुरावासोच्छेदभीतस्य रावणं प्रति था न कर्त्तुं प्रार्थनाऽत्र प्रतिपाद्यते तेन च विधात् रावणप्रतिज्ञाभङ्गाय चेष्टाकर्त्तव्यतां प्राप्यते, रावणस्य विधातारमपि तृणाय मन्वानस्य दर्पोक्तिरियम् । गुक्तमेव वृत्तम् ॥ ३४ ॥

तडिल्लेखेति । इयं (सौधोपरि प्रत्यक्षमीक्ष्यमाणा) तड़िल्लेखा=विद्यु-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपीदं नोन्मज्जत् कुवलयवनं मीनतरलं
परं तस्या एव स्फुरति नयनालोकललितम् ॥३५॥

(विभाव्य) नूनं तदेव सीताभिधानं कन्यारत्नम् ।—(पुनः सहर्षम्)

राजीव ! जीवसि मुधा, न सुधाकर, त्व-
मस्याः समः पदनखस्य कुतो मुखस्य ।
अग्रे दृशोर्मृगदृशः कतमः कुरङ्ग-
स्तत्खञ्जन, त्वमपि किं जनरञ्जनाय ॥ ३६ ॥

१७६२९

ल्लता न विलसति परं सौधशिखरे=प्रासादोपरि वसन्त्याः=तिष्ठन्त्याः कस्याः कामिन्याः कनकरुचिरा=सुवर्णवर्णा गात्रलतिका=काययष्टिः । इदमपि उ जत्=तरङ्गायितमाचरत् मीनतरलं=मत्स्यचञ्चलं कुवलयवनम्=नीलकमल (न अस्तीति शेषः ।) परं=किन्तु तस्याः=सौधशिखरे वसन्त्या रमण्या एव नालोकस्य=नेत्रकान्तेः ललितम्=विलासः स्फुरति=प्रकटति । विद्युल्लतासादृश्य गात्रकान्तेः प्राखर्यं नेत्राभिभावकत्वं च लतिकारूपणेन चास्थूलत्वं कनकाल रेति विशेषणेन रमणीयवर्णत्वमित्यादि पूर्वार्धे, परार्द्धे च मीनतरलमित्य नेत्रयोः शफरीविभ्रमशालिता कुवलयसादृश्येन नीलकान्तिरित्यादि चावेद्यते, च दृश्यमानरमण्याहृदयावर्जकत्वं व्यज्यते । अत्र निश्चयान्तः सन्देहोऽलङ्कारः शिखरिणीच्छन्दः ॥ ३५ ॥

राजीवेति । राजीव,=कमल (त्वम्) मुधा जीवसि=(निरर्थकं प्राणान् धारयसि) सीतामुखसादृश्यमलभमानस्य तव जीवनं वृथेति भावः । सुधाकर=अमृतदीधिते, त्वमस्याः=सीतायाः पदनखस्य=चरणनखस्य न समः= तुल्यः मुखस्य कुतः (सम इति शेषः) सीतापादनखसादृश्यवञ्चितस्य तदीयमुखसादृश्यसम्भावनादूरापास्तेति भावः । मृगदृशः=हरिणनयनाया दृशोः =नेत्रयोरग्रे=पुरतः कुरङ्गः=मृगः कतरः=किंविधः (तुच्छ इति हृदयम्) =तस्मात् (पूर्वोक्तानां तां दशां दृष्ट्वा) हे खञ्जन, त्वमपि किं जनरञ्जनाय =लोकप्रसादनाय (प्रभवसीति शेषः) नेति भावः । सर्वेषामुपमानानां रुपमेयैः सीताङ्गैः पराभवोऽत्र विवक्षितः । "आधिक्यमुपमेयस्योपमानका

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(पुनः सरभसम्)

कदली कदली करभः करभः, करिराजकरः करिराजकरः ।
भुवनत्रितयेऽपि बिभर्त्ति तुला-मिदमूरुयुगं न चमूरुदृशः ॥३७॥

मञ्जीरकः—सखे नूपुरक, किमेतत् । कस्याश्चिदपि हस्तादादाय सानन्दमा-लोकयत्यन्तःपुरिको जनः ?

नूपुरकः—अहं एरिसं संभावेमि जं किर गुरुभवणादो आगदाए चन्दणि-आए समप्पिदं चित्तपडं पुलोवेदि त्ति [अहमीदृशं सम्भावयामि यत्किल गुरुभव-नादागतया चन्दनिकया समर्पितं चित्रपटं विलोकयतीति)

मञ्जीरकः—स त्वया दृष्टश्चित्रपटः ?

नूपुरकः—भट्टदारिआ दाव अणच्च को वि णीलुप्पलदामसामलओ कुसुम-सरसरिसरूओ कुण्डलीकिदहरचावो चक्कवट्टिकुमारो [भर्तृदारिका तावदन्यश्च

…न्यूनताऽथवेति" लक्षणलक्षितो व्यतिरेकोऽत्रालङ्कारः । वसन्ततिलकं वृत्तम् । …ल्लक्षणं यथा—"उक्त वसन्ततिलकं त-भ-जा ज-गौ गः" ॥ ३६ ॥

कदलीति । कदली=रम्भातरुः कदली = अतिशयशीतलतायुतस्तदाख्यो …वृक्षः । अतो नास्य समशीतोष्णस्यास्या ऊरुयुगलस्य सादृश्यमावहतीति भावः, …करभः = मणिबन्धतः कनिष्ठाङ्गुलीपर्यन्तो बाहुभागः करभः=नितान्तखर्वः । अत-…नास्य दीर्घस्योरुयुगलस्य तुलनां नाधिकरोति । करिराजस्य=हस्तिश्रेष्ठस्य करः …शुण्डादण्डः करिराजकरः अत्यन्तकठिना हस्तिशुण्डैव । एवं सोऽपि …नितान्तमृदोस्तस्य सहाध्यायी न वक्तव्यः । एवञ्च चमूरुदृशः=हरिणलोचनायाः …इदं=शोभासम्भारमन्थरमूरुयुगं भुवनत्रितये=लोकत्रयेऽपि तुलां=सादृश्य (केनापि …वस्तुना) न विभर्त्ति । प्रसिद्धोरूपमानानां कदलीकरभकरिराजकराणां सादृश्य-…योग्यतायां विघटितायां तदितरपदार्थनिष्ठा चमूरुदृगूरुसादृश्यावाप्तिशक्तिरतीवा-…सम्भविनीति तात्पर्यम् । अत्र द्वितीयकदल्यादिशब्दाः पौनरुक्त्यभिया मुख्यार्थे …बाधिता जाड्यादिगुणविशिष्टकदलीरूपमर्थं बोधयन्ति जाड्याद्यतिशयश्च व्यङ्ग्यः । …अर्थान्तरसङ्क्रमितवाच्यध्वनिरत्र । तोटकवृत्तम्, तल्लक्षणं "वद तोटकमब्धि-…सकारयुतम्" इति ॥ ३७ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कोऽपि नीलोत्पलदलश्यामलः कुसुमशरसदृशरूपः कुण्डलीकृतहरचापश्चकर्षि कुमारः ।

मञ्जीरकः—अहह !! मुग्धः खल्वबलाजनः । यदेवमपि कठोरप्रतिज्ञे राज किशोरवयसं जामातरमाशंसति । सखे, जानासि केन लिखितं चित्रमिति ?

नूपुरकः—जाणामि, महेसिणो जणअस्स दुहिआए धम्मआरिणीए ।

[जानामि महर्षेर्जनकस्य दुहित्रा धर्मचारिण्या]

मञ्जीरकः—इदानीमुद्भिन्नो मम मनोरथाङ्कुरः । देवी मैत्रेयी सिद्धयोगि कालत्रयदर्शिनी सा नालीकमालिखति ।

नूपुरकः—सव्वं सम्भावीअदि जइ इमो जरठङ्गो इदो ओसरदि ।

[सर्वं सम्भाव्यते यद्ययं जरठाङ्ग इतोऽपसरति]

मञ्जीरकः—आः, कोऽयम् ? किमिदम् ? एनमपसारयामि । अये, किमितः विलोकयसे । नन्विदं शाम्भवं धनुस्तदिहैव दीयतां दृष्टिः ।

पुरुषः—आः, किमुच्यते दृष्टिरिति, नन्वियं मुष्टिरपि दीयते ।

(परिक्रम्य, शेखरभ्रंशमभिनीय सविषादं विलोकयति)

मञ्जीरकः—

अयेऽलङ्केश विस्रस्तशेखरालोकनेन ते ।
समयो याति तच्चूर्णं गृहाण हरकार्मुकम् ॥ ३८ ॥

भर्तृदारिका=राजकन्यका (सीता) नीलोत्पलदलश्यामलः = नीलकम पत्रकृष्णवर्णः कुसुमशरेण=कामेन सदृशं=तुल्यं रूपं यस्य सः । कुण्डलीकृ =नमितः हरस्य=शिवस्य चापो=धनुर्येन तादृशः ।

किशोरवयसम्=अचिरनिवृत्तबाल्यमनुद्भिन्नयौवनावस्थञ्च ।

उद्भिन्नः=प्रकटितः, मनोरथाङ्कुरः=मनोरथमूलम् । अलीकम्=मिथ्या जरठाङ्गः = जरठम्—जीर्णम् (जीर्णता चाऽत्र सौन्दर्यव्यतिरेकेण बोध्या)

(शेखरस्य=मुकुटस्य भ्रंशमभिनीय बलादिव पातयित्वेति भावः)

अये इति—अये (सम्बोधनेऽव्ययम्) केशात्=मूर्द्धजात् विस्रस्त =पतितस्य शेखरस्य=शिरोमण्डनस्य आलोकनेन=दर्शनेन ते=तव (धनुर्नमन तस्य) अलम्=न किमपि फलम् । समयः=कालः याति=वृथा गच्छति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुरुषः—(स्वगतम्) कथमनेन विदितोऽस्मि (विमृश्य) घुणाक्षरन्यायगतं शब्दसादृश्यमेतत् (प्रकाशम् । ससंरम्भम्)

सावलेपकमनीयमुदस्य, क्रीडयैव विनिबध्य च मौर्वीम् ।
कृष्टमेव हरकार्मुकमेतत्, दृश्यमत्र सुदृशो हृदयञ्च ॥३९॥

(धनुषि हस्तमर्पयित्वा । स्वगतम्) कथं न चलत्यपि । भवतु । (प्रकाशम्) अये, धनुरिति वक्रः पन्थाः । तत्सरलेन करवालधारापथेन सीतामानयामि ।

मञ्जीरकः—कथमतिप्रगल्भसे । न विलोकयसि ।

रोषारुणीकृतविलोचनकान्तिभिन्न-
भ्रूभङ्गभीमघटितभ्रुकुटीविटङ्कम् ।

=तस्मात् तूर्णं=शीघ्रं हरकार्मुकं=शैवं धनुर्गृहाण=धारय (नमनाय सन्धेहीति भावः) अत्र मञ्जीरकोक्तौ—अये, अलम्, केशेति च्छेदे पूर्वोक्तोऽर्थः, अये लङ्केश इति च्छेदे लङ्केशेति रावणसम्बोधनम् । अमुं द्वितीयमेव च्छेदं मनसि कृत्य रावण आत्मानं ज्ञातमाशङ्क्य वक्ष्यति "विदितोऽस्मीति" ॥ ३८ ॥

घुणाक्षरन्यायः—घुणैः=लघुभिः—कीटैर्भक्षिते काष्ठे अकस्मात् काचिदक्षराकृतिर्जन्यते तद्वत् लंकेशपदेऽपि मया भ्रमः कृतो भवेदिति रावणाशयः ।

सावलेपेति—अवलेपेन=गर्वेण सहितम् अत एव कमनीयम्=अभिरामम् मौर्वीं=प्रत्यञ्चाम् उदस्य=आकृष्य क्रीड़या=अनायासेनैव च (ताम्) विनिबध्य=आरोप्य एतत् हरकार्मुकम्=शैवं धनुः कृष्टमेव=आरोपितमौर्वीकं कृतमेव (नात्र संशयस्यावकाशः) दृश्यं=रमणीयम् सुदृशो = मनोहरनयनाया हृदयं = मनश्च कृष्टमेव=आकर्षितमेव मत्पराक्रमावलोकनप्रीता सीता मह्यं स्निह्येदिति भावः । सावलेपकमनीयमिति । क्रियाविशेषणम् । रावणस्य स्वबाहुवीर्यविश्वासप्रसूता इयमुक्तिः । स्वागतावृत्तम् ॥ ३९ ॥*

वक्रः=दीर्घकालापेक्षत्वात् कुटिलः । करवालस्य=असेः धारा तत्पथेन=तन्मार्गेण ।

रोषारुणीकृतेति—रोषेण=रावणविकत्थनप्रभवक्रोधेन अरुणीकृतं=रक्तव-

* अत्र श्लोके दृश्यमिति हृदयस्य विशेषणं कथं सङ्गतं स्यादिति चिन्तनायम्, मया तु कोऽपि पाठभेद आसीदिदानीं परिभ्रष्ट इति सम्भाव्यते ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उत्खातलोलकरवाललताकराल-
दोर्दण्डचण्डचरितं नरवीरचक्रम् ॥४०॥

पुरुषः—(कृपाणमुद्यम्य) (परितो विलोक्य) पश्यत पश्यत ।

निर्भिन्नवैरिकरिकुम्भतटीविमुक्त-
मुक्ताफलप्रकरतारकिताम्बरश्रीः ।
यः कालरात्रिरिव भाति रणे स एव
रे रे नृपा मम कृपाकृपणः कृपाणः ॥४१॥

वर्णीकृतं यत् विलोचनं=नयनं तस्य कान्तिः=आभा तया भिन्नः=मिलितो भ्रूभङ्गः=भ्रूवक्रिमा तेन भीमं=भयानकम् यथा स्यात्तथा घटितः=सञ्जातः भ्रु दिटङ्कः=भ्रुवोरुन्नतः प्रदेशो यस्य तदिति राजमण्डलस्यैकं विशेषणम् । तेषां क्रोधावस्था प्रकाश्यते । उत्खाता=उत्पाटिता हठात् कोशान्निस्सारिता =चञ्चला । (चाञ्चल्यं चेदं क्रोधजन्यसम्भ्रमकृतम्) करवाललता=खड्ग स्तया करालः=भयानको दोर्दण्डः=बाहुदण्डः तेन (तत्कृतत्वाभिप्रायम्) =कोपनम् चरितम् यस्य तादृशम् नरवीरचक्रम्=राजन्यकमण्डलम् इदं लोकयसीति पूर्वोक्तस्य कर्म । एतादृशं वीरमण्डलं पश्यतस्तवाऽयं विकत्थना पारोऽतीवानुपयुक्तो हास्यकरश्च तन्निभृतमास्स्वेति मञ्जीरकस्याभिप्रायः । अनु तपथप्रवृत्तस्य तवात्र घोरोऽपमानः सम्भवतीति तदाकूतम् । वसन्ततिलकं छन्द

निर्भिन्नवरीत—निर्भिन्नाः = विपाटिता याः वैरिणां=शत्रूणां क =हस्तिनां कुम्भतट्यः=शिरोभागास्ताभ्यो विमुक्तानि=उत्पतितानि यानि मु फलानि=मौक्तिकानि तेषां प्रकरः=समुदायस्तेन तारकिता=सनक्षत्रीकृता रश्रीः=व्योमशोभा येनेति कृपाणेऽन्वेति । यः (कृपाणः) रणे=युद्धे काल रिव=(सर्वसंहारकारणत्वसाधर्म्यात) प्रलयरात्रिरिव भाति । रे रे नृ (इदं सौन्दर्यदृप्तस्य तस्य तेषु अवज्ञायाः द्योतकं सम्बोधनम्) स एष मम (पराभवव्यसनिनः) कृपाकृपणः=निर्दयः कृपाणः=खड्गः । तदिमं विलो स्वस्थानान्न प्रचलनीयं भवद्भिरिति रावणस्य विभीषिकाया अभिप्रायः । मु फलानामतिशुभ्रताशालितया वर्त्तुलाकारतया च तारकासादृश्यम् । तेषां ता

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(आकाशे कर्णं दत्त्वा) किं ब्रूथ ?

एकः कथं बहुतरैः सुभटैः करोमि,
संग्रामडम्बरमिति त्यज रे विषादम् ।
यं मन्यसे सुलभमत्र सहैव तेन
चेतो निधेहि समरे समरेखयैव ॥४२॥

(नेपथ्ये)

मन्दाकिनी - कनकपद्म-बिसाङ्कुराणां
किञ्चाग्रदिग्गजलसद्दशनाङ्कुराणाम् ।
उन्मूलनैरलमनीयत शैशवं यै—
स्तेऽमी भुजा मम निजाः प्रकटीभवन्तु ॥ ४३ ॥

वकथनेन दूरं गतत्वम्, तेन च प्रहारस्य गम्भीरता व्यज्यते,। पूर्वोक्तमेव वृत्तम् ।

एकः कथमिति—रे ! (दर्पद्योतिसम्बोधनम्) एकः=सहायकान्तर-हितो बहुतरैः सङ्ख्यायां भूयोभिः सुभटैः=महायोद्धृभिः कथं=केनप्रकारेण सङ्ग्रामडम्बरं=युद्धाटोपम् करोमीति विषादं=खेद त्यज=जहिहि । यं=माम् अत्र सुलभं=सुजेयं मन्यसे=सम्भावयसि तेन=मया सह एव समरे=युद्धे समरेखया = तुल्यतया एव चेतो निधेहि । सर्वैः सम्भूय मया सह योद्धव्यमिति मम पराजयो मा शङ्कि, समेषामपि शक्तेः समा मदीया शक्तिरिति रावणस्याशयः । प्रागुक्तमेव वृत्तम् ॥ ४२ ॥†

मन्दाकिनीति । मन्दाकिन्याः=आकाशगङ्गाया यत् कनकपद्मं=स्वर्णकमलं तस्य बिसाङ्कुराः=मृणालदण्डप्ररोहास्तेषाम्, किञ्च उग्राः=मदस्राविणो ये दिग्गजाः=दिशासु प्रसिद्धाः करिणः तेषां लसतां=शोभमानानाम् दशनाङ्कुराणाम्=दन्तानाम् उन्मूलनैः=उत्पाटनैः यैः (मम भुजैः) (कर्तृभिः) अलम्=वृथा शैशवं=बाल्यम् अनीयत=अयाप्यत तेऽमी मम निजाः=आत्मीया भुजाः=बाहवः प्रकटीभवन्तु=प्रकाशमासादयन्तु । प्रच्छन्नानां बाहूनां प्रकाशमर्थयमानस्य

† अत्रापि श्लोकेऽर्थः श्लथ इव प्रतिभाति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

(ततः प्रविशति निजरूपेण दशकण्ठः)

नूपुरकः—वअस्स, पेक्ख पेक्ख कोदूहलं जं एकस्स वि माणुसस्स मत्थआइं ।

[वयस्य, पश्य पश्य कौतूहलं यदेकस्यापि मानुषस्य दश मस्तकानि]

मञ्जीरकः—नैष मानुषः, राक्षसराजः खल्वसौ दशकण्ठः ।

नूपुरकः—ता परित्ताअदु मं वअस्सो, णं रक्खसमत्तो जेव्व संमुहप माणुसं चव्वेइ किं उण रक्खसराओ ।

[तत्परित्रायतां मां वयस्यः । नूनं राक्षसमात्र एव सम्मुखपतितं मा चर्वयति किं पुना राक्षसराजः]

मञ्जीरकः—अलं कातरतया । सकलवीरवृन्दवन्दनीया हि वन्दिजातिः । कथमस्मद्विधेषु सकलभुवनैकवीरो विपरीतं वर्त्तिष्यते दशकण्ठः ।

नूपुरकः—(सहर्षम्) जइ एरिसं ता किंपि इमं णीसङ्को पुस्सि (उपसृत्य) अये, किंत्ति एत्तिआइं मत्थआइं उव्वहोअन्ति, किंति वा रक्खिअ उण अवराइं जत्तकुत्तवि ण णिक्खिप्पन्ति ।

[यदीदृगं तर्हि किमप्येनं निःशङ्कं प्रक्ष्यामि । अये, किमितीयन्ति मस्तक ह्यन्ते किमिति वैकं रक्षित्वा पुनरपराणि यत्रकुत्रचिन्न निक्षिप्यन्ते]

रावणः—आः पाप, कथमस्थाने शिरश्छेदवार्त्तयाऽमङ्गलमावेदयसि । वैतालिक इत्युपेक्ष्यः ।

मञ्जीरकः—(विहस्य) स्थाने शिरश्छेदवार्त्तापि भवतो मङ्गलाय ।

स्वरूपेणावतितीर्षतो रावणस्य बाहून् प्रति सदर्पैयमुक्तिः । बाहवो हि वियद्गङ्गाकमलान्युन्मूल्य दिग्गजानां दन्तांश्चोत्पाट्य बाल्यमयापयन्नित्यु संप्रति तेषां प्रौढ़तया प्रभूतपराक्रमत्वं ध्वन्यते । निजा भुजा इत्युक्त्या बाहुमात्रसहायकस्य स्वस्यापराजेयतां व्यञ्जयति । अत्रापि तदेव वृत्तम् ॥ ४३

कौतूहलम्=कौतुकम् ।

सकलानां=समेषां वीरवृन्दानां=वीरसमुदयानाम् वन्दनीया=आदरणी वन्दिजातिः=चारणगणः ।

विपरीतं वर्त्तिष्यते=अन्यथाऽऽचरिष्यति (हन्तुं प्रवत्स्यंतीति भावः)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रावणः—अथ किम्, ननु रे—

विद्याधरप्रणयिनी-करपल्लवाग्र-
लीलाविमुक्त-कुसुम-प्रकरावकीर्णे ।
श्रीचन्द्रचूड़चरणे च रणे च कामं
छिन्नोऽपि मस्तकगणो मम मङ्गलाय ॥ ४४ ॥

नूपुरकः—जदि एरिसो तुमं ता किंत्ति णिअरूअं संगोविअ चोराव्व पविट्ठोसि । [यदीदृशस्त्वं तर्हि किमिति निजरूपं संगोप्य चोर इव प्रविष्टोऽसि]

रावणः—धिङ् मूर्ख, न जानासि रे—

ये चन्द्रचूड़ाचलचालनैक-चातुर्यचिन्तामणयो भुजा मे ।
तैरेव भूयिष्ठतरैः प्रवृत्तश्चापाधिरोपाय कथं न लज्जे ॥ ४५ ॥

तत्कथय कुत्र जानकीति ।

मञ्जीरकः—(सविषादम्)

विद्याधरेति—विद्याधराणां=देवयोनिप्रभेदानां प्रणयिन्यः=रमण्यस्तासाम् [क]राः=हस्ता एव पल्लवाः तेषामग्रेण=प्राग्भागेन लीलया=सविलासम् विमुक्तः [=]प्रत्तः यः कुसुमप्रकरः=पुष्पसमुदयस्तेन अवकीर्णे=आच्छादिते श्रीचन्द्रचूड़स्य [=]चन्द्रशेखरस्य—शिवस्येति यावत्, चरणे=पादप्रान्ते रणे=युद्धे च कामं=यथेच्छं [छि]न्नः=कृत्तोऽपि मस्तकगणो=मुण्डश्रेणी मम मङ्गलाय=कल्याणाय जायते, इति [भा]वः । 'कीर्णे' इत्यन्तं सप्तम्यन्तं चन्द्रचूड़चरणरणयोरुभयोर्विशेषणम् । शिव-[च]रणयोः श्रद्धया रणे च प्रसन्नतया ताः पुष्पाणि वर्षन्ति । भक्त्यतिशयेन शिव-[च]रणे शिरांसि च्छिद्यन्ते तेन च प्रीतः शिवः सर्वविधमपि वरं प्रयच्छति । रणे [च] कृत्तानि शिरांसि पराक्रमं प्रख्यापयन्तीति स्थलद्वयेऽपि शिरश्छेदो मङ्गल-[ज]नकत्वेनाभिप्रेयते ॥ ४४ ॥

ये चन्द्रचूड़ेति—ये मे=मम (रावणस्य) चन्द्रचूड़स्य=शिवस्याचलः [=]पर्वतः=कैलासस्तस्य चालनम्=स्थानात् प्रच्यावनं तत्र एकम्=असमं चातुर्यं [=]दक्षता तत्र चिन्तामणयः=प्रसिद्धसामर्थ्याः (सन्ति) भूयिष्ठतरैः=बहुतरैः [त]ैरेव भुजैः=बाहुभिः चापाधिरोपाय=धनुरुत्तोलनाय प्रवृत्तः=तत्परः (अहम्)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

यस्याः स्वयं कुलगुरुः किल याज्ञवल्क्य-
स्तातः स एष जनको जननी धरित्री।
साऽपि त्वमद्य बत दुर्विधिवैशसेन
वत्से निशाचरकराङ्कगता भवित्री ॥ ४६ ॥

नूपुरकः—(अपवार्य) अलं तावेण। कहं एत्तिअमेत्तम्मि वीरमण्डले णत्थि जो इमस्स हठप्पउत्तस्स पुरदो होदि [अलं तापेन। कथमेतावन्मात्रे वीरमण्डले कोऽपि नास्ति योऽस्य हठप्रवृत्तस्य पुरतो भवति]

मञ्जीरकः—कुपितस्य दशकण्ठस्य कः सम्मुखे भवति क्षत्रियः, ऋते सहस्रबाहोः कार्त्तवीर्यात्।

कथं=केन प्रकारेण न लज्जे सर्वथापि मया लज्जितुमुचितमिति भावः। मम बाहुभिरह हरवासभूमिं कैलासपर्वतं समग्रमुदतोलयं तैरेव बाहु(करणैः) स्वल्पतरभारं शिवधनुरुत्थापयितुं कृतसन्नाहोऽहं भवामि। महति कर्मणि यशो लब्धवतो ममाऽत्र लघुनि हरचापारोपणे प्रवृत्तिर्लज्जा सर्वथोपयुक्तेति तात्पर्यम्। इन्द्रवज्रावृत्तम्—स्यादिन्द्रवज्रा यदि तौ ग इति तल्लक्षणात् ॥ ४५ ॥

यस्याः स्वयमाह— वत्से=जानकि, यस्याः तव कुलगुरुः=याज्ञवल्क्यः=तन्नाम्ना प्रसिद्धो योगिराज, तातः=पिता स एषः (स्वगुणप्रसिद्ध जनकः=विदेहः, जननी = माता च धरित्री=पृथ्वी। सापि = एतादृशे सर्वथा पवित्रे च कुले जातापि त्वमद्य दुर्विधेः=दुर्भाग्यस्य वैशसेन = क्रूर (सर्वथाऽनतिक्रमणीयाया नियतेः प्रभावात्) निशाचरस्य=राक्षसस्य कराङ्कगता=करक्रोडगता (अधीनेति तात्पर्यम्) भवित्री = भविष्यसि। सापीत्यत्रत्योऽपिशब्दः सर्वथा जानक्याः पूर्वोक्तं कुलगौरवं स्मारयन् रावणकरगमनायोग्यतां व्यनक्ति। इदमपि वसन्ततिलकं वृत्तम्। अनेन श्लोकेन दण्डकारण्ये सीताया रावणकर्तृकं भावि हरणं सूचितम् ॥ ४६ ॥

हठप्रवृत्तस्य=धनुरारोपणमकृत्वा बलात् सीतां निनीषतः। पुरतो भवति=निवारयति। सहस्रबाहोः=कार्त्तवीर्यात् ऋते=विना (स एवाऽत्र समर्थ इति भावः) इदं च सहस्रबाहोर्बाणस्य प्रवेशं सूचयितुमुक्तम्। असूचितस्य पात्रस्य प्रवेशो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नूपुरकः—(सहर्षम्), जीविदं ह्म, पेक्ख ण पत्तो सहस्सबाहू किदवीरपुत्तो
[जीविताः स्मः, पश्य ननु प्राप्तः सहस्रबाहुः कृतवीर्यपुत्रः]

मञ्जीरकः—धिङ् मूर्ख, जामदग्न्यकुठारधाराजलनिमग्नः क्व सम्प्रति कार्त्तवीर्यः । तन्नूनमयं बाणासुरो भविष्यति । हन्त भोः, तदिदमनर्थान्तरम् । (विमृश्य) अथवा विषस्य विषमौषधं भविष्यति ।

(ततः प्रविशति बाणासुरः)

बाणासुरः—(परिक्रम्य, साटोपम्)

कैलासशैलशिखरादपि भूरिसारं
निस्सीमभारमधुना धनुरिन्दुमौलेः ।
आलम्ब्य पुष्पसदृशं करपल्लवेन
स्फीतं भुजद्रुमवनं सफलं करामि ॥४७॥

च युज्यते इति सङ्गीतकल्पतरुः । जामदग्न्यस्य=परशुरामस्य कुठारस्य=परशोः धारा तदेव जलं तत्र निमग्नः=ब्रुडितः । परशुरामेण परशुना हत इति भावः ।

अनर्थान्तरम् = अन्योऽनर्थः, एको रावणः स्वयमनर्थभूतोऽपरश्चायं बाण इति उभयमुपस्थिता साम्प्रतमनर्थद्वयी ।

विषस्य विषमौषधं भविष्यति—बाणः रावणं शमयित्वा स्वयमपि शान्तो भविष्यति । विषं शमयितुमन्यद् विषमुपयुञ्जते वैद्याः ।

कैलासशैलेति—कैलासः = हराचल एव शैलः=पर्वतस्तस्य शिखरात् उच्छ्रितादग्रभागात् अपि भूरिसारम्=समधिकभारम् (अत एव) निस्सीम=निरवधि भारो=गुरुत्वं यस्य तत् इन्दुमौलेः=शिवस्य धनुः पुष्पसदृशम्=कुसुममिव (अनायासोत्थापनीयतासूचनायेदम्) करपल्लवेन=करः पल्लव इवेत्युपमितसमासः तेन आलम्ब्य=उत्थाप्य स्फीतम्=समृद्धम् इदं भुजद्रुमवनं=बाहुमण्डलं सफलं=फलवत् करोमि=सम्पादयामि । कैलासादप्यधिकभारस्यास्य चापस्य पुष्पवदनायासोत्तोलनेनास्य मम भुजमण्डलस्य साफल्यं सम्भवतीति तदाशयः । भुजानां द्रुमवनत्वेन तदङ्गुलीनां पल्लवत्वेन धनुषस्तदग्रसंलग्नतया पुष्पतया धनुरुत्तोलनस्य च फलत्वेन रूपणं बोध्यम् । तदत्र साङ्गपरम्परितरूपकमलङ्कारः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

रावणः—(अनाकर्णितकेन) कथमद्यापि नानीयते जानकी ।

बाणः—(विलोक्य, स्वगतम्) कथमिह दशकण्ठोऽपि । (प्रकाशम्) एतावति वीरलोके न केनापि तावदारोपितमैश्वरं धनुः ।

नूपुरकः—नारोपणीयं च ।

रावणः—कथमद्यापि नानीयते सीता । तदयं चन्द्रहास एव बलादान

बाणः—(विहस्य) यदीदृशं वीरडम्बरं तत्किमारोप्यैव हरकार्मुकं न यते सीता ।

रावणः—आः, कोऽयमलीकपण्डितः ?

उद्दण्डचण्डिमलसद्भुजदण्डखण्ड-
हेलाचलाचलहराचलचारुकीर्त्तेः ।
कीदृग्यशस्तुलितबालमृणालकाण्ड-
कोदण्डकर्षण-कदर्थनयाऽनया मे ॥ ४८ ॥

बाणः—सोऽयमशक्तिप्रकारः ।

वीरडम्बरं—वीरतादर्पः ।

उद्दण्डचण्डिमेति—उद्दण्डः = उग्रो यश्चण्डिमा = क्रौर्यं तेन ल = शोभमानो यो भुजदण्डः = बाहुलता तस्य खण्डः = एकदेशः (अग्रभा तेन हेलया = अनास्थया (प्रयत्नबाहुल्यनिरपेक्षमित्यर्थः) चलाचलः = च हराचलः = कैलासपर्वतः ततः चार्वी = मनोरमा कीर्त्तिः = यशो यस्य पराक्रमशालिबाहुशिखरेण कैलासमुत्थाप्य शारदशशधरशुभ्रं यशोऽधिग इत्यर्थः । मे = मम रावणस्य तुलितः = समीकृतः बालस्य मृणालस्य कम काण्डः = प्ररोहो येन तादृशो यः कोदण्ड = श्चापस्तस्य कर्षणं = नमनं त कदर्थना = वृथा क्लेशस्तया कीदृक् = किंविधं यशः ? प्रागुक्तविशेषणयुतस्य रावणस्यातिकोमलनिस्सारशिवधनुरारोपणेन कीदृशी कीर्त्तिः ? न का भावः । महति कार्ये सफलस्य तुच्छे कर्मणि सिद्धिर्न यशसे, सिंहं परा चतः शशकविजयः प्रत्युतायश एव प्रख्यापयतीति । चरिचलिपतिव वा द्वित्वमित्यादि वार्त्तिकेन चलाचलशब्दः साध्यते ॥ ४८ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रावणः—आः, कथं दशमुखस्याप्यशक्तिसम्भावना।

बाणः—(विहस्य) अये, बहुमुखता नाम बहुप्रलापितायाः कारणम्। विक्रमस्य बहुबाहुतैव।

रावणः—आः, कथं रे, पलालभारनिस्सारेण भुजभारेण वीरंमन्योऽसि।

बाणः—(सक्रोधम्) अये समरकलाकुण्ठ दशकण्ठ, ममापि भुजभारं निस्सारं व्यपदिशसि। न जानासि किं, यतोऽत्रैव—

पितुः पादाम्भोजप्रणतिरभसोत्सिक्तहृदयः,
प्रयातः पातालं न कतिकतिवारानकरवम्।
सहस्रे बाहूनां क्षितिवलयमासज्य सकलं,
जगद्भारोद्वेलां फणफलकमालां फणिपतेः॥ ४९॥

बहुमुखतया बहुवक्तुं शक्यते, योद्धुं तु बाहुबहुत्वमेव प्रेरयतीति तव बहुमुखता न वीरताफला।

पलालः = शुष्कतृणकाण्डः। तद्वन्निस्सारेण = शक्तिरहितेन।

पितुरिति—पितुः = बलेः पादाम्भोजे = चरणकमले प्रणतिः = प्रणाममात्र रभसः = समधिका स्पृहा तया उत्सिक्तं = गर्वितं हृदयं यस्य एवम्भूतः अहम् पातालं = रसातलम् (स्वपितुरावासदेशम्) प्रयातः = गतः कतिकतिवारान् = कतिधा बाहूनां = निजभुजानां सहस्रे (समुदाये) (तेषां तत्सङ्ख्याकत्वात् तथोक्तिः) सकलं=समग्रं (गिरिमालासमुद्राद्युपेतं) क्षितिवलयं भूमण्डलम् आसज्य = निधाय फणिपतेः = शेषस्य फणा एव फलकानि तेषां मालां = समूहं जगद्भारोद्वेलां = भूभाररहितां = धरणीधरणजन्यक्लेशास्पृष्टाम् अकरवम्=न कृतवान् मयि बाहूनां सहस्रेण भुवं दधाने शेषो विश्राम्यति पातालं चाहं पितरं प्रणन्तुं प्रयामि बहुधा, तदहममुं विश्रामावसरं कतिधा ...ाय समर्पितवानस्मि। एतेन कैलासमात्रमुत्थाप्य विकत्थमानस्त्वं स-सागर-...तां महीमुत्थापितवतो मम पुरो न जाने कथं न जिह्रेषीति बाणस्याशयः। ...त्र शिखरिणीवृत्तमुक्तलक्षणम्॥ ४९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

रावणः—अरे, वलितनय, चलितनयवृत्तिरसि; यदलोकविक्रमवर्णनया विक्रमस्य मे पुरतः स्वात्मानं विडम्बयसि।

बाणः—कथं त्वमेव सत्यविक्रमः।

रावणः—अथ किम्?

दोष्णां न मे विदितवानसि वीरलक्ष्मी-
प्रासादविभ्रमवतीं पदवीं गरिष्ठाम्।
ये चन्द्रशेखरगिरौ करपल्लवाङ्क-
पर्यङ्कशायिनि दधुः कलशप्रतिष्ठाम् ॥५०॥

बाणः—अलमलीकवाग् विग्रहेण। तदिदं धनुरावयोस्तारतम्यं निरूपयिष्यति

मञ्जीरकः—अये बाण-रावणौ, किमिदं नरवीरैकसमर्पणीयसीतापरिणयपथेन विफलमायास्यते चेतःपदवी।

बाणः—किमेतावता—

त्रिपुरमथनचापारोपणोत्कण्ठता धी-
र्मम न जनकपुत्री-पाणिपद्मग्रहाय।

वलितनय—नीतिनिष्ठ, (बाण इति वा) चलिता नये वृत्तिः=स्थितिः इत्यर्थः। अत्र प्रथमार्थेन विरोधो द्वितीयेन च परिहारः।

दोष्णामिति—वीरलक्ष्मीप्रासादः = वीरतानिवासगृहम् तस्य वि =विलासोऽस्या अस्तीति तथा ताम् (वीरता निवाससौभाग्यसमृद्धाम्) मे=न) दोष्णां = बाहूनां गरिष्ठां = गुरुतरां पदवीं = मर्यादां न विदितवान् = ज्ञातवान् असि। वीरतानिवासगृहाणां मम बाहूनां पराक्रमं न ज्ञातवानसि कि ये मम भुजाः चन्द्रशेखरगिरौ=हराचले करपल्लवाङ्कपर्यङ्कशायिनि=हस्ताग्रवर्ति कलशप्रतिष्ठां=कलशशोभाम् दधुः=धारयन्तिस्म। बाहवो हि वीरलक्ष्मीप्रासा-स्तत्र स्थितः कैलासः कलश इव प्रतिभातीति भावः।

अलीकः=मिथ्या, वाग्विग्रहः=विवादः, अहंश्रेष्ठः, अहंश्रेष्ठ इत्येवं तारतम्यम्=उत्तमाधमभावम्।

त्रिपुरमथनेति--त्रिपुरमथनस्य=शिवस्य चापस्य=धनुष आरोपणे=आ

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपि तु बहुलबाहुव्यूहनिर्व्यूहमाला-
बलपरिमलहेलाताण्डवाडम्बराय ॥५१॥

रावण:—

उन्मीलितेन शिखरेण हराचलस्य
प्रागेव मे भुजवनस्य कृता परीक्षा।
एषा विदेहतनयाकुचकुम्भकेलि-
कौतूहलाद्गिरिशकार्मुककर्मदीक्षा ॥५२॥

र्वीकृतासम्पादने मम धीः=बुद्धिः उत्कण्ठिता=उत्सुका, जनकपुत्र्याः=सीतायाः णिपद्मग्रहाय=करकमलग्रहणाय न (उत्कण्ठिता मम धीरिति योजनीयम्) पि तु बहुलाः=भूयांसः। ये बाहवो=हस्तास्तेषां व्यूहः=समूहस्तस्य निर्व्यूहा असङ्कीर्णप्रसारा या माला=श्रेणी तस्याः बलपरिमलः=पराक्रमसुगन्धः (परि-लोऽत्र यशः) तस्य ताण्डवं=क्रीडानृत्यं तत्र आडम्बराय=प्रख्यापनाय (उत्क-ठता मम धीरित्यस्यात्रापि योजना) केवलहरचापारोपणमात्रविधाने ममा-ह:, सीतापरिणयविषये तु नाहमभिलाषी। अमीषां बहूनां पराक्रमः प्रसि-तु ममैतावतैव निर्बन्ध इत्यभिप्रायः। एतेन निजस्य विशुद्धान्तःकरणता तिज्ञां चाकारणकलुषान्तःकरणता प्रत्याय्यते। मालिनीवृत्तम्—ननमयययुतेय ालिनी भोगिलोकैः" इति तल्लक्षणात् ॥ ५१ ॥

वि उन्मीलितेनेति—हराचलस्य=कैलासस्य उन्मीलितेन=चालितेन (उत्थापि-तेन) शिखरेण=अग्रभागेन मे=मम भुजवनस्य=बाहुमण्डलस्य परीक्षा=श्रेणीनिर्धा-रणा प्रागेव=अस्माद्धनुरारोपणात् पूर्वमेव कृता=विहिता, (अतश्चाहमिह न बाहुबलं प्रदर्शयितुमुत्सुकोऽस्मि) एषा (साम्प्रतिकी) विदेहतनयायाः=जानक्याः कुचौ स्तनौ एव कुम्भौ (मांसलत्वोच्छ्रायसाम्यकृतः कुम्भत्वारोपः) ताभ्याम् केलिः क्रीडा तत्र कौतूहलम्=अदम्योऽभिलाषस्तस्मात् गिरिशस्य=शिवस्य कार्मुकस्य धनुषः कर्मणि=नमनरूपे व्यापारे दीक्षा=प्रवृत्तिः। केवलजानकीकुचकुम्भपरिर-म्भविषयकाभिलाषप्रसवा ममाऽत्र प्रवृत्तिरित्युत्तरार्धाशयः। एवञ्च बाण-राव-णयोरुद्देश्यभेदः प्रदर्श्यते, बाणस्य बाहुबलप्रदर्शने मनोरथे सफलेऽपि सीताविषयं तस्य ममत्वं च रावणेन व्यक्तीकृतम् ॥ ५२ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

(नेपथ्ये)

अमुरसुरनिशाचरोरगाणामपि नरकिन्नरसिद्धचारणानाम् ।
नमयति यदि कोऽपि चापमेतन् मम दुहितुः स करग्रहं तनोतु॥

रावणः—

रे रे भुजाः कुरुत चन्द्रकलाकिरीट-
कोदण्डकर्षणयशोधवलां त्रिलोकीम् ।
अङ्गीकुरुध्व मचिराच्च विदेहपुत्री-
वक्षोजचन्दनरजःपरिधूसरत्वम् ॥ ५४ ॥

असुरसुरेति—असुराः = दैत्याः, सुराः = देवाः निशाचराः = रा
उरगाः = सर्पाश्च तेषाम्, अपि च किञ्च नराः = मनुष्याः किन्नराः = देव
प्रभेदाः सिद्धाः = तद्विधा एवैके चारणाः—वन्दिविशेषाश्च तेषाम् (म
यदि कोऽपि एतत्—पुरोदृश्यमानम् चापम् = धनुः यदि नमयति = आरो
स (जातियोनिसामाजिकमर्यादानैरपेक्ष्येण) मम दुहितुः = कन्यायाः क
= विवाहं तनोति = करोति । मम दुहितुरित्युक्त्या प्रतिज्ञातुरत्रार्थे दा
तेन चास्याः प्रतिज्ञाया अवश्यपूरणीयता व्यज्यते । पुष्पिताग्रावृत्तम् "
न युगरेफतो जकारो युजि च नयौ यरजाश्चपुष्पिताग्रा" ॥ ५३ ॥

रे रे भुजा इति—रे रे भुजाः = बाहवः (सोद्दीपनं सम्बोधनम्)
लोकीम् = त्रयाणां लोकानां समाहारस्त्रिलोकी ताम् चन्द्रकला किरीटे =
यस्य तस्य शिवस्य कोदण्डः = चापस्तस्य कर्षणं = नमनं तेन यद्यशः =
= तेन धवलां = स्वच्छां कुरुत = सम्पादयत (शैवं धनुरिदमारोप्य
डिण्डिमं त्रिभुवने मुखरयतेति भावः) त्रिलोक्या धावल्यासम्बन्धेऽपि
सम्बन्धवर्णनरूपातिशयोक्तिः । अचिरात् = शीघ्रमेव विदेहपुत्री = जानकी
वक्षोजौ = स्तनौ तस्य चन्दनम् = चन्दनकृतं स्थासकं तस्य रजो = धूलि
परिधूसरत्वम् = रजस्वलत्वञ्च अङ्गीकुरुध्वम्—स्वीकुरुत । अत्रापि
तिलकं वृत्तम् ॥ ५४ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(धनुरालोक्य, स्वगतम्) अये, दुर्विगाहमिदम्। तदलमनेन। (प्रकाशम्) बाण, त्वमेव तावदग्रे धनुरारोपय, अस्माकमपि नूतनागतत्वेन मान्योऽसि।

बाणः—तथाऽस्तु (इति परिक्रामति)

रावणः—(स्वगतम्) अरे हृदय, अलं कातरतया, अयं तावत्कृतरः कुण्ठीकृतदशकण्ठे शितिकण्ठकार्मुके।

अन्योऽपि कोऽपि यदि चापमिमं विकृष्य
सीताकरग्रहविधिं विदधीत धीरः।
लङ्कां नयामि च गिरानुनयामि चैनां
द्रागानयामि च वशे जनकेन्द्रपुत्रीम् ॥ ५५ ॥

मञ्जीरकः—सखे, पश्य।

बाणस्य बाहुशिखरैः परिपीड्यमानं
नेदं धनुश्चलति किञ्चिदपीन्दुमौलेः।

दुर्विगाहम्—सुखेन आरोपयितुमशक्यम्।

कातरतया—अयं धनुरारोप्य सीतां वरिष्यतीति चिन्तया। कुण्ठीकृतः=असफलीकृतो दशकण्ठो=रावणो यत्र तत्र, शितिकण्ठस्य=नीलकण्ठस्य शिवस्येति भावः।

अन्येऽपि कोऽपीति—कोऽपि=अज्ञातपरिचयः अन्यः=बाणाद्भिन्नोऽपि धीरः (योऽधुना नोत्तम्यति) (बाणस्य तु शक्तेः परत एवेदम्) इमं चापं=धनुर्विकृष्य=नमयित्वा सीताकरग्रहविधिं विदधीत सीतां परिणयेत (नातः कापि मदीया क्षतिः) एनाम्=जनकेन्द्रपुत्रीम् विदेहतनयां लङ्कां नयामि गिरा=वाचा अनुनयामि=विश्वासमुत्पाद्य प्रसादयामि द्राक्=शीघ्रम् वशे=अधीनतायां आनयामि। अतः सम्प्रति केनापि सीतायामूढायां नमयोदासनीयं, पुरः करणीय सीतापहरणविषये कृतनिर्णयत्वादिति भावः। "अन्योऽपि" इत्युक्त्याऽथाहमेव सम्प्रत्येव सीतामपहर्त्तुं सफलप्रवृत्तिः स्यां तदा तु कथैवान्या नोपतिष्ठते इत्यपि व्यन्यते। अनेन सीताहरणोपन्यासेन च भाविसीताहरणं सूच्यत इति बोध्यम्। पूर्वोक्तमेव वृत्तम् ॥ ५५ ॥

बाणस्येति—बाणस्य=बलितनयस्य बाहुशिखरैः=बाहवः शिखराणीव तैः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

कामातुरस्य वचसामिव संविधानै-
रभ्यर्थितं प्रकृतिचारु मनःसतीनाम् ॥ ५६ ॥

रावणः—(सविषादमात्मगतम्) सीतानुनयप्रत्यूहपिशुनेव दुरुपश्रुतिः (प्रकाशम्) अये वाण, अपि नाम ते पलालभारनिस्सारो भुजभारः ।

वाणः—कथं भुजमण्डलमिदमालोकयन्नपि कटुभाषितां न मुञ्चसि ।

रावणः—तत्किमनेन करिष्यसि ।

वाणः—यत्कृतं हैहयराजेन ।

रावणः—इदमसौ ते भुजवनं निजप्रतापानले निर्दहामि ।

वाणः—इदमहं त्वत्प्रतापानलमनेकरुचिरचापचुम्बितनिजवाहुवल निवहनिर्मुक्तनाराचधारासारैः शमयामि ।

परिपीड्यमानं—भूयसा प्रयत्नेनाभृश्यमान मुत्थापयितुमितस्ततो मृद्यम इदं पुरोवर्त्ति इन्दुमौलेः=शिवस्य धनुः किञ्चिदपि = ईषदपि न चलति = (उत्थानस्य तत्र का कथा ?) उदाहरति, कामातुरस्य = अतिशयकामाकु वचसां = नानाविधानां वाग्भङ्गीनां संविधानैः=विरचनैः अभ्यर्थितं = प्रा प्रकृतिचारु = स्वभावदृढम् (चारुताऽत्र दृढताकृता) सतीनां = पतिव्र मनः = हृदयमिव । वाणस्य बाहुभिराघृष्यमाणं शैवं धनुः कामिवचनैः सा हृदयमिव न चलतीति भावः । दृष्टान्तोऽत्रालङ्कारः सधर्मवस्तुप्रतिबिम्बनात् तु वसन्ततिलकमेव । अनेन भावी सीताकर्तृको रावणतिरस्कारः सूचितः ॥

सीताया अनुनयः = प्रलोभनं तत्र प्रत्यूहो = विघ्नस्तस्य पिशुना = का दुरुपश्रुतिः दुष्टमाकर्णितम् ।

हैहयराजेन = कार्त्तवीर्येण, तेन हि रावणस्य पराजयः कृत इति पु प्रसिद्धम् ।

अनेके ये चापास्तैश्चुम्बिताः युक्ता बाहवः = भुजा एव वला = मेघाः तेषां निवहः = समूहः तस्मात् निर्मुक्ताः = विसृष्टाः नाराचाः = तेषां धारा = परम्परा तस्या आसाराः = अविरलवर्षणानि तैः शम = शान्तं करोमि ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रावणः—

रे वाण, मुञ्च मयि वाणशतानि पञ्च,
नन्वस्ति मे करतले करवालवल्ली ।
रे पञ्चवाण, विवृणु त्वमपि स्ववाणान्,
नन्वेति सा युवतिलोकललामवल्ली ॥ ५७ ॥

नूपुरकः—अये वाणलावणा, सअं जव्व अप्पाणं वण्णऽन्तौ ण लज्जेथ [अये ...णरावणौ, स्वयमेवात्मानं वर्णयन्तौ न लज्जेथे]

रावणः—धिङ् मूर्ख, कथमात्मैकश्लाघ्यो दशकण्ठः, ननु रे,—

मन्दोदरीकुटिलकोमलकेशभार—
मन्दारदाममकरन्दरसं पिबन्तः ।
वीणानिनादमधुरध्वनिमुद्गिरन्तो
मद्विक्रमं मधुकरा अपि कीर्त्तयन्ति ॥ ५८ ॥

रे वाणेति—रे वाण, (सोपहासं सम्बोधनमिदम्) मयि पञ्चवाणश...नि = वाणानां पञ्चशतीं मुञ्च = त्यज तावन्निर्वाणैर्मां प्रहर, ननु मे करतले हस्ते करवालवल्ली=असिलताऽस्ति=विद्यते सर्वमपि वाणगणं मम चन्द्रहासः ...त्तुं मलमिति न मम काऽपि ततो भीतिरिति निर्भयतां व्यञ्जयितुं 'ननु' ...म् । रे पञ्चवाण=कन्दर्प, त्वमपि स्ववाणान् विवृणु = प्रकाशय ननु सा ...कप्रसिद्धा युवतिलोके = युवतिसमूहे ललामवल्ली (स्वरूपा) सुन्दरीलता ...ति = इतोऽभिवर्त्तते, त्वया प्रहृतानां वाणानां वाधां शमयितुं कापि युवतिः ...ा इयं त्वसाधारणसौन्दर्यसारसहिताऽतः किमपि त्वयापि न मम विघटनीय...ति तदाशयः, तदेवात्रापि वृत्तम् ॥ ५७ ॥

मन्दोदरीति—मन्दं = कृशमुदरं = शरीरमध्यं यस्याः सा रावणमहिषी ...राः कुटिलः=वक्रः (वक्रता च भ्रमरसादृश्यमावेदयति) कोमलः=स्निग्धश्च ...केशभारः = केशपाशः तत्र (सन्निवेशितम्) यत् मन्दाराणां = देवकुसुमानां ...=माल्यम् तस्य मकरन्दरसं=पुष्पासवं पिबन्तः=आस्वादयन्तः (अत एव

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

बाणः—कथमयं सुरतरुकुसुमदामकमनीयकामिनीजनोपभोगसौभाग्यं वि- यति ? तदिदानीम्—

अमी मे दोर्दण्डास्तुलितहरशैलैकशिखरा-
स्तुरासाहं साहङ्कृतिकरतलन्यस्तकुलिशम् ।
पराभूय स्वैरं त्रिदशवनमुन्मूल्य सकलं,
मम क्रीडोद्यानं सुरतरुमनोज्ञं विदधतु ॥ ५९ ॥

(इति निष्क्रान्तः)

रावणः—कथमयं निर्गतः ? अहं तु—

कषायास्वादनेन रक्तकण्ठतया) वीणानिनादः=तन्त्रीस्वरस्तद्वन् मधुरध्वा- खदं शब्दं (श्रोत्रपेयम्) उद्गिरन्तः=व्याहरन्तः मधुकराः=भ्रमरा अ- विक्रमं=मदीयपराक्रमं कीर्त्तयन्ति=गायन्ति । भ्रमरा अपि यदि मदीयां गायन्ति का कथा पुनश्चेतनाप्राशस्त्यशालिनां मनुष्यादीनामित्यपिना- श्यते । "मन्दारः पारिजातकः" "मकरन्दः पुष्परसः" इत्यमरः ॥ ५८ ॥
सुरतरुः=मन्दारः तस्य कुसुमं=पुष्पम्, तस्य दाम=माल्यम् तेन कमनीयः=सु- कामिनी=स्त्री तल्लक्षणो जनः तस्य उपभोगः=(क्रीडाविलासादिः) ।

अमी म इति— तुलितानि=साम्यं प्रापितानि हरशैलस्य=कैलासस्य नि=प्रसिद्धानि शिखराणि=शृङ्गाणि यैस्ते अमी=दृश्यमाना मम बाणस्य दो- =भुजदण्डाः साहङ्कृति=सगर्वं (अहङ्कारश्चाऽयं कुलिशं करे कृते स- यताभिमानेन) करतले=हस्ते न्यस्तं=स्थापितं कुलिशं=वज्रं येन तं तु- =वज्रिणम् पराभूय=विजित्य सकलं त्रिदशवनम्=समग्रं नन्दनकाननम् =यथारुचि, उन्मूल्य=उत्पाट्य मम (बाणस्य) क्रीडोद्यानं=विलासोपवन- तरुभिः=मन्दारवृक्षैः मनोज्ञं=सुन्दरं, विदधतु=कुर्वन्तु । अमी समुच्छ्रित- करा वज्रपाणिमपि शक्रं पराजित्य नन्दनवनाहृतैः सुरतरुभिर्मदीयं विला- भूषयन्त्विति भावः । "तुराषाण्मेघवाहनः" "कुलिशं भिदुरं पविः, इत्यमरः । शिखरिणीवृत्तम् ॥ ५९ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनाहृत्य हठात् सीतां नाऽन्यतो गन्तुमुत्सहे ।
न शृणोमि यदि क्रूरमाक्रन्दमनुजीविनः ॥ ६० ॥

मञ्जीरकः—वत्से जानकि, अधुना दैवैकरक्षणीयासि ।

रावणः—(कर्णं दत्त्वा) अये, कस्याऽयमाक्रन्दः श्रूयते नभसि । (निपुणं रूप्य) नूनमनेन कस्यचिन्नाराचपीडितेन कठोरमाक्रन्दता गगनपथचारिणा रीचेन भवितव्यम् । तदेनमाश्वासयामि तावत् (इति निष्क्रान्तः) ।

नूपुरकः—वअस्स, दिट्ठिआ वग्घस्स विअ मुहादो कुरङ्गी विअ इमस्स थादो उव्वरिदा जाणई [वयस्य, दिष्ट्या व्याघ्रस्येव मुखात् कुरङ्गीवास्य स्तादुर्वरिता जानकी] ।

मञ्जीरकः—सखे, एवमेतत् । तदेहि । वृत्तान्तमिमं जनकराजस्य निवेदयावः ।

(इति निष्क्रान्ताः सर्वे)

इति प्रथमोऽङ्कः ।

—०—

अनाहृत्येति—हठात्=बलात् सीतामनाकृष्य अन्यतः=अन्यत्र (सार्वविभक्तिकस्तसिः) गन्तुं न उत्सहे=इच्छामि । प्रकृतापवादमाह=यदीति—यदि नुजीविनः (कस्यापि) स्वानुचरस्य क्रूरम्=अतिवेगम् आक्रन्दं=रुदितं न णोमि=नाऽऽकर्णयामि । स्वानुचरवर्गे कुतश्चिद्विपत्पातादेव सीतामनाहृत्य मयमितः प्रस्थानं सम्भवतीति भावः । इदं च भाविनो मारीचाक्रन्दस्य सूचकम् ।

अधुना=रावणे तथा प्रतिश्रृण्वति, दैवैकरक्षणीया=भाग्यैकरक्ष्या (भाग्यादेव कुतोऽपि पुरुषकारात्) रावणानुचराक्रन्दसम्भव इति भावः ।

निष्क्रान्ताः सर्वे इति—इदं चाङ्कावसानं सूचयितुम् । 'अन्तनिष्क्रान्तखिलपात्रोऽङ्कः परिकीर्त्तितः' इत्युक्तेः ।

"अङ्कः" इति तल्लक्षणं यथा—

"प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः ।
भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः ॥
विच्छिन्नावान्तरैकार्थः किञ्चित्संलग्नविन्दुकः ।
युक्तो न बहुभिः कार्यैर्बीजसंहृतिमान्न च ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

[द्वितीयोऽङ्कः]

(ततः प्रविशति तापसः)

तापसः—(समन्तादवलोक्य) अहो,—अयमनेकशुकशावकानुगमनिता हरिल्लतावितानमनोरमारामरमणीयसन्निवेशप्रदेशः । (नेपथ्याभिमुखमवलोक्य कथमयं भिक्षुः । भिक्षो, इत इतः ।

(प्रविश्य)

भिक्षुः—अपि कुशलं तापसस्य ?

तापसः—क्षेममस्माकम्, युष्माकं च कुशलम् ?

भिक्षुः—इदानीं विशेषतो भवद्दर्शनात् ।

तापसः—(पुनः सप्रणयम्) ननु कीटवन् महीपर्यटनेन श्रान्तो भवान् तत्र मिथिलायां पञ्चरात्रनिवासेन श्रमोऽपनेतव्यः । प्रसङ्गादयं च राजा जन द्रष्टव्यः ।

नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् ।
आवश्यकानां कार्याणामविरोधाद्विनिर्मितः ॥
नानेकदिननिर्वर्त्य-कथया संप्रयोजितः ।
+ + +
प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः ।
अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः ॥"

साहित्यदर्पणे

इति श्रीरामचन्द्रमिश्रविरचिते प्रसन्नराघवप्रकाशे प्रथमाङ्क-प्रकाशः ।

—०—

अनेकेषाम्=बहूनाम्, शुकशावकानाम्=बालशुकानाम्, अनुगमेन=मिलने नितान्तं हरित्=तद्वर्णा या लता=वल्ली तस्याः वितानः=विस्तारः तेन मनो मस्य=मनोहरस्य आरामस्य=उद्यानस्य रमणीयः सन्निवेशो=निवेशनम् यत्र प्रदेशः ।

कीटवदिति–कीटा यथाऽविश्रान्तमत्यक्तभूभागं च महीं पर्यटन्ति तथ (चारतया तथा पर्यटनस्य समुचितत्वात्) मिथिलायाम्=तीर्थत्वेनाभिमतायाम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

भिक्षुः—किमस्माकं निरीहाणां राजदर्शनेन ।

तापसः—नूनमयं ब्रह्मविद्याविनोदकुशलः खलु सीरध्वजः । तेन द्रष्टुमुचित एव भवादृशाम् ।

भिक्षुः—अये, राजापि ब्रह्मविद्यावानिति सत्यमेतत् ?

तापसः—भिक्षो, सत्यमेतत्, देवस्य दश—(इत्यर्धोक्ते) देवस्य शितिकण्ठस्याज्ञा ।

भिक्षुः—(विहस्य) अलमपलापेन । विदितं मया, राक्षसः खलु भवान् ।

तापसः—तत्कथय विस्रब्धं को भवानिति ?

भिक्षुः—अहमपि भवादृश एव कोऽपि राक्षसः ।

तापसः—तदाकर्ण्यताम् । अहं हि सकलमन्त्रिमुकुटमाल्येन माल्यवता हितस्ताटकावनम् । आकर्णितं हि तेन यत् किल कोऽपि कौशिको नाम मुनी राजानमयोध्याधिपतिमेत्य स्वमखरक्षणाय तस्य रामनामानं तनयं सानुजं याचितवान् । तेन चावश्यं माननीयो मुनिरिति निजनयनाभ्यामपि प्रियतमौ निजतनयौ तस्य समर्पितौ ।

भिक्षुः—ततस्ततः ।

निरीहाणाम्=त्यक्ताभिलाषाणाम् यथोक्तम् "निरीहाणामीशस्तृणमिव तिरस्कारविषयः" इति । ब्रह्मविद्या=वेदान्तविद्या तया विनोदश्चर्चासुखं तत्र कुशलः=दक्षः ।

सत्यमेतत् ?—भूयस्तया तु राजानो भौतिकसिद्धय एव प्रयतमाना अध्यात्मविषय उदासत इति प्रश्नावसरः । "इत्यर्धोक्ते" इति चिराभ्यस्ततयाऽनिच्छन्नपि दशकण्ठेत्युच्चारयितुं दशेत्युच्चार्य स्वप्रकाशभयेन तद्गोपयितुमिच्छुः शितिकण्ठस्येत्याह ।

अपलापेन=स्वरूपगोपनाय=प्रयत्नान्तरानुष्ठानपूर्वकं प्रकटितार्थप्रच्छादनात्मकाय ।

मुकुटमाल्येन=आदरणीयेन (माल्ये आदरातिशयस्य स्वाभाविकतया तथा रूपणम्) ।

स्वमखरक्षणाय=राक्षसकृतेभ्य उपद्रवेभ्यस्त्राणाय । निजनयनाभ्यामपि प्रिय-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

तापसः—ततस्तेन मुनिना पारितोषिकं ताटङ्कयुगमर्पितं तस्य राज्ञः। उक्तं 'राजन्, दिव्यमिदं ताटङ्कयुगम्।

तदिदं वीरसूकर्णनिवेशोचितमित्यसौ ।
अन्तःस्फुरन्ती रत्नानां वर्णमालेव शंसति ॥ १ ॥

तेन च कौशल्या कर्णयोर्निवेशनीयम्' इति। अनुमतं च राज्ञा। रा कुमारद्वयानुगतेन निजाश्रमपदं प्रति गतं च मुनिना।

भिक्षुः—ततस्ततः।

तापसः—तदिदमाकर्ण्य तत्ताटङ्कयुगं लङ्केश्वरजनन्या निकषाया एव क चितमिति विचिन्त्य तदाहरणाय पूर्वमेव ताटकां प्रति निजानुचर एकः प्रस्थ पितः। अधुना च नूनं ताटकया तत्ताटङ्कयुगमाहृतमिति विचार्य तदानयन ताटकां प्रत्यहं प्रहितः।

भिक्षुः—कथं पुनरिदं वृत्तान्तजातमाकर्णितं माल्यवता।

तापसः—वार्त्ता च कौतुकवती विमला च विद्या
लोकोत्तरः परिमलश्च कुरङ्गनाभेः।

तमाविति प्रीत्यतिशयद्योतनाय। 'तस्य समर्पितौ' इत्यत्र तस्येति सम्ब सामान्ये षष्ठी।

दिव्यम्=ताटङ्कान्तरविलक्षणम् अतिरमणीयतया सिद्धिविशेषदातृतया तथोक्तिः।

तदिदमिति—असौ अन्तः=मध्ये स्फुरन्ती=प्रकाशमाना रत्नानां=पद्म गादीनाम् (तत्र खचितानाम्) वर्णस्य=लौहित्यादेः माला समुदायः व माला=अक्षरपङ्क्तिः इव शंसति=कथयति किमिति कथयतीति पूर्वार्द्धेनाह तदिदं=प्रत्यक्षद्वयम् (ताटङ्कयुगम्) वीरं सूते या सा तस्याः कर्णयोः=श्रवण निवेशस्य=परिधानस्य उचितम्=योग्यम् (अस्तीति शेषः) एतत्ताटङ्कान्तः चितपद्मरागादिमणिगणप्रभानिवहोऽक्षरमालेवानयोस्ताटङ्कयोर्वीरसूकर्णयोर्निवा योग्य इत्यभिधत्ते इत्यर्थः। असम्बन्धे सम्बन्धरूपातिशयोक्तिः ॥ १ ॥

लङ्केश्वरस्य=रावणस्य, मातुरिति च जनन्या इत्यस्यार्थः। कर्णयोः=श्रोत्र उचितं=योग्यम्।

वार्त्ता चेति—कौतुकम्=अद्भुततांप्रयुक्तमुत्कण्ठाप्रयोजकत्वं तदस्त्यस

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

तैलस्य बिन्दुरिव वारिणि दुर्निवार-
मेतत्त्रयं प्रसरति स्वयमेव भूमौ ॥ २ ॥

विशेषतश्च बहुतरप्रणिधिप्रणिधायी माल्यवान् ।

भिक्षुः—तत्कथं मिथिलोपवने भवान् ? ।

तापसः—आकर्णितं हि मया मिथिलामागतो लङ्केश्वर इति । अतस्तद्विलोकनाय प्रथममिहागतः । अधुना च ताटकावनं यास्यामि । तत्कथय तावद्भवान् पुनः कतरः ।

भिक्षुः—अहमपि स एव यः प्रथमं ताटकां प्रति प्रहितः । मिथिलोपवनागमनकारणं समानमावयोः ।

तापसः—(सहर्षम्) तत्कथय तावत् । तत्किं सताटङ्कं सम्प्रति ताटकावनम् ?

भिक्षुः—सताटकमिति तावत् पृच्छ ।

तापसः—क्व पुनः सम्प्रति ताटका ? ।

भिक्षुः—पुरीं प्रविष्टा ।

तापसः—तत्किं दशरथस्य ?

मिति सा (कौतूहलोत्पादनसमर्था) वार्त्ता=वृत्तान्तः विमला=विशुद्धा च विद्या=शास्त्रविषयकं ज्ञानम्, कुरङ्गनाभेः = कस्तूर्याः लोकोत्तरः = सर्वाधिकः परिमलः=सुगन्धश्च दुर्निवारं=प्रतिरोद्धुमशक्यम् एतत्त्रयं, वारिणि=जले तैलस्य =सार्षपादिस्नेहस्य बिन्दुः=स्वल्पतमभाग इव (जले) भूमौ=पृथिव्यां स्वयमेव=प्रचारकमन्तरैव प्रसरति=विस्तीर्यते । यथा तैलबिन्दुरम्भसि प्रक्षिप्यमाणः स्वयमेव भूयसि प्रदेशे व्याप्नोति तथैव वार्त्ताविमलविद्याकस्तूरीणां प्रचारकाभावेऽपि स्वाभाविकी भूलोके प्रसरणशीलतेति भावः । अत्र प्रस्तुताया वार्त्ताया अप्रस्तुतयोश्च विद्याकस्तूर्योः प्रसरणरूपैकधर्माभिसम्बन्धाद्दीपकम्, त्रयाणामपि तैलबिन्दुनोपमा चाऽलङ्कारौ । "वार्त्ता प्रवृत्तिर्वृत्तान्तः" इत्यमरः । वसन्ततिलकं वृत्तम् ॥ २ ॥

बहुतराणां = भूयसाम् प्रणिधीनां = चाराणाम् प्रणिधायी = नियोजकः । "प्रणिधिरपसर्पश्चरः" इत्यमरः । सताटकमिति तावत् पृच्छ=ताटकाया अपि स्मृतिशेषतया तथा पर्यनुयोगः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

भिक्षुः—नहि नहि, अन्तकस्य ।

तापसः—केन पुनः प्रतिहारायितमन्तकपुरीप्रवेशे तस्याः ।

भिक्षुः—रामबाणेनैव ।

तापसः—क्व एष रामः ? (विमृश्य) नूनं स एव यः खलु दशरथकुमारयोरग्रजः । तत्कथय, क्व पुनरधुना ताटकातनयौ ?

भिक्षुः—सुबाहुस्तावत्ताटकामेवानुगतः । मारीचोऽपि शिशुक्रीडोचितराम-नाराचपीडितो जीवन्मुक्त इव दूरं क्षिप्तः ।

तापसः—तत् कथमिदानीं न कथितं केनापि लङ्केश्वरस्य ।

भिक्षुः—कथितमेव किलेदमाक्रन्दता मारीचेन ।

तापसः—तत्कथं कुपितो न लङ्केश्वरः ।

भिक्षुः—सीताभिलाषशीतले लङ्केश्वरचेतसि नारूढ एव कोपपरितापः ।

तापसः—क्व पुनरधुना रामलक्ष्मणौ ।

भिक्षुः—श्रुतं मया कौशिकानुपदं तदाश्रमान्मिथिलां प्रति प्रचलिताविति (विलोक्य) (सत्रासम्) कथमिमौ तावित एवाभिवर्त्तेते । तदस्य निशाचर

प्रतिहारायितम्—द्वारपालवदाचरितम् "प्रतीहारो द्वारपालद्वाःस्थद्वाःस्थित-दर्शकाः" इति कोशः ।

ताटकामेवानुगतः—मृत इति तात्पर्यम् ।

शिशुक्रीडेति—बाल्यक्रीडनकं तत्रोचितं योग्यं यद्धनुः तन्निस्सृतेन बाणेन जीवन्मुक्तस्त्यक्तसर्वचेष्टः अकार्यक इव । अत्र रामस्य बालत्वान्नाराचानां तथोक्तिः । तादृशैरपि नाराचैर्मारीचस्य तादृशदशाविधानेन रामस्य प्रचुरपराक्रमत्वं चावेद्यते ।

कथितम्=उक्तम् लङ्केश्वरस्येति कर्मणि षष्ठी । अत्र वृत्तमिति शेषः ।

आक्रन्दता=रुदता । चीत्कुर्वतेति वा ।

सीताभिलाषशीतले=सीताविषयकवासनायुक्ते (यथातिशीते वस्तुनि कथमपि वह्निकृतस्तापो न प्रभावमुत्पादयति तथैव सीतापहृतहृदयतया रावणो नावश्य-ध्येयमपि श्रोतुं प्रवर्त्तते इति भावः)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

रिणो रामस्य पुरतः स्थातुमनुचितमावयोः ।

(इति निष्क्रान्तौ)

इति विष्कम्भकः ।

—०॥०—

(ततः प्रविशतो रामलक्ष्मणौ)

रामः—वत्स लक्ष्मण, पश्य पश्यारामरामणीयकम् ।

लक्ष्मणः—आर्य, निसर्गरमणीयोऽयमारामः । अधुना तु मधुमासावतारेण नितान्तरमणीयः ।

रामः—(सहर्षम्) कथमवतीर्णैव मधुमासलक्ष्मीः (विमृश्य) एवमेतत् । तथाहि—

इह मधुपवधूनां पीतमल्लीमधूनां,
विलसति कमनीयः काकलीसम्प्रदायः ।
इह नटति सलीलं मञ्जरी वञ्जुलस्य,
प्रतिपदमुपदिष्टा दक्षिणेनानिलेन ॥ ३ ॥

विष्कम्भकः इति तल्लक्षणं यथा—'वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः । संक्षिप्तार्थस्तु विष्कम्भः' इत्यादि ।

आरामस्य=उद्यानस्य रामणीयकम्=शोभाम् ।

निसर्गेण=स्वभावेन,रमणीयः=सुन्दरः मधुमासस्य=चैत्रस्य ("स्याच्चैत्रे चैत्रिको मधुः" इत्यमरः । अवतीर्णैव मधुमासलक्ष्मीरित्यत्रैव पदेनातर्कितत्वं तदवतारस्य व्यज्यते । एवमेतत्=सत्यमिदम् । तथाहि=मधुमासावतरणप्रमामकभ्रमरदक्षिणानिलरवप्रवृत्ती प्रदर्शयति पुरतः पद्येन ।

इहेति—इह=अस्मिन्नुद्यानदेशे—पीतमल्लीमधूनां=पानकर्मीकृतलतापुष्परसानाम् (आस्वादितकपायतया रक्तकण्ठानाम्) मधुपवधूनां=भ्रमरीणाम् कमनीयः=सुन्दरः (श्रुतिहारी) काकलीसम्प्रदायः=मधुरध्वनिनिवहः, विलसति=प्रादु-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अपि च,

मलयशिखरादाकैलासं मनोभवशासना-
द्भुवनवलयं जेतुं वाञ्छन् वसन्तसमीरणः ।
विहितवसतिं कैलासाग्रे भुजङ्गधरं हरं
मनसि विमृशन् भीतः शङ्के प्रयाति शनैः शनैः ॥४॥

र्भवति । इह दक्षिणानिलेन=मलयवायुना प्रतिपदम्=प्रतिपादविक्षेपम् (प्रति शब्दम् इति वा) उपदिष्टा=शिक्षिता वञ्जुलस्य=अशोकस्य (अम्बुवेतसस्य वा) मञ्जरी सलीलं=लीलया नटति=नृत्यति । अत्र पूर्वार्द्धे लतारसास्वादनेन … कण्ठा भ्रमरा मधुरं गायन्ति इति परार्द्धे च मलयानिलेन शिक्षयित्रा सतत… दिश्यमाना वञ्जुलमञ्जरीसलीलं नृत्यतीति भावः । "शीतपा नीरवञ्जुल… "वकुलो-वञ्जुलोऽशोके" इति चामरः ।

अत्र श्लोके उत्तरार्द्धे 'उपदिष्टा सलीलं नटतीति' हेतोः पदार्थताम्… काव्यलिङ्गम् "ननमयययुतेयं मालिनीभोगिलोकैः" इति लक्षितं मालि… वृत्तम् ॥ ३ ॥

मलयशिखरादिति—मलयस्य=तदाख्यस्य गिरेः शिखरात्=अग्रभा… (आरभ्येत्यध्याहार्यम्) आकैलासं शिवाचलपर्यन्तम् (उत्तराशावसानं … दिति भावः) भुवनवलयं=पृथ्वीमण्डलम् मनोभवशासनात्=कामदेवादेशा… (शासनपदमाज्ञाया अनुल्लङ्घनीयतां द्योतयितुम्) जेतुं=स्वायत्तीकर्त्तुम् वा… =कामयमानो वसन्तसमीरणः=मधुमासवायुः कैलासाग्रे=तदाख्यपर्वतोपरि वि… तवसतिं=कृतनिवासं (वसतिपदं सार्वदिकीं स्थितिमभिप्रैति) भुजङ्ग… =फणिभूषणं हरं—(न तु शिवम्) महादेवं मनसि=हृदये विमृशन्=विचा… शङ्के=आशंसे (अहमिति भावः) शनैः शनैः = मन्दं मन्दं भीतः=भय… (भयहेतुकं मन्दगमनम्) प्रयाति=वहति अस्मिन् श्लोके कामाज्ञया जग… प्रवर्त्तमानस्य दक्षिणानलस्य कैलासनिवासिनो हराद्भीतिः कामदेवभृत्य… स्वाभाविक्येव, तत्रापि हरस्य भुजङ्गधरत्वेन तस्य हृदये स्वापायशङ्कया … धिक्यं भुजङ्गानां वाताशनत्वात् भयमर्थसमूहो व्यज्यते । काव्यलिङ्गमु…

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

लक्ष्मणः—आर्य, अहं त्वेवं तर्कयामि ।

पथि पथि लतालोलाक्षीभिः स्रवन्मधुसीकरं
कुसुमनिकरं वर्षन्तीभिः सहर्षमिवार्चितः ।
मधुकरवधूगीतासक्तं कुरङ्गकमास्थितः
प्रसरति वने मन्दं मन्दं वसन्तसमीरणः ॥ ५ ॥

रामः—वत्स, अलमनेन । तद्यावदयं भगवान् विश्वामित्रस्तत्रभवतो याज्ञवल्क्यस्य समागमसुखमनुभवति तावत्तदीयसायन्तनदेवतार्चनोचितानि कुसुमान्यवचीयन्ताम् ।

लक्ष्मणः—वाढम् । (इति लताविटपान्तरितः कुसुमावचयं नाटयति)

रामः—(विलोक्य) कथमिदमितश्चण्डिकायतनम् । (अञ्जलिं बद्ध्वा)

वालङ्कारौ "मारुत-मरुज्जगत-प्राण-समीरणाः इत्यमरः । हरिणीवृत्तम् तल्लक्षणं यथा—नसमरसलागः षड्वेदैर्हयैर्हरिणीमता । इति ॥ ४ ॥

पथि पथीति—लताः=वल्ल्य एव लोलमक्षि यासां ता लोलाक्ष्यो रमण्यस्ताभिः स्रवन्तः=श्च्योतन्तः मधुनः = पुष्परसस्य सीकराः=विन्दवो यस्मात्तं=मधु स्रवन्तमित्यर्थः कुसुमनिकरं=पुष्पसमूहं वर्षन्तीभिः=उपहरन्तीभिः पथि पथि=मार्गे (वीप्सायां द्विरुक्तिः) सहर्षं=सप्रमोदमिव यथाऽर्चितः=पूजितः । लतावधूभिः पुष्परसस्राविपुष्पभरं विकीर्य प्रतिमार्गं पूज्यमान इत्यर्थः । मधुकरवधूभिः=भ्रमरीभिः गीतं=गीयमानं तत्रासक्तं=ध्यानवन्तं कुरङ्गकं=मृगं (प्रति) आस्थितः=आरूढः वसन्तसमीरणः=मधुमासवायुः वने=कानने मन्दं मन्दं प्रसरति=प्रचलति (वाति) अत्र पद्ये लोलाक्षीपदेन रमणीयता, वर्षन्तीभिरिति कुसुम-समृद्धिः, सहर्षमित्यनेन क्रियाविशेषणेनानुरागातिशयः, समीरणस्य च तेन प्रसादः, मधुकरवधूगीतेत्यादिना विशेषणेन कुरङ्गकस्य सरसहृदयता, कुरङ्गकपदेनानुकम्पार्थककन्प्रत्ययघटितेन गीतासङ्गो हि तेषां प्राणान् विपादयतीति जानतोऽपि तस्य तत्रादरातिशयमावहतोऽनुकम्पनीयता, आस्थित इत्यनेन वायोर्गुणतानुवृत्तिरेवमादिका अर्था व्यज्यन्ते । उत्प्रेक्षाऽलङ्कारः । पूर्वोक्तमेव वृत्तम् ॥ ५ ॥

समागमसुखम्=सङ्गजन्यं प्रमोदम् सायन्तनी=सन्ध्याकालिकी या देवतानामर्चना तत्र उचितानि=उपयुक्तानि अपेक्षितानि ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

करुणतरङ्गतरङ्गिणि, विकसन्नयनामृतोर्मिसीकरिणि ।
तरुणतुहिनकरचूडामणिरमणि त्वां नमस्यामि ॥ ६ ॥

(पुनरन्यतोऽवलोक्य) अये, इयमसौ मदकलकलहंसोत्तंसितसितसरोजराजिराजिता सरसी सरसीकरोति मे चेतः । (पुनः सकौतुकम्) अये, कथमयं नलिनीवनविहारिणीं सहचरीमपि विहाय कलहंसपोतश्चूतविटपान्तरालमनुसरति । (कर्णं दत्त्वा) अये, क एष मदकलकरिकनकशृङ्खलामणिरणितानुकारी मनोहरः कोऽपि कलकलः समुल्लसति । (विमृश्य) नूनं राजहंसशिञ्जितहारि मञ्जीरगुञ्जितमेतत् । तदवश्यमिह सलीलचलच्चरणरणन्मणिनूपुरया—पुराङ्गनया कयापि चण्डिकायतनमागच्छन्त्या भवितव्यम् । तदलमस्माकमितोऽवलोकनेन परकलत्रशङ्कापि सङ्कोचाय रघूणाम् ।

(नेपथ्ये)

भर्तृदारिके, इत इतः ।

रामः—कथमियं राजकुमारिका, तदालोकयामि तावत् । (विलोक्य सहर्षकौतुकम्) ।

(ततः प्रविशति सीता सखी च) ।

करुणेति—करुणतरङ्गः=दयोद्रेकः तस्य तरङ्गिणि=नदि विकसतोः=प्रसरतोः नयनयोः=नेत्रयोर्योऽमृतोर्मिः=सुधाधारा तस्याः सीकरः=विन्दुः सोऽस्या अस्तीति तथा (तत्सम्बुद्धौ) । तरुणः = अप्रौढः तुहिनकरश्चन्द्रमाः चूडामणिः=मस्तकालङ्कारो यस्य तस्य बालेन्दुशेखरस्य रमणि=विलासिनि (इति) नमस्यामि=नमामि । अत्र प्रथमविशेषणेन दयाप्लुतता द्वितीयेन तत्प्रदर्शन सामर्थ्यम्, आवेद्यते । नमोवरिवश्चित्रङः क्यजिति नमस्यामि पदसिद्धिः । वृत्तम् उपगीतिप्रभेदः ॥ ६ ॥

मदकलैः=मत्तैः कलहंसैरुत्तंसिता=अलङ्कृता याः सरोजानां=कमलानां राजिः पंक्तयस्ताभिः राजिता=शोभिता सरसी=सरोवरः । सरसीकरोति=प्रसादयति । कलहंसस्य=राजहंसस्य पोतः=बालः (एतेन तस्य किशोरावस्था लक्ष्यते) । कनकशृङ्खला=स्वर्णनिर्मितनिगडः । तत्र (खचितः) मणिस्तस्य रणितं=गुञ्जितं मनुकरोतीति तथा । कलकलः=शब्दविशेषः । समुल्लसति=प्रादुर्भवति । राजहंस

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

केयं श्यामोपलविरचितोल्लेखहेमैकरेखा–
लग्नैरङ्गैः कनककदलीकन्दलीगर्भगौरैः ।
हारिद्राम्बुद्रवसहचरं कान्तिपूरं वहद्भिः
कामक्रीडाभवनवलभीदीपिकेवाविरस्ति ॥७॥

सीता—हला, पेक्ख, पेक्ख। अज्ज इममुज्जाणं वसन्तसहअरेण सअं जेव्व म्महेणालंकिदं विअ अतिमेत्तं रमणिज्जं पडिहादि (हला, पश्य पश्य, अद्येदमुद्यानं सन्तसहचरेण स्वयमेव मन्मथेनाऽलङ्कृतमिवातिमात्रं रमणीयं प्रतिभाति।)

शिञ्जितं=चलचरणरवं=हरति तच्छीलम्, मञ्जीरस्य=चरणभूषणस्य गुञ्जितम्=रणितम् । सलीलम्=सविलासं चलता चरणेन रणन्तौ=शब्दायमानौ मणिनूपुरौ यस्याः सा तया। चण्डिकायतनम्=भगवतीमन्दिरम्। शङ्कापि=सम्भावनापि। रघूणाम्=तद्वंश्यानाम्। सङ्कोचाय=शिरोनमनाय।

राजकुमारिका=राजकन्या (कुमारिकापदमविवाहितत्वमाह, तेन तद्दर्शनस्यादोषता, परस्त्रीत्वाभावात्)।

केयमिति—श्यामोपले=निकषपाषाणे–विरचितोल्लेखा-उल्लिखिता या हेम्नः=स्वर्णस्यैका=सजातीयद्वितीयरहिता रेखा=पङ्क्तिस्तद्वत् लग्नैः=साधुविन्यस्तैरिति भावः, कनककदली=सौवर्णोरम्भातरुः तस्य कन्दली=(मध्यगतः श्लक्ष्णमः बाह्यावयवापसारणे दृश्यो ऽतिवर्त्तुलः स्तम्भाकृतिर्भागः) तद्वद्गौरैः (इदं चातिगौरत्ववर्त्तुलत्वादेरङ्गेष्वपेक्षितस्य गुणगणस्य प्रदर्शनार्थम्) हरिद्राया इदं हारिद्रम् अम्बु=जलम् तदेव द्रवः=द्रुतपदार्थस्तस्य सहचरं=सखायं (सादृश्ये ख्यमुपचर्यते) कान्तिपूरं=प्रभाप्रवाहं वहद्भिः=क्षरद्भिः (धारयद्भिरिति यावत्) अङ्गैः=शरीरावयवैः (उपलक्षिता) इयं=पुरोदृश्यमाना, कामस्य=कामदेवस्य या क्रीडाभवनवल्लभी=चन्द्रशाला (सौधोपरिस्थो रमणीयो विलासभवनभागः) स्याः=दीपिका=दीप इव का–इयम् आविरस्ति=प्रकाशमासादयति ?। श्यामोलेत्याद्यङ्गविशेषणेन लतागृहस्यातिश्यामता, सीतायाश्च नातिस्थूलकाययष्टिता, कनककदलीति विशेषणेनातिरमणीयवर्णता हारिद्राम्बुद्रवेत्यादिना वर्णस्य रलियुक्तता, द्रवपदेन च कान्तेः प्रसारशीलता, कामक्रीडेति-कथनेन नितान्त-

५

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सखी—अनवद्याङ्गि, एवमेतत् ।

रामः—अये सर्वानवद्याङ्गीति वक्तव्यम् । नन्वस्याः—

बन्धूकबन्धुरधरः सितकेतकाभं
चक्षुर्मधूककलिकामधुरः कपोलः ।
दन्तावली विजितदाडिमबीडराजि-
रास्यं पुनर्विकचपङ्कजदत्तदास्यम् ॥ ८ ॥

लावण्यम्, दीपिकेत्युक्त्या च कामोद्दीपकत्वमित्यादयोऽर्था व्यज्यन्ते "शुद्धा वलभीचन्द्रशाले सौधेऽभ्रवेश्मनि" इति रभसः । अत्रोपमोत्प्रेक्षे अलङ् चरणत्रये प्रथमा चरमचरणे च द्वितीयेति विवेकस्तयोश्चैकवृन्तगतफलद्वयन्या संकरः । मन्दाक्रान्तावृत्तम् ॥ ७ ॥

वसन्तसहचरेण=तत्सहायेन, मन्मथेन=कामेन ।

अवद्यम्—निन्दनीयम् (अवद्य-पण्य-वर्यागर्ह्य-पणितव्याऽनुरोधेषु) इत निपातः । न अवद्यानि निन्दनीयान्यङ्गान्यस्या इति बहुव्रीहिः ।

अस्याः सख्या उक्तौ संस्कृतावाक् तद्वैदग्ध्यप्रख्यापनायाश्रिता—तथोक्तं भावे संस्कृतभाषाचाराः प्रायो नाट्येषु न स्त्रियः श्लाघ्याः, क्वचिदपि तपःप्रभ द्विदग्धताख्यापनाच्च शस्यन्ते" इति ।

अनवद्याङ्गीत्युक्तौ यस्य कस्यचिदेकस्याङ्गस्यापि तथात्वं सम्भाव्येत, येय सर्वेषामेवाङ्गानामतः सर्वानवद्याङ्गीति । अनवद्यसर्वाङ्गीति वक्तव्यमिति माद्र

बन्धूकबन्धुरिति । अधरः=ओष्ठदेशः बन्धूकस्य बन्धुः=पुष्पविशे (मधुरी) सखा, चक्षुः=नयनम् सितस्य=स्वच्छस्य केतकस्य आभेवाऽऽभा तादृशम् अतिस्वच्छम्, कपोलः=गण्डः मधूकस्य (महुआ) कलिकावन्मधुरोः णीयवर्णो रसाप्लुतश्च, दन्तावली=दशनश्रेणी विजिता=पराजिता दाडिम राजिः तद्बीजसमूहो यया तादृशी पुनः आस्यं=मुखम् । विकचाय=विकसित पङ्कजाय दत्तं दास्यं=भृत्यभावो येन तादृशं जितकमलमिति यावत् । अङ्गानि पूर्वोक्तस्वरूपाणि तेनेयं सर्वानवद्याङ्गीति वक्तव्यमिति रामाशयः । त्रोपमा-व्यतिरेकयोः साङ्कर्यम् । वसन्ततिलकं वृत्तम् ॥ ८ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अहो, मुग्धाया अप्यस्याः प्रकृतिकमनीयपदार्थपरिशीलनौचित्यचातुरी। यथाहि। इयं हि—

पदाभ्यामुन्निद्रामधरयति शोणाम्बुजरुचिं
कराभ्यामादत्ते नवकिसलयानामरुणताम्।
प्रवालस्यच्छायां दशनवसनाग्रेण पिबति
स्मितज्योत्स्नापूरैरुपहसति कान्तिं हिमरुचेः॥९॥

सखी—भर्तृदारिके, इदं तच्चण्डिकायतनम्।

सीता—(अञ्जलिं बद्ध्वा) देवि, ससहरमौलिदेहाद्धारिणि, त्रिहुअण-

मुग्धायाः=विवेकशून्यायाः, प्रकृतिकमनीयः=स्वभावसुन्दरो यः पदार्थस्तस्य परिशीलनं=यथावज्ज्ञानं तत्र चातुरी=दक्षतेति विरोधः। मुग्धायाः=अचिरारब्धयौवनाया इत्यर्थे तु तत्परिहारः।

पदाभ्यामिति। पदाभ्याम्=चरणाभ्याम् उन्निद्रां=स्फुटां शोणाम्बुजस्य रक्तकमलस्य रुचिं=कान्तिम् अधरयति=न्यूनीकरोति। कराभ्यां=हस्ताभ्यां नवकिसलयानां=बालपल्लवानाम् अरुणतां=रक्तिमानम् आदत्ते=गृह्णाति। प्रवालस्य=विद्रुमलतायाः छायां=रक्ताभतां (सादृश्यम् इति वा) दशनानां=दन्तानां वसनम्=आवरणम् (ओष्ठ इति) तेन पिबति=आचामति (पिबतिपदेन सामस्त्येण ग्रहणं बोध्यते) स्मितस्य=ईषद्धसितस्य या ज्योत्स्ना=कान्तिस्तस्याः पूरैः=समुदयैः हिमरुक्=चन्द्रस्तस्य कान्तिं=सौन्दर्यमुपहसति=निन्दति पदाभ्यामधरयति, कराभ्यामादत्ते, ओष्ठेन पिबति, स्मितेन हसति इत्युक्त्या यथोपयोगं करणमुपात्तमिति चातुर्यं पूर्वोक्तं समर्थितं भवति। प्रबालस्य तुलनामित्यनुक्त्वा छायामिति कथनेन तथोक्तौ कदाचित् कठोरतापि गृह्येतेति तस्या व्यावृत्तिः। हिमरुच इति पदेन चन्द्रमसः कान्तेरतिस्वच्छता तया च तद्विजेतुः स्मितस्य स्वच्छतातिशयः प्रत्याय्यते। "पल्लवोऽस्त्री किसलयम्"। व्यतिरेकोपमयोरत्र सङ्करः शिखरिणीवृत्तम्॥ ९॥

शशधरः चन्द्रमा मौलौ=शिरसि यस्य स तस्य देहः=कायस्तस्याऽर्द्धं तस्य धारिणि, एतेन पत्युः प्रियतमेयमिति ध्वन्यते। त्रिभुवनं गृहं=निवासदेशो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

घरसुहासिणि, णमो णमो दे। (देवि, शशधरमौलिदेहार्धधारिणि, त्रिभुवनगृह-वासिनि, नमो नमस्ते।)

सखी—समुचितैव प्रणामपरिपाटी।

सीता—(सप्रणयकोपम्) अलमलीअजप्पिदेण (अलमलीकजल्पितेन)

सखी—(अञ्जलिं बद्ध्वा)

कान्तमिन्दुमणिदामकोमले कोमलेन्दुमुकुटाङ्कशायिनि।
इन्दुचारुमचिरेण विन्दतामिन्दुसुन्दरमुखी सखी मम ॥१०॥

रामः—अये, कथमस्याः परिणयमनोरथप्रणयी सखीजनः, (विमृश्य) उचितमेतत्। वयस्सन्धौ खल्वियं वर्त्तते। तथाहि—

यस्याः सा सुवासिनी=सद्गृहिणी तत् संबुद्धौ समुचिता=उपयुक्ता (पतिंवरा सीता स्वस्य पत्यौ तस्य च स्वस्यामेकान्ततोऽनुरागं स्वस्याः पतिपारिवारप्रि... चाभ्यर्थयते, तदिदं द्वयमपि तदीयप्रणामपरिपाट्याप्रकटितमिति तस्याः स...चितत्वं बोध्यम्)।

कान्तमिति—इन्दुमणिः=चन्द्रकान्तमणिस्तस्य दाम=पङ्क्तिः=(समुदाय... तथा कोमले=रमणीये, (सौन्दर्यशालिनि) कोमलः=अकर्कशः=(बालः... इन्दुर्मुकुटं=मस्तकालङ्कारो यस्य तस्याऽङ्के शेते तच्छीले, (हरवधु,) (सम्बो... धनान्तं पदद्वयम्) मम सखी=सीता (ममपदेन प्रार्थनायां व्याकुलीभा... प्रतीयते) अचिरेण=शीघ्रं (तेन तस्या विवाहोपयुक्तवयस्कता बोधिता... इन्दुसुन्दरमुखी=चन्द्रमनोज्ञवदनेति सीताविशेषणम्। इन्दुचारुम्=सौन्दर्यतुल्... तचन्द्रमसं कान्तं=रमणं विन्दताम्=आप्नोतु। अत्र सम्बोधनान्तभगवतीविशे...णयुगलेन तस्याः प्रार्थ्यमानवरदानयोग्यता सूच्यते। इन्दुचारुमिन्दुसुन्दरमु...त्याभ्यां विशेषणाभ्यां कन्यावरयोरनुरूपताया आवश्यकत्वं समर्थ्यते। सा... विवाहेऽवश्यविचार्या यथाऽऽह नैषधीये श्रीहर्षः—"चकास्ति योग्येन हि योग... सङ्गमः" इति। यमकं शब्दालङ्कारः। परिकरश्चार्थालङ्कारः। रथोद्धताछन्दः "स्यान्नराविह रथोद्धता लगौ" इति च तल्लक्षणम् ॥ १०॥

परिणयमनोरथः=विवाहेच्छा तत्र प्रणयी=इच्छुकः। वयसोः=अवस्थाद्वय... सन्धौ=मिलनावसरे।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अपक्रान्ते बाल्ये तरुणिमनि चागन्तुमनसि
प्रयाते मुग्धत्वे चतुरिमणि चाश्लेषरसिके ।
न केनापि स्पृष्टं यदिह वयसा मर्म परमं
तदेतत्पञ्चेषोर्जयति वपुरिन्दीवरदृशः ॥११॥

सखी—अयि देवि, सत्वरं मे पूरय मनोरथम्, यावदियं न दुर्मनायते सखी ।

सीता—(सप्रणयकोपम्) किंति दुम्मणायिस्सम् (किमिति दुर्मनायिष्ये) ।

लक्ष्मणः—अयि राजहंसकन्यके, किमिति दुर्मनायसे, अयं ते चूतविटपान्तरितः कान्तः ।

सीता—हला, कस्स इमो करिकलहकण्ठनिग्घोसमहुरो कण्ठसद्दो सुणीअदि । ता णिरूवेह्म (हला, कस्याऽयं करिकलभकण्ठनिर्घोषमधुरः कण्ठशब्दः श्रूयते, तन्निरूपयामः) ।

अपक्रान्त इति—बाल्ये=बालभावे=ऽपक्रान्ते ऽपसृतेतरुणिमनि=प्रौढतायाम् (यौवने॰वा) आश्लेषस्य=आलिङ्गनस्य रसिके=स्नेहिनि (आगन्तुमिच्छति) मुग्धत्वे=बाल्यचापलकृतेऽविवेके प्रयाते=गते चतुरिमणि=चातुर्ये चागन्तुमनसि (भावे सप्तम्यः सर्वाः) केनापि वयसा=बाल्ययौवनान्यतरावस्थया न स्पृष्टं =नाश्रितम् इह यत् परमं=प्रधानम् पञ्चेषोः=कामस्य मर्म=रक्षास्थानम् तत् इन्दीवरदृशः=कमलनयनाया वपुः=शरीरं जयति=सर्वोत्कर्षेण वर्त्तते । अत्र अपक्रान्ते प्रयाते इति क्तप्रत्ययाभ्यां तयोरत्यन्तासम्बन्धः । आगन्तुमनसि आश्लेषरसिक इत्याभ्यां च तयोरपि नात्यन्तिकी प्राप्तिरिति । परमं मर्म इत्युक्त्या वयस्सन्धेः सर्वावस्थातिशायि कामोद्भावकत्वम् इत्याद्यर्थजातमावेद्यते ।

दुर्मनायते=उदास्ते ।

चूतविटपस्य=आम्रवृक्षशाखायाः, अन्तरितः=मध्यगतः ।

करिणः=गजस्य कलभः=अप्राप्तत्रिंशद्वर्षवयाबालः तस्य कण्ठनिर्घोषो=बृंहितम् तद्वन्मधुरः=प्रियः । अत्र 'कलभः करिशावकः' इत्यमरः । "त्रिंशद्वर्षः करीबालः" इति च गजविद्याविदः । अत्र यद्यपि कलभशब्देनैव करिबालप्रत्यये सम्भवति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

रामः—(सविषादम्) कथमियमन्तरितैव लतया। (लतां प्रति)।

स्तनविजितस्तबकश्रीरधराधरितप्रवालनवलक्ष्मीः ।
अयि लतिके तिरयन्ती तरलदृशं नावलम्बसे लज्जाम् ॥१२॥

(पुनः सहर्षम्)

श्यामच्छवीनामियमन्तराले प्रादुर्भवन्ती कदलीदलानाम् ।
कलेव चान्द्री नवनीरदानां चकोरवन्मां मुदितं करोति ॥१३॥

करिपदं वृथेति शक्यते वक्तुं परं—विशिष्टवाचकपदानां सति विशेषणवा पदसमवधाने विशेष्यमात्रपरत्वमिति वामनोक्त्या समाधानेन सन्तोष्टव्य सकीचकैर्मारुतपूर्णरन्ध्रैरित्यत्रापीयमेव गतिः।

स्तनविजितेति—स्तनाभ्यां=कुचाभ्यां विजिता=तिरस्कृता स्तव =पुष्पगुच्छानां श्रीः=शोभा यस्याः साऽधरेण=ओष्ठेन अधरिता=परा प्रवालानां=नवकिसलयानां लक्ष्मीः=शोभा यस्याः सा च त्वम् (लति तरलदृशं=चञ्चललोचनां तिरयन्ती=प्रच्छादयन्ती, अयि लतिके, लज्जां अवलम्बसे=श्रयसि, सीतायाः स्तनाभ्यां नवपुष्पस्तवकः पराजितः, अधरे प्रवालकान्तिरपमता, तदीदृशीं स्वविजयकरीं त्वं प्रच्छाद्य तामुपकुरुषे क तवाविवेककारित्वं प्रकटमिति भावः। प्रच्छादनेन च तदुपकारः सखीकादी दर्शनादात्मगोपनरूपः, रामकर्मकनिभृतदर्शनस्थानप्राप्तिरूपो वा बोध्यः। "प्रवाल विद्रुमे वीणादण्डेऽभिनवपल्लवे" इति हैमः। गीतिश्छन्दः ॥ १२ ॥

श्यामच्छवीनामिति—श्यामा=कृष्णवर्णा छविः=कान्तिर्येषां तेषां= वर्णानाम् कदलीदलानां=रम्भातरुपत्राणां (मण्डपाकारेण स्थितानां क तरुपत्रावलीनाम्) अन्तराले=मध्ये आविर्भवन्ती=प्रकटन्ती इयं=सीता (श च्छवीनाम्) नवनीरदानां=नूतनघनानां (मेघे नूतनत्वं सद्यः सम्भृतसलि वृष्टिप्राक्कालिकत्वं च बोध्यम्) (अन्तराले=मध्ये) प्रकटन्ती चान्द्री=ऐ कला=षोडशो भागः चकोरवत्=चकोरमिव मां मुदितं=प्रसन्नं करोति=वि श्यामवर्णवस्तुमध्ये भास्वरकान्तिवस्तु सातिशयं प्रकाशते इति सौन्दर्यं व्यञ्जयति। नवनीरदानामित्यत्र नवपदेन चातकाभिलाषपूरकता व्यक्ता, तदु

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

(पुनः कदलीं प्रति)

हे बालहेमलतिके ध्रुवमीहसे त्व-
मूरुश्रियं कलयितुं तरलायताक्ष्याः ।
एनां विलम्बय विलासवतीं चिरं हि
स्त्रीणां कलाः परिचिताः स्थिरतां प्रयान्ति ॥१४॥

सीता—हला, को इमो कणअवण्णो सिहण्डिपिच्छमण्डिदकण्णपूरो मुद्धत्तण-विमुक्कलोअणविआरो कुमारो दीसदि । इमं पेक्खन्तीए मह णिअवच्छम्मि विअ वच्छत्तणपच्छालिअं हिअअं वट्टदि । (हला, कोऽयं कनकवर्णः शिखण्डिपिच्छ-मण्डितकर्णपूरो मुग्धत्वविमुक्तलोचनविकारः कुमारो दृश्यते । इमं पश्यन्त्या मम निजवत्स इव वात्सल्यप्रक्षालितं हृदयं वर्त्तते) ।

च सीताया अपि राजकुमारिकात्वेन रामाभिलाषपूरकत्वसम्भावना प्रकाश्यते । उपमात्राऽलङ्कारः । उपजातिश्छन्दः । उपेन्द्रवज्रेन्द्रवज्रयोः साङ्कर्येण च तदुपपत्तिः ॥ १३ ॥

हे बालहेमलतिके इति । हे बालहेमलतिके=नवीनरम्भे (अत्र रम्भातरोः कनकवर्णतया हेमलतात्वारोपः) ध्रुवम्=अवश्यं त्वं तरले आयते च चञ्चले दीर्घे चाऽक्षिणी=नेत्रे यस्यास्तस्याः (सीतायाः) ऊर्वोः=जघनयोः श्रियं=कान्ति कलयितुं=प्राप्तुम् ईहसे=इच्छसि (तर्हि) एनाम्= यस्या ऊर्वोः श्रियं लब्धु-मिच्छसि ताम् विलासवतीम् । चिरं= बहुकालं विलम्बय=अन्यत्र गमनान्निवारय हि=यतः स्त्रीणां परिचिताः कलाः=गुणाः स्थिरतां=चलत्वाभावम् उपयान्ति =प्राप्नुवन्ति । यदि तदीयोरुशोभायां तव लिप्सा (तथा चाहं तर्कयामि) तर्हि एनां चिरं विलम्बय यतः स्त्रियः परिचितं गुणमाददत इत्याशयः । अत्र सामा-न्येन विशेषसमर्थनात्माऽर्थान्तरन्यासः । वसन्ततिलकं वृत्तम् ॥ १४ ॥

शिखण्डिनो=मयूरस्य पिच्छेन=बर्हेण मण्डितः=भूषितः कर्णपूरः=कर्णाभरणं यस्य सः । मुग्धत्वेन=अप्रौढतया (बाल्येन) विमुक्तः=अनाश्रितः लोचन-विकारो=भ्रूभङ्गिर्येन तथा । वात्सल्येन=कनिष्ठपुत्रादिविषयकस्नेहप्रभवभाव-विशेषेण प्रक्षालितं=धौतम् । सुचिरप्रवृत्ता=चिरकालादागता ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

लक्ष्मणः—अये, केयमस्यां सुमित्रायामिव मे सुचिरप्रवृत्ता चित्तवृत्तिः।

सीता—हला, इमं कुमारं पुलोअन्तीए मह वच्छा उम्मिला चित्तम् हदि। (हला, इमं कुमारं विलोकयन्त्या मम वत्सोर्मिला चित्तमारोहति)

सखी—(विहस्य) नूनमयं कस्यचिद्वत्सशब्दलालनीयो भविष्यति। विलोकयन्त्या मे त्वमपि चित्तवृत्तिमारोक्ष्यसि। तत्पृच्छामि तावदेनम् (परिक्रम्य) अये राजकुमार, कः खलु भवान्? यस्त्वमेक एव मुग्धतयाऽप शीलितास्वपि वनभूमिषु विहरसि।

लक्ष्मणः—धिङ् मूर्खे, कथं मामग्रजेन परिसरवर्त्तिना रामचन्द्रेण नाथवन्तमप्येकाकिनमपदिशसि?

सखी—(सहर्षम्) कुसुमितस्तदधुना मे मनोरथद्रुमः।

सीता—हला, किमेत्थ अह्माणं। ता एहि। णिअघरं जेव्व वज्जा (किञ्चित् परिक्रम्य, पुनर्व्यावृत्य) हला, एक्कं विसुमरिदह्मि। णं सो सहआ पादवो अवलोअणीओ जस्स वासन्दीलदाए सह संगमं अहिलसन्ति सह अम्बा (हला, किमत्राऽस्माकम्? तदेहि, निजगृहमेव व्रजामः। हला, एकं विस्मृता ननु स सहकारपादपोऽवलोकनीयो यस्य वासन्त्या लतया सह संगममभिल ममाऽम्बाः) (इत्युभे परिक्रामतः)

रामः—(सहर्षम्)।

मन्मनःकुमुदानन्दशरत्पार्वणशर्वरी ।
अहो इयमितो नूनं पुनरप्यभिवर्त्तते ॥ १५॥

मुग्धतया=अविवेकितया। अपरिशीलितासु=अपरिचितासु। अपरिचित श्रमणस्य विपदावहत्वेन तत्कर्त्तुरविवेकः प्रमाप्यते।

परिसरवर्त्तिना=समीपस्थितेन, रामचन्द्रेण नाथवन्तमित्यत्राभेदे तृ (प्रकृत्यादिभ्य उपसंख्यानमिति) तेन सनाथमिति यावत्।

कुसुमितः=पुष्पितः, मनोरथद्रुमः=अभिलाषपादपः।

सहकारपादपः=आम्रवृक्षः। (इदं रामपुनरालोकनाय सीताया व्याजमा

मन्मन इति—मम मनः=हृदयमेव कुमुदं=कैरवम् तस्यानन्दाय श =ऋतुविशेषस्य पर्वणि भवा पार्वणी (पर्व चाऽत्र पूर्णिमा विवक्षिता)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

(निर्वर्ण्य)

वहत्यस्या दृष्टिर्विकचनवनीलोत्पलतुला-
मखण्डस्याभिख्यां वदनमिदमिन्दोः कलयति ।
कुचौ किञ्चिन्मीलत्कमलतुलनां कन्दलयत-
स्तमःशोभां चित्रां चिकुरनिकुरम्बं हि कुरुते ॥१६॥

सखी—एष सहकारपादपः, इयं च वासन्ती लता । (इति तदन्तिकमनुसरतः) ।

=रात्रिः पूर्णिमारात्रिरिति बोध्यम् । अहो इति निपातः प्रसन्नतातिशयद्योतकः । नूनं निश्चयेन इयं पुनरपि इतः=मदध्युषितदेशाभिमुखम् अनुवर्त्तते=आगच्छति । शरन्निशाया विमलव्योमतया स्वतः स्वच्छता तत्रापि पर्वणि तु नितान्तस्वच्छता, तया च कुमुदानन्दे प्राचुर्यं तद्रूपणेन स्वं प्रति सीताया आनन्दातिशयसमर्पकत्वं व्यज्यते । अत्र परम्परितं रूपकमलङ्कारः ॥१५॥

वहत्यस्या इति—अस्याः=सीताया दृष्टिः=नयनम् विकचस्य=विकसितस्य नीलोत्पलस्य तुलां=सादृश्यं वहति=धत्ते । (नयनोपमाने नीलकमले विकचत्वकथनेन तस्यापि विकसितत्वं तेन प्रसादावस्था, तया च तस्याः स्वं प्रति प्रेमातिशयो द्योत्यते) इदम् (अस्याः) वदनम् अखण्डस्य=सम्पूर्णस्य इन्दोः =विधोः (इन्दुपदेन स्वप्रकृतिधातुप्रतिपाद्या परमैश्वर्यवत्ता चन्द्रस्योक्ता तस्य च पूर्णा तुला मुख इति शोभाधिक्यम्) अभिख्यां=शोभां कलयति=प्राप्नोति । कुचौ=स्तनौ किञ्चित्=ईषत् मीलतः = मुकुलितस्य कमलस्य तुलनां=सादृश्यं कन्दलयतः=वहतः । चिकुरनिकुरम्बं=केशपाशः (हि पदं त्वर्थकम्) हि चित्रां =विलक्षणाम् तमः शोभां कुरुते । पूर्वश्लोके सीतापार्वणशर्वरीत्वेनाध्यवसिता, तदेव समर्थयितुमिदं पद्यमत्र नयनकमले विकासः प्रसन्नताम्, कुचोपमानयोः कमलयोः मीलनं च कमलकोरकाभस्तनीत्वमावेदयति (शरन्निशात्वेन सीतारूपेण तदङ्गानां कमलानां विकासवर्णनमुचितमिति पर्यनुयोगे पूर्वश्लोकेन सहासम्बन्ध एवोत्तरम् । नचैवं (निर्वर्ण्य) पदविरोधः, तस्य पूर्वोक्त्याऽसन्तुष्टतामात्रं व्यञ्जयितुं कृतकृत्यत्वात्) । उपमात्रालङ्कारः । शिखरिणीवृत्तम् ॥१६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

रामः—कथमिमे मे परिसरमनुसरतः। तत्किञ्चिदपसरामि तावत्।

सखी—(सहकारशाखां करे धृत्वा) (सकौतुकम्) हला, पेक्ख पे इमेहिं नहसिहाविलिहिदेहिं कोमलदलेहिं संभावीअदि जं किर इअं चूदलदा केण विदद्धेण णिअहत्थेण संभाविदेत्ति। अथवा णिअचावलदासङ्किदेण सअं मम्म व्वेति। (हला, पश्य पश्य, एतैर्नखशिखाविलिखितैः कोमलदलैः सम्भा यत्किलेयं चूतलता केनापि विदग्धेन निजहस्तेन संभावितेति। अथवा निज पलताशङ्कितेन स्वयं मन्मथेनैवेति)।

रामः—इत्थं सम्भावयति भवती, मम पुनरन्यथा वितर्कः।

मत्वा चापं शशिमुखि निजं मुष्टिना पुष्पधन्वा
तन्वीमेनां तव तनुलतां मध्यदेशे बभार।
यस्मादत्र त्रिभुवनवशीकारमुद्रानुकारा-
स्तिस्रो भान्ति त्रिवलिकपटादङ्गुलीसन्धिरेखाः ॥१७॥

नखस्य=शिखाऽग्रभागस्तया विलिखितैः=खण्डितैः सम्भाव्यते=श विदग्धेन=रसिकेन खण्डनं सुकुमारतापरीक्षणमात्रप्रयोजनं तथाप्रवृत्तिश्च चरितु रसिकतां प्रकाशयति॥

अन्यथा=अन्यप्रकारेण (अन्यादृश इति भावः)।

मत्वा चापमिति—शशीव मुखं यस्या इति तत्सम्बुद्धौ शशिमुखि= वदने (सीते) एनां तन्वीं=कृशां तव तनुलतां=काययष्टिम् पुष्पधन्वा=क निजं चापं=धनुः मत्वा=ज्ञात्वा (एनां तव तनुलतां) मध्यदेशे बभार=जग्रा यस्मादत्र=यतोऽत्र तव तनौ त्रिवलिकपटात्=त्रिवल्यामिषात् त्रिभुवनस्य=भुवन त्रयस्य वशीकारमुद्राः=स्वाधीनतासम्पादनप्रयोगचिह्नानि तासामनुकारः=स यासु ताः तिस्रः=तत्सङ्ख्याः अङ्गुलीसन्धिरेखाः भान्ति=शोभन्ते। अत्र का कृशतया मध्यनतत्वेन च चापत्वारोपः, ग्रहणमात्रेण रेखोत्पत्त्या कोम तातिशयः। चिह्नानां वशीकारमुद्रासादृश्येन नितान्तरमणीयता। इत्यादयो व्यङ्ग्याः। अङ्गुलीभिश्चतसृभिर्ग्रहणे तिस्रो रेखाः प्रादुःष्युः। अन्यस्यान्यत सम्भावनात्मोत्प्रेक्षालङ्कारः। मन्दाक्रान्तावृत्तम् ॥१७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सखी—भर्तृदारिके, इयं वासन्ती लता, इदं च पश्य,

वासन्तीरसबिन्दुं सुन्दरमिन्दिन्दिरा इह चरन्ति ।
चिरमन्दिरमरविन्दं मन्दं मन्दं परिहरन्ति ॥१८॥

(सीता तदेव पठति)

रामः—किमिदानीं लतान्तरवर्णनया, नन्वियमेव—

निर्मुक्तशैशवदशा शिशिरा नवीन–
सम्प्राप्त-यौवन-वसन्त–मनोरम-श्रीः ।
उन्मीलितस्तननवस्तवका निकाम-
मेणीदृशस्तनुलता तनुते मुदं नः ॥१९॥

सखी—भर्तृदारिके, पश्य । इयमसौ वासन्ती लता स्वयमेव सहकारपोत-मालिङ्गितुं पुरःसरति ।

वासन्तीति—वासन्ती=तन्नामिका लता तस्याः सुन्दरं=मनोज्ञतरं रसबिन्दुं=पुष्परसकणम् इह=अस्मिन्नुद्याने इन्दिन्दिराः=भ्रमराः चरन्ति=आस्वादयन्ति । मन्दं मन्दं=शनैः शनैः चिरमन्दिरं=पुराणमावासम् अरविन्दं=कमलं परिहरन्ति=त्यजन्ति । (सायङ्कालस्य प्रस्तावात्) वासन्ती लता विकसिता अत्र भ्रमरा रन्तुमारभन्ते चिरादध्युषितं च कमलं विजहतीत्यर्थः । 'वासन्ती माधवी स्यात्' इति कोशः । वृत्तमार्याप्रभेदः । वृत्त्यनुप्रासः शब्दालङ्कारः ॥१८॥

निर्मुक्तशैशवदशेति । निः-निश्शेषेण मुक्ता=अपगतः शैशवदशा=बाल्यावस्थैव शिशिरो=ऋतुविशेषो यस्या स तथा सम्प्राप्ता=ऽधिगता यौवनवसन्तस्य मनोरमा=रमणीया श्रीः=शोभा यया सेयं=पुरःस्थिता एणीदृशो=हरिणलोचनायास्तनुलता=काययष्टिः निकामं नः मुदं तनुते=विपुलयति । तामेव विशिनष्टि =उन्मीलितेति उन्मीलितौ=विकसितौ स्तनावेव नवौ=प्रत्यग्रौ स्तवकौ=गुच्छौ यस्याः सा इति । अत्र यौवनस्य वसन्तत्वारोपेण लतात्वेन रूपितायास्तनोः अवयवांशेन विकासः स्तवके नवत्वविशेषणेन तद्रूपितयोः स्तनयोः कमलकोरकाभता, तनोर्लतात्वारोपेण यथास्थाननम्रता च द्योत्यते साङ्गपरम्परितं रूपकमलङ्कारः । वसन्ततिलकं वृत्तम् ॥ १९ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सीता—(सप्रणयकोपम्) अये, अलिअजप्पिणि, दाणिं तुह परिसरं परिह अण्णादो गमिस्सम् । (अये, अलीकजल्पिनि, इदानीं तव परिसरं परिहृत्या गमिष्यामि)

रामः—

अमलमृणालकाण्डकमनीयकपोलरुचे-
स्तरलसलील नीलनलिनप्रतिफुल्लदृशः ।
विकसदशोकशोणकरकान्तिभृतः सुतनो-
र्मदलुलितानि हन्त ललितानि हरन्ति मनः ॥२०॥

सीता—(विलोक्य, सकौतुकम्)

विसट्टपेसलुप्पलप्पलासपुञ्जसामलो
महेससोम्मसेहरप्फुरन्तसोमकोमलो ।

अमलमृणालेति । अमलं=निर्मलं यन्मृणालकाण्डं=कमलनालदण्ड रुचिरिव रुचिर्यस्यास्तस्यास्तथा तरले=चञ्चले सलीले=सविलासे च ये नीलनलि =श्यामकमले तद्वत् प्रतिफुल्ले विकसिते दृशौ=नयने यस्यास्तस्याः किञ्च विक =प्रस्फुटन् यः अशोकः=तदाख्यो वृक्षः (अत्र पुष्पम्) तद्वत् शोणा=रक्तौ क =हस्तयोः कान्तिः=शोभा तां बिभर्त्ति तस्याः सुतनोः=सुन्दर्याः (सीतायाः) लुलितानि=मदाकुलानि ललितानि=श्रृङ्गारव्यञ्जकचेष्टाविशेषाः (मे) हरन्ति=आकर्षन्ति । अत्र तदङ्गानां तत्तदुपमानसादृश्योक्त्या सुतनो रम तातिशयः, हरन्तीत्येतेन सर्वथा स्वायत्तीकारः ललितानीति बहुवचनेन त माधिक्यं तेन च तस्याः प्रकामकमनीयता, व्यज्यन्ते । उपमालङ्कारः । " विलासविब्बोकविभ्रमाललितं तथा, हेला लीलेत्यमी हावाः, क्रियाः श्रृ भावजाः" इत्यमरः । नर्दटकं वृत्तम्, "यदि भवतो नजौ भजजला नर्दटक इति च तल्लक्षणम् ॥ २० ॥

विसट्टेति—विकसितः पेशलो=रमणीय उत्पलस्य=कमलस्य पलाशं तस्य पुञ्जः=समूहस्तद्वत् श्यामलः=कृष्णवर्णः, (पुनः) महेशस्य=शिवस्य सौ शेखरे=मनोहरे मौलौ स्फुरन्=उदयमानो यः सोमस्तद्वत् कोमलो=मुग्धः स्नि अनङ्गस्य=कामस्य रूपस्य सौन्दर्यस्य खण्डनः=अभिभविता (ततोऽधिकरू

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

लदाघरम्मि को इमो अणङ्गरूअखण्डणो
विलोअणाण देइ मे सुहं सिहण्डमण्डणो ॥२१॥

(छाया—विकसितपेशलोत्पलोत्पलाशपुञ्जश्यामलो
महेशसौम्यशेखरस्फुरत्सोम-कौमलः ।
लतागृहे कोऽयमनङ्गरूप-खण्डनो
विलोचनयोर्ददाति मे सुखं शिखण्डमण्डनः ॥२१॥)

सखी—भर्तृदारिके, कथय कथय, कथं लतालोकनाद्विरतासि ?

(सीताऽनाकर्णितकेन तदेव पञ्चमस्वरं पठति)

सखी—(उपसृत्य) कथमियमन्यचित्तेव लक्ष्यते ? क्व पुनश्चित्तमस्याः ? (रामं दृष्ट्वा, साकूतम्) अये, इदमस्याश्चित्तगजबन्धनालानम् । (पुनः तां करे धृत्वा) प्रणयमधुरोऽपि सखीजनः किमवधीर्यते ? अथवोचितमिदम्, धुना हि तवायं हृदयमधिवसति ।

सीता—(स्वगतम्) कहं अवगदह्मि इमाए (कथमवगतास्म्यनया) इति लज्जां नाटयति) ।

खण्डमण्डनः=मयूरपुच्छभूषणः लतागृहे=लतामण्डपे कोऽयं (स्थित्यर्थकक्रिया-राध्याहारेण सप्तमी) मे विलोचनयोः=नेत्रयोः सुखं ददाति । अत्र कमलपत्र-कोमलत्वेन नितान्तकोमलतासहकृता नेत्रानन्दप्रदानयोग्यता, सोमकोमल-यनेन रामस्यानुग्रस्वभावता, सोमे महेशशिरःस्थायित्वविशेषणोपादानेन स्य वयसोऽल्पताऽहरहरुपचीयमानप्रभता च, इत्यादयोऽर्था व्यञ्जिताः ॥ पत्रं शम्, अब्जो जैवातृकः सोमः "शिखण्डस्तु पिच्छबर्हे तथासमे" इति मरः । पञ्च चामरं चेदं वृत्तम् ॥ २१ ॥

विरतासि=निवृत्ता असि । (अनाकर्णितकेन=तदुक्तं न श्रुतमित्येवं प्रकारेण) अन्यचित्ता=ऽन्यमनस्का चित्तमेव गजः (मत्ततया) बन्धनस्य आनालम् स्थूणा ("आलानं गजबन्धनी"त्यमरः । प्रणयमधुरः=प्रीतिस्निग्धः, अवधी-=तिरस्क्रियते (हृदयाभिप्रायगोपनेन खेद्यत इति भावः) आरामे, इत्यत्र इति छित्वा राम इत्यर्थः । (तमनुसन्धाय सखी वक्ष्यति आकारप्रकटनेन) कारप्रकटेन=आकारस्य वर्णविशेषस्य योजनेन आकारगुप्तिं=स्वरूपप्रच्छादनम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सखी—(स्वगतम्) कथमियं लज्जते ? तदन्यतो नयामि । (प्रकाश कथमद्यापि हृदयं न मुञ्चति ते प्रणयकोपः ?

सीता—(स्वगतम्) कोवमुद्दिसिअ इमाए भणिदं ण उण इमम् । (मुद्दिश्यानया भणितम्, न पुनरिमम्) (प्रकाशम्) हला, कहं तुह कुविस्सं । लमण्णचित्तदाए ण सम्भाविदासि । (हला, कथं तुभ्यं, कुपिष्यामि । केवल चित्ततया न संभाविताऽसि ।)

सखी—क्व तर्हि दत्तचित्ताऽसि ?

सीता—आरामम्मि (आरामे) ।

सखी—(विहस्य) अहो ते चातुर्यम्, यत आकारप्रकटनेनैवाकार कृतवत्यसि ।

(सीता सलज्जमधोमुखी तिष्ठति)

रामः—

उत्तरङ्गय कुरङ्गलोचने लोचने कमलगर्वमोचने ।
अस्तु सुन्दरि कलिन्दनन्दिनीवीचिडम्बरगभीरमम्बरम् ॥२२॥

यस्य प्रकटनं तस्य गोपनमित्यसम्भवं परन्तु त्वयाऽऽकारम् प्रकटय्य (वर्ण योजयित्वा) आकारः स्वाशयः (रामे बद्धभावता) गोपित इति विनापि कार्यविधानेन त्वदीयं चातुर्यं व्यज्यते इति सख्या अभिप्रायः ।

उत्तरङ्गयेति—हे कुरङ्गलोचने=मृगनयनि, कमलानां गर्वः=सौ मदस्तस्य मोचने=अपहारिणी लोचने उत्तरङ्गय=उपरि प्रक्षिप । (किमिति कथनेन मुधा मुखमधोनीतवत्यसि) सुन्दरि, (सीतासम्बोधनम्) (परिदेशे चक्षुषोः क्षिप्तयोः) अम्बरं=व्योम कलिन्दनन्दिन्याः=यमु वीचयः=तरङ्गास्तासां डम्बरम्=(विकासाभिप्रायम्) तेन गभीरम्= अस्तु जायताम् । त्वयि वियति सविलासं कृते दृष्टिनिक्षेपे तदीयप्रसृमरनी प्रभया वियति यमुनाप्रवाहः संशय्यतामित्यर्थः । अत्र कुरङ्गलोचने चञ्चलनयना तेन तत्कान्तेर्वियति प्रसारः कालिन्दीजलत्वेन सन्दिग्धत नयनप्रभायाः नीलिमा चावेद्यते । असम्बन्धे सम्बन्धरूपातिशयोक्तिरत्रालङ्कारः रथोद्धतावृत्तम् ॥ २२ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सखी—(स-प्रणयस्मितम्) अलमालिजनेऽपि हृदयापलापेन, ननु विदितं मया

अत्र ते सखि शिखण्डमण्डने, पुण्डरीकरमणीयलोचने ।
श्यामतामरसदामकोमले, रामनामनि मनो मनोभवे ॥२३॥

सीता—हला, पेक्ख पेक्ख, [हला, पश्य पश्य,]

मऊणवहूणेउररवरमणिज्जं किम्पि किम्पि कूजन्तो ।
माअन्दमुउलमहुरसमहुरमुहो महुअरो भमइ ॥२४॥

(छाया)

[मदनबधूनूपुररवरमणीयं किमपि किमपि कूजन् ।
माकन्दमुकुलमधुरसमधुरमुखो मधुकरो भ्रमति ॥२४॥]

अत्र त इति—सखि, सीते, शिखण्डमण्डने=बर्हालङ्कारे पुण्डरीकं=सिताम्भोजं तद्वत् रमणीयं=सुन्दरं लोचनं यस्येति तस्मिन् कमलकमनीयनेत्रे, श्यामं कृष्णं यत्तामरसं=कमलं तस्य दाम=पङ्क्तिस्तद्वत् कोमले=सुकुमारे रामनामनि =रामाभिधाने मनोभवे=कन्दर्पे (तव) मनः (त्वदीयो भावानुबन्ध इति भावः, इति मया विदितमिति पूर्वेण सम्बन्धः ॥ अस्मिन् श्लोके शिखण्डमण्डने इत्युक्त्या सीतया मनसि कृतस्य विलासरसिकत्वम्, पुण्डरीकरमणीयलोचने इति सुरूपता, श्यामतामरसेत्यादिना चाकर्कशकायता, सर्वैश्चैभिः सीताकर्तृकानुरागस्यौचिती व्यज्यते । सखीति सम्बोधनं तु—"समप्राणः सखामतः" इत्यभियुक्तोक्त्या त्वदेकप्राणां मां प्रत्यपि तव हृदयगोपनव्यापारः सर्वथाऽनुपयुक्तो मया तु त्वद्गतप्राणया त्वयाऽल्पीयसापि मात्रयेङ्गितेनापि न प्रकटितस्य ज्ञानमासादितमित्यर्थस्य पोषणायेति सहृदयैरनुध्येयम् ॥ पूर्वोक्तमेव वृत्तम् ॥२३॥

मऊणेति—मदनस्य=कामस्य बधूः=रतिः तस्या नूपुरयो रवः=स्वनस्तद्वद्रमणीयं किमपि किमपि—अर्थशून्यं किञ्चित (यदनर्थकमपि सस्पृहं श्रोतव्य तां न मुञ्चति) कूजन्=शब्दायमानः, माकन्दस्य=चूतस्य मुकुलस्य=मञ्जर्या मधुरसः=मकरन्दस्तेन मधुरमुखः=रक्तकण्ठः भ्रमरः=षट्पदो भ्रमति । अत्र मकरन्दपानमत्तभ्रमरकूजितवर्णनेनोन्मादकेऽस्मिन् काले मया रामे पोष्यमाणः स्नेहोऽनाकस्मिक इत्यर्थः प्रतीयते ॥ २४ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

(पुनः स्वगतम्)

अइ पिबह लोअणाइं पिअजणवअणारविन्दमअरन्दम् ।
अइ तरलाइं विआरह पुण कह तुह्मे कह इमो अ ॥२५॥

(छाया)

[अयि पिबतं लोचने प्रियजनवदनारविन्दमकरन्दम् ।
अयि तरले विचारयतं पुनः क्व युवां क्वायं च ॥२५॥]

रामः (निर्वर्ण्य)

सर्वस्वं नवयौवनस्य भवनं भोगस्य भाग्यं दृशां
सौभाग्यं मदविभ्रमस्य जगतः सारं फलं जन्मनः ।
साकूतं कुसुमायुधस्य हृदयं रामस्य तत्त्वं रतेः
शृङ्गारस्य रहस्यमुत्पलदृशस्तत् किञ्चिदालोकितम् ॥२६॥

(सीता स्वगतं पुनस्तामेव गाथां पठति)

अयि लोचने इति—अयि लोचने=नेत्रे, प्रियजनस्य=स्नेहपात्रस्य व=मुखमेवारविन्दं=कमलं तस्य मकरन्दं=पुष्परसम् (माधुर्यं, शोभाम्, इत्यर्थो विवक्षितः) पिबतं=पश्यतम् (पानमुत्कण्ठया दर्शनार्थे) अयि तरले=चञ्चल (अक्षिणी) विचारयतम्=शोचतम् पुनः=(इतोऽपसृतेऽस्मिन् मध्येव वा स्वदेश नीतायां मातृगणेन वाहूयमानायाम्) युवां क्व ? अयं च क्व ? नोभयोर्भवत्प रेतेन सह सङ्गमसम्भव एतेन तस्याभिलष्यमाणता च प्रत्याय्यते । तरले इत्य तयोः स्वहितेऽपि हेलाऽतश्चोपदेशस्यौचित्यं व्यज्यते । वृत्तमार्याप्रभेदः ॥२५॥

सर्वस्वमिति—नवयौवनस्य सर्वस्वं=समग्रा सम्पत्तिः, भोगस्य=वि सस्य भवनम्=निकेतनम् (एतेन तस्य स्वाभाविकः सततवासः) दृशां भा =अदृष्टोदयः (एतेन रमणीयतातिशयशालिता, तादृशवस्तुविलोकने नेत्रसाफ जन्मसाफल्यं च भाग्यायत्तम्) मदविभ्रमस्य=विलासस्य सौभाग्यम्=दै कूल्यम् (एतादृशपात्रप्राप्तेः) कुसुमायुधस्य=कामस्य साकूतम्=आशयः (आ मिति युक्तः पाठः, एतद्धि कामस्य मूर्त्तिमानभिप्रायः सीताया विलोकित

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सखी—अयि भर्तृदारिके, पश्य।

दलदमलकोमलोत्पलपलाशशङ्काकुलोऽयमलिपोतः।
तव लोचनयोरनयोः परिसरमनुवेलमनुसरति ॥ २७ ॥

सीता—(सहर्षमात्मगतम्) अपि लोअणाइं वद्धसप्पदाइं णं सुहोपसुदीयम्।
(अपि लोचने बद्धषट्पदे ननु सुखोपश्रुतिरियम्)

रामः—(सप्रत्याशम्)

अमृतमयपयोधिक्षीरकल्लोललोलैः
स्नपयति तरलाक्षी यत्र मां नेत्रपातैः।

रामस्य हृदयं=मनः (एतेन तां विना जीवितुमयोग्यता) रतेः=क्रीड़ायाः तत्त्वम्=निष्ठा (इयत्ताविशेषः) शृङ्गारस्य=रसराजस्य रहस्यम्=उपनिषत् तत् किञ्चित् (इदन्त्वेन निर्धारयितुमशक्यत्वात्) उत्पलदृशः=कमलनयनायाः आलोकितम्=दर्शनम्। सीता हि यदालोकते तत्पूर्वोक्तप्रकारेणोल्लिख्यते। उल्लेखोऽत्रालङ्कारः, शार्दूलविक्रीडितं वृत्तम् ॥ २६ ॥

दलदमलेति—दलत्=विकसत्, अमलं=निर्मलम् उत्पलपलाशम्=कमलदलम् तस्य शङ्का=सम्भावना तयाऽऽकुलः=उत्कः (प्रेर्यमाण इति भावः) अयम् अलिपोतः=भ्रमरशिशुः अनयोः तव लोचनयो=र्नेत्रयोः परिसरं=समीपप्रदेशम् अनुवेलं=सततम् अनुसरति=उपैति, अत्र भ्रमरपोतस्य सीतानयनज्योतिषा तत्परिसरस्य श्यामीभूततया तन्नयनयोर्नीलकमलत्वभ्रम इति तद्देशावाप्तिः। भ्रान्तिमानलङ्कारः। आर्या वृत्तम् ॥ 'पर्यन्तभूः परिसरः' इत्यमरः ॥ २७ ॥

लोचने=नयने बद्धषट्पदे=भ्रमरं स्ववशीकृतवती इति सुखोपश्रुतिः=शुभशकुनम्। (एतेन अहं स्वप्रणयिनं स्वस्यामनुरक्तं विधाताहे इति सीताहृदयेऽभिलाषोदयमामनन्ति चिन्तकाः) सप्रत्याशम्=ससम्भावनम् (प्रत्याशा चात्रैतत्सीतोक्तिश्रवणनिमित्ता)।

अमृतमयेति—अमृतमयपयोधिः=सुधाप्रचुरः समुद्रः तस्य क्षीरकल्लोलो=दुग्धतरङ्गः तद्वत् लोलैः=चपलैः नेत्रपातैः=कटाक्षनिक्षेपैः यत्र=यस्मिन् (सन्मुहूर्त्ते इति योजनीयम्) तरले=चञ्चले अक्षिणी=नयने यस्याः सा सीता मां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अपि भवतु सदाऽयं सन्मुहूर्त्तः—

(विमृश्य सविषादम्)

कुतो वा ?

मधुरविधुरमिश्राः सृष्टयो हा ! विधातुः ॥ २८ ॥

(प्रविश्य)

चेटी—भट्टदारिए, भट्टिणीहिं आण्णत्तह्मि । जं किर वत्सा जाणई घरमाणीअ विचित्ताहरणेहिं मण्डीअदु । जेण तीए साणन्दं वअणार पुलोअह्म [भर्तृदारिके, भट्टिनीभिराज्ञप्ताऽस्मि, यत्किल वत्सा जानकी गृहमानीय विचित्राभरणैर्मण्ड्यताम् । येन तस्याः सानन्दं वदनार विलोकयामः ।]

सीता—हण्डे, कहं सिणेहमुद्धाओ मह अम्बाओ (हण्डे, कथं स्नेह ममाऽम्बाः) ।

चेटिका—जा तुमं णिसग्गलावण्णचन्दलेहां णेवच्छलच्छोलञ्छणेण

स्नपयति=(प्रसादयति) स अयम् सन्मुहूर्त्तः=शोभनः कालः सदापि=सर्व भवतु=जायताम् । (यतोऽहमिमां निर्भरमालोकयेयमियं च मद्दर्शनप्ररूढानु जायताम्) कुतो वा ? (इदं सम्भवतीति शेषः) (सर्वथाऽसम्भावनीय भावः) हा !=खेदे विधातुः सृष्टयो=विधेर्निर्माणानि मधुरेण (सुखाधा सुखत्वेनाध्यवसितेन) हितेन, विधुरेण (दुःखप्रदेन) अहितेन मिश्राः=मि भवन्तीति शेषोऽतो न तथा सम्भवतीति । तरलाक्षीत्यत्र 'बहुव्रीहौ सक्थ्य रिति पच्, षित्वान्ङीष् । अमृतपयोधितरङ्गसाम्येन नेत्रपातेषु सद्यः प्राणप्र स्नपयति, इत्यनेन दर्शने स्फीतता, सदा भवतु इत्येतेन व्यापारान्तरविस्म इत्याद्यर्था व्यज्यन्ते । अर्थान्तरन्यासोऽत्रालङ्कारः । "भङ्गस्तरङ्ग ऊर्मिर्वा वीचिरथोर्मिषु । महत्सूल्लोलकल्लोलौ" इत्यमरः । मालिनीवृत्तम् ॥ २८ ॥

विचित्राभरणैः—नानाप्रकारैः, मण्डनैः=भूषणैः ।

स्नेहेन = वात्सल्येन, मुग्धाः=व्यस्ताः (मदीयालङ्करणग्रहणोत्कण्ठि निसर्गलावण्यं=स्वाभाविकं सौन्दर्यम् यस्य स चन्द्रस्तस्य लेखां=स्व

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

न्छन्ति । तहा अ । (यास्त्वां निसर्गलावण्यचन्द्रलेखां नेपथ्यलक्ष्मीलाञ्छ-
।ऽलङ्कर्तुमिच्छन्ति)

अइ तुह मुहलेहा चन्दबिम्बे सणेहा
दसणकिरणलच्छी अच्छजोह्लासरिच्छी ।
कुवलय-दलदोणी-कन्दराए वहन्ती
तरलबहलमिट्ठी दुद्धधारे व्व दिट्ठी ॥ २९ ॥

ता आअच्छ, गच्छह्म णिअघरं जेव्व ।

(छाया)

अयि तव मुखलेखा चन्द्रबिम्बे सस्नेहा, दशनकिरणलक्ष्मीरच्छज्योत्स्नासदृक्षा । कुवलयदलद्रोणीकन्दरायां वहन्ती, तरलबहलमिष्टा दुग्धधारेव दृष्टिः ॥२९॥]

तदागच्छ, गच्छामो निजगृहमेव ।

रामः—सविषादम्) कथं नयनपथमतिक्रान्तैव कान्ता ? ।

(पुनः सप्रत्याशम्)

णीयान्त्वां नेपथ्यलक्ष्मीः वेषविन्यासजन्या शोभा सैव लाञ्छनं=कलङ्कस्तेन । न्द्रमसि कलङ्क इव त्वयि मण्डनानीति भावः ।

अयि तवेति—अयि (सीते) तव मुखलेखा ,चन्द्रबिम्बे=चन्द्रमण्डले स्नेहा=प्रणयिनी (सादृश्यहेतुकस्तयोः स्नेहः) दशनकिरणानां=दन्तप्रभाणाम् क्ष्मीः=शोभा अच्छा=स्वच्छा या ज्योत्स्ना=चन्द्रकान्तिस्तया सदृक्षा=तुल्या । वलयदलस्य=कमलपत्रस्य या द्रोणी=नावाकृतिः पत्रादिनिर्मितो वक्रप्रान्तः त्रविशेषो ('दोना' इति ख्यातस्तत्र) तस्याः कन्दरायां=गुहायां वहन्ती=स्यन्द-िना तरला=चञ्चला बहलमिष्टा=अतिमधुरा दुग्धधारा इव (तव) दृष्टिरिति । न्दरो वाऽस्त्री देवखातबिले गुहे'त्यमरः । कुवलयदलं द्रोणीति कथनेन चक्षु-रक्तिमा, द्रोणीपदापादानेन वक्रता, वहन्तीति कान्तिधारानिर्गमः, इत्याद-ऽर्था व्यज्यन्ते । मालिनीवृत्तमेतत् । उपमालङ्कारः ॥ २९ ॥

नयनपथम्=नेत्रदृश्यं प्रदेशम्, अतिक्रान्ता=अपसृता (अदृश्यतां गता)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अप्याविरस्तु भूयोऽपि मम लोचनयोरियम् ।
दिवसेऽन्तर्हिता नक्तं चन्द्रिकेव चकोरयोः ॥ ३० ॥

लक्ष्मणः—आर्य, इयमाविरस्ति ।

रामः—(सहर्षम्) कथं पुनः प्राप्ता प्रेयसी । (विलोक्य) न ता किमप्यन्यदभिसन्धाय तदिदमुक्तं वत्सेन । (उच्चैः) वत्स, केयमाविरस्ति ।

लक्ष्मणः—

मुग्धस्य केलिविजितस्मरचापयष्टे-
रातन्वती रुचिमतीव सुधाकरस्य ।
रागोद्धुरा स्फुटमुदञ्चिततारकश्रीः
सन्ध्याविरस्ति ननु काऽपि पतिंवरेव ॥ ३१ ॥

अप्याविरिति—इयं=(सीतास्वरूपा) मम लोचनयोः=नेत्रयोः च =कौमुदी (शीतलताप्रदानात् प्रसादनाच्च तथारोपः) भूयोऽपि=पु आविरस्तु=प्रकटतु, कयोः केवेत्याह, दिवसे=दिनेऽन्तर्हिता=तिरोहिता चन्द्रिके चकोरयोः इव । यथाऽहनि निलीना चान्द्री कला प्रदोषे प्रकाशमुपेत्य चको तुन्दिलयति तथैवेयं राजकन्या पुनरात्मानं प्रकटय्य माम् प्रमोदयत्विति लङ्कारः स्फुटः ॥ ३० ॥

मुग्धस्येति—मुग्धस्य=रमणीयस्य केलिविजिता=अनत्यायासं परा स्मरचापयष्टिः=कामधनुर्लता येन तस्य (वक्रतया तथोक्तिः) सुधा अतीव=बहुम् रुचिम्=प्रेमाण मातन्वती=विस्तारयन्ती रुचिम्=कान्तिमा =प्रसारयन्तीति चाऽर्थः । रागोद्धुरा=अभिलाषपूर्णा, रक्तिमरञ्जिता च =स्पष्टम् उदञ्चिता तारका=कनीनिका, ज्योतिश्च तासां श्रीः यस्या य सन्ध्या=प्रदोषः ननु कापि पतिंवरा=अचिरनिर्वर्त्स्यमानपरिणया कन्येव रस्ति=प्रकटति । अत्र श्लिष्टविशेषणमाहात्म्यात् कन्यासन्ध्ययोरौपम्यं नि चन्द्रमसो रुचिं हि कन्या स्वदेहप्रभया विस्तारयति । कन्यापि कस्यचित् प्रे सुपोढ्यति स्वयं च रागं भजते । वसन्ततिलकं वृत्तमिदम् ॥ ३१ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

रामः—वत्स, एवमेतत्, तथा हि—

कृत्वा प्रबुद्धकमलामखिलां त्रिलोकी-
मम्भोनिधेर्विशति गर्भमसाविदानीम् ।
अन्तःप्रसुप्तहरिनाभिसरोजबोध-
कौतूहलीव भगवानरविन्दबन्धुः ॥ ३२ ॥

लक्ष्मणः—आर्य, दृश्यताम्-अयमीषन्मुकुलितराग इव गगनाभोगः ।

रामः—एवमेतत्—इदानीं हि—

प्राचीमालम्बमाने घनतिमिरचये बान्धवे बन्धकीनाम्
संप्राप्ते च प्रतीचीं शशिकरनिकरे वैरिणि स्वैरिणीनाम् ।
अर्धश्यामोपलार्धस्फटिकमिव दिशामन्तरालं विधत्ते
कालिन्दीजह्नुकन्यामिलदमलजलस्यन्दसन्दोहमैत्रीम् ॥ ३३ ॥

कृत्वेति—असौ भगवान् अरविन्दानां=कमलानां बन्धुः=सखा सूर्यः (विकासकतया सखोक्तः) अखिलां=समस्तां त्रिलोकीम्=त्रिभुवनम् प्रबुद्धानि विकसितानि कमलानि यस्यां सा तादृशीं विकसितनलिनीं विधाय इदानीं दिवसावसानसमये अन्तःप्रसुप्तः=मध्ये शयितो यो हरिः=विष्णुस्तस्य नाभिसरोजस्य=नाभिकमलस्य बोधः=विकासनं तत्र कौतूहलीव कुतुकीव अम्भोनिधेः समुद्रस्य गर्भं=कुक्षिप्रदेशम् (अन्तरालं) विशति=अवगाहते । सूर्यास्तवर्णनमिदम । सूर्योऽहनि जगत्त्रयस्थितं निखिलमपि कमलं विकास्य सायमेकं (समुद्रजलान्तर्धानहेतोः) विकासमनुपेतं भगवन्नाभिकमलं कदाहं विकासयितुं प्रभवेयमित्युत्कण्ठाप्रेरित इव समुद्रान्तःप्रवेशमाचरतीत्यर्थः । अत्र कौतूहलीवेति हेतूत्प्रेक्षाऽलङ्कारः । पूर्वोक्तमेव वृत्तमत्रापि ॥ ३२ ॥

ईषत्=स्वल्पम्, मुकुलितः=प्रस्फुटितः, रागो=रक्तिमाभा यत्र तथा, गगनाभोगः=व्योमविस्तारः ।

प्राचीमिति—बन्धकीनां=प्रच्छन्नकामुकीनां व्यभिचारिणीनाम् बान्धवे बन्धौ (अवसरप्रदत्वात्) घनतिमिरचये=निविडान्धकारनिवहे प्राचीं=पूर्वां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

(पुनः सहर्षमङ्गुल्या दर्शयन्)

एतत्कोककुटुम्बिनीजनमनःशल्यं चकोराङ्गना-
चञ्चूकोटिकपाटयोर्घटितयोरुद्घाटिनी कुञ्चिका ।
दग्धस्यापि नवाङ्कुरः स्मरतरोरार्द्रागसां प्रेयसी-
मानोद्दामगजाङ्कुशो विजयते मुग्धं सुधांशोर्वपुः ॥३४॥

दिशमालम्बमाने=आश्रयति, पूर्वस्यां दिशि तमसि प्रसरति सतीति भावः ईरितुं शीलं यासां ताः स्वैरिण्यः=कुलटास्तासां वैरिणि=शत्रौ (प्रकाश तदाचरणे विघ्नविधायित्वात्) शशिकरनिकरे=चन्द्रकरसमूहे प्रतीचीं=पश्चि सम्प्राप्ते=अधिगतवति (उभयत्रापि भावे सप्तम्यौ) अर्धश्यामम्=कृष्ण भागम्, यदुपलं=प्रस्तरखण्डं तत् अर्धस्फटिकम्=स्फटिकघटितार्धभागमि =पुरोदृश्यम् दिशामन्तरालं मध्यम्, कालिन्दी=यमुना जह्नुकन्या=गङ्गा मिलन्=परस्परं सङ्गच्छमानो यो जलस्यन्दः=पयःपूरस्तस्य सन्दोहः=समू मैत्रीं=तुलनां (समानशीलेषु सख्यस्यौचित्यात्) विधत्ते=कुरुते । तमसि प्रसृते पश्चिमायां च चन्द्रे भासमानेऽशतः श्यामं शुभ्रं चांशतो शलं गङ्गा-यमुनानद्योः सम्मिलितस्य प्रवाहस्यानुकरोतीति भावः । ध्यसती"त्यमरः सन्दोह"·सङ्घातसञ्चयाः" इति च । अत्रोपमालङ्क स्रग्धरावृत्तमेतत् ॥ ३३ ॥

एतत्कोकेति— कोककुटुम्बिनी=चक्रवाकी तल्लक्षणस्य जनस्य =हृदयस्य शल्यम्=शङ्कुः (कण्टकं वा) तद्रूपः (चन्द्रोदये कोकवधूः वियुज्यत इति तस्य दुःखदायित्वेन शल्यत्वमुच्यते) चकोरस्य=तन्नाम्ना ख्यस्य पक्षिजातिविशेषस्य अङ्गना=स्त्री चकोरी तस्याश्चञ्चूकोटी=चञ्च्व तावेव कपाटौ (परस्परसङ्गतत्वाद्बाङ्निर्गमप्रतिबन्धकत्वाच्च) घटितयोः= मिलितयोः तयोश्चकोरीचञ्चूपुटकपाटयोः उद्घाटिनी=पृथक्करणशीला उन् कुञ्चिका=यन्त्रविशेषः ('चावी'ति प्रसिद्धः) सति चन्द्रोदये चकोर्याः प्रस्फुटतः तथाह जगन्नाथः "चञ्चूपुटं चटुलयन्ति चिरं चकोराः" इति । =हरनयनहुताशने ज्वलितस्य स्मरतरोः=कामदेवरूपस्य वृक्षस्य नवाङ्कुरः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

लक्ष्मणः—

कल्लोलक्षिप्तपङ्कत्रिपुरहरशिरःस्वस्रवन्तीमृणालं
कर्पूरक्षोदजालं कुसुमशरवधूसीधुभृङ्गारनालम् ।
एतद्दुग्धाब्धिबन्धोर्गगनकमलिनीपत्रपानीयबिन्दो-
रन्तस्तोषं न केषां किसलयति जगन्मण्डनं खण्डमिन्दोः ॥३५॥

रामः—वत्स, अलमतिप्रसङ्गेन, तदेहि, सायन्तनत्रिदशार्चनोचितकुसुमोपायनेन भगवन्तं गाधिनन्दनमुपास्महे ।

(इति निष्क्रान्ताः सर्वे)

इति द्वितीयोऽङ्कः ।

—०❀०—

प्ररोहः (कामवासनोद्दीपकत्वाच्चन्द्रोदयस्य तथा कथनम्) आर्द्रं=क्लिन्नं (नवम्) आगो=ऽपराधो येषां=सद्यः कृतापराधानां पुंसां प्रेयसीनां=प्रियतमानां मानः =कोपः स एव उद्दामगजः=मत्तकरी तस्याऽङ्कुशः (स्थिरीकरणात्) एतत्=पुरःस्थितं मुग्धं सुधांशोः वपुः मण्डलं दृश्यते । शल्यपदं नितान्तव्यथकतां, कुञ्चिकापदं सर्वथोन्मोचनम्, दग्धस्यापीत्यपिशब्दः=अत्यन्तसामर्थ्यवत्ताप्रतिपादनमुखेनातिकामोद्दीपकतां, मानस्य गजत्वोक्त्या मानवतीनां हार्दिकं क्षोभं, तच्छमकत्वं चाऽङ्कुशपदं व्यञ्जयति । अत्रोत्प्रेक्षोल्लेखयोः सङ्करः । शार्दूलविक्रीडितं वृत्तम् । "कोकश्चक्रश्चक्रवाकः" इत्यमरः ॥३४॥

कल्लोलेति—कल्लोलेन=तरङ्गेण क्षिप्तः=प्रत्यस्तो दूरीकृतः पङ्कः=कर्दमो यस्यास्तादृशी या त्रिपुरहरस्य=शङ्करस्य शिरसो=जटाजूटस्य स्वः स्रवन्ती=आकाशगङ्गा तस्या मृणालं=विसदण्डः। (कल्लोलेत्युक्त्या पङ्कप्रक्षेपेण जले स्वच्छता ततस्तदुत्पन्ने मृणालेऽतिस्वच्छता) कर्पूरस्य क्षोदजालम्=चूर्णसमुदायः (राशीकृतं कर्पूरचूर्णम्) कुसुमशरवध्वाः=कामदेवपत्न्या रतेः सीधुभृङ्गारनालम्=मद्यपानपात्रम् । एतत् दुग्धाब्धिबन्धोः=क्षीरसागरसुहृदः (वर्धकत्वात्) गगनमेव कमलपत्रं तत्र पानीयबिन्दोः=जलकणस्य शोभां बिभ्रतः इन्दोः जगन्मण्डनं=भूभूषणं खण्डं =(वक्रतयाऽपूर्णतया च) केषामन्तस्तोषं=हार्दिकीं प्रसन्नतां न किसलयति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

[तृतीयोऽङ्कः]

(ततः प्रविशति वामनकः)

वामनकः—(आत्मानं विलोक्य । सविस्मयम्) अहो अङ्गाणं मे तुङ्गत्तणम् अवि णाम ईरिसेहिं अङ्गेहि एत्थ संचरन्तेण मए दुआरसिहरं भञ्जीअदि । ता खुज्जो भविअ संचरिस्सम् । (तथा करोति)

[अहो अङ्गानां मे तुङ्गत्वम्, अपि नामेदृशैरङ्गैरत्र सञ्चरता मया द्वारशिखरं भज्यते । तत्कुब्जो भूत्वा सञ्चरिष्यामि ।]

(प्रविश्य)

कुब्जकः—वअस्स वामणअ, दाणिं सअलगुणसंजुत्तो सि तुमं ।

(वयस्य वामनक, इदानीं सकलगुणसंयुक्तोऽसि त्वम्)

वामनकः—कहं विअ (कथमिव)

कुब्जकः—पढमं जेव्व वामणो दाणिं उण खुज्जत्तणं पत्तो ।

(प्रथममेव वामन इदानीं पुनः कुब्जत्वं प्राप्तः)

वामनकः—(सक्रोधम्) अए मुरुख, कहं अत्तणो खुज्जत्तणं परम्मि आरोवेसि । णं तुमं जेव्व खुज्जओ । मए उण दुआरसिहरभङ्गसङ्किदेण अप्पम्मि खुज्जत्तणमारोविदम् [अये मूर्ख, कथमात्मनः कुब्जत्वं परस्मिन्नारोपयसि । ननु त्वमेव कुब्जकः । मया पुनर्द्वारशिखरभङ्गशङ्कितेनात्मनि कुब्जत्वमारोपितम् ।]

कुब्जकः—(विहस्य) कहं विअत्थिमेत्तएण तुह अङ्गेण दुआरसिहरं भज्जि-

=पल्लवयति ? सर्वेषामपि हृदयमावर्जयतीति भावः । अत्र मृणालान्तेन विशेषणेन चन्द्रखण्डस्य स्वच्छतातिशयः, कर्पूरक्षोदतोक्त्या स्वच्छता शैत्यं च, सीधुपदेन मादकतातिशयः, गगनस्य कमलिनीपत्रतोक्त्या प्रशस्यश्यामवर्णवत्ता, 'किसलयति' इति क्रियापदेन आनन्दातिरेकः, इत्याद्यर्थाः सुधीभिरुन्नेयाः । अत्रापि प्रागुक्तावेव अलङ्कारौ, वृत्तं तु स्रग्धरा ॥३५॥

इति श्रीरामचन्द्रमिश्रकृते प्रसन्नराघवव्याख्याने प्रकाशे

द्वितीयाङ्क—प्रकाशः ।

—०—

अङ्गानाम्=अवयवानाम् । तनुता=ह्रस्वता । द्वारशिखरम्=द्वारोपरिभागः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

इ । (पुनः सक्रोधम्) अरे अलीअवाआल, केण तुह कहिदं अहं खुज्जओ त्ति
थं वितस्तिमात्रेण तवाङ्गेन द्वारशिखरं भज्यते । अरे अलीकवाचाल, केन
कथितमहं कुब्जक इति ।]

वामनकः—णं इमिणा जेव्व दरिअवुसहककुदसरिसेण पुट्ठट्ठिदेण मंसत्थवएण
वाहिएण (नन्वनेनैव दृप्तवृषभककुदसदृशेन पृष्ठस्थितेन मांसस्तवकेना-
हितेन) ।

कुब्जकः—(विहस्य) अए मदिसुण्ण, कहं इमो मंसत्थवओ वि उण सोह-
ग्गच्छीए उवहाणगेण्डुओ (अये मतिशून्य, कथमयं मांसस्तवकोऽपि पुनः
भाग्यलक्ष्म्या उपधानगेन्दुकः) ।

वामनकः—(साशङ्कम्) अरे, सणिअं जप्प, अह्मारिसाणं अन्तेउरचारिणं
ग्गवुत्तन्तमाअण्णिअ भट्टा कुविस्सदि [अरे, शनैर्जल्प, अस्मादृशानामन्तः-
चारिणां सौभाग्यवृत्तान्तमाकर्ण्य भर्त्ता कुपिष्यति ।

कुब्जकः—अलं भीरुत्तणेण, दाणिं धावघरम्मि वट्टदि भट्टा (अलं भीरुत्वेन,
नीं ध्यानगृहे वर्त्तते भर्त्ता)

वितस्तिमात्रेण=हस्तार्धमात्रेण (द्वादशाङ्गुलप्रमाणेनेति यावत्) प्रमाणे-
मात्रच् ।

दृप्तः=दर्पशाली वृषभः=बलीवर्दस्तस्तस्य ककुदः=तस्य मांसलमंसदेशोपरि-
तमङ्गम् ।

मांसस्तवकेन=मांसग्रन्थिना । उद्वाहितेन=वहनकर्मीकृतेन ।

मतिशून्य !=निर्बुद्धे ! । सौभाग्यमेव लक्ष्मीस्तस्य लक्ष्मीरिति वा समास-
या भाग्यसम्पद इति वाऽर्थः ।

उपधानम्—(शयनोपयोगी कोमलः) उपबर्हः=गेन्दुकः (सम्पदो=विश्राम-
निमिति भावः) ।

सौभाग्यवृत्तान्तम्=सौभाग्यसमाचारम् (अन्तःपुरचारिणां वामनकुब्जका-
ं सौभाग्यसमाचारं श्रुत्वा राजा स्वकीयमन्तःपुरेष्वन्यतमं तेष्वनुरक्तं
भावयेत्तत्कृतं च तेषां तत्सौभाग्यं मन्येत, ततश्च तेषु दण्डं विनिपातयेदिति
मनकस्य भीतिः)।

ध्यानगृहे=समाधिसदने (पूजाभवने वा) अतश्च न त्वदुक्तश्रवणसम्भवः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

वामनकः—ण हु ण हु। अज्ज किर कस्सावि पाहुणस्स महेसिणो आ पडिवालअन्तो बाहिरमण्डवे वट्टदि (न खलु न खलु, अद्य किल क प्राघुणिकस्य महर्षेरागमनं प्रतिपालयन् बाह्यमण्डपे वर्त्तते)

कुब्जकः—हा हदह्म (हा हताः स्मः)

वामनकः—किंत्ति (किमिति)

कुब्जकः—णं पढमं जेव्व एक्केण महेसिणा जण्णवक्केण उवदिट्ठो राआ अच्छिनीलणेहिं रत्तिओ गमेदि। दाणिं उण इमिणा उवदिट्ठो अ जेव्व परिहरिस्सदि। तदो किं इमो अह्मेहिं खवणो व्व कप्पडपेडएहिं करि (ननु प्रथममेवैकेन महर्षिणा याज्ञवल्क्येनोपदिष्टोऽयं राजाऽक्षिनिमीलनै गमयति। इदानीं पुनरनेनोपदिष्टोऽन्तःपुरमेव परिहरिष्यति। ततः किमयमस् क्षपणक इव कर्पटपेटकैः करिष्यति)

वामनकः—सच्चं एदं, जइ इमो महेसी अह्माणं रण्णो उवदेसत्थं भवे। इमो उण हरधणुद्दंसणत्थम् (सत्यमेतत्, यद्ययं महर्षिरस्मा उपदेशार्थमागतो भवेत्। अयं पुनर्हरधनुर्दर्शनार्थम्)

कुब्जकः—किं इमस्स महेसिणो होमग्गिधूमसामलिअलोअणस्स हर सणेण। ता तक्केमि खत्तिअबह्मणो इमो त्ति (किमस्य महर्षेर्होमाग्निधू

प्राघुणिकस्य=अतिथेः, प्रतिपालयन्=प्रतीक्षमाणः। बाह्यमण्डले= भवने। अक्षिनिमीलनैः=ध्यानोपयुक्तनेत्रनिमीलनैः (निशासु ध्यानाव तीति भावः) अन्तःपुरम्=अवरोधान् (राज्ञीरिति तात्पर्यम्) परिह =त्यक्ष्यति (विरागादिति शेषः) क्षपणक इवेति। यथा क्षपणका साधवः कर्पटपेटकैः=वस्त्रसमुदयैः किमपि प्रयोजनं न रक्षन्ति तथैव जाते विरागेऽन्तःपुरविसर्जने सति नाऽस्माकं वृत्तेरत्रोपायः सम्भवेदिति कु चिन्तां समेधयति)

एतत्=त्वदुक्तं राज्ञो वैराग्यादन्तःपुरपरित्यागप्रभृति (स्यादिति योज दर्शनार्थम्—(आगत इति शेषः)

होमस्य अग्निस्तस्य धूमः तेन श्यामलितम्=कृष्णवर्णतां प्रापितम् =नयनं यस्य तस्य सतताग्निहोत्रविधानसम्भवधूमलतया कृष्णवर्णीभूतनेत्र

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

लितलोचनस्य हरचापदर्शनेन, तत्तर्कयामि क्षत्रियब्राह्मणोऽयमिति)

वामनकः—(विहस्य) कहं तणु व्व मदीवि तुहं वक्कुणी जं एव्व तक्केसि। सच्चं खत्तिअवह्मणो इमो त्ति (कथं तनुरिव मतिरपि ते वक्रा, यदेवं तर्कयसि, सत्यं क्षत्रियब्राह्मणोऽयमिति)

कुब्जकः—ता को वि अणत्थो संभाविअदि जं किर चिरतवस्साकरिसिदो इमो तिव्वं पेक्खमाणो खत्तिअवह्मणो रुजुमदिणो अह्माणं राएसिणो रज्जं गहीदुं आअदो त्ति (तत्कोऽप्यनर्थः सम्भाव्यते यत् किल चिरतपस्याकर्षितोऽयं तीव्रं प्रेक्षमाणः क्षत्रियब्राह्मण ऋजुमतेरस्माकं राजर्षे राज्यं ग्रहीतुमागत इति)

वामनकः—सन्तं पावम् । ईरिसं मा जप्प। अअं हि चिरतवस्सापरितोसिदस्स वह्मणो वाआए खत्तिअत्तणं परिहरिअ वह्मणत्तणं पत्तो (शान्तं पापम्, ईदृशं मा जल्प, अयं हि चिरतपस्यापरितोषितस्य ब्रह्मणो वाचा क्षत्रियत्वं परिहृत्य ब्राह्मणत्वं प्राप्तः)

कुब्जकः—कहं तणु व्व मदीवि तुह वामणी जं एरिसअलीअलोअवुत्तन्ते वि पत्तिआअदि। जइ कस्सवि वाआए खत्तिओ वह्मणो होइ ता मह वाआए तुमं वि वह्मणो होसि (कथं तनुरिव मतिरपि ते वामनी, यदीदृशालीकलोक-

---

हरचापदर्शनेन किम्=न किमपि फलमिति भावः (शमवृत्तेरुपासकस्य चास्यर्षेः किम्फलमनेन दृष्टेन शैवधनुषा ? नहि क्षीरार्थी करिणीं लिप्सते।)

क्षत्रियब्राह्मणः=पूर्वं क्षत्रियः प्रश्चाद्ब्राह्मणः–(अतोऽस्य जातिसंस्कारोऽनुवर्त्तते) एवं तर्कयसीति=सिद्धं तर्केण बुध्यस इति तव ज्ञानमार्गो वक्र इति बुद्धेर्वक्रतोपहासः।

अनर्थः=कष्टम्। चिरं या तपस्या=तपश्चरणम् तया कर्षितः अनुभूतक्लेशः। तीव्रम्=उग्रम्। ऋजुमतेः=सरलबुद्धेः (एतेन वञ्चनीयतासम्भवः।) क्षत्रियो ब्राह्मणः' इति तस्यार्थगृध्नुतामूला ब्रह्मवृत्तिरित्येष तर्कः। ब्राह्मणत्वं प्राप्तः–यो ब्रह्मणो वाचं सार्थकयितुं ब्राह्मणत्वं स्वीचक्रे न तत्र तादृशी धनैषणा सम्भाव्यतेऽतो निराधारस्ते तर्क इति तदाशयः।

अलीके=मिथ्याभूते लोकवृत्तान्ते=समाचारे (क्षत्रियो ब्रह्मवाचा ब्राह्मणो जात ईदृशे) प्रत्याय्यते=विश्वास्यते। वालिशः=मूर्खस्तत्सम्बुद्धौ "मूर्खवैधेयबालिशा" इत्यमरः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

वृत्तान्तेऽपि प्रत्याय्यते, यदि कस्यापि वाचा क्षत्रियो ब्राह्मणो भवति तर्हि वाचा त्वमपि ब्राह्मणो भवसि)

वामनकः—अरे बालिस, कहं तुह गोमुहस्स भअवदो चतुम्मुहस्स वि णत्थि अन्तरम् (अरे बालिश, कथं तव गोमुखस्य भगवतश्चतुर्मुखस्यापि नास्त्यन्तरम्)

कुब्जकः—जइ इमो सुद्धबह्मणो ता किं इमस्स चावचिन्ताए (यद्ययं शुद्धब्राह्मणस्तत्किमस्य चापचिन्तया)

वामनकः—अत्थि कारणं, तस्स पासम्मि तदो जेव्व गहिअचावविज्जा दो खत्तिअकुमारा वट्टन्ति। ताणं दंसइस्सदि चावं ति (अस्ति कारणं, तस्य पार्श्वे तत एव गृहीतचापविद्यौ द्वौ क्षत्रियकुमारौ वर्त्तेते, ताभ्यां दर्शयिष्यति चापमिति)

कुब्जकः—ता सुद्धासओ इमो। (तच्छुद्धाशयोऽयम्)

वामनकः—अह इं (अथ किम् ?)

कुब्जकः—ता कहेहि दाव, इमस्सिं अलीअदूसणारोवेण णं मइपावं उप्पण्णं ण वेति (तत्कथय, तावत्, अस्मिन् अलीकदूषणारोपेण ननु मम पापमुत्पन्नं न वेति)

वामनकः—पावं ति किं भणीअदि। णं महापावं उप्पण्णम् (पापमिति किं भण्यते, ननु महापापमुत्पन्नम्)।

गोः मुखमिव मुखं यस्य तस्य=वृषाननस्य। चतुर्मुखस्य=ब्रह्मणः। अन्तरम् =भेदः (यतो यथा तदुक्त्या=क्षत्रियतपस्विनो विश्वामित्रस्य ब्राह्मणत्वप्राप्ति-स्तथा ममापि तव वाचा स्यादिति भावः।

शुद्धब्राह्मणः=जातिपरिवृत्तिमन्तरा तज्जातीयः। चापचिन्तया=धनुर्विषयकस्यै-त्कण्ठया। तत एवेति=विश्वामित्रादेवेति। अत्र तत इति पञ्चमी कुमारद्वयनिय-नियमपूर्वकं विद्याग्रहणमाह। एवपदं चान्यगुरुनिषेधपरम्। मिलितं चोभमुख-तादृशकुमारद्वयद्वारकधनुर्दर्शनार्थं विश्वामित्रस्य प्रवृत्तेरौचित्यं व्यञ्जयति।

शुद्धाशयः=पवित्राभिप्रायः (न तु राज्यादिलिप्सया मलिनमनोदेशः इति भावः)

अस्मिन्=महर्षौ विश्वामित्रे। अलीकस्य=मिथ्याभूतस्य (राज्याभिलाषादेः) दूषणस्य=दोषस्य आरोपेण=कल्पनया। पापं=निषिद्धपरापवादनरूपकर्म-करणजन्यं (दुःखप्रदं) दुरदृष्टम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

कुब्जकः—अरे मुरुख, ण आणासि धम्मस्स तत्तम्। संबन्धिअणे परिहासवअणाइं ण हु पावकारणाइं (अरे मूर्ख, न जानासि धर्मस्य तत्त्वम्। सम्बन्धिजने परिहासवचनानि न पापकारणानि भवन्ति)।

वामनकः—कहं उण इमो तुह सम्बन्धिअणो (कथं पुनरयं तव सम्बन्धिजनः)।

कुब्जकः—अरे, ण आणासि। अस्स वि दोण्णि कुमारा, अह्माणं वि दोण्णि कुमारीओ। ता तक्केमि सम्बन्धिअणो हविस्सदि त्ति (अरे, न जानासि, अस्यापि द्वौ कुमारौ। अस्माकमपि द्वे कुमारिके। तत्तर्कयामि सम्बन्धिजनो भविष्यतीति)।

वामनकः—(विहस्य) कहं अह्माणं एरिसं पुण्णम् (कथमस्माकमीदृशं पुण्यम्)।

(नेपथ्ये)

ताटङ्किना झटिति ताडितताटकेन
रामेण पद्मरमणीय-विलोचनेन।
क्रीडाशिखण्डकधरेण स-लक्ष्मणेन
साकं मुनिः कुशिकसूनुरितोऽयमेति ॥ १ ॥

तत्त्वम्=रहस्यम्। परिहासः=विनोदः। तत्र, निन्दावाक्यानि न तदुद्देश्येन प्रवृत्तानीति न पापं जनयन्ति उद्देश्यविशेषस्यैव पापपुण्योभयजनकतानियामकत्वात्। अन्यथा व्रणारोपणेच्छया कटुद्रव्यनिधानेनापि वैद्यानां पापमुत्पद्येत। इदं च सम्बन्धित्वोपन्यसनं भाविनोऽङ्कार्थस्य सूचनार्थम्।

ताटङ्किनेति—ताटङ्कः=कर्णभूषणं तदस्यास्ति तेन बाल्योचितकुण्डलालङ्कृतकर्णेनेत्यर्थः। झटिति=शीघ्रम् (अनायासम्) ताडितताटकेन=मारितताडकासुरेण पद्मरमणीयविलोचनेन=कमलकमनीयनयनेन क्रीडाशिखण्डकधरेण=काकपक्षधारिणा सलक्ष्मणेन रामेण साकं=सह अयम् कुशिकस्य तन्नाम्नो राज्ञः सूनुः मुनिः=विश्वामित्रः इतः=अस्यां दिशि एति=अभिवर्त्तते। अतः सर्वैर्यदृच्छोपविष्टशयितैः सावधानैर्भूत्वा तत्साक्षात्कारोचितस्थितिशालि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

वामनकः—(सहर्षविस्मयम्) अहो, जा किर सअललोअभीसणा रक्ख ताडएत्ति सुणीअदि सा इमिणा जइ ताडिदा ता इमस्सिं हरचावारोवणं सम्भावीअदि, ता एहि । इमं कण्णसुहारहं भट्टिणीणं समप्पह्म (अहो, या हि सकललोकभीषणा राक्षसी ताटकेति श्रूयते साऽनेन यदि ताडिता तदस्मिन् चापारोपणमपि सम्भाव्यते । तदेहि । इमं कर्णसुधारसं भट्टिनीभ्यः समर्पयाम

(इति निष्क्रान्तौ)

(इति प्रवेशकः)

(ततः प्रविशति रामलक्ष्मणानुगतो विश्वामित्रः) ।

विश्वामित्रः—(अङ्गुल्या दर्शयन्) वत्स रामभद्र,

एतत्तर्कय चक्रवाकहृदयाश्वासाय तारागण-
ग्रासाय स्फुरदिन्दुमण्डलपरीहासाय भासां निधिः ।
दिक्कान्ताकुचकुम्भकुङ्कुमरसन्यासाय पङ्केरुहो-
ल्लासाय स्फुटवैरिकैरववनत्रासाय विद्योतते ॥ २ ॥

ऽभिभूयतामिति घोषणार्थः ॥ १ ॥

भीषणा=भयङ्करी । हरचापारोपणं=शिवधनुरानमनम् । यस्ताटकां हन्त स धनुरप्युत्तोलयेत् इति सम्भावना । कर्णसुधारसं=कर्णरसायनम्, श्रुतिम हरम् । दशरथतनयकर्तृकहरचापारोपणसम्भावनया किशोरवयसं जाम कामयमानाः सीतामातरो नितरां प्रसीदेयुरिति ।

प्रवेशकः—अर्थोपक्षेपकेषु पञ्चसु द्वितीयः । तल्लक्षणं यथा दशरूपके

'तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः ।
प्रवेशोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः' । इति ॥

अत्र तद्वदिति विष्कम्भकवदित्यर्थः । तयोश्च वृत्तवर्त्तिष्यमाणकथाप्र कत्वं सादृश्यमवगन्तव्यम् । अत्र वृत्तायास्ताटकादिमारणरूपाया वर्त्तिष्यमा या विवाहादिस्वभावायाश्च कथायाः सूचनेति लक्षणसङ्गतिः ।

एतत्तर्कयेति—चक्रवाकाणां=तन्नामकपक्षिविशेषाणाम् हृदयस्य=चि स्य आश्वासाय=सन्तोषणाय तारागणस्य=नक्षत्रसमुदयस्य ग्रासाय=अन्तर्धा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

रामः—(अञ्जलिं बद्ध्वा)

लालयन्तमरविन्दवनानि, क्षालयन्तमभितो भुवनानि ।
पालयन्तमथ कोककुलानि, ज्योतिषां पतिमहं महयामि ॥ ३ ॥

विश्वामित्रः—(स्वगतम्) अपि नाम मयोपनीयमानं वत्सरामभद्रमचिरा-
त्र जनकस्तनूजया सम्भावयिष्यति ।

य स्फुरतः=स्वरूपेण वर्त्तमानस्य (न तु तेजसा) इन्दुमण्डलस्य=चन्द्रवि-
स्य परीहासाय=उपहासाय, दिश एव कान्ताः=रमण्यः तासां कुचाः=स्तना
व (स्थूलत्वादुन्नतत्वाच्च) कुम्भाः=घटास्तेषु कुङ्कुमरसस्य=कश्मीरजद्रवस्य
ासाय=निक्षेपणाय, पङ्केरुहाणां=कमलानाम् उल्लासाय=विकासनाय स्फुट-
स्य वैरिणः कैरववनस्य त्रासाय भासां निधिः=प्रभाकरो विद्योतते=प्रकटति
तत् तर्कय=विलोकय । अत्र विद्योतते एतदित्यन्तवाक्यार्थः पश्यतेः कर्म ।
त्र चक्रवाकेति कथनेन दयनीये दया, स्फुरदिन्दुमण्डलेत्यादिना वैरिपराजय-
मर्थ्यं, दिक्कान्तेत्यादिना विलासरसिकत्वम्, पङ्केरुहेत्यादिना मित्रमण्डल-
सादनगुणः, कैरववनत्रासायेत्यनेन द्विषदनुरक्ततर्जनमित्यादयः सर्वेऽपि सुराज-
णा व्यञ्जितास्ते च त्वया भाविना राज्ञाऽनुध्येया इति प्रभातवर्णनमिषेण
मः शिक्ष्यते इति सुधियो विदन्तु । अन्त्यानुप्रासरूपकफलोत्प्रेक्षा अलङ्का-
ः । शार्दूलविक्रीडितम् वृत्तम् ॥२॥

लालयन्तमिति—अरविन्दवनानि=कमलकुलानि लालयन्तं=विकासेन
नोदयन्तं, भुवनानि=लोकान् अभितः=सर्वात्मना क्षालयन्तं=शोधयन्तं तम-
ोऽपसारणेन प्रसादयन्तमिति भावः । अथ=पुनः कोककुलानि=चक्रवाकसमूहान्
लयन्तं=रक्षन्तम् (कोकमिथुनं परस्परं संयोज्य जीवयन्तम्) ज्योतिषां
तिं=सूर्यमहं महयामि=पूजयामि तेन च नमस्कार आक्षिप्यत इति । स्वागता-
त्तम् ॥३॥

उपनीयमानं=सन्निधाप्यमानम् । तनूजया=कन्यया (सीतया) सम्भा-
यिष्यति=सत्करिष्यति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

लक्ष्मणः—आर्य, पश्य—

यावन्नीरनिधेः प्रभातसमयः प्रोद्धृत्य लोकत्रयी-
माणिक्यं रविबिम्ब मम्बरवणिग्वीथीपथे न्यस्यति।
तावत्कर्तुमिवास्य मूल्यमुचितं पद्माकरेण स्वयं
लक्ष्मीर्लब्धविकासपङ्कजकरन्यस्ता पुरः स्थाप्यते ॥ ४ ॥

विश्वामित्रः—(सहर्षमात्मगतम्) अये वत्स, लक्ष्मणेनैव दत्तमुत्तरम्। ...ताधिष्ठितानि हि मुग्धवचनानि भवन्ति।

यावदिति—यावत् नीरनिधेः=समुद्रात् प्रोद्धृत्य=बहिरानीय लो... =त्रिलोकी तस्यां माणिक्यं=रत्नरूपम् (प्रकाशकत्वात्सौन्दर्याच्च) ... म्बम्=सूर्यमण्डलम् प्रभातसमयः=प्रातःकालः (कर्त्ता) अम्बरम्=आका... एव वणिग्वीथीपथः=पण्यभूमिः (आपणम्) तत्र न्यस्यति=स्थापयति, ... तस्मिन्नेव कालेऽस्य (पण्यभूमिस्थापितस्य सूर्यमण्डलमाणिक्यस्य) ... =योग्यम् मूल्यं कर्त्तुम् स्वयम्=अनन्यानुरुद्धेन कमलाकरेण=पद्मालयेन (... लब्धो=ऽधिगतो विकासः फुल्लता येन तादृशं यत्पङ्कजं=कमलं तदेव करो... तत्र न्यस्ता=रक्षिता लक्ष्मीः=शोभा पुरः=अग्रे स्थाप्यते=निधीयते। अत्र ... निधेरिति विभागार्थया पञ्चम्या सूर्यस्य पूर्णोदयः, रविबिम्बम् (माणिक्य... रूपकेण तस्य रक्ताभता वर्त्तुलाकारता च, स्वयमित्यनेन (स्वेच्छाप्रवृ... केन) बहूपादेयत्वम्, पद्मपदेन क्रेतुः पद्मपरिमाणधनवत्ता तया च तदुचि... करणतदर्पणशक्तिः, न्यस्तेति पदेन मूल्यभूतधनस्य तत्रोपस्थापनम्, तेन ... न्तग्रहणीयताद्वारातिरम्यता, लक्ष्म्या एव मूल्यतयोपस्थापनेन प्रचुरलक्ष... चेत्याद्यर्था द्योत्यन्ते, प्रभातसमयः प्रोद्धृत्य समुद्राद्रविमण्डलरूपं माणि... माकाशविपणौ स्थापयति, पद्माकरश्च कमलकरनिहितया (शोभया) ऽने... तदुचितं मूल्यं कुरुते इति सरलार्थः। रूपकोत्प्रेक्षयोरत्र सङ्करः। शार्दू... विक्रीडितम् वृत्तम् ॥४॥

उत्तरम्—जनकः सीतया रामं सम्भावयिष्यतीत्येवं रूपम् (यतः हे... पूर्वश्लोके रविमाणिक्यमूल्यकरणमिषेणास्यार्थस्य प्रकटनात्) देवताधिष्ठिता... तेन तस्यावश्यविश्वास्यताप्रत्ययः। मुग्धवचनानि=बालोक्तयः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

रामः—(मुनिं प्रति) भगवन्, बहुनरकरितुरङ्गमतरङ्गितापि राजधानीयं थं तपोवनभूमिरिव प्रशान्तपावनी विभाव्यते ।

विश्वामित्रः—क इह विस्मयः ? नन्विह जनकः प्रतिवसति यस्याऽयं भगवा-ाज्ञवल्क्यो गुरुः ।

रामः—सोऽयं भगवानस्य गुरु र्यः किल योगीश्वर इति ख्यायते ।

विश्वामित्रः—वत्स, स एवायम् ।

पादोपजीवनाद् भानोः प्रबोधमुपलभ्य यः ।
अभूद्योगीश्वरख्यातेः सद्म पद्ममिव श्रियः ॥ ५ ॥

तदेहि, राजभवनमुपसर्पामः (इति निष्क्रान्ताः) ।

(नेपथ्ये)

पयोभिः सिच्यन्तां बहलविलसत्कुङ्कुमरसैः
प्रसूनैः कीर्यन्तां परिमलमिलल्लोलमधुपैः ।

बहुनरेति—बहवो नराः=मनुष्याः करिणो=हस्तिनः तुरङ्गमाः=अश्वास्तैस्त-रङ्गिता=इतस्ततश्चलनेन व्यग्रीकृता । एतेन नगर्याः समृद्धतोक्ता । प्रशान्तपावनी =शान्ता पवित्रा च ।

विस्मयः=आश्चर्यम् ।

पादोपजीवनादिति—भानोः=भास्करस्य पादोपजीवनात्=तपस्तप्यमानेन चरणप्रणिधानात् (उद्बोधकतया तदाश्रयाच्च) प्रबोधम्=ज्ञानोदयं (विकासञ्च) उपलभ्य=प्राप्य यः, पद्मं=कमलं श्रिय इव, योगीश्वरख्यातेः=योगिराजतया प्रसिद्धेः सद्म=विश्रामभवनमभूत् । अनिमिषदृशा भास्करं पश्यता चिरतरं तपस्य-ताऽनेन मुनिना योगीश्वरख्यातिरर्जितेति भावः । (स एवायमिति पूर्वोक्तेन सम्बन्धः) आर्थीयमुपमा ॥ ५ ॥

पयोभिरिति—पौरस्त्रीभिः=नगरवनिताभिः (कर्त्तरि तृतीया) मुदा =हर्षेण नगरपथस्य=पुरवर्त्मनो या रथ्याङ्गणभुवः=प्रतोलीचत्वरभूमयस्ताः (कर्म) बहलं बहु विलसन्तः=शोभमानाः कुङ्कुमरसाः=काश्मीरजद्रवा स्तैरेव (करणैः) पयोभिः=जलैः सिच्यन्ताम्=आर्द्रीक्रियन्ताम् । परिमलेन=सुवासेन मिलन्तः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

चतुष्कैः पूर्यन्तामविरललसन्मौक्तिकगणै-
र्मुदा पौरस्त्रीभि र्नगरपथरथ्याङ्गणभुवः ॥ ६ ॥

विश्वामित्रः—नूनमस्मदभ्यागमनसानन्दस्य शतानन्दस्य वाक्यपरिस्प
(विलोक्य) अहो अस्य रभसातिशयो यदयं कृतमपि नगरपरिष्कारं पुनरप्यादि

(प्रविश्य)

शतानन्दः—भगवन्, अभिवादये।

विश्वामित्रः—सौम्य, आयुष्मान् भूयाः।

शतानन्दः—अयमसौ जनको राजा भगवन्तं प्रतीक्षते।

विश्वामित्रः—(विलोक्य) अये, स एष जनकः,

अङ्गैरङ्गीकृता यत्र षड्भिः सप्तभि रष्टभिः।
त्रयी च राज्यलक्ष्मीश्च योगविद्या च दीव्यति ॥ ७ ॥

=सङ्गताः लोलाः=चञ्चलाः मधुपाः=भ्रमरा येषु तैः सुगन्धवशाकृष्टचञ्चल
कैरित्यर्थः। प्रसूनैः=कुसुमैः कीर्यन्ताम्=आच्छाद्यन्ताम्। अविरलं=विना
लसन्तो=द्योतमानाः मौक्तिकगणाः=मुक्ताराजयो येषु तादृशैश्चतुष्कैः=मार्गा
विश्रामभवनैः पूर्यन्ताम्=भ्रियन्ताम्। अत्र चतुष्कस्य पुरा निर्मितत्वेऽपि
मणिगणकरणकालङ्करणमात्रस्य पुरस्त्रीजनविधेयतया देवदत्तः शिखी मुण
क्रियतामितिवत् प्रयोगः विश्वामित्रस्यातिथेः सत्काराय नगरपरिष्कारः
तामिति तात्पर्यम्। शिखरिणीच्छन्दः ॥ ६ ॥

वाक्परिस्पन्दः=वाक्प्रकाशः (वचनचातुरी) रभसस्य (मदागमज
हर्षस्य। "रभसो वेग-हर्षयोः" इति विश्वः। अतिशयः=आधिक्यम्।
शति=आज्ञापयति ॥६॥

अभिवादये=प्रणमामि। भगवन्तं प्रतीक्षते=भवन्तम् (भवदीयमागम
प्रतिपालयति।

अङ्गैरङ्गीकृतेति—यत्र=यस्मिन् (राजनि जनके) षड्भिः,
अष्टभिश्च (तत्तत्सङ्ख्याकैरिति बोध्यम्) अङ्गैः=अङ्गशास्त्रैः, उपकरणैः,
भूतैरवयवैश्च अङ्गीकृता=युक्ता, आयत्तीकृता, अभ्यस्ता च त्रयी=वे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

(ततः प्रविशति जनकः)

जनकः—(कृताञ्जलिर्भूत्वा)

यः काञ्चनमिवात्मानं निक्षिप्याग्नौ तपोमये ।
वर्णोत्कर्षं गतः सोऽयं विश्वामित्रो मुनीश्वरः ॥ ८ ॥

(उपसृत्य) भगवन्, अयं ते समीहितसम्पल्लतासमुद्गमारामः प्रणामः)

विश्वामित्रः—राजर्षे, वसुधासुनासीरसीरध्वज, अप्रतिहतमनोरथो भूयाः ।

यलक्ष्मीः=भूपालत्वसम्पत्, योगविद्या स्वनामप्रख्यातः शास्त्रविशेषश्च दीव्यति वेद्योतते । एतस्मिन् राजनि जनकेऽङ्गशास्त्रसमेधिता वेदविद्या, साङ्गा यलक्ष्मीः, साङ्गा योगविद्या च सहभूय वर्त्तत इति परमादरणीयोऽयमिति वः । अत्र यथासङ्ख्यमलङ्कारः । अर्थश्लेषश्चाङ्गपदे ॥

वेदाङ्गानि यथा—"शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दसां चयः । ोतिषामयनं चे"त्यमरः । (षट्)

राज्याङ्गानि यथा—"स्वाम्य, मात्य, सुहृत्, कोश, राष्ट्र, दुर्ग, बलानि ऽ राज्याङ्गानी"त्यमरः (सप्त)

योगाङ्गानि यथा—यम, नियमा, सन, प्राणायाम, प्रत्याहार, धारणा, ान, समाधयः (अष्ट) ॥ ७ ॥

यः काञ्चनमिवेति—यः (विश्वामित्रः) काञ्चनमिव आत्मानम्=स्वम् ोमये=तपश्चर्यात्मके अग्नौ=पावके निक्षिप्य=धृत्वा (तापयित्वा) वर्णोत्कर्षं स्य=रक्तिम्नः, जातेश्च उत्कर्षम्=उन्नतिं गतः=प्राप्तः सोऽयं=प्रसिद्धतपाः नीश्वरः=ऋषिराजः (आगच्छति) यथा वह्नौ निक्षिप्तस्य स्वर्णस्य वर्णोत्कर्षो यते तथैव तीव्रतरतपस्वयाऽयं क्षत्रियत्वादूर्ध्वं ब्राह्मणत्वमाप्तवानिति भावः । मारूपकार्थश्लेषाणां सङ्करोऽत्रालङ्कारः ॥ ८ ॥

समीहिता—अभीष्टा सम्पदेव लता=वल्ली तस्याः समुद्गमस्य=प्ररोहस्य रामः=पुष्पवाटिका । यथाऽऽरामे लता वर्द्धन्ते तथा तव प्रणामे कृते समृद्धयो यन्ते, इति भावः ।

वसुधायां—पृथिव्यां सुनासीर,=महेन्द्र, सीरध्वज, अप्रतिहतमनोरथः विफलाभिलाषः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

(इति यथोचितमुपविशन्ति)

जनकः—भगवन्, अधुना सुनासीरसाधारणत्वमधःकरणं मे ।

विश्वामित्रः—कथमिव ?

जनकः—सम्प्रति तदीयामपि पदवीमतीत्य वर्त्ते ।

गाधिनन्दन! न नन्दनजन्मा, तादृशः स हरिचन्दनशाखी ।
यादृशो मम भवत्पदपद्म-द्वन्द्वबन्दनविधिः सुखहेतुः ॥ ९

विश्वामित्रः—अहो ते प्रणयातिशयो यः सहजप्रमोदसुखाम्भोधिनिमग्न... स्मत् समागमजन्मनः सुखशीकरान् बहु मन्यसे ।

जनकः—भगवन्, अस्मद्विधानां राज्यरागोपरक्तचेतश्चन्द्रमसां कुतस्त्योऽ...

सुनासीरसाधारणत्वम्=इन्द्रसादृश्यम् ।

पदवीम्—प्रतिष्ठाम्, अतीत्य=अतिक्रम्य वर्त्ते । तमपि स्वापेक्ष... मन्ये ।

गाधिनन्दनेति—हे गाधिनन्दन !=विश्वामित्र ! नन्दने=तदाख्ये सुर... जन्म यस्य स हरिचन्दनशाखी=कल्पवृक्षः (इन्द्रस्य कृते) तादृश... सुखहेतुः=आनन्दप्रदो न । यादृशो मम (जनकस्य) भवतः पदं=... पद्मं=कमलं तस्य द्वन्द्वं=युगलं तस्य बन्दनविधिः=प्रणामपरिपाटी (स्तुतिः... रस्तीति योज्यम्) यादृशं सुख मिन्द्रः कल्पतरोः प्रसादादधिगन्तुमर्हति ... विलक्षणं हर्षं भवत्पदाम्बुजप्रणमनादाशंसमानस्य मम पदवीन्द्रपदमपि... वर्त्तत इति भावः । स्वागतावृत्तम् । "सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्द... नम्" इत्यमरः ॥ ९ ॥

प्रणयातिशयः=स्नेहमहिमा सहजः=स्वाभाविकः प्रमोदो=हर्षस्ततः... माह्लादस्तत्र निमग्नोऽपि ब्रह्मज्ञानानन्दनित्यतृप्तोऽपीति विवक्षा । सुख... रान्=आनन्दबिन्दून् । समुद्रमग्नस्य बिन्दावादरः स्नेहमहिमानमाह । ... रोऽम्बुकणाः स्मृताः" इत्यमरः ॥

राज्ये रागः (अनुराग एव) रागः=(श्यामिका) तेन उपरक्तं... (ग्रस्तं) चेत इव चन्द्रमा येषां तेषाम् । कुतस्त्यः=कुतो लभ्यः । सहज...

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

नन्दचन्द्रिकोद्भेदः ।

विश्वामित्रः—मैवम्, भोः—

ज्याघातः कार्मुकस्य श्रयति करतलं कण्ठमोङ्कारनाद-
स्तेजो भाति प्रतापाभिधमवनितले ज्योतिरात्मीयमन्तः ।
राज्यं सिंहासनश्रीः शममपि परमं वक्ति पद्मासनश्री-
र्येषां ते यूयमेते निमिकुलकुमुदानन्दचन्द्रा नरेन्द्राः ॥१०॥

शतानन्दः—सत्यमेतत्, एते हि—

वाराङ्गनाकरतरङ्गितचामरोर्मि-
श्वेतातपत्रशतपत्रिणि राजहंसाः ।

विक आनन्द एव चन्द्रिका (तमः शमकत्वात्) तस्या उद्भेदः=विकासः राज्यग्रहणग्रस्तो मच्चेतश्चन्द्रो न ब्रह्मानन्दमनुभवतीति भावः ।

ज्याघात इति—येषां कार्मुकस्य=धनुषो ज्याघातः=मौर्वीकिणाङ्कः करतलं बाहुमूलं श्रयति=अवलम्बते, ओङ्कारस्य नादो=ध्वनिः कण्ठं (श्रयति) प्रतापाभिधं=प्रतापनामक तेजः अवनितले=भूमण्डले भाति=प्रकाशते आत्मीयं ज्योतिः=ब्रह्मानुभवसमिद्धं तेजः (अन्तः=हृदये भातीति) सिंहासनस्य=राजोचितासनविशेषस्य श्रीः=शोभा राज्यं=राजभावं पद्मासनस्य=योगशास्त्रोक्तोपवेशनप्रकारविशेषस्य श्रीः परमं=परां काष्ठामुपेतं शमं=शान्तिं वक्ति=अभिधत्ते ते यूयम् निमिकुलस्य=मिथिलाराजवंशस्य कुमुदस्य=कैरवस्य आनन्दाय सन्तत्यै चन्द्रास्तत्तुल्या नरेन्द्राः=राजानः (सन्तीति भावः) यथा यूयं तथैव शास्त्रे, यथा प्रतापे तथा ध्याने, यथा राजकर्मणि तथा शमे (समतया) विराजध्व इति परमं प्रशंसास्थानमिति भावः । 'श्रयति' पदेन सम्बन्धः, 'भाति' पदेन प्रकाशकत्वम्, 'वक्ति'पदेन स्फुटतया प्रकटनम्, माधुर्यां व्यज्यन्ते । "मौर्वी ज्या शिञ्जिनी गुणः" इति कोशः । स्रग्धरावृत्तम् ॥

वाराङ्गनेति—वाराङ्गनानां=रमणीनां (चामरग्राहिणीनाम्) कराः=बाहवस्तैस्तरङ्गितानां=चालितानां चामराणामसूर्मयः=(प्रत्यावर्त्तन-) तरङ्गाः त एव

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

क्रीडन्ति राज्यसरसि स्वरसं च धीरा
योगीन्द्रचन्द्रसुगमे पथि संचरन्ति ॥११॥

लक्ष्मणः—(अपवार्य) आर्य, राजानोऽप्यमी ब्रह्मविद्याचतुरा इति यते मे चेतः ।

रामः—वत्स, किमिह चित्रम् ? ननु—

छत्रच्छाया तिरयति न यद्यन्न च स्प्रष्टुमीष्टे
दृप्यद्गन्धद्विपमदमषीपङ्कनामा कलङ्कः ।
लीलालोलः शमयति न यच्चामराणां समीरः,
स्फीतं ज्योतिः किमपि तदमी भूभुजः शीलयन्ति ॥१२॥

सितम्=धवलम् आतपत्रम्=छत्रम् (तद्रूपम्) शतपत्रम्=कमलम्=अस्य तस्मिन् चामरग्राहिणीकरचालितचामरतरङ्गरूपधवलच्छत्रात्मककमलयुते (इदं च सरसीत्यग्रेतनेन सम्बध्यते) राज्ये सरसि=सरोवरे धीराः=ध्या राजान एव हंसाः स्वरसं=स्वेच्छया क्रीडन्ति (राज्यमुपभुञ्जते) यो एव चन्द्रास्तैः सुगमे=सुखसञ्चरणीये पथि=मार्गे-(योगशास्त्रोक्तसमाधिरूपे) रन्ति=विहरन्ति च । यथाऽमी राज्यमुपयुञ्जते तथैव योगसिद्धिमपि अ इति भावः । यथा—दिवि भुवि चाव्याहतगतयो हंसा वियति सरसि विहरन्ति, न कुत्रापि बध्यन्ते तथैवैषां निमिकुलकुमुदचन्द्राणां राज्ञां शास्त्रोक्तसिद्धौ राज्योपभोगे चाबाधः प्रसर इति तेषां कर्मयोगिता व्य वसन्ततिलकं छन्दः ॥११॥

चित्रीयते=आश्चर्यवद्भवति ।

छत्रच्छायेति—यत् (ज्योतिः) छत्रच्छाया=आतपत्रस्य छा तिरयति=तिरोधत्ते, यत् च माद्यन्तो=मदच्युतो ये गन्धद्विपाः=करीन्द्रा मद एव मषी=कज्जली सैव पङ्कः (तद्रूपः) कलङ्कः=दूषणं न स्प्रष्टुम् =शक्नोति । यत् लीलालोलः=विलासचपलः चामराणां समीरः=वायुः यति=न निर्वापयति तत् किमपि=विलक्षणगुणं स्फीतं निर्मलम् ज्योतिः (आन्तरं ब्राह्मं प्रकाशम्) अमी=निमिकुलालङ्कारभूता भूभुजः=राजानः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

विश्वामित्रः—आङ्गिरसोचितमात्थ, राजहंसा इति। सकलकुवलयोत्तंसा राजहंसा अमी।

जनकः—भगवन्, इदमस्मत्प्राचीनेषु शोभते न तु मयि कतिपयग्रामटिकास्वामिनि।

विश्वामित्रः—मैवं भोः,

अवनिमवनिपालाः सङ्घशः पालयन्ता-
मवनिपतियशस्तु त्वां विना नापरस्य।
जनक, कनकगौरीं यत्प्रसूता तनूजां
जगति दुहितृमन्तं भूर्भवन्तं वितेने ॥१३॥

न्ति=निषेवन्ते। अन्यद्धि भौतिकं=रत्नादिसम्भवं तेजश्छाययाऽऽव्रियते, चान्द्रमतथाभूतमपि तेजः कलङ्केन दूष्यते, न चेदं तथा। दहनजन्यं च तेजो वायुना शम्यते तथा च नेदं, ध्यानगम्यमन्तर्विकासि परमाह्लादकं तेज, स्तदमी ध्यायन्तीति भावः। राजचिह्नानि धारयतामप्यमीषां योगनिष्ठा निराबाधेति तदाशयः। मन्दाक्रान्तावृत्तम्। विशेषोक्तिरलङ्कारः ॥ १२ ॥

'आङ्गिरस' इति शतानन्दस्य सम्बोधनम्। सकलस्य कुवलयस्य=कमलस्य (कोः पृथिव्या वलयस्य मण्डलस्येति चार्थः)।

कतिपयाः—अल्पसङ्ख्याः ग्रामटिकाः=तुच्छग्रामाः तासां स्वामिनि=पालके।

अवनिमिति—अवनिपालाः=भूपतयः सङ्घशः=समुदायभावेन अवनिं पालयन्ताम्=अवन्तु तु=किन्तु अवनिपतियशः=भूपतित्वजन्याकीर्त्तिः त्वां विना =विहाय परस्य=अन्यस्य न (अस्तीति शेषः) अत्रार्थे प्रमाणमुपन्यस्यति—जनकेति। जनक! यत् कनकगौरीं=तपनीयवर्णां तनूजां=कन्यां प्रसूता=जनितवती (कर्त्तरि क्तः) भू र्भवन्तं जगति=संसारे दुहितृमन्तं=कन्याप्राप्तिधन्यं वितेने=विदधे। 'सन्तानफलो दारसङ्ग्रहः' इति स्मृत्यनुसारेण भवदीय मवनिस्वामित्वं सीतास्वरूपापत्यलाभेन कृतार्थमन्येषां महीभुजां तु पालनप्रयासमात्रं लाभ इति भावः। अत्र सङ्घशः इत्यनेन राज्ञां बहुत्वं, तेन च जनकस्य (विजेयाधिक्यकृतं) गौरवम्, पालयन्तामित्यनेन अपरराजकर्तृकपृथिवीपालनस्याफलतयाऽनादरः, दुहितृमन्तमिति मतुपा प्रशंसा चावेद्यते। मालिनीवृत्तम् ॥१३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

जनकः—भगवन्, नूतनभुवननिर्माणनिपुणस्य भगवतः कियतीयमभि वचनचातुरी नाम, स खलु भवान्यस्य,—

शलाकीकृत्य स्वां दृशमसमकोपारुणरुचिं
सुरश्रेणीचित्रं गगनतलभित्तौ रचयतः।
सुधांशोर्भानोश्च प्रथमरचितं विम्बयुगलं
सुधालाक्षासान्द्रद्रवभरितपात्रद्वयमभूत् ॥१४॥

शतानन्दः—राजर्षे, सत्यमात्थ, किमुच्यतेऽसौ भगवान्,

त्रिशङ्कोः स्वर्लोकादवनितलपातं रचयितुं
सुनासीरे कोपाद्विकसितपदाब्जे विकसितः।

नूतनं=ब्रह्मकृतातिरिक्तम् यत् भुवनं=संसारस्तस्य निर्माणे निपुणस्य अभिनववचनचातुरी=विचित्रा वाग्भङ्गिः, कियती=न कठिनेति भावः।

शलाकीकृत्येति— असमेन=अतुलेन (महतेति भावः) कोपेन अरु रुचिं=रक्तवर्णां दृशं=दृष्टिं शलाकीकृत्य=चित्रनिर्माणोपयुक्तलेखिनीम् (कूचिकां) विधाय गगनतलम्=आकाशमण्डलमेव भित्तिः=कुड्यं तत्र सुरश्रेणी=देवसमूहः यस्तस्याश्चित्रं प्रतिकृतिं रचयतः=निर्मातुं प्रवर्त्तमानस्य (यस्य तव) प्रथम रचितं=प्रागेव (ब्रह्मणा) निर्मितं सुधांशोः=चन्द्रमसः भानोः=सूर्यस्य च बिम्ब युगलम्=मण्डलद्वयम्, सुधा=अमृतम्, लाक्षा=रञ्जनद्रव्यविशेषस्तयोः सान्द्रः =गाढो द्रवो रसस्तेन भरितं=पूर्णम् पात्रद्वयम् अभूत्=अजनिष्ट। रोषारुणं दृशं कूचिकां कृत्वाऽऽकाशभित्तौ देवांश्चित्रयतस्तव ब्रह्मनिर्मितसुधाकरसूर्यबिम्बे श्वेत, रक्त, रंजनद्रव्यपूर्णपात्रद्वयतयोपायुज्यतेति भावः। चन्द्रमसः, सूर्यस्य तादृशवर्णवत्तया प्रभाप्रदत्वेनाकाशस्थितत्वेन वर्तुलाकारतया च तथारूपद नेत्रकान्तेः सूच्याकारतया शलाकात्वारोपः,। स्वतपःप्रभावेण नूतनं कोप विधातुं प्रवर्त्तमानस्यास्य देवादिस्रष्टृत्वात् प्रभावातिशयो व्यञ्जितः। शिख रिणीवृत्तमेतत्। असम्बन्धे सम्बन्धरूपातिशयोक्तिः ॥१४॥

त्रिशङ्कोरिति—त्रिशङ्कोः=तन्नामकस्य (विश्वामित्रेण सदेहं स्वर्गं प्रे माणस्य) राज्ञः स्वर्लोकात्=स्वर्गात् अवनितलपातं=पृथिव्यां पतनं रचयितुं=

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

यदीयोऽसौ नव्यत्रिदशनगरारम्भरभसः
सुरस्तोमे भक्त्या मुकुलितकराब्जे मुकुलितः ॥१५॥

लक्ष्मणः—(अपवार्य) आर्य, कथमेवं-विधं भगवतः प्रतापितभुवनत्रयं ोऽभिधानं तेजः ।

रामः—अपि न विदितं ते राजर्षेरिदम् ?

ोषाभिभूतपुरुहूतपदाभिभूतं, दृष्ट्वा त्रिशङ्कुमथ कोपविपाटलश्रीः ।
ाकुड्मलीकृतकराम्बुजराजिरम्या, सन्ध्येव दृष्टिरमरैर्यदुपासिताऽस्य॥१६॥

कसितपदाब्जे=चलितचरणकमले सुनासीरे=(इन्द्रे सदेहं स्वर्गं प्रविशन्तं शङ्कुं पदा पृथिव्यां पातयितुं प्रवृत्ते) विकसितः=जनितः यदीयो=यत्सम्बन्धी सौ=प्रसिद्धप्रभावः नव्यस्य=इन्द्राधिष्ठितविलक्षणस्य त्रिदशनगरस्य=स्वर्गस्य ारम्भे=निर्माणे रभसो=वेगः (उत्साह इत्यर्थः) भक्त्या=प्रणिपातेन मुकुलित- कराब्जे=आकुञ्चितकरकमले (नवं स्वर्गं निर्मातुं प्रवर्त्तमानस्य विश्वामित्रस्य ततो निवृत्तये स्तवमञ्जलिं बद्ध्वा व्यदधुरतस्तेषां करकमलानि मुकुलितानि) सुरस्तोमे देवनिवहे मुकुलितः=शान्तः यो निजामाज्ञामिन्द्रेण प्रतिरुद्धां विलोक्य नवं स्वर्गं विधातुं प्रारभत, स एव देवेषु साञ्जलिबन्धं तथा न विधातुं स्तुवत्सु ततो व्यवर्त्ततेति भावः । एतेन चास्य परम महत्त्वं व्यञ्जितम्, क्रोधजयात्, सुज- स्याशुसन्धेयत्वोक्तेश्च । अत्र रूपमलङ्कारः कराब्जपदे । वृत्तं तु पूर्वोक्तमेव । णं रभसो वेग-हर्षयोः" इति विश्वः ॥ १५ ॥

प्रतापितं=प्रभावितं, भुवनत्रय=लोकत्रयं येन तत् तथा ।

रोषाभिभूतेति—त्रिशङ्कुं=तन्नामानं राजानं रोषाभिभूतस्य=कोपवशं- दस्य पुरुहूतस्य=शक्रस्य पदा चरणेन अभिभूतं=तिरस्कृतं दृष्ट्वा=विलोक्य अथ कोपविपाटला=रोषारुणाश्रीः=कान्तिर्यस्या एतादृशी अस्य=इदमीया आकुड्- मलीकृता=ईषत् सङ्कोचिता कराम्बुजराजिः (प्रसादनप्रणामाञ्जलिपरायणा देव-) करकमलमाला तया रमया दृष्टिः=नयनम् सन्ध्या (सूर्योदयास्तमयकालात् भयतः १॥ सार्द्धैकदण्डात्मकः कालः, तदुक्तम्—"सन्ध्यात्रिनाडीप्रमिना- र्कविम्बात्") कालविशेष इव अमरैः=देवैरुपासिता=स्तुता । सन्ध्याऽपि अम्बुज-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

विश्वामित्रः—राजर्षे, अपि तावद्रत्नगर्भागर्भसम्भवं कन्यारत्नम्
कुरुते त्वाम् ?

जनकः—भगवन्, भवत्प्रसादादधुना जामातृरत्नमप्यलङ्करिष्यते। (
मवलोक्य) (सकौतुकम्) भगवन्।

सकलजनविलोकनोत्सवाना, मय मयनं कतरः पुरः कुमारः ?।
हरितमणिमयूखहारिणो यः, कलयति कल्पतरोः प्ररोहलीलाम् ॥१

शतानन्दः—भगवन्, अयं च कतरो यः खल्वस्यैव।

नीलनीरजदलोज्ज्वलकान्तेरन्तिके स्फुरति काञ्चनगौरः।
लोचनस्य सुदृशः श्रवणाग्रे सन्निविष्ट इव चम्पक-गुच्छः ॥१

विश्वामित्रः—नाम्ना तावद्रामलक्ष्मणावेतौ।

जनकः—अहो कर्णामृतम्।

राजिं किञ्चित्कुड्मलयतीति रम्यान्तं तस्या दृशश्च विशेषणम्। उपमाल
वसन्ततिलकं वृत्तम् ॥ १६ ॥

रत्नगर्भा—पृथिवी–'भूतधात्री रत्नगर्भा पृथिवी' त्यमरः, तस्या
अन्तःप्रदेशः, कुक्षिश्च।

सकलजनेति—सकलस्य=समग्रस्य जनस्य=लोकस्य विलोकनानि=
णि तेषामुत्सवानाम् (आनन्दप्रदतयोत्सवत्वारोपः) अयनम्=आश्रयः
=पुरःस्थितः कुमारः कतरः (किमभिजनः, किंजातीयः, किंजनकश्च) कि
चयः ? यः (अयं कुमारः) हरितमणिः=मरकतमणिस्तस्य मयूखाः=किरणानि
हारिणो=रमणीयस्य कल्पतरोः=कल्पवृक्षस्य प्ररोहलीलाम्=अङ्कुरसादृश्यं
यति=भजते। (श्यामतया भाविराक्षसवधद्वाराभूभारहरणभक्तत्राणादिदि
फलदानचिह्नवत्तया च कल्पवृक्षाङ्कुरेण रामस्योपमा कृता) स्वागतावृत्तम् ॥
नीलनीरदेति— नीलम्=श्यामलम् नीरजं=कमलं तस्य दलं=पत्र
ज्ज्वला=रम्या कान्तिः=आभा यस्य तस्य (रामस्येति बोध्यम्) अ
=पार्श्वे (यः) काञ्चनगौरः स्फुरति=प्रकाशते (सकतर इति जिज्ञासा।
पार्श्वे लक्ष्मणः कीदृक् प्रतिभासत इत्युपमया व्यञ्जयति—सुदृशः=सुलो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

शतानन्दः—(निर्वर्ण्य) भगवन् ,

एतयोरहमुदाररूपयो-रुल्लसत्सहज-सौहृदश्रियोः ।
कामपि स्वजनतां विभावये, कौस्तुभामृतमयूखयोरिव ॥१९॥

जनकः—

एतयोः प्रकृतिरम्यरूपयोरुल्लसत्सहजसौहृदश्रियोः ।
आन्तरः स्फुरति कोऽपि सन्निधिः, प्रत्यगात्मपरमात्मनोरिव ॥२०॥

पाः) (न तु युवतिसाधारणस्य) लोचनस्य (नीलकमलतुल्यस्य) नयनस्य (पार्श्वे) श्रवणाग्रे=कर्णाग्रभागे सन्निविष्टः=स्थितश्चम्पकगुच्छः=चम्पकस्तवक इव । चम्पकगुच्छोपमया लक्ष्मणस्य तपनीयवर्णता, सुश्लक्ष्णकाययष्टिता च, 'लोचनस्य पार्श्वे' इति नीलनीरजदलेत्यनेन च रामस्य श्यामसुन्दरता, दल-पदेन कोमलकायता च व्यज्यते । पूर्वोक्तमेव च्छन्दः ॥ १८ ॥

एतयोरिति—अहम् उदारम् रूपं ययोस्तयोः=सुन्दरयोः, उल्लसन्ती भासमाना सहजसौहृदस्य=स्वाभाविकस्नेहस्य श्रीः=शोभा ययोस्तौ, तयोः प्रकटाकृत्रिमप्रेमप्रभयोः एतयोः–(त्वया सहागतयोः) कुमारयोः कौस्तुभम् =(मणिविशेषो भगवता ध्रियमाणः प्रसिद्धः) अमृतमयूखश्चन्द्रश्च तयोरिव कामपि=(स्वरूपकान्तिप्रभृतिसाम्यकृताम्) स्वजनतां = निजपरिजनतां वि-भावये=तर्कयामि । यथा कौस्तुभचन्द्रौ समुद्ररूपसमानान्वयजन्मानौ तथैवे-मावपि कुमारौ समानकुलालङ्काराविति शतानन्दस्य तर्कः । 'प्रेम स्नेहोऽथ सौहृद'मिति कोशः । स्वागतावृत्तमेतत् ॥ १९ ॥

एतयोरिति— प्रकृतिरम्यम्=स्वभावसुन्दरं रूपं=तनुकान्तिर्ययोस्तयो-रुल्लसत्सहजसौहृदश्रियोरेतयोः कोऽपि=(अवर्णनीयः) सन्निधिः = सामी-प्यम् (सादृश्यपर्यवसायिताऽत्र) स्फुरति तत्र दृष्टान्तमाह प्रत्यगात्मेति - प्रत्यगात्मा = जीवः परमात्मा=ब्रह्म तयोरिवेति । यथा जीवब्रह्मणोरभेदेऽपि उपाधिवशाद् भेदः प्रतिभासते तथैवानयोरपि कुमारयोर्वस्तुतः (समानचरु-भागजन्यतया) भेदाभावेऽपि शरीरभेदकृत एव भेदः सर्वमन्यत्समानमिति, न केवलं कायिककान्तिमात्रकृतं साम्यमपि तु विशिष्यसादृश्यमिति भावः । शेषं पूर्वपद्यव्याख्यानाद्बोध्यम् ॥ २० ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

विश्वामित्रः—अयि योगीश्वरशिष्य, ईदृशेषु गभीरेष्वभिनवोदन्तवेशन्तेषु भवत एव मनो निमज्जति । स्वजनभावे पुनरनयोर्वयमपि साक्षिणः ।

जनकः—तत् किं भ्रातरावेतौ ? ।

विश्वामित्रः—अथ किम् ।

जनकः—(सहर्षं निर्वर्ण्य)

तनुश्रिया निर्जितचम्पकोत्पलौ सुवर्णनीलोत्पलकोशकोमलौ ।
अहो दृशामुत्सवदानदक्षिणौ सुलक्षणौ लक्षमण-लक्ष्मणाग्रजौ ॥२१॥

(पुना रामं विलोक्य । सकौतुकम्)

यथाऽहं निस्सीमोत्सवसुभगभोगे भवकथा-
पथातीते चेतःप्रणयिनि रमे पुंसि परमे ।

योगीश्वरशिष्य—याज्ञवल्क्यान्तेवासिन् (इदं जनकस्याध्यात्मविद्याविचक्षणत्वं व्यञ्जयति) परिकरोऽलङ्कारः ।

ईदृशेषु=भवदुक्तसादृश्यप्रयोगतुल्येषु । अभिनवः=साधारणजनदुर्बोधः उदन्तः=वार्त्ता, (तद्रूपेषु) वेशन्तेषु=अल्पसरस्सु । भवत एव मनो निमज्जति=रमते । भवानेव वार्त्तायामपि गहनं तत्त्वमुद्भावयतीति भावः । 'वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः' "वेशन्तः पल्वलं चाल्पसरः" इत्यमरः ।

तनुश्रियेति—तनुश्रिया=शरीरशोभया निर्जिते=अधःकृते चम्पकोत्पले=चम्पापुष्पनीलकमले याभ्यां तौ सुवर्णं=हिरण्यं, नीलोत्पलस्य=श्यामकमलस्य कोशः=उदरं (मध्यभागश्च) च ताविव कोमलौ=रमणीयौ दृशामुत्सवदाने=नयनानन्दप्रदाने दक्षिणौ=कुशलौ लक्ष्मणलक्ष्मणाग्रजौ=लक्ष्मणरामौ आ सुलक्षणौ=आश्चर्यकरसौभाग्यादिचिह्नवन्तौ । लक्षणपदं सामुद्रिकोक्तचि परम् । तथाविधानि हि चिह्नानि तदीय भावि भाग्यवत्त्वादिकमाख्यान्ति "नीलोत्पलं कुवलयमथनीलाम्बुजन्म च" "चिह्नं लक्ष्म च लक्षणम्" इ चामरः ॥ २१ ॥

यथाऽहमिति—अहम् (जनकः) सीम्नोऽवधेर्निर्गतो=निरवधिः उत्सवः=आनन्दस्तेन सुभगो=रमणीयो भोगः=आस्वादनम् (अनुभवः) यस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

तथैवाऽस्मिन् बाले ! दलदमल-नीलोत्पलदलो-
दरश्यामे रामे नयनपदवीमागतवति ॥ २२ ॥

विश्वामित्रः—(स्वगतम्) उचितमेतत् । न खलु लोकलोचनानन्दकरः शीतकरः शङ्करशिरःशयालोः कलानिधेरपरं तत्त्वम् । (प्रकाशम्) राजर्षे, स एव सौन्दर्यातिशयस्य महिमा ।

जनकः—कः पुनराभ्यां पुत्रवतां मौलिमाणिक्यमारोपितः ? ।

अस्मिन्=(निरवधिप्रमोदरमणीयानुभूतावित्यर्थः) भवस्य जन्मनः कथायाः पन्थाः=मार्गस्तस्मादतीते=दूरवर्तिनि अजे । चेतः प्रणयिनि=हृदयगते (ध्याते) परमे पुंसि=परमपूरुषे (परमात्मनि) रमे=आनन्दधारायामिवावगाहे तथैव (ब्रह्मानुभवदशायामिव) अस्मिन् बाले=शिशौ दलतः=विकसतः अमलस्य =निर्मलस्य (अनामृष्टस्य) उत्पलदलस्य=नीलकमलपत्रस्य उदरं=मध्यभाग-स्तद्वत् श्यामे=नीलवर्णे रामे=तदाख्ये (दशरथप्रथमपुत्रे) नयनपदवीमागतवति =दृष्टिपथातिथौ (रमे इति पूर्वतोऽनुषञ्जनीयम्) रामपक्षेऽपि 'भवकथापथातीते-' इत्यस्य भवकथाउत्पत्तिवार्त्ता तस्याः पथः=वर्त्मनः अतीते=दूरस्थेऽज्ञातजन्मकथे, ऽपरिचितकुल इति तात्पर्यम्, यथाऽऽह मसीमानन्दकरानुभवेऽजे परमपुंसि चेतसि ध्याते प्रमोदमनुभवामि तथैवाऽमुं बालं नीलकमलोदरश्यामलशरीरं रामं पश्यन् प्रसीदामीति तात्पर्यम् । ब्रह्मणो हृदये ध्यातत्वेनानन्दप्रदता रामस्य च दृष्टत्वमात्रेणेति व्यतिरेकः । सर्वैश्च प्रसङ्गै रामस्य परमब्रह्मरूपतोक्ता शिखरिणीवृत्तम् ॥ २२ ॥

लोकलोचनानाम्=सकलजननयनानाम् आनन्दकरः=हर्षजनकः (आकाशस्थः) शीतकरः=चन्द्रः शङ्करशिरःशयालोः=शिवेन चूडामणीकृतात् कलानिधेरपरं =भिन्नं तत्त्वम् न यथाऽऽकाशस्थितः पूर्णश्चन्द्रमाः शिवशिरःस्थतरुणतुहिनका-न्तेर्नातिरिक्तः (उभयोरेकत्वात्) (अशांशिभावमात्रकृतपृथगुपलम्भशालित्वाच्च) तथैव (रामस्य ब्रह्मांशत्वात्) बालोऽपि रामो ब्रह्मणो न भिन्न इत्यर्थः ।

आभ्याम्=रामलक्ष्मणाभ्याम्, मौलिमाणिक्यं=चूडामणिम् आरोपितः=आरोपितः शिरसिकृतः=श्रेष्ठत्वं गमित इति भावः । आभ्यां कः पुत्रीति जिज्ञासा ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

विश्वामित्रः—

किं शीतांशुमरीचयः, किमु सुरस्रोतस्विनीवीचयः

किं वा केतकसूचयः, किमथ वा चन्द्रोपलानां चयः ।

इत्थं जातकुतूहलाभिरभितः सानन्दमालोकिताः

कान्ताभिस्त्रिदिवौकसां दिशि दिशि क्रीडन्ति यत्कीर्त्तयः ॥२३॥

रामः—वत्स, नूनमयं सकलगुणावदातस्तातः प्रस्तूयते ।

लक्ष्मणः—अपि नाम भूयोऽपि प्रस्तोष्यते ?

विश्वामित्रः, अपि च ।

यस्योद्यद्भुजदण्डचण्डिमलसत्-कोदण्डलीलायितै-

र्निष्पीते दनुजेन्द्रचन्द्रवदनाभ्रूवल्लरीविभ्रमे ।

किं शीतांशुमरीचय इति—यस्य कीर्त्तयः=यशांसि जातकुतूहलाभिः=ज तोत्कण्ठाभिः त्रिदिवौकसां=देवानां कान्ताभिः=वधूभिः अभितः=सर्वासु दिक्षु सानन्दम्=सहर्षम् किम् शीतांशोः=चन्द्रस्य मरीचयः=किरणानि ? सुरस्रोतस्विन्याः=मन्दाकिन्याः वीचयः=तरङ्गाः, किं वा केतकस्य=... पुष्पविशेषस्य सूचयः कण्ठकाकृतयोऽग्रभागाः, अथवा किम् चन्द्रोपलानां =चन्द्रकान्तमणीनाम् चयः=राशिः (इमाः कीर्त्तयः) इत्थं=पूर्वोक्तप्रकारेण वितर्कविषयतया दृष्टाः (यत्=कीर्त्तयः) दिशि दिशि क्रीडन्ति=खेलन्ति 'जातकुतूहलाभिरि'त्यनेन कीर्त्तेरतिसुन्दरता, 'सानन्दम्' इति दशरथस्य... सह मैत्री (अन्यथा तत् कीर्त्तौ दृष्टायां देववधूनां द्वेष उदयेत) 'दिशि दिशि' इति कीर्त्तेः प्रसार इत्याद्यर्था व्यज्यन्ते । सन्देहः शुद्धोऽत्रालङ्कारः) शार्दूलविक्रीडितं वृत्तम् । 'त्रिदिवेशा दिवौकसः' 'मन्दाकिनी वियद्गङ्गा स्वर्णदी' इत्यमरः ॥ २३ ॥

तातः प्रस्तूयते=वर्णनविषयीक्रियते । अपि नाम=इदं तातप्रताप... श्रवणोत्कण्ठाप्रकाशकम् ।

यस्योद्यदिति—यस्य (दशरथस्य) उद्यत्=पराक्रममाणो यो भुजः... =बाहुयष्टिस्तस्य चण्डिमा=उद्धतत्वं तेन लसतः=शोभमानस्य कोदण्डस्य=...

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

लक्ष्मीमस्रविपाटलक्षतमयीमालम्बते केवलं
पौलोमीकरजाङ्कुरव्यतिकरादाखण्डलीयं वपुः ॥२४॥

अपि च, तस्य पद्मवनबान्धववंशोत्तंसमांसलमहामणिमौलेः।
कायकान्तिपरिभूतमनोजौ ताविमौ दशरथस्य कुमारौ ॥२५॥

जनकः—यद्बाहू वहतः पराक्रमहृतां प्रत्यर्थिसीमन्तिनी-
चक्षुःकज्जलकालिकामिव धनुर्मौर्वीकिणश्यामिकाम्।

...लायितैः=विलासैः (कर्त्तृभिः) दनुजेन्द्राणां=राक्षसमुख्यानां चन्द्रवदनाः ...मण्यः तासां भ्रूवल्लरीणां=भ्रूलतानां विभ्रमे=सलीलनर्त्तने निष्पीते=निःशेषं ...मापिते (यद्धनुपि राक्षसविनाशेन तद्वधूनां वैधव्यमापादयति) आखण्ड-...यम्=इन्द्रसम्बन्धि वपुः=शरीरं केवलम् पौलोम्याः=शच्याः करजाङ्कुराः=नख-...=रोहास्तेषां व्यतिकरात्=आघातात् (स्पर्शकृतात्, नखक्षतसम्भवात्) अस्रेण ...रुधिरेण विपाटलं=रक्तरक्तं क्षतं=व्रणः तन्मयीं=तत्स्वरूपाम् लक्ष्मीम्=शोभाम् ...लम्बते=विभर्त्ति। दशरथेन राक्षसेषु हतेषु शक्रः, सम्प्रति केवलं शच्या रमते ...श्चिन्तत्वादिति भावः। राक्षसेषु जीवत्सु तु तदस्त्राणां क्षतान्यपि शक्रशरीर-...लमकुर्वन्, सम्प्रति तेषु नष्टेषु न तत्सम्भव इति तात्पर्यम्। अत्र भङ्गया ...व्याभिधानात्मा पर्यायोक्तनामाऽलङ्कारः। शार्दूलविक्रीडितं वृत्तम् ॥ २४ ॥

तस्येति—पद्मवनस्य=कमलकुलस्य बान्धवो=मित्रं सूर्यस्तस्य वंशस्य ...अन्ववायस्य उत्तंसाः=अलङ्कारभूताः मांसलाः=स्थूलाः महामणयः (प्रसि-...द्धा राजानः) तेषां मौलेः=श्रेष्ठस्य (सूर्यवंशभूषणराजसु प्रधानस्य) तस्य=दश-...रथस्य ताविमौ=पुरो दृश्यमानौ कायकान्त्या=शरीरशोभया परिभूतः=अधःकृतो ...मनोजः=कामो याभ्यां तौ (शरीरशोभाजितकामदेवौ) कुमारौ (विद्येते इति ...शेषः) स्वागतावृत्तम् ॥ २५ ॥

यद्बाहू इति—यस्य=दशरथस्य बाहू=हस्तौ पराक्रमेण=सामर्थ्येन हृताम् ...आनीताम्, प्रत्यर्थिनां=द्विषतां, सीमन्तोऽस्त्यासामिति सीमन्तिन्यो=नार्यस्तासां ...चक्षुषां कज्जलकालिकामिव=नेत्राञ्जनश्यामिकामिव धनुर्मौर्वी=चापज्या तस्याः ...किणानां=शुष्कव्रणानां श्यामिकां=कालिमानं वहतः=धारयतः। यदीयौ बाहू

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

यद्दोर्दुर्मदकर्मकार्मुकगुणप्रोत्तालकोलाहलै-
र्वैरिस्त्रीकलमेखलाकलकलाः पीता इवास्तं गताः ॥२६॥

अपि च,

यस्येन्द्रारिजयश्रिया सह झटित्याकृष्य मौर्वीलतां
साकं भूवलयेन चापवलयं दोर्मण्डले बिभ्रति ।
पौलोमीकुचकुम्भसीमनि रहः पश्यन्नखाङ्कं नवं
धत्ते चेतसि केवलं न तु करे कोदण्डमाखण्डलः ॥२७॥

शत्रूणां समरे निधनं विधाय तेषां स्त्रियो विधवाः कृत्वा तदीयकज्जलका... मिव ज्याकर्षणव्रणचिह्नं धारयत इति पूर्वार्द्धाशयः । (किञ्च) यस्य दो... =बाह्वोः दुर्मदम्=उद्धतं कर्म=व्यापारो यस्य तादृशं कार्मुकं=धनुस्तस्य... =चापज्या तस्य=प्रोत्तालाः=बहुलाः कोलाहलाः=टङ्कारास्तैः (कर्त्तृभिः) ... इव=निगीर्णा इव वैरिस्त्रीणां=द्विषदङ्गनानां कलाः=मधुराः मेखलाकल... =रशनाशब्दाः अस्तंगताः=समाप्ताः । शत्रुषु निहतेषु तदीयस्त्रीणां रशना... विरमति तदेव पानहेतुकतयोत्प्रेक्ष्यते । "वैरिप्रत्यर्थिपरिपन्थिनः" ... सीमन्तिनी बधूः" "भुजबाहू प्रवेष्टो दोः" इति सर्वत्राऽमरः । अत्र ... द्रव्योत्प्रेक्षा, परार्थे हेतूत्प्रेक्षेति द्विधोत्प्रेक्षालङ्कारः । शार्दूलविक्रीडितं वृत्त...

यस्येति—यस्य=दशरथस्य दोर्मण्डले=बाहुदण्डे इन्द्रारे=रसुरविशेषस्य... श्रिया=विजयलक्ष्म्या सह झटिति=त्वरया मौर्वीलतां=चापवल्लीमाकृष्य=नम... (पक्षे स्वीकृत्य) भूवलयेन=पृथ्वीमण्डलेन साकं=सार्धं चापवलयं=धनु... बिभ्रति=धारयति सतीति शेषः, आखण्डलः=इन्द्रः रहः=एकान्ते पौलोम्याः=... कुचौ=स्तनावेव कुम्भौ=घटौ (वर्त्तुलमध्यभागतया स्थूलतया च तत्सादृ... तयोः सीमनि=उपरिदेशे नवं=नूतनं (स्वेनैव कृतं) नखाङ्कं=नखक्षतं ... =विलोकमानः केवलं चेतसि=हृदये न तु करे=बाहौ कोदण्डं=धनुः धत्ते=धा... (स्मरति इति वार्थः) इन्द्रविरोधिराक्षसान् पराजित्य तदीयां लक्ष्मीं ... धीनं भूवलयं च दशरथे गृह्णति स्वस्थ इन्द्रो निजस्त्रिया रहः केलीः ...

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

तपनकुलशिरःकिरीटकोटि-स्फुरदरुणोत्पलकुड्मलस्य तस्य।
दशरथनृपतेरिमौ मृगाङ्कप्रतिमसुरेखमुखाम्बुजौ कुमारौ ॥२८॥

विश्वामित्रः—अथ किम्?।

जनकः—अहो धन्यता दशरथस्य, यस्य द्वे अपि तनयावलोकनशीतले दृशौ।

शतानन्दः—दिशौ च।

विश्वामित्रः— ननु दिश इति वक्तव्यम्।

शतानन्दः—तत् किमन्यावपि कुमारौ दशरथस्याङ्कं भूषयतः?

विश्वामित्रः—अथ किम्?। यौ खलु भरत-शत्रुघ्नौ प्रतिबिम्बाविव रामलक्ष्मणयोः।

शतानन्दः—नूनममी ऋष्यश्रृङ्गचरुभागानां विलासाः।

जनकः—दशरथ-भागधेयानां च।

विश्वामित्रः—एवमेतत्, अवधिः खलु भाग्यवतां राजा दशरथः।

पाकारं नखक्षतं पश्यन् सादृश्यवशात् केवलं स्मरति धनुर्नतु करे करोति, जेतव्याभावादिति भावः। अत्र सहोक्तिस्मरणालङ्कारयोरेकवृन्तगतफलद्वय-स्यतारूपः सङ्करः। वृत्तं पुनस्तदेव। 'आखण्डलः सहस्राक्षः' 'मौर्वी ज्या शिञ्जिनीगुणः' 'पुलोमजा शचीन्द्राणी' इति चामरः ॥ २७ ॥

तपनकुलेति— तपनकुलस्य=सूर्यवंशस्य याः शिरःकिरीटकोटयः=मुकुटश्रेण-यस्तासु स्फुरत्=प्रविकसत् यदरुणोत्पलकुड्मलं=रक्तकमलमुकुलं तस्य=तत्सदृशस्य विवंशालङ्कारभूतस्येति भावः, दशरथनृपतेरिमौ मृगाङ्कः=चन्द्रस्तत्प्रतिमं=तत्तु-ल्यं सुरेखं=सुन्दरं मुखमम्बुजं ययोस्तौ तथाभूतौ कुमारौ—(विद्येते इति काक्वा प्रश्नः) पूर्वार्द्धेतिशयोक्तिः, मृगाङ्कप्रतिमेत्यत्रार्थीसमासगोपमा चालङ्कारः। पुष्पिताग्रावृत्तम्। 'हिमांशुश्चन्द्रमाश्चन्द्रो ग्लौर्मृगाङ्कः' इत्यमरः ॥२८॥

तनययोः—पुत्रयोरवलोकनेन=दर्शनेन शीतले=वात्सल्यरसास्वादकृतार्थे।

दिशौ च—पार्श्वद्वयमपीति। प्रागुक्तविशेषणस्यात्राप्यनुषङ्गकश्चकारः। तेन नेत्रचतुष्टयशालिता दशरथस्य सूचिता, द्वाभ्यां दृशोरपराभ्यां च द्वाभ्यां पार्श्वयोः शिशिरीकरकरणात्।

चरुभागानाम्—यज्ञे दीयमानद्रव्यविशेषश्चरुः, तस्य भागः=प्रसादकल्पः भ्रष्टांशः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

जनकः—महात्मवतां च ।

विश्वामित्रः—तत् किमस्माभिरुच्यताम्, भवतोर्महिम्नि भवन्तावेव सा

जनकः—कतरोऽहं दशरथस्य महिमाभोगमनुभवितुं कासार इव सागरस्य

विश्वामित्रः—शोभन्त एव विनयमधुराणामधरीकृतात्ममहिमानः सत्यविधुरा अपि वाचः । अथवा समुचितमेवैतत् । यतः—

> जज्ञिवान् दशरथः स हि राजा
> रामभिन्दुमिव सुन्दरगात्रम् ।
> लोकलोचनविगाहनशीलां
> त्वं पुनः कुमुदिनीमिव सीताम् ॥२९॥

भवतोरिति—स च (दशरथपदार्थकोऽत्र तच्छन्दः) भवांश्च (ध्यमानजनकार्थश्च भवच्छब्दः) तयोरिति । तद्भवतोस्त्यदाद्योरेकशेषे भवच्छब्दस्यैव शेषः । 'त्यदादीनां मिथः सहोक्तौ यत् परं तच्छिष्यते वार्त्तिकात् ।

महिमाभोगम्—पराक्रमविस्तारम् । कासारः=सरः । 'कासारः सरसी इत्यमरः ।

अधरीकृतात्ममहिमानः—अधःकृतस्वपराक्रमाः । सत्यविधुराः=असत

जज्ञिवान् इति—स हि राजा दशरथः इन्दुम्=चन्द्रम् इव सुन्द =रमणीयशरीरं रामं जज्ञिवान्=उत्पादितवान्, त्वं पुनः कुमुदिनीम्=कैर इव लोकानां=जनानां लोचनेषु=नयनेषु विगाहनं=प्रवेशः शीलं=स्वभावो तां सीतां जज्ञिवान् इति पूर्वेण सम्बन्धः । यथा तेन चन्द्रसुन्दरगात्रो जनितस्तथैव त्वयापि सौन्दर्यातिशयमहिम्ना जनानां लोचनानि प्रवे सीता समुत्पादिता तद्भवन्तौ—अन्योन्योपमेयौ तुल्याविति भावः । यद्यपि कर्मकतया रामं जज्ञिवानिति प्रयोगो नोचितस्तथापि स्थितस्य गतिश्चिन्त न्यायेनान्तर्भावितणिजर्थकतया साधुता समर्थनीया । केचित्तु राजानं रामचन्द्रजनकतया सागरं, जनकं च कुमुदिनीजनकं सरोवरं ब्रुवाणेन प्रागुक्तजनकोक्तेः समुचितत्वं स्थापितमित्याहुः । वयन्तु परस्परप्रशंसनस्य विभावयन्तो न तथाऽभिप्रेम इति बुधा विविञ्चन्तु । स्वागतावृत्तमेतत् ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

लक्ष्मणः—(अपवार्य) इन्दुकुमुदिनीदृष्टान्तेन किमपि संविधानं सूचितं ...गवता ।

रामः—(सप्रणयकोपम्) अलमलीकालापितया ।

जनकः—(स्वगतम्) कथमनया भङ्ग्या किमपि सूचितं मुनिना । तत् ...मनेन रभसवशंवदेन विस्मृतमेव शाम्भवं धनुः । (प्रकाशम्) भगवन्, ...नेन भगवतो वक्रकमनीयेन वाग्विलासेन द्वितीयेनेव हरकार्मुकेण किमपि ...तुकितोऽस्मि ।

विश्वामित्रः—(स्वगतम्) कथमनया परिपाट्या हरचापारोपणमुद्भावयति । ...वतु । (प्रकाशम्) राजर्षे, साधु स्मारितोऽस्मि । अतीव मे कौतुकं वृषभकेतु-कार्मुकावलोकने । तेन तदानयनायादिश्यन्तां पुरुषाः । अथवा, किमन्यैः, ...मभद्र एवादिश्यताम् ।

जनकः—(सविस्मयम्) भगवन्, कथं मुग्ध इव दुग्धमुखमपि राममिन्दु-किरीटकार्मुकानयनार्थमादिशसि । न जानासि किम् ?

एतत्तद्दुर्विगाहं तुहिनगिरिमयं कार्मुकं यत्र जज्ञे
मौर्वी दर्वीकराणां पतिरुदधिसुतानायकः सायकश्च ।

संविधानम्=घटना, (यथेन्दुकुमुदिन्योः परस्परमनुरागस्तथा रामसीतयो-...पि युज्यत इति मुन्यभिप्रायं लक्ष्मण ऊहांचक्रे रामाय चाचचक्षे)।

अलीकालापिता=मिथ्याकथा ।

रभसवशंवदेन=वार्त्तालापजनितविनोदरसाप्लुतेन शाम्भवं धनुः=शिवचापः (पणीकृतनमन इति शेषः)।

उद्भावयति=स्मारयति ।

दुग्धमुखम्=अतिबालम् । इन्दुकिरीटः=शिवस्तस्य धनुष आनयनायेति ...भावः ।

एतत्तदिति—एतत्=कथाविषयीकृतं तत्=प्रसिद्धं दुर्विगाहं=कष्टनमनीयं तुहिनगिरिमयं=हिमालयावयवनिर्मितं कार्मुकं=धनुर्यत्र धनुषि दर्वीकराणां= सर्पाणां पतिः=वासुकिः मौर्वी=गुणः, उदधिसुतायाः=लक्ष्म्याः पतिः=विष्णुश्च सायकः=बाणो जज्ञे=जातः । यत्=एतद्धनुः चन्द्रमौलेः=शिवस्य दोर्दण्डैः=भुज-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

दोर्दण्डैश्चन्द्रमौलेर्नतमपि यदभूदुन्नतं कार्मुकाणां
बाष्पाम्भोवृष्टये च त्रिपुरमृगदृशामैशमप्यैन्द्रमासीत् ॥३०॥

विश्वामित्रः—जानामि ।

सेवायातसमस्तखेचरकरक्रीड़ाचलच्चामर-
श्रेणीमारुतपानपीननिविड़ज्यापन्नगाकर्षिणा ।
गाढ़ाकुञ्चनजृम्भमाणतुहिनस्यन्दैर्यदीयैः श्रमः
सन्त्यक्तः पुरवैरिणाऽपि तदिदं शैलेन्द्रसारं धनुः ॥३१॥

जनकः—तत्कथमस्यानयनाय रामायादिशसि ?

दण्डैः नतं=नम्रीकृतं सज्यीकृतमिति विवक्षा, अपि कार्मुकाणां=धनु (समुदाये) उन्नतं=लब्धगौरवं च तथा त्रिपुरमृगदृशां=त्रिपुरासुरवनि वाष्पमेवाम्भो=जलं तस्य वृष्टये=वर्षणाय ऐशं=शैवं (सत्) अपि ऐ =इन्द्रसम्बन्धि आसीत्=अजायत । उन्नते हीन्द्रचापे वृष्टिर्जायतेऽमुष्मिन् रैशेप्युन्नतिशालिनि तथेति तथोक्तिः । शिवो हि विष्णुं बाणं वासुकिनां गुणं विधाय त्रिपुरासुरं जघान, तेनास्य बाणस्य महती प्रतिष्ठा तद्विधवान नेत्रयोरविरलधाराश्रुपात इत्यर्थः । स्रग्धराच्छन्दः ॥३०॥

सेवायातेन—सेवायै=उपासनायै आयाताः=समागता ये समस्त सकलाः खेचराः=देवास्तेषां कराः=हस्तास्तेषां क्रीड़या=सलीलचालनप्रकार चलन्त्याः=प्रचरन्त्याश्चामरश्रेण्या मारुतो=वायुस्तस्य पानं=निगरणं तेन =स्थूलशरीरो निविडो=घनः (सारवत्तरः) ज्यापन्नगः=मौर्वीभूतो वासु नागस्तमाकर्षति तेन पुरवैरिणा=शिवेनापि गाढ़ाकुञ्चनं=बलाज्झटिति चानमनं तेन जृम्भमाणाः=प्रकटन्तस्तुहिनस्यन्दाः=हिमप्रवाहास्तैः (स्तुहिनस्यन्दैः) श्रमः—धनुर्नमनजन्यः क्लमः सन्त्यक्तः, तदिदं शैलेन्द्र हिमालयस्य सारभूतं=तत्त्वभूतं धनुरस्तीति शेषः । त्रिपुरासुरविनिपातन महतो ऽस्य धनुष आस्फालनेन क्लान्तः पुरा गाढ़माकुञ्चितादतः प्रवहमा हिमधारया शिशिरीकृतो ऽतोऽस्य शिवश्रमकरत्वेनातिभारवत्त्वमिति तात्पर्य रूपकमलङ्कारः । शार्दूलविक्रीडितमत्र वृत्तम् ॥३१॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

विश्वामित्रः—न केवलमानयनाय, किन्त्वानमनाय (रामं प्रति) वत्स, बध्यतां परिकरः । इदं च

मारीचमारीचतुरं सुबाहोरपवारणम् ।
न्यस्यतां लक्ष्मणकरे ताटकाताड़नं धनुः ॥३२॥

जनकः—कथमसम्भावनीयमेवोद्भावयसि ?

विश्वामित्रः—कथमिदं न विदितं ते । अनेन हि—

प्राप्य चापनिगमानितः क्रमात्
सम्प्रताप्य विशिखैर्निशाचरान् ।
अस्मदीयमखरक्षणक्रिया-
दक्षिणेन गुरुदक्षिणीकृता ॥३३॥

परिकरः=सन्नाहः, धनुरानयनतदानमनोपयुक्तवस्त्रादियथास्थानोपन्यासरूपः । मारीचेति—मारीचस्य=तन्नाम्नो रक्षसो मारी=मारणक्रिया तस्यां चतुरं=दक्षम् । सुबाहोः=तदाख्यस्य रक्षस एव अपवारणम्=रोधकम् (तत्कृतादुपद्रवाद्रक्षकमिति भावस्तेन च तच्छमकत्वं लक्ष्यम्) ताटकायास्ताडनं=हन्तृ इदं-त्वया सम्प्रति ध्रियमाणं धनुर्लक्ष्मणस्य करे न्यस्यताम्=रक्ष्यताम् । अत्रादेशवचश्चातुर्या भूतार्थः सूचितः, जनकहृदयावस्थितरामविषयकवात्सल्यप्रयुक्तधनुराहरणादिगता चिन्तापसारिता च । मारीपदसाधुत्वं चिन्तनीयं पण्डितैः । मारी=मारणम्, यथा—बटुकभैरवे—'मारीभये राजभये' इति ॥३२॥

असम्भावनीयम्=ताड़कादिनिधनम्, उद्भावयसि=प्रकाशयसि ।

प्राप्य चापेति—इतो=मत्सकाशात् चापनिगमान्=धनुर्वेदोपदेशान् प्राप्य=लब्ध्वा क्रमात्=यथाक्रमम् विशिखैः=बाणैः निशाचरान् सम्प्रताप्य=घातयित्वा दक्षिणेन=कुशलेनानेन (त्वया बालतयाऽबलतया च संशयितेन) अस्मदीयमखस्य=अस्माभिरनुष्ठितस्य यज्ञस्य रक्षणक्रिया=राक्षसोपद्रवात् त्राणात्मा व्यापारो गुरुदक्षिणीकृता=अध्यापकाय विद्यावसाने देयं द्रव्यं गुरुदक्षिणा तत्त्वं गमितेति भावः । मत्तोऽध्ययनं कृत्वा धनुर्वेदस्येत्युक्त्या स्वाध्यापितस्य साफल्यविषये विश्वासः, गुरुदक्षिणीकृतेत्यनेन रामस्य परीक्षितत्वं तत्र स्वस्य सन्तोषश्च मुनिना

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

जनकः—(विमृश्य । निःश्वस्य च) भगवन्, अस्त्येतत्, किन्तु

मारीचमुख्यरजनीचरचक्रचूडा-
चञ्चन्मरीचिचयचुम्बितपादपीठः ।
अत्राभवद्विफलबाहुबलावलेपो
वीरः शशाङ्कमुकुटाचलचालनोऽपि ॥ ३४ ॥

विश्वामित्रः—किमेतावता ? नन्वत एव राममादिशामि (रामं प्र
वत्स, उत्तिष्ठ । कुमुदिनीकान्तकलाकिरीटकार्मुकरोपणप्रवीणतया सम्प्रीणयास्मा

जनकः—(स्वगतम्)

यस्य ख्याता जगति सकले निस्तमिस्रा तपःश्री-
मिथ्योत्कण्ठः कथमिह भवेदेष गाधेस्तनूजः ।

व्यञ्जितस्तेन च जनकं प्रति विश्वासः करणीयस्त्वयापि रामपौरुष
भवतीति भावः । पुष्पिताग्रा वृत्तम् ॥ ३३ ॥

मारीचमुख्येति—मारीचमुख्याः=तत्प्रधाना रजनीचरा=राक्षसा
चक्रं=मण्डलं तेषां चूडासु=शिरोभूषासु चञ्चन्तो=द्योतमानाः मरीचयः=(
किरणानि तेषां चयः=समूहस्तेन चुम्बितम्=युक्तम् पादपीठम्=पादतलं
सः—(सकलसुरसेव्यमानपाद इत्यर्थः) वीरः=पराक्रमी शशाङ्कः=चन्द्रमा
=मस्तके यस्य स शिवस्तस्याचलः=कैलासपर्वतस्तस्य चालनः=उत्था
(रावणः) अपि विफलः बाहूनां बलस्यावलेपो=गर्वो यस्य तथाऽभवत्
समप्युत्थापितवतो रावणस्यात्र कैलासाधिकसारे धनुषि पराभवं प्रत्य
क्षितवतो मम रामविषयकः संशयो नातीवानुपयुक्तोऽस्थाने चेति जनकस्या
वसन्ततिलकं वृत्तम् ॥ ३४ ॥

एतावता=रावणो न शक्त इति । कुमुदिनीकान्तः=चन्द्रस्तस्य कला
किरीटे=मस्तके यस्य स शिवस्तस्य कार्मुकं=धनुस्तस्य आरोपणं=सज्जी
तत्र प्रवीणतया=तत्र दक्षतया सम्प्रीणय=प्रसादय ।

यस्य ख्यातेति—सकले=सम्पूर्णे जगति=संसारे यस्य (विश्वामित्र
निस्तमिस्रा=निर्दूषणा तपःश्रीः=तपस्याप्रभावः ख्याता=प्रसिद्धा स

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

बालो रामः किमपि गहनं कार्मुकं चान्द्रमौले,-
र्दोलारोहं कलयति मुहुस्तेन मे चित्तवृत्तिः ॥३५॥

(पुनः पृथिवीमालोक्य)

रतिरिव जननेत्रानन्दिनी नन्दिनी ते
कुसुमशर इवायं रूपसारः कुमार : ।
यदि तु धनुरपीदं प्राप्तमेतस्य हस्तं
कुसुममयमिव स्यात्सम्भृतः सम्प्रदायः ॥३६॥

=तदाख्यनृपतेस्तनूजः पुत्रो विश्वामित्र एष इह=रामकर्तृकशिवधनुर्नमन-विषये मिथ्या=विफलोत्कण्ठा=अभिलाषो यस्य तथाभूतः कथं भवेत् ?। न सम्भाव्यत इदमिति भावः, (किन्तु) रामः (येन धनुरुत्थापनीयं, सः) बालः=अप्राप्तप्रौढ़भावः, चन्द्रमौलेः=शिवस्य कार्मुकं=धनुश्च किमपि (प्रचुरं) गहनं=कठोरं सारवच्च (अस्तीति शेषः) तेन मे=मम चित्तवृत्तिः=मनोदशा मुहुः=भूयः दोलारोहम्=हिन्दोलारोहणदशाम् (उभयपक्षधावितयाऽभिप्रायसिद्धिः) कलयति । यद्यपि विश्वामित्राभिलष्यमाणतया रामेण शिवधनुः शक्यारोपणमिति विश्वसिमि तथापि रामं बालं तच्चापं च महासारं पश्यतो मम मनः संशेत इति भावः। मन्दाक्रान्ता वृत्तमिदम् ॥३५॥

रतिरिवेति— जननेत्राणां=लोकलोचनानाम् आनन्दिनी=हर्षिणी ते=(पृथिव्याः) तव नन्दिनी=दुहिता रतिः=कामवधूरिव अस्तीति शेषः (निरतिशयसौन्दर्यशालितया सीता-रत्योः सादृश्यम्) अयं (च) कुमारः=बालः कुसुमशरः=कामदेव इव रूपस्य सारः=सौन्दर्यस्य सारभूतः (अतिरमणीयतया तथोक्तिः) यदि तु इदं=शैवं धनुरपि एतस्य=रामस्य हस्तं=करं प्राप्तम् तेन स्पृष्टमात्रमित्यर्थो बोध्यः कुसुममयमिव=पुष्पमयमिव (लघु सुनमं च) स्यात् =जायेत तदा सम्प्रदायः=परिपाटी (कामदेवस्य पुष्पचापता रतिनाथता च प्रसिध्यति, तदनुसारिणी रीतिः) सम्भृतः=पूर्णः स्यात्=सम्पद्येत । रूपं=सारो यस्येति तु न विग्रहः कार्यः, तथा सति पराक्रमस्य निषेधात् । इदं पद्यं विश्वा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

शतानन्दः—राजर्षे, किमेतन्मूढ इव मुहुर्मुहुरालोकसे, अनुवर्त्तस्व वचनम्।

जनकः—(प्रकाशम्) अनुवृत्तमेव, (रामं प्रति) वत्स, अनुष्ठीयतां वचनम्। (राम उत्थाय परिकरं बध्नाति)

(प्रविश्य)

प्रतीहारी—जेदु जेदु देवो। कोवि बह्मणो देवस्स दसणत्थी दुआरदेसम्मि चिट्ठदि। ता किं पवेसीअदु। (जयतु जयतु देवः, कोऽपि ब्राह्मणो देवस्य दर्शनार्थी द्वारदेशे तिष्ठति तत् किं प्रवेश्यताम्।)

जनकः—आः, इदमपि किं जनकः प्रष्टव्यः।

प्रतीहारी—तथा (इति निर्गत्य तेन सह प्रविशति)

जनकः—ब्रह्मन्, प्रणम्यसे।

मुनिः—राजन्, सुमतिर्भूयाः।

जनकः—(स्वगतम्) अन्यादृशीयमाशीःपरिपाटी। भवतु। (प्रकाशम्) मुने इहास्यताम्।

मुनिः—सन्देशहरः खल्वस्मि।

जनकः—कस्य ? कीदृशो वा संदेशः ?

मुनिः—पीत्वा कज्जलकालिमानमखिलं क्ष्मापालनारीदृशां
नीत्वा स्फीतयशोऽट्टहासमहसा लोकत्रयं शुभ्रताम्।

मित्रस्य रामकर्तृकहरचापारोपणविषयकोत्कण्ठाशालितां व्यनक्ति। शार्दूलविक्रीडितच्छन्दसोपनिबद्धमिदम् ॥३६॥

मूढ इव=किङ्कर्त्तव्यमिति ज्ञानशून्य इव।

इदमपि—ब्राह्मणः प्रवेश्यताम् इत्यपि। ब्राह्मणा हि सदादरेण प्रवेश्याः, अतो नात्र प्रश्नस्यावसरोऽस्तीति जनकस्याशयः।

अन्यादृशी=अन्यप्रकारा, प्राग्घि=प्रणतोऽयं किमप्यन्यथाऽभाषत आशीस्तु मतिसौम्यतामाशास्त इति हृदये कश्चन क्षोभोऽस्यास्तीति प्रतिभातीति हृदयम्।

पीत्वा कज्जलेति—क्ष्मापालाः=राजानस्तेषां नारीणां=वनितानां दृशां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

चण्डीशं चरितैरनेकविभवैरद्यापि यः सेवते
हे वैदेह स जामदग्न्यपरशुस्त्वामेतदाभाषते ॥३७॥

जनकः—(स्वगतम्) अहो गर्वाङ्कुरस्य वक्रता । भवतु । (प्रकाशम्) तत् ।

मुनिः—कस्मैचिद्देहि कन्यां नरपतिशिशवे दीर्घमायुर्लभस्व
व्यावर्त्तस्वाप्रियान्नः पुरमथनधनुःकर्षणालापपापात् ।

चक्षुषाम् अखिलं=समस्तं कज्जलकालिमानम्=अञ्जनश्यामिकां पीत्वा=निगीर्य राज्ञां निधनेन तद्वधूनां विधवात्वमापाद्य तदीयनयनानि सततप्रवृत्ताश्रुधारया वैधव्योचितनियमपालनेन वा निष्कज्जलानि कृतानीति बोध्यम्) स्फीतस्य स्वच्छस्य यशसः=कीर्त्तेरट्टहासः=विकासः तस्य महसा=तेजसा (प्रकाशेन) लोकत्रयं शुभ्रतां=धावल्यम् नीत्वा=प्रापय्य (जगत्त्रयं क्षत्रपराजयप्रभवयशसा काश्येत्यर्थः) (च) यः (=जामदग्न्यपरशुः) अद्यापि=सम्प्रत्यपि अनेकभवैः=बहुधा भिन्नैर्नानाप्रकारैरिति भावः, चरितैः=आचरणैश्चण्डीशं=शिवं सेवते=आराधयति स जामदग्न्यपरशुः हे वैदेह, त्वामेतत्=अग्रे वक्ष्यमाणम् आभाषते । अत्र शिवसेवकताप्रतिपादनेन तद्वचसः श्रद्धायोग्यता, 'त्वाम्' इति नापि सम्बोध्यमानस्य भाषणोद्देश्यताप्रतिपत्तौ सम्भवन्त्यां पुनस्त्वामित्युक्तिनन्यार्थकतामस्या उक्तेराह, तेन च चास्या अवश्यमान्यता व्यज्यते । विषमालङ्कारः "गुणौ क्रिये वा चेत्स्यातां विरुद्धे हेतुकार्ययोः" इति लक्षणात्कज्जलं पीत्वा लोकत्रयमट्टहासेन शुभ्रतां नीतमिति च तत्समन्वयः । शार्दूलविक्रीडितं वृत्तम् ॥३७॥

गर्वाङ्कुरस्य=गर्वोदयस्य वक्रता=कुटिलता ।

कस्मैचिद्दिति—कस्मैचित्=अपरिगणिताय (अपि) नरपतिशिशवे=क्षत्रियबालकाय कन्यां देहि, (न मम तस्मिन् विषये कश्चन निर्बन्धविशेषः) दीर्घं=विशालम् आयुः=जीवितं लभस्व=आप्नुहि । (किन्तु) नः=अस्माकम् अप्रियात्=अनभीष्टात् पुरमथनस्य=शिवस्य धनुषः कर्षणम्=आनमनम् तस्य आलापः=कथा (तदात्मकात्) ततः पापात्=अधर्मात् व्यावर्त्तस्व=विनिवृत्तो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

नो चेदन्योऽस्त्युपायस्तव कलुषमसीपङ्कसंक्षालनाया
मस्मद्विस्तारिधाराञ्चलबहलपयःपूरदूरावगाहः ॥३८

जनकः—(विहस्य) तन्मयापि प्रतिसंदेशः कथनीयस्तस्य।

मुनिः—कीदृशोऽसौ ?

जनकः—त्वं मित्रं मम जामदग्न्यपरशो, येनैतदाभाष्यसे
सम्प्रत्येव यथाप्रतिश्रुतमियं कन्या मया दीयते।

भव। नो चेत्=यदि त्वमेवं कर्त्तुं मतिमान्द्यादशक्तस्तदा तव कलुषं=... मसीपङ्कः=कज्जलम् तस्य क्षालनायां=मार्जनायाम् (अपाकरणे) ... विस्तारिणी=परिणाहवती या धारा=तीक्ष्णतमः पुरोभागस्तदेवाञ्चलं=प्रान्तभाग... स्तत्र वहलः=प्रचुरो यः पयःपूरो=जलराशिस्तत्र दूरावगाहः=सुदूरनिस्तार... अन्यः (एतादृशकलुषाचरणान्निवृत्तेरतिरिक्तः) उपायः=प्रतीकारः, ...तस्त... शिवधनुर्भङ्गजनितपापनिवृत्तेरुपायद्वयम्—एकस्ततो निवृत्तिरूपः, द्वितीयम... तथा कृत्वा कारयित्वा वा मदीयधारया शिरश्छेदनमिति व्यवस्थितत्व...सम... सत्त्वे येनेष्टं तेन गम्यतामिति सुहृद्भावाभिमानिनो जामदग्न्यपरशोर्जनक... संदेशोऽस्य पद्यस्याशयः। अत्र 'कस्मैचित्' 'नरपतिशिशवे' इति पदैव... क्षत्रियविषये परशोरत्यन्तमनास्था, तेन च तदीयवीरता, 'आलाप'... कथायामपि तथा चिन्तनस्याहितकरत्वं, तेन स्वसामर्थ्ये विश्वासातिशयः... यान्तरप्रदर्शनेन च प्रथमपथाननुसरणे स्वस्यावश्यम्भावी वध इत्याद्यं... ज्यन्ते। वृत्तमत्रापि पूर्वोक्तमेव ॥३८॥

प्रतिसंदेशः=प्रतिवाचिकम्।

त्वं मित्रमिति— हे जामदग्न्यपरशो, त्वम् मम=जनकस्य मित्रं असीति शेषः, येनैतत्=पुरःप्रतिपादनीयम् आभाष्यसे=कथ्यसे, सम्प्रति=... एव यथाप्रतिश्रुतं=स्वां प्रतिज्ञामनुल्लङ्घ्यैव मया इयं कन्या=दुहिता ... =(शिवधनुर्भञ्जकाय समर्प्यत इति बोध्यम्) तेन (=येन हेतुना दीयते... मित्रमसीति वा) स्वयम् एत्य=आगत्य धूर्जटेः=शिवस्य धनुषः धौरेयं... लने समर्था दोःसम्पत्तिः=बाहुबलं यस्य तस्य (मदीय-) जामातुः पुरतः...

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

तेनेह स्वयमेत्य धूर्जटिधनुर्धौरेयदोःसम्पदो
जामातुः पुरतश्चिराय भवता धाराजलं त्यज्यताम् ॥३९॥

मुनिः—तथास्तु । (इति निष्क्रान्तः)

जनकः—आङ्गिरसोपक्षिप्तस्तावदयं जामदग्न्येन निजकोपानलस्फुलिङ्गः ।

शतानन्दः—किमेतावता ? अतिगम्भीरभुजसारकासारकैरवारामः खलु रामः ।

विश्वामित्रः—राजर्षे, के पुनरमी परितः स्फुरन्मणिमौलय परःसहस्रा दृश्यन्ते ।

जनकः—श्रीकण्ठकार्मुकनिरस्तभुजावलेपा
नानादिगन्तजगतीपतयः किलामी ।

जामदग्न्यपरशुना चिराय=सदाकृते धारा=तीक्ष्णाग्रभाग एव जलं=वारि तारल्यचाकचिक्यादिकृतं सादृश्यम्) त्यज्यताम्=विसृज्यताम् । मम जामातुः तस्त्वया स्वीयतीक्ष्णतागर्वः परिहीयतामिति भावः, मित्रमसीति हेतो र्मया क्रियमाणे कन्यादाने त्वया (मम करे) दानोपयोगिजलदानमुचितमिति समानो द्वितीयोऽर्थः । अत्र पद्ये 'सम्प्रत्येव' 'यथाप्रतिश्रुतम्' इत्याभ्यां पर- क्तेः सर्वथा निरादरः, स्वयमेत्येत्यनेन जामातृपराक्रमे प्रखरः प्रत्ययश्च व्यज्यते । द्वेहापि वृत्तं बोध्यम् । "धूर्जटिर्नीललोहितः" इत्यमरः ॥३९॥

आङ्गिरस=इदं शतानन्दस्य वंशपरिचायकं सम्बोधनम् । उपक्षिप्तः=प्रारब्धः, स्फुलिङ्गः=कणः ।

अतिगभीरः=अत्यन्तनिम्नमध्यः, भुजसारो=बाहुबलं स एव कासारः=सर- स्य कैरवारामः=कुमुदवाटिकारूपः । 'कासार' पदोपादानम् 'स्फुलिङ्ग' निर्वा- पकतासूचनद्वारा परशुरामपराजयं व्यञ्जयतीति बोध्यम् ।

श्रीकण्ठेति—श्रीकण्ठस्य=शिवस्य कार्मुकेण=धनुषा निरस्तः=अपसारितो रीकृत इति यावत् भुजावलेपः=बाहुगर्वो येषां ते तथोक्ताः अमी नानादि- न्तानां=भिन्नभिन्नदेशानाम् जगतीपतयः=राजानः मम अभ्यर्थनाम् (कियन्ति- न दिनानि भवद्भिर्निजचरणरजोभिः पूयतामयं मदग्रहारः) इत्येवंरूपां प्रार्थनाम् किमपि=कियतांशेन अभिवर्त्तमानाः (किल) कानिचिदहानि नरेन्द्र- पूजां=राजसत्कारं गृह्णन्ति=प्राप्नुवन्ति । शिवधनुर्भङ्गाय समवेताः विभिन्न-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अभ्यर्थनां मम किमप्यभिवर्त्तमाना
गृह्णन्ति कातिचिदहानि नरेन्द्रपूजाम् ॥४०॥

विश्वामित्रः—वत्स रामचन्द्र, तदेषामेव पश्यतां कौतुकमस्माकं पूरय

(रामो विश्वामित्रं प्रणम्य निष्क्रान्तः)

जनकः—आङ्गिरस, अपरिशीलितसन्निवेशस्य वत्सरामस्य भवता प्रत्य-भूयताम्। आदिश्यतां कञ्चुकी च करकलितकमलमालाया जानक्याः राङ्गणावतरणाय।

शतानन्दः—तथास्तु। (इति निष्क्रान्तः)

(प्रविश्य)

कञ्चुक—जयतु देवः, अनुष्ठित एव देवादेशः।

विश्वामित्रः—(विलोक्य) (सहर्षम्) आः, कथमुद्गतमेव रामचन्द्र पताकाकेतुदण्डेन हरकोदण्डेन, (पुनः सविस्मयम्) अये,

राघवेण शिशुनापि किलायं लीलयैव नमितो हरचापः।
दूरमुल्लसति यस्य समन्तादम्बरेऽपि गमितो गुणघोषः ॥४१॥

भूभागस्वामिनो मदनुरोधेन कतिचन दिनानि मदीयं सत्कारं स्वीकारेण भ वयन्तीति भावः। "श्रीकण्ठः शितिकण्ठः कपालभृत्" इत्यमरः। वसन्ततिलका च्छन्दसोपनिबद्धमिदं पद्यम् ॥४०॥

अपरिशीलितः=अपरिचितः सन्निवेशो=देशविशेषः स्थानविशेषश्च येन := प्रत्यनन्तरः=मार्गदर्शकः सहायः। करे कलिता=निहिता कमलस्य=पुष्पवि स्वनामख्यातस्य माला यया तस्याः। स्वयंवराङ्गणावतरणाय=स्वयम्वरा परस्थानाय।

उद्गतम्=उत्थितम्। केतुदण्डः=आश्रयवंशः (यत्र पताका बध्यते)

राघवेणेति— अयं हरचापः=शिवधनुः शिशुना=बालेनापि राघवेण वंशिना रामेण लीलयैव=अनायासमेव नमितः=सज्यीकृतः। यस्य=सज्यी हरधनुषः अम्बरे=आकाशेऽपि गमितः=प्रापितः (व्याप्तः) गुणघोषः (रामचन्द्रयशःप्रशस्तिर्वा) समन्तात्=सर्वतः दूरम्=बहुदूरपर्यन्तम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

लक्ष्मणः—भगवन्, एवमेतत्, तथाहि—

पूर्णा एव पुरारिचापकपटच्छन्नाचलग्रामणी-
गूढ़ानेकगुहागभीरकुहरस्फारप्रतिध्वानिभिः ।
मौर्वीभूतभुजङ्गराजवदनश्रेणीविसर्पद्वचः-
प्रारब्धार्यंयशःप्रशस्तिसदृशैर्ज्याघातघोषैर्दिशः ॥४२॥

जनकः—आः, किमुच्यते, दिशः पूर्णा इति। ननु

एतैः श्रीकण्ठकोदण्डचञ्चन्मौर्वीभवै रवैः ।
चिरात्प्रतिज्ञया साकं पूर्णो मम मनोरथः ॥४३॥

रति। रामेणाकृष्यमाणस्य हरधनुषो ज्याघोषः अम्बरमपि ना भुवमभिव्याप्य
त इति भावः। स्वागता वृत्तम् ॥४१॥

पूर्णा एवेति—पुरारेः=शिवस्य चापस्य=धनुषः कपटेन=छलेन च्छन्नस्य
रोभूतस्य, (हरचापरूपतया स्थितस्येति भावः) अचलग्रामण्यः=पर्वतमुख्यस्य
(हिमगिरेः) गूढ़ाः=अन्तर्हिताः अनेके=बहवो गुहागभीरकुहराः=गुहारूपा
—वृता यांमा विवरास्तेषु स्फारं प्रतिध्वनन्ति=शब्दायन्ते तच्छीलैः, (किञ्च)
र्वीभूतस्य=ज्याभावं भजतः भुजङ्गराजस्य=वासुकेः वदनश्रेणी=मुखपंक्तिस्तस्याः
सकाशात्) विसर्पद्भिः=निस्सरद्भिर्वचोभिः प्रारब्धा=प्रवृत्ता याऽऽर्यस्य=राम-
द्रस्य यशःप्रशस्तिः=कीर्त्तिवर्णना तया सदृशैर्ज्याघातघोषैः=धनुर्गुणरवैः
ताः=ककुभः पूर्णाः=व्याप्ता एव। चापरूपतया स्थितस्य हिमगिरेः कन्दरासु
तिध्वनन्तो ज्याभावंगतस्य वासुकेर्वदनेभ्यो निष्क्रामद्भिर्वचनैः प्रवर्त्तमानाया
चन्द्रश्लाघायाः समाश्च शिवधनुर्भङ्गशब्दा दिशो व्याप्नुवन्ति तेन त्वदुक्तं न
ति विश्वामित्रं प्रत्यस्या लक्ष्मणोक्तेराशयः। शार्दूलविक्रीडितमेव वृत्तम् ॥४२॥

एतैरिति—एतैः श्रीकण्ठस्य=शिवस्य कोदण्डस्य=धनुषश्चञ्चन्ती=त्रुट्यन्ती
र्वी=गुणः तद्भवैः=तदुत्थैः रवैः=शब्दैः चिरात्=बहुकालात् (मम) प्रतिज्ञया
कं=सह मम मनोरथः=(सीतापरिणयदर्शनरूपः) अभिलाषः पूर्णः=सत्या-
तः। शिवधनुर्भङ्गभवो रवो न केवलं दिशः, अपि तु मदीयां प्रतिज्ञां मम
नोरथञ्चापूरयदिति भावः ॥४३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

प्रतीहारी—(कञ्चुकिनं प्रति) अज्ज, पेक्ख पेक्ख कोदूहलम्। सीद मिलिअ उण हरचावारोवणं समग्गीकरीअदि।

(आर्य, पश्य पश्य, कौतूहलम्। सीतारामाभ्यां मिलित्वा पुनर्हरचा समग्रीक्रियते)।

कञ्चुकी—(सकौतुकम्) कथमिव। (विमृश्य, विहस्य च) आं,

करकिसलयलीलाचारु चण्डीशचापे
दशरथतनयेन स्वैरमाकृष्यमाणे।
रससरसविकासी सीतया पुङ्खितोऽसौ
कुवलयदलदामश्यामकान्तिः कटाक्षः ॥४४॥

लक्ष्मणः—भगवन्, अत्यद्भुतं वर्त्तते। नन्वयम्—

भिन्दन्निद्रां मुरारेः सकलभुजभृतां म्लानयन् शौर्यदर्पं
छिन्दन् दिक्कुम्भिकर्णाञ्चलचलनकलां कम्पयन् कूर्मराजम्।

सीतारामाभ्याम्—प्रथमं तु केवलं रामेण धनुराकृष्टमिदानीं धनुम वर्त्तमानं रामं कटाक्षेण सीता पश्यति तेन तस्या दृशो नीलनीला प्रभा तत्र करस्थे धनुषि बाणभावं भजत इत्यभिप्रायोक्तिः।

करकिसलयेति—करौ एव किसलयौ=पल्लवौ तयोः लीला=क्रीडा चारु=रमणीयमिदं क्रियाविशेषणम् (न तु भृशायासेन) स्वैरं=यथेच्छं तनयेन=रामेण चण्डीशचापे=हरधनुषि आकृष्यमाणे=नम्यमाने 'यस्य च भावेन' इति सप्तमी। रसेन=अनुरागेण सरसः=शीतलो विकासी=प्रफुल्लितश्च दलस्य=कमलपत्रस्य दाम=माला तद्वत् श्यामा कान्तिः=वर्णो यस्य स इति पुङ्खित=वक्रतामारोप्य प्रक्षिप्तः। यावद्रामोऽनायासं हरचापं कराभ्यामा मयति तावदेव सीताऽनुरागप्रविकसन्नयनकमला कटाक्षेणेक्षते स्मेत्या अत्र 'किसलय'पदेन कुसुमारता, 'आकृष्यमाणे' इत्यत्र वर्त्तमानार्थ धनुर्नमनकटाक्षपातयोः समसमयताप्रतीत्या सीताया विस्रब्धभावः, पुङ्खित' इत्यनेन तस्य बाणस्थानीयतोक्त्या हृदयान्तःप्रवेशशक्तिशालि योऽर्थो व्यज्यन्ते। मालिनी वृत्तम् ॥४४॥

भिन्दन्निति—मुरारेः=विष्णोः (शेषे समुद्रे शयानस्य, एतेन

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

आर्यश्लाघागभीरः प्रलयजलधरध्वानधिक्कारधीर-
ष्टाङ्कारः कृष्यमाण-त्रिपुरहरधनुर्भङ्गभूराविरस्ति ॥ ४५ ॥

प्रतीहारी—तेल्लोक्कं लङ्घअन्तो गिरिगहिरगुहासुत्तजग्गन्तसीह
प्फारुम्मिल्लन्तकण्ठत्थणिदपडिरवुग्गारपूरिज्जमाणे ।
बह्मण्डे भज्जमाणे बहुविअडकडक्कारपब्भारभीमो
अम्म भज्जन्तचण्डीसरधणुट्टणक्कारओ उग्गमेइ ॥४६॥

(त्रैलोक्यं लङ्घयन् गिरिगभीरगुहासुप्तजाग्रत्सिंह-
स्फारोन्मीलत्कण्ठस्तनितप्रतिरवोद्गारपूर्यमाणे ।
ब्रह्माण्डे भज्यमाने बहुविकटकटत्कारप्राग्भारभीमो
ऽहो भज्यच्चण्डीश्वरधनुष्टणत्कार उद्गच्छति ॥)

तालप्रवेश उक्तः) निद्रां=स्वापं भिन्दन्=उच्चाटयन्, सकलानां भुजभृतां हुमतां शौर्यदर्पं=पराक्रमगर्वं म्लानयन्=मलिनयन्, दिक्कुम्भिनो=दिग्गजास्तेषां र्णाञ्चलस्य=कर्णाग्रभागस्य चलनकलां=चलनजन्यां छविं छिन्दन्=अपहरन् कुम्भिनो हि महान्तं रवं निशम्य कर्णं स्तम्भयन्ति, अत एवमुक्तिः) कूर्मराजं धरित्रीधारिणं कमठम् कम्पयन्=चालयन्, आर्यस्य=रामस्य श्लाघया=प्रशंसया भीरः=भृतः प्रलयजलधरः=समयावसानकालिको मेघस्तस्य ध्वानः=स्तनितं स्य धिक्कारे=तिरस्कारे धीरः=निपुणः कृष्यमाणस्य=नम्यमानस्य त्रिपुरहरधनुषः शिवचापस्य भङ्गः तद्भू-स्तदुत्थः टाङ्कारः=तदनुकरणशब्दः आविरस्ति=उद्भ- ति । धनुर्भङ्गजन्यरवस्य विष्टपत्रितयव्यापकस्य महाभीमस्य चोपलब्ध्या लक्ष्म- स्याद्भुतरसोदयः । स्रग्धरावृत्तम् ॥४५॥

त्रैलोक्यं लङ्घयन्निति—त्रैलोक्यं=भुवनत्रयं लङ्घयन्=व्याप्नुवन्, रीणां=पर्वतानां गभीरासु=दीर्घासु गुहासु=कन्दरासु सुप्ताः=शयिताः (प्राक्) ग्रतः (पश्चात्) ये सिंहाः तेषां स्फारमुन्मीलत्=दीर्घं प्रकटीभवत् स्तनितं गर्जितं तस्य प्रतिरवः=प्रतिशब्दस्तस्योद्गारः=निर्गमस्तेन पूर्यमाणे=भ्रियमाणे ह्माण्डे=संसारे भज्यमाने=त्रुट्यति (शिथिलबन्धतां=व्यस्तताम् आसादयति) हुविकटः=अतिभयानकः कटत्कारः=कड़कड़ाशब्दः तस्य प्राग्भारः=विस्तारः तेन

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

कञ्चुकी—पश्य कौतुकम्—

क्रीड़ाभग्नमृगाङ्कमौलिधनुषं सीतार्पितां वक्षसा
विभ्राणं कमलस्रजं निजगृहं शृङ्गारवीरश्रियोः ।
रामं व्रीडवशादवाञ्चितमुखं भूमीभुजां पश्यतां
चेतः क्रोधविषादविस्मयमुदामूर्मीः समालिङ्गति ॥४७॥

(प्रविश्य)

शतानन्दः—राजर्षे, विषीद वा प्रसीद वा, इदं यथादृष्टमुपवर्ण्यते ।

ज्यावल्लीं ललिताङ्गुलीकिसलयैराकर्णमाकर्षतो-
न भ्रूभंगुरतां गता रघुशिशोर्भग्नं धनुर्धूर्जटेः ।

भीमो=भयानको भज्यतः=त्रुट्यतः चण्डीश्वरधनुषः=शिवशरासनस्य उद्गच्छति=उदयते । धनुर्भङ्गभवेन रवेण त्रिलोकी व्याप्ता, गुहासु सिंहाः प्रबुद्धास्सन्तो गर्जन्ति, तेन गुहाः प्रतिध्वनन्ति, ब्रह्माण्डं भज्यत भावः । इयं प्राकृतगाथापि स्रग्धरयैव निबद्धा ॥४६॥

क्रीड़ाभग्नेति—क्रीड़या=अनायासेन भग्नं=खण्डितं मृगाङ्कमौलेः= धनुर्येन तम्, सीतयाऽर्पितां=निहितां कमलस्रजं=कमलमालां वक्षसा= विभ्राणम्, शृङ्गारवीरश्रियोः=तत्तदाख्यरसविशेषलक्ष्म्योः, निजगृहं=स्व निवासभूमिमिति भावः, व्रीडवशात्=साध्वसपारतन्त्र्यात् अवाञ्चितमुखम्= नतवदनम् रामं पश्यतां=विलोकमानानां भूभुजां=राज्ञां चेतः=हृदयं (क क्रोधः=कोपः, विषादः=खेदः, विस्मयः=आश्चर्यम्, मुत्=आनन्दः, एषाम् ऊ तरङ्गान् आलिङ्गति=स्पृशति । सीतास्वयम्बरमालाललितगलं रामं प राज्ञां मनसि ते ते क्रोधखेदाश्चर्यानन्दाख्याः (स्वभावसम्बन्धादिभेदभि भावाः प्रादुरासत इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥४७॥

ज्यावल्लीमिति—ललिताङ्गुलीकिसलयैः=रमणीयाङ्गुलिपल्लवैः ज्या =धनुर्लताम् आकर्णं=कर्णपर्यन्तम् आकर्षतः=नमयतः रघुशिशोः=रघुवंशि रस्य भ्रूभंगुरतां=कुटिलतां न गता प्राप्ता (किन्तु) धूर्जटेः=शिवस्य =चापं भग्नम्=त्रुटितम् । अनायासभग्नताऽनेन सूचिता । अस्य कण्ठे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

नाहङ्कारतरङ्गितो ध्वनिरभूत् कण्ठे ऽस्य दीर्यद्धनु-
ष्टङ्कारस्तु चकार तारतरलः शब्दाद्वितीयं जगत् ॥४८॥

जनकः—कथं पुनरेतावतीमतिभूमिमवगाहमानोऽपि वत्सो रामभद्रो भवता न निवारितः।

शतानन्दः—कथङ्कारं वारयामः ?

यावत्कन्दुकलाञ्छनाञ्चितकरः शोणाब्जनालाकृतिः
कौसल्यार्पितमङ्गलप्रतिसरो वत्सस्य दोःकन्दलः।
किञ्चिच्चञ्चति तावदेव हि दलच्चण्डीशचापोच्छल-
च्छब्दैकार्णवमग्नमेतदखिलं जातं त्रिलोकीतलम् ॥४९॥

जनकः—तदलं कालातिपातेन, याच्यतामनुमतिर्भगवतो विश्वामित्रस्य जानकीरामभद्रयोः पाणिसङ्घट्टनाय।

तरङ्गितः=साहङ्कारः ध्वनिः=शब्दो नाभूत्, । तु=परन्तु दीर्यतो=भज्यमानस्य धनुषः=चापस्य तारतरलः=उच्चो व्यापकश्च टङ्कारः जगत्=भूमण्डलं शब्दाद्वितीयं=केवलशब्दमयं चकार=विदधौ । अत्र शब्दाद्वितीयमित्युक्त्या जगति जातस्य कोलाहलस्य सकलज्ञानज्ञेयान्तरराहित्यमाह, तेन च कोलाहलातिशयो व्यज्यते। तदेव वृत्तमत्रापि । कार्यहेत्वोः पौर्वापर्यविपर्ययमूलातिशयोक्तिरलङ्कारः ॥४८॥

अतिभूमिं=शिवधनुरुत्थापनमात्रसाध्ये कार्ये तद्भङ्गप्रवृत्तिरधिकायते सैवात्रातिभूमिः।

यावत्कन्दुकेति—यावत् कन्दुकलाञ्छनाञ्चितकरः=बालोचितकन्दुकक्रीडासमुद्भूततच्चिह्नाङ्कितबाहुपुरोभागः, शोणं यदब्जनालं=कमलदण्डस्तत्सदृशः, कौशल्यया=रामजनन्या अर्पितः=बद्धः मङ्गलप्रतिसरः=रक्षार्थसूत्रादिर्यत्र तथाभूतः वत्सस्य=रामस्य दोःकन्दलः=बाहुदण्डः किञ्चित्=ईषत् चञ्चति=चलति तावदेव तावतैवाल्पीयसा समयेन दलतः=भज्यमानस्य चण्डीशचापस्य=शिवधनुषः उच्छलन्=उद्भवन् शब्द एव एकार्णवः=महासमुद्रस्तत्र मग्नमेतत् अखिलं=समस्तं त्रिलोकीतलम् जातम्। यावता कालेन करः किञ्चिच्चलति तावतैव कालेन हरधनुर्भङ्गभवो रवो भुवनत्रयं व्यापदतो धनुर्भञ्जनाद्रामं वारयितुं नेहम-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

शतानन्दः—[१]सम्यक्सङ्घट्टमानेन धनुषैव पिनाकिनः ।
ननु सङ्घट्टितौ पाणी जानकी-रामभद्रयोः ॥५०॥

तदूर्मिला-लक्ष्मणयोरेव पाणिसङ्घट्टनाय भगवानभ्यर्थनीयः ।

विश्वामित्रः—अस्त्वेतत्, परन्तु,

पाणीञ्जनककन्यानां पीडयद्भिः सहानुजैः ।
सीताया रामभद्रो मे पाणिपीडनमिच्छति ॥५१॥

जनकः—(सहर्षम्) कथं माण्डवी-श्रुतकीर्त्तिभ्यां भरत-शत्रुघ्नयोरपि परिण-मनुसन्धत्ते भगवान्?

विश्वामित्रः—अथ किम्?

वसरं नालभे नातो वाच्यतावकाश इति शतानन्दोक्तेराशयः । कन्दुकेत्यादि कौसल्यार्पितेत्यादिना च रामस्य बाल्यम्, यावत्तावत्पदाभ्यां करचलनधनु-ङ्गयोः समकालत्वं च व्यज्यते । "हस्तसूत्रे प्रतिसरोऽस्त्रियाम्" इत्यमरः । पूर्वानुवृत्तम् ॥४९॥

सम्यगिति—सम्यक्=साधु सङ्घट्टमानेन=आनम्यमानेन पिनाकि=शिवस्य धनुषा=चापेनैव जानकी-रामभद्रयोः पाणी=हस्तौ सङ्घट्टितौ=पर मेलितौ । जनकप्रतिज्ञापूर्त्तिरेव सीतापरिणयसम्पूर्त्तिरतस्तदर्थया चिन्तया-मिति भावः ॥५०॥

पाणीन् इति—जनककन्यानाम्=ऊर्मिलादीनां तिसृणाम् पाणीन् पीडय-स्ताभिः सह विवाहं कुर्वद्भिः अनुजैः=भरतादिभिस्त्रिभिः सह मे रामभद्रः सीता पाणिपीडनं=परिग्रहणमिच्छति । एतेन भ्रातृवत्सलतोक्ता ॥५१॥

अनुसन्धत्ते=अभिप्रैति ।

१ एकत्र हस्तलिखितपुस्तके—'सद्यो विघट्टमानेने'ति पाठः, स चार्थतो मनो-तत्र विघट्टमानेन 'सङ्घट्टितौ' इत्यापातपातिविरोधाभासः । विघट्टमानेन=भज्य-'सङ्घट्टितौ=मेलितौ' इति तत्रार्थः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

जनकः—तद्गृहीतमिदमधिशेखरमाज्ञाकुसुमं भगवतः। तदागच्छत। समीहितं निष्पादयामः।

(इति निष्क्रान्ताः सर्वे।)

इति तृतीयोऽङ्कः।

—०*०—

चतुर्थोऽङ्कः।

(नेपथ्ये ध्रुवा गीयते)

मणिमयमङ्गलदीवो जणअनरेन्दस्स मण्डवे जलइ।
चण्डाणिलो वि पत्तो जस्सिं विफलाअमो होइ ॥१॥

[मणिमयमङ्गलदीपो जनकनरेन्द्रस्य मण्डपे ज्वलति।
चण्डानिलोऽपि प्राप्तो यस्मिन् विफलागमो भवति ॥१॥]

(पुनर्नेपथ्ये)

अधिशेखरम्=शिरसि,आज्ञाकुसुमं=निदेशपुष्पम्।

इति श्रीरामचन्द्रमिश्रविरचिते प्रसन्नराघव'प्रकाशे'

तृतीयाङ्क-प्रकाशः।

———

ध्रुवा, ध्रुवागीतेर्लक्षणं यथा—'प्रथयति पात्रविशेषान् सामाजिकजनमनांसि [र]ञ्जयति। अनुसन्दधाति च रसान् नाट्यविधाने ध्रुवा गीतिः' इति राजशेखरः। मणिमयेति—मणिमयः=मणिकल्पितो मङ्गलदीपः=मङ्गलार्थः प्रदीपो [जन]कनरेन्द्रस्य=राज्ञो जनकस्य मण्डपे=भवने ज्वलति=दीप्यते। यस्मिन्=(मणि[प्र]दीपे) प्राप्तः=निर्वापणाय समागतः चण्डानिलः=प्रबलवेगो वायुरपि [वि]फलागमः=निरर्थकागमनः (मणिप्रदीपस्य शमयितुमशक्यतयोद्देश्यासिद्धेः) [भ]वति। अत्र ध्रुवायां मणिमयदीपत्वेन रामः, चण्डानिलतया कोपनः परशुरामः, [वि]फलागमपदेन तदागमेऽपि रामस्य निरपायता, इत्याद्यर्थाः सूचिताः। आर्या-[भे]दो वृत्तम्। अतिशयोक्तिर्दीपांशेऽलङ्कारः ॥१॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अरे क्षत्रियाः, अपसरत लोचनपथात् । नन्वयम्—

कुर्वन् कोपादुदञ्चद्रविकिरणसटापाटलैर्दृष्टिपातै-
रद्यापि क्षत्रकण्ठच्युतरुधिरसरित्सिक्तधारं कुठारम् ।
तीव्रैर्निःश्वासपातैः पुनरपि भुवनोत्पातमासूचयद्भि-
र्गर्जन्मौर्वीकचापस्त्रिभुवनविजयी जामदग्न्यः समेति ॥२॥

(ततः प्रविशति जामदग्न्यः)

जामदग्न्यः—(साटोपं परिक्रम्य) अहो धृष्टता जनकस्य ! यदयं हरध-
पारोपणेन कन्यादानं प्रतिजानीते । (परशुं विलोक्य)

सकलनृपकठोरकण्ठपीठीबहलगलद्रुधिरौघधौतधारः ।
तदिदमजनकं जगद्विधत्ते परशुरयं जमदग्निनन्दनस्य ॥३॥

कुर्वन्निति—कोपात्=क्रोधात् उदञ्चन्तः=प्रकटीभवन्तो रविकिरणाः=
करा एव सटा=जटा (सहभावात्तथोक्तिः) तद्वत् पाटलैः=रक्तैः दृष्टिपातैः=
निक्षेपैः अद्यापि कुठारं=परशुं क्षत्रनिधनवृत्तान्तस्य पुराणतायां जातायाम
क्षत्रकण्ठेभ्यः=राजन्यकगलविवरेभ्यः च्युता=निर्गता रुधिरसरित्=शोणित
तया सिक्तधारं=प्लाविततीक्ष्णाग्रभागं कुर्वन् (चिरनिर्वृत्तेपि क्षत्रियक्षये र
नयननिरीक्षणैर्नयनरागेण रञ्जितस्य कुठारस्य क्षत्रियरुधिरसिक्ततामापा
प्रत्याययन्तं परशुरामं कविरभिप्रैति) तीव्रैः=उग्रैः पुनरपि भुवनोत्पातं=सं
पद्रवमासूचयद्भिः=इङ्गयद्भिः निःश्वासपातैः=श्वासनिर्गमैरुपलक्षित इति
गर्जन्ती=आकर्षणास्फालनादिना शब्दायमाना मौर्वी=ज्या यस्य तादृशः
=धनुर्यस्य तथाभूतस्त्रिभुवनविजयी=त्रिलोकीपराजयनपटुः जामदग्न्यः=जमद
ऋषेः पुमपत्यं परशुरामः समेति=आगच्छति (अतो लोचनपथादपसर
पूर्वोक्तेन सम्बन्धः करणीयः । अत्र रविकिरणेषूदञ्चत् इति विशेषणेन र
समेतीत्यत्र समुपसर्गेण समीपागमनं तेन च पलायनस्योपयुक्तत्वं व्यज्य
स्रग्धरावृत्तम् । 'श्वेतरक्तस्तु पाटलः' 'मौर्वी ज्या शिञ्जिनी गुणः' इत्य
त्राप्यमरः ॥२॥

सकलेति— सकलानां=सर्वेषां नृपाणां=क्षत्रियाणां कठोराः=कठिनाः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

(विमृश्य)

उदितोऽर्जुनभुजविपिने ज्वलितस्तुङ्गेषु नृपतिवंशेषु ।
निमिकुलकमलकलापं कोपानल किं पुनः स्पृशसि ॥४॥

(पुनर्विचिन्त्य) अलमस्मिन्नुपेक्षया । मनोरथोपनीतजामातृभुजबलावलेपदुर्ललितः खल्वयम् । तथाहि—सन्दिष्टमनेनास्मत्परशोः—(त्वं मित्रम् ३।२९ पुनः पठति) अहो अस्य दुरवलेपः ।

पीठ्यो=गलप्रदेशास्ताभ्यो बहलं=प्रचुरं वहतः=स्यन्दमानस्य रुधिरस्य=शोणितस्य ओघः=प्रवाहस्तेन धौता=क्षालिता धारा=तीव्रतमो भागो यस्य तथाभूतः, (निखिलराजन्यककण्ठकर्त्तनयशस्वीति भावः) जमदग्निनन्दनस्य=मम परशुरामस्य अयं (विश्वविख्यातः) परशुः तदिदं=(यत्रैवंविधो ममापि गुरोर्धनुर्भङ्गरूपस्तिरस्कारः सम्भवति स्म) जगत् अजनकं=जनकाख्यराजशून्यम् विधत्ते=कुरुते । जनकमितो जगतः पृथक्करोतीति भावः । अत्र जगदजनकं करोतीतिप्रयोगे ऽजनकत्वरूपविशेषणांशे एव विधेयता बोध्या, देवदत्तं शिखिनं करोतीत्यत्र यथा शिखित्वांशमात्रे । विधत्ते इत्यत्र च वर्त्तमानसामीप्ये लड् बोध्यः ॥ पुष्पिताग्रावृत्तम् ॥३॥

उदित इति—अर्जुनस्य=कार्त्तवीर्यस्य भुजविपिने=बाहुवने उदितः=प्रथमप्रकटितः, तुङ्गेषु=उच्चेषु दृप्तेषु वा नृपतीनां=राज्ञां वंशेषु=कुलेषु नृपतय एव वंशास्त्वक्सारतरवस्तेषु इति वार्थः । ज्वलितः=प्रज्वलितः समृद्ध इति भावः । (एतादृश, मम) कोपानल,=क्रोधवह्ने, पुनः निमेः=जनकपूर्वपुरुषस्य कुलं=वंश एव कमलं तस्य कलापः=समुदायस्तं किं स्पृशसि=(दग्धुं) श्रयसि ? नेदं तवोचितमिति भावः । अन्योऽपि वह्निर्वृक्षशाखासङ्घट्टतो वने जन्यते तुङ्गान् वंशांश्च दहति । योऽर्जुनमवधीत्, एकविंशतिवारांश्च भुवं निःक्षत्रियां चक्रे तस्य मम कोपानलस्य कमलशीतलनिमिवंशजिघांसा नोपपद्यत इति सारांशः । साङ्गपरम्परितरूपकमलङ्कारः । कार्त्तवीर्यार्जुनस्य सहस्रबाहुतया तद्बाहूनां वनत्वारोपः । वृत्तमार्याप्रभेद एव ॥४॥

उपेक्षया=अनास्थया (अयं न हन्तव्य इत्यात्मिकया दयाप्रवृत्त्या) मनो-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

यस्योद्यद्घोरधाराञ्चलदलितगलद्बाहुशाखासहस्र-
प्रोद्गच्छद्रक्तधारानिवहजितनवोन्मीलदर्कांशुजालः ।
क्ष्मापालः कार्त्तवीर्यः सुरपुरसुदृशां पुष्पिताशोकशाखि-
भ्रान्तिं दत्त्वापि चित्रो निजपुरसुदृशां शोकशाखी बभूव ॥५

अपि च—

येनाबध्यत नर्मदाम्बुनिवहः संख्ये च लङ्केश्वर-
स्तद्यस्मिन्निरमज्जदर्जुनभुजक्षोणीरुहां मण्डलम् ।

रथोपनीतस्य=मनसा वृतस्य जामातुः । भुजबलावलेपः=बाहुपराक्रमग... दुर्ललितः=प्ररूढालीकाभिमानः ।

यस्योद्यदिति—यस्य (परशोः) उद्यत्=प्रकाशमानं धाराञ्चलं=... प्रान्तस्तेन दलिताः=कृत्ताः (अत एव) गलन्तः=पतन्तो बाहव एव... सहस्रं तेभ्यः प्रोद्गच्छन्त्याः=प्रवहन्त्याः रक्तधारायाः निवहः=समूहः तेन... नवोन्मीलतः=अचिरोदयमानस्यार्कस्य अंशूनां=किरणानां जालं येन त... (यः परशुः स्वधारेण कृत्तबाहुसहस्रस्य अर्जुनस्य बाहुभ्यश्च्यवमानेन शो... प्रवाहेणाचिरोदितसूर्यमरीचिनिचयमतुलयदिति पूर्वार्द्धतात्पर्यम्) (पू... विशेषणः) क्ष्मापालः=राजा कार्त्तवीर्यः सुरपुरसुदृशां=सुराङ्गनानां चित्ते=... पुष्पितस्य=प्रफुल्लस्याऽशोकशाखिनः=रक्तपत्रपुष्पस्य स्वनामप्रसिद्धवृक्षस्य भ्र... =संशयं दत्त्वा=उत्पाद्य अपि निजपुरसुदृशां=स्वग्रामवनितानां शोकशाखी=... तरुः (क्लेशप्रदः) बभूव । यः अशोकशाखी भवति कासाञ्चित् कृते स ए... रासां कृते शोकशाखीत्यापाततो विरोधावभासः । बाहुसहस्रवत्तया ... शोणिताप्लावितया च पुष्पितत्वं कल्पितम् । शार्दूलविक्रीडितं वृत्तम् ॥५

येनाबध्यतेति—येन=कार्त्तवीर्यार्जुनबाहुमण्डलेन नर्मदाम्बुनिवहः=ते... रिप्रवाहः अबध्यत=न्यरुध्यत संख्ये=युद्धे च लङ्केश्वरः=रावणः अबध्यत=बद्ध... अर्जुनस्य=हैहयराजस्य भुजाः=बाहवः एव क्षोणीरुहाः=वृक्षास्तेषां मण्डलं... यस्मिन् (परशौ) निरमज्जत्=अब्रुडत् । लयं गत इति भावः । ... =राजन्यकाङ्गनानां नयनाम्बुपूरः=अश्रुप्रवाहस्तन्निमिषतः=तच्छलेन ...

RajGuru Math, Shivala, Varanasi Collection: Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

क्षत्रस्त्रीनयनाम्बुपूरमिषतः खेलन्ति यत्केलय-
स्तत्तादृक्परशुर्ममायमधुना धाराजलं मुञ्चति ॥६॥

(विलोक्य) कथमयं शतानन्दशिष्यस्ताण्ड्यायनः ।

(प्रविश्य)

ताण्ड्यायनः—भगवन्, अभिवादये ।

जामदग्न्यः—आयुष्मान् भूयाः । कथय तावत् । अपि नाम भवदुपाध्याययजमानस्य निवृत्ता हरचापारोपणश्रद्धा ? ।

ताण्ड्यायनः—निवृत्ता ।

जामदग्न्यः—(सहर्षम्) निवृत्ता ।

ताण्ड्यायनः—भगवन्, निवृत्ता सहैव चापेन ।

जामदग्न्यः—(ससंभ्रमम्) किमात्थ, सहैव चापेन निवृत्तेति ।

ताण्ड्यायनः—अथ किम् ।

जामदग्न्यः—स्फुटं कथय तावत् किं वृत्तमिति ?

ताण्ड्यायनः—कस्यचिद्—

अखण्डचण्डिमोद्दण्डभुजदण्डनिपीडितम् ।
भगवन्, भृगुमार्त्तण्ड, भग्नं भर्गशरासनम् ॥७॥

=यस्य यशांसि खेलन्ति=क्रीडन्ति, तत्तादृक्=नर्मदाप्रवाहं रावणं च नियन्त्रितवतोऽर्जुनभुजभारस्य समापकः, क्षत्रियक्षययशस्वी च ममायं परशुः, धारा एव जलं तत् अधुना मुञ्चति=विसृजति (प्रहरतीति तात्पर्यम्)। एकदा कार्त्तवीर्यः स्वबाहुसहस्रेण नर्मदाप्रवाहमबध्नात्तत एव सा सहस्रधारा सञ्जातेति पौराणिकं वृत्तम् । अत एव च तां कालिदासोऽवर्णयत्—"उपलविषमे विन्ध्यपादे विशीर्णां, भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य" । स्रग्धरावृत्तम् ॥६॥

निवृत्ता=समाप्ता, (पूर्णेति ताण्ड्यायनाशयः)

निवृत्ता=उपसंहृता (स्वयं त्यक्तेति परशुरामेण ज्ञातमत एव हर्षावकाशः)

सहैवेति–चापोपि निवृत्तः=समाप्तः । श्रद्धापि, निवृत्ता=पूर्णा ।

अखण्डेति—अखण्डः=अप्रतिहतः यश्चण्डिमा=उग्रभावस्तेन उद्दण्डः=दुर्दमो

Raj Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

जामदग्न्यः—(सक्रोधम्) कस्य ?

ताण्ड्यायनः—

सुबाहुमारीचपुरस्सरा अमी
निशाचराः कौशिकयज्ञघातिनः ।
वशे स्थिता यस्य

जामदग्न्यः—अलम्, अतः परं ज्ञातः खलु खलानामग्रणी निशा ग्रामणीः ।

ताण्ड्यायनः—(स्वगतम्) कथं दशकण्ठेन धनुर्भग्नमिति प्रतीतं भगव भवतु तावत् ।

जामदग्न्यः—(सक्रोधम्) अयमिदानीम् ।

नृपशतसुकुमारकण्ठनालीकदनकलाकुशलः परश्वधो मे ।
दशवदनकठोरकण्ठपीठीकदनविनोदविदग्धतां दधातु ॥९॥

यो भुजदण्डः=बाहुयष्टिः तेन निपीडितम्=खण्डितम्, भर्गस्य=शिवस्य सनम्=धनुः, भगवन् भृगुमार्तण्ड=भृगुवंशप्रकाशक, (द्वयमपि जामद सम्बोधनम्) भग्नम्=त्रुटितम् । केन खण्डितमिति तु भयादिह नोक्तम् ॥

सुबाहुमारीचेति—यस्य (जामदग्न्यबुद्धौ रावणस्य, विवक्षा रामचन्द्रस्य) वशे=(अधीनतायां प्रजात्वेनेति रावणपक्षे, रामपक्षे च नियन्त्रणे) अमी कौशिकयज्ञस्य=विश्वामित्रमखस्य घातिनः=विनाशकाः नि (एतावत्युच्यमान एव परशुरामो रावणं धनुर्भञ्जकं निरचैषीत्) ॥

खलानाम्=दुष्टानाम् अग्रणीः=अग्रगण्यः (मुख्यः)

निशाचरग्रामणीः=राक्षसराजः ।

नृपशतेति—नृपाणां=राज्ञां शतानि=समूहास्तेषां सुकुमाराः=को कण्ठाः एव नाल्यः=प्रणाल्यः (सारल्याद्रक्तधारावाहित्वाच्चेत्थमुक्तिः) त कदने=खण्डने या कला=प्रवीणता तस्यां कुशलो=दक्षो मे परश्वधः, द नस्य=रावणस्य कठोरा कण्ठपीठी=गलप्रदेशस्तस्य कदनं=कृन्तनमेव वि =क्रीडा तत्र विदग्धतां=चातुर्यं दधातु=आश्रयतु । नृपाणां कोमलं कण्ठ

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

(विमृश्य) अथवा—

य: कर्त्तार्जुनभूरुहाद्भुतभुजाशाखासहस्रच्छिदां
दम्भोलेर्गिरिकूटपाटनपटोः शौण्डीर्यतो लज्जते ।
तस्यैतस्य परेतराजसदनद्वारः कुठारस्य मे
का श्लाघा दशकण्ठकण्ठकदलीकाण्डावलीखण्डने ? ॥१०॥

(पुनर्विचिन्त्य) तथाप्यनुचितमुदासितुमेतस्मिन् कृतागसि रक्षसि । तदिदानीं

छत्वा (कृताभ्यासः) मम परशुः सम्प्रति कठिनं दशकण्ठकण्ठं कृन्तत्विति भावः । कोमले हि कृताभ्यासः कठिनेऽपि सिध्यति । "तृणे तृणेढ़ि ज्वलनः खलु ज्वलन्, क्रमात्करीषद्रुमकाण्डमण्डलम्" । पुष्पिताग्राच्छन्दः ॥९॥

यः कर्त्तेति—यः (मम) कुठारः अर्जुनः=कार्त्तवीर्यार्जुन एव भूरुहो वृक्षस्तस्याद्भुताः=आश्चर्यकरा भुजाः=बाहव एव शाखासहस्रम्=सहस्रसङ्ख्या-मिता विटपास्तस्य च्छिदां=भेदनं कर्त्ता=विधाता, तृन्नन्तमिदमतः कर्मणि षष्ठी न । गिरिकूटानि=पर्वतनिचयास्तेषां पाटनं=भेदनं तत्र पटोः=दक्षस्य दम्भोलेः वज्रस्य शौण्डीर्यतः=पराक्रमजन्याहङ्कारात् लज्जते=त्रपते । (हीनं दृष्ट्वोत्तमस्य त्रपा नास्वाभाविकी) तस्य एतस्य=तद्गुणकस्यात्र स्थितस्योद्यतस्य च, परेतराजः यमः तस्य सदनस्य=गृहस्य द्वारः=द्वारभूतस्य मे कुठारस्य दशकण्ठस्य=रावणस्य कण्ठा एव कदलीकाण्डानि=कदलीस्तम्भाः तेषामावली=माला तस्याः खण्डने का किंस्वरूपा श्लाघा=प्रशंसा ? न कापीति भावः । येन कुठारेण कार्त्तवीर्यस्य सहस्रं बाहवश्छिन्ना, यश्च पर्वतभेदिनं वज्रं साहङ्कारं दृष्ट्वा 'किमनेन कृतं यदेवं विकत्थते' इति मनसि कृत्य त्रपते, यश्च यमपुरप्रवेशे द्वारभूतः, स यदि कदली-काण्डोपमान् दशकण्ठकण्ठान् कृन्तति, कियदिदमधिकं तस्येति भावः । "दम्भो-लिरशनिर्द्वयोः" इति कोशः । शार्दूलविक्रीडितं वृत्तम् । शुण्डा गर्वः सोऽस्या-स्तीति विग्रहे ईरन् प्रत्ययस्ततः स्वार्थेऽण्, (तस्य भावः) इति शौण्डीरपदे वाचस्पत्यम् ॥१०॥

तथापि=यद्यपि किमपि यशो नास्ति तथापि । कृतागसि=विहितापराधे ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

दक्षिणस्याम्बुधे मध्ये कृत्वा कोङ्कणमष्टमम् ।
मद्बाणजन्मा दहनो लङ्कातङ्काय जायताम् ॥११॥

(इति साटोपं परिक्रामति)

ताण्ड्यायनः—(स्वगतम्) दिष्ट्या स्वस्ति क्षत्रियकुलाय ।

(नेपथ्ये)

अहो नियोगिनः, कृतविवाहमङ्गलयोः सीतारामचन्द्रयोः स्वस्तिवाच द्विजा आहूयन्ताम् ।

जामदग्न्यः—(परिवृत्य, सक्रोधम्) आः ब्रह्मबन्धो, कथमलीक क्षीर्तिदानेन प्रतारितोऽस्मि । नन्वयमन्यः कोपि जनकजामाता ।

ताण्ड्यायनः—भगवन्, मम को वापराधः ? (अर्धोक्त एव) भ्रान्तं, मयापि संभ्रान्तम् ।

जामदग्न्यः—तन्निश्शेषं तावत् कथय ।

दक्षिणस्येति—दक्षिणस्य=तद्दिगवस्थितस्य समुद्रस्य मध्ये=अन्तः कोङ्कणं=देशभेदं कृत्वा=निर्माय मद्बाणजन्मा=मदीयशरसमुद्भवः दहनो= लङ्काया आतङ्काय=भयाय जायताम्=भवतु । नवीनं देशं समुद्रशोषणेन लङ्कां भीषयतु मम बाणेभ्य उद्गतो हुताशन इत्यर्थः । कोङ्कणः=देशभेदो, हरिवंशे—कुन्तलांश्च तथा बङ्गान् शाल्वान् कोङ्कणकांस्तथा । (१४शेऽध्या अत्रेदमुन्नेयम्, पुराकाले प्रकुपितो जामदग्न्यो जलधौ बाणान् चिक्षेप । शुष्यतः समुद्रान्निर्गतया भुवा (सप्तसु स्थानेषु) सप्तकोङ्कणा निर्मि इदानीमिममष्टममाशंसति । अत्रार्थेऽस्यैवाङ्कस्य १४शश्लोके निवेशितः 'प्र क्षितिखण्डदण्डनविधिक्रीडाविधोऽम्बुधि'रिति पादः प्रत्यायकः । समुद्रं भूखण्डं परशुरामः पुरा दण्डितवान् इति तदर्थः । इति । कश्यपाय भुवं स्वनिवासाय तेनाब्धिरशोषि । इति पौराणिकी कथा ॥११॥

स्वस्ति=कल्याणम् । रावणं प्रति क्रोधप्रकटनात् तथाशोदयः ।

ब्रह्मबन्धो=मिथ्याब्राह्मण, नीचतया तात्पर्यम् ।

भ्रान्तम्=अन्यथा ज्ञातम्, मया संभ्रान्तम्=भयेन मयान पुनः किञ्चि इति मम संभ्रमः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

ताण्ड्यायनः— शराग्रवर्तिनः

प्रतापलेशस्य गताः पराभवम् ॥८॥

(तथैव अखण्डचण्डिमा ४।७ पुनः पठति)

जामदग्न्यः—कः पुनरयं मारीचदमनः ?

ताण्ड्यायनः—ये ऋष्यशृङ्गचरुभागभुवः कुमाराः
संजज्ञिरे दशरथस्य वधूजनेन ।
तेषामयं निरुपमः प्रथमः कुमारो
रामाभिधः कुशिकराजतनूजशिष्यः ॥१२॥

जामदग्न्यः—(क्षणं विभाव्य, सामर्षम्)

दुर्धर्षाः सुरसिद्धकिन्नरनरैस्त्यक्तक्रमं वक्रता

शराग्रवर्त्तिन—इति (इदमीयोऽवशिष्टांशः प्रागुक्तो व्याख्यातश्च) शरस्य=बाणस्याग्रे=पुरः वर्त्तते तथा तस्य प्रतापलेशस्य=पराक्रमलवस्य (वशे स्थिता इति प्रागुक्तं सम्बन्धनीयम्) पराभवं नाशं गताः । वंशस्थं वृत्तम् ॥८॥

ये ऋष्यशृङ्गेति—ऋष्यशृङ्गस्य=तदाख्यमुनेः चरोः=हव्यपाकस्य भागों-ऽशः ततो भूरुत्पत्तिर्येषां ते तथोक्ताः ये कुमाराः=पुत्राः दशरथस्य बधूजनेन=स्त्री-समुदयेन संजज्ञिरे=अजन्यन्त, तेषां=तत्तनयानां प्रथमः=श्रेष्ठः निरुपमः=अतुल-नीयः कुशिकराजो=गाधिस्तस्य तनूजो=विश्वामित्रस्तस्य शिष्यः=अनुशासनीयः (विद्यार्थी) 'रामः' इत्यभिधा=नाम यस्य तथाभूतः अयम्=पुरो दृश्यमानः कुमारः=बालः । अस्तीति शेषः । दशरथस्यापुत्रस्य पुत्रोत्पत्तये ऋष्यशृङ्गप्रधाना ऋषयः पुत्रीयाम् इष्टिमन्वतिष्ठँ, स्तदवशिष्टं चरुभागं च दशरथराज्ञ्यो विभज्या-भुञ्जत, तत्प्रसादेन ता गर्भं दधिरे ततश्च ताभिश्चत्वारस्तनया असाविषतेति कथा प्रसिद्धैव । 'हव्यपाके चरुः पुमान्' इत्यमरः । 'संजज्ञिरे' इत्यत्र जनेरन्तर्भावि-तण्यर्थता कल्पनीया ॥१२॥

दुर्धर्षा इति—सुराः=देवाः सिद्धाः=देवयोनिविशेषाः किन्नराः=तथाभूता एव नरैः दुर्धर्षाः=अनास्कन्दनीयाः (अशक्याभिभवा इत्यर्थाः) यत्र=शिवचापे विधा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

प्राप्ते यत्र विधातरीव तरसा तिस्रोपि दग्धाः पुरः ।
तद्भग्नं यदि राघवेण शिशुना चण्डीपतेः कार्मुकं

ताण्ड्यायनः—(स्वगतम्) किमधुना वक्ष्यति ?

जामदग्न्यः—तन्मग्नं कुलमेव तर्कय रघोर्मच्छस्त्रधाराम्भसि ॥१३॥

ताण्ड्यायनः—संरब्धोऽयं भगवान् । तमिमं वृत्तान्तमुपाध्यायस्य कथया

(इति निष्क्रान्तः)

जामदग्न्यः—(विलोक्य) अभिनवविवाहमङ्गलतया तर्कयामि स एष सानुज इति (सहर्षम्, निर्वर्ण्य) अर्धमुग्धः खल्वयं जनो यदेनं काम वक्तव्ये राम इति जल्पति । (पुनर्निर्वर्ण्य)

सौन्दर्यं मदनादपि प्रथयति प्रौढिप्रकर्षं, पुरां
भेत्तारं मदनारिमप्यधरयत्युद्दामदोःक्रीडितम् ।

तरि=ब्रह्मणि (दैवे) इव वक्रतां=कुटिलतां प्राप्ते (नते) (चण्डीशकार्मुकस्य वक्रीभावो भुवनत्रयस्य भाग्यविपर्ययादनतिरिक्तरूपः, तथा सति तन्नाशस्य नि भावात्) तिस्रः अपि पुरः=भुवनानि दग्धाः=अदह्यन्त । तत्=त्रिभुवनदा ण्डं चण्डीपतेः=चण्डीशस्य कार्मुकं यदि शिशुना=बालेन राघवेण भग्नं= तत्=तदा रघोः कुलं=रघुवंश एव मच्छस्त्रस्य=मदीयायुधस्य धारा एवाम्भो= तत्र मग्नं=त्रुडितं तर्कय=भावय । शिवधनुर्भञ्जनापराधोऽयं रघुवंशस्य ध्वं भविष्यतीति तदाशयः। शार्दूलविक्रीडितं वृत्तम्। "यक्ष-गन्धर्व किन्नराः, पि गुह्यकः सिद्धो भूतोमी देवयोनयः" इत्यमरः ॥१३॥

संरब्धः=कुपितः ।

अर्धमुग्धः=अर्धमूढः, अंशतोऽविवेकीत्यर्थः ।

सौन्दर्यम् इति—सौन्दर्यं=मनोज्ञाकारता मदनात्=कामदेवादपि प्रौ प्रकर्षं=रामणीयकातिशयं प्रथयति=प्रकटयति, उद्दाम=उग्रं दोष्णोः=बाह्वोः क्री =विलासः (पराक्रमः) पुरां=त्रयाणां भुवनानां भेत्तारं=दाहकम् मदनारि महेशम् अपि अधरयति=नीचतां नयति । मुग्धत्वं=सुकुमारताजन्याऽभिरा मदनारेः=शिवस्य मौलेः=शिरसः (तदलङ्कारभूतः) शशी=चन्द्रमास्तद

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

मुग्धत्वं मदनारिमौलिशशिनोऽप्युत्कर्षमालम्बते
मूर्त्तैस्तत् किमसौ रसैर्विरचितः शृङ्गारवीराद्भुतैः ॥१४॥

(ततः प्रविशतो राम-लक्ष्मणौ)

लक्ष्मणः—(स-कौतुकम्)

मौर्वीं धनुस्तनुरियं च बिभर्त्ति मौञ्जीं
बाणाः कुशाश्च विलसन्ति करे सितायाः ।
धारोज्ज्वलः परशुरेष कमण्डलुश्च
तद्वीर-शान्तरसयोः किमयं विकारः ? ॥१५॥

शिवचूड़ामणीभूतबालेन्दोरपीत्यर्थः) उत्कर्षम्=अतिशयितां सुकुमारतायां विषम् आलम्बते=भजते तत्=एवंस्थितौ (किं पदं जिज्ञासायां वितर्के वा) असौ=रामः मूर्त्तैः=शरीरधारिभिः शृङ्गारवीराद्भुतैः=तत्तदाख्यैः रसैर्विरचितः=निर्मितः (अन्यथाभावे नेदृग्गुणसमन्वयस्य सम्भव इति भावः)। कामाधिकरूपवत्तया शृङ्गारस्य, शिवाधिकपौरुषशालितया च वीरस्य, बालचन्द्रापेक्षया चाधिकसौकुमार्ययोगेनाद्भुतस्य रसस्य साकारतासहकृतासहायताऽस्य सम्भाव्यते परशुरामेणेति बोध्यम् ॥ व्यतिरेकोऽलङ्कारः। शार्दूलविक्रीडितं छन्दः ॥१४॥

मौर्वीमिति—धनुः=चापः मौर्वीं=प्रत्यञ्चां बिभर्त्ति, (धनुःसमारोपितगुणं वर्त्तते) इयं तनुः=शरीरं च मौञ्जीं=मुञ्जनिर्मितां मेखलां (बिभर्त्ति) बाणाः=शराः कुशाः=दर्भाश्च करे=बाहौ विलसन्ति=विराजन्ते। सितं=स्वच्छमयो देहं यस्य तथाभूतः, धारायाम्=धारभागावच्छेदेन उज्ज्वलः=प्रकाशशीलः परशुः=कुठारः (एकतः) कमण्डलुः=जलपात्रं च (अपरतः) विराजते इति प्रयोजनीयम्, तत्=(वीरोचितसज्यशरासनबाणकुठारवत्त्व-शान्तजनोचितमौञ्जीकुशकमण्डलुयुक्तत्वाभ्यां शवलितः) अयं=पुरोवस्थितः किं—(शङ्कायां) वीरशान्तयोः=स्वनामख्यातयोः रसयोः विकारः=रूपान्तरम्। तावेव रसौ परस्परसम्भेदकाविमां भूमिकां प्राप्तौ किमिति लक्ष्मणस्याशयः ॥ 'धारोज्ज्वलः' इदं विशेषणं धारया=जलधारया उज्ज्वलः=प्रकाशमान इत्यर्थेन कमण्डलावपि सुयोज्यम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

आर्य, किं पुनरिदं ब्रह्मक्षत्रवर्णात्मकं चित्रमिव स्फुरति ?

रामः—वत्स, न विदितं ते, नन्वयं स भगवान् भार्गवः—

वेध्यं क्रौञ्चमहीधरस्य शिखरं देयं धरित्रीतलं
प्रत्यग्रक्षितिखण्डदण्डनविधिक्रीडाविधेयोऽम्बुधिः ।
जेयस्तारकसूदनो युधि करक्रीडाकुठारस्य च
च्छेद्यं यस्य बभूव हैहयपतेरुद्दामदोःकाननम् ॥१६॥

लक्ष्मणः—तर्हि विस्मयनीयशीलोऽयं भगवान् ।

क्वचित् पुस्तके सितायाः इत्यस्य स्थाने 'शिताग्र' इति पाठः । तस्य शितं ती... मग्रं=प्राग्भागो यस्येत्यर्थो बोध्यः । वसन्ततिलकेन निबद्धम् इदम् ॥१५॥

वेध्यम् इति—यस्य=(परशुरामस्य) क्रौञ्चमहीधरस्य=तदाख्यपर्व... शिखरं=शृङ्गं वेध्यम्=भेदनीयम्, (बभूवेत्यस्य सर्वत्राध्याहारः करणी... क्वचित् पुस्तके वेध्यमित्यस्य स्थाने भेद्यमित्येव पाठः । अर्थस्तूभयोरपि स... धरित्रीतलं=समग्रं भूमण्डलं देयम्=दातव्यम्, अम्बुधिः=समुद्रः प्रत्यग्रम्=... नम् यत् क्षितिखण्डं=भूभागस्तेन दण्डनम्=दण्डविधानं तेन (हेतौ तृतीया... विधेयः=नम्रः, प्राज्ञाधीन्य इत्यर्थः (पुरा कश्यपाय समग्रं भूमण्डलं दत्त... परशुरामेण स्ववासोपयोगिस्थानं लिप्समानेनाऽऽग्नेयास्त्रेण समुद्रस्य कि... भागः शोषितस्तेन तत्रत्या जले मग्ना भूर्बहिर्गता, अयमेव भूनिर्गमः समु... प्रत्यग्रक्षितिदण्डनत्वेन रूपेणात्र निबद्धः) युधि=युद्धे (अहं श्रेष्ठोऽहमिति... वादात्मके) तारकसूदनः=स्कन्दः जेयः=पराभवनीयः, हैहयपतेः=कार्त्तवीर्य... स्योद्दाम=गर्वोद्धतम् दोःकाननम्=बाहुसहस्रवनम् करक्रीडाकुठारस्य=बा... लासपरशोः छेद्यं=कर्त्तनीयं बभूव, सोयं भगवान् भार्गव इति पूर्व... सम्बन्धः ॥ "प्रत्यग्रं नूतनं नवम्" "काननं विपिनं वनम्" इति च को... अत्र 'धरित्रीतलम्' इत्यत्र तलपदं समग्रताम्, दण्डनपदं समुद्रस्य गत्य... भावकृतं पारतन्त्र्यं तेन च परशुरामस्य पराक्रमातिशयम्, क्रीडापदं कुठार... विशेषायासशाणितत्वं तेन च हैहयराजबाहूनां सुखच्छेद्यतां तेन च ... पराक्रमप्राचुर्यमित्याद्यर्थं व्यञ्जयति । शार्दूलविक्रीडितं वृत्तम् ॥१६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

रामः—विस्मयनीयशीलानां शिखामणिरिति वक्तव्यम्। अयं हि—

एकः स्वर्णमहीधरां क्षितिमिमां स्वर्णैकशृङ्गीं यथा
गामेकां प्रतिपाद्य कश्यपमुनौ न स्वात्मने श्लाघते।
किञ्च क्रौञ्चगिरिं गिरीशतनयस्याविद्धशक्तिक्षतं
विद्ध्वा बाणगणैरुदारहृदयो वैलक्ष्यमालम्बते ॥१७॥

(उभौ परिक्रामतः)

रामः—(अञ्जलिं बद्ध्वा) भगवन्, भृगुकुलशिरःशेखरशिखण्डक, एष [अ]नुजस्य मे परमोन्नतिरमणीयपरिणामः प्रणामः।

जामदग्न्यः—समरविजयी भूयाः।

एक इति—(अयं हि) एकः=सजातीयद्वितीयरहितः (अत्र साजात्यं [भू]प्रभूदानकर्तृत्वेपि श्लाघाऽगृध्नुत्वेन) इमां स्वर्णमहीधरां=सुवर्णखनि-[सम]न्वयुतां क्षितिं=पृथ्वीं स्वर्णैकशृङ्गीं=सुवर्णमण्डितैकविषाणां गां=धेनुं यथा=इव [कश्]यपमुनौ=तदाख्यतपस्विनि प्रतिपाद्य=समर्प्य आत्मने=स्वस्मै न श्लाघते [=प्र]शंसति। (सुवर्णपर्वतशालिनीं भुवं सुवर्णखचितशृङ्गीं गामिव ब्राह्मणाय [द]त्त्वापाय प्रतिपाद्य यो नाल्पमपि दृप्यति इत्यर्थः) किञ्च क्रौञ्चगिरिं गिरीश-[तन]यस्य=शिवस्य पुत्रःस्कन्दस्तस्य आविद्धा=कुण्ठिता या शक्ति=स्तदाख्यमस्त्रं तया [क्षतं=]व्रणितं (न तु भिन्नम्) बाणगणैः=शरसमुदयै र्भित्त्वा=विदार्य (अपि) [उदा]रहृदयः=महामनाः वैलक्ष्यम्=लज्जाम् आलम्बते=प्राप्नोति। स्कन्देन सहा-[धी]यानस्य शिवाद्धनुर्वेदं परशुरामस्य 'कः क्रौञ्चगिरिं निजास्त्रेण भिनत्ति' इति [परी]क्षा गुरुणा कृता, तत्र परशुरामो बाणेन तं विभेद, स्कन्दस्तु प्रथमं प्रवृत्तः [शक्]त्या तं गिरिं केवलमाहत्य निवृत्त इति कथा। अत्र स्कन्दशक्त्या य आघात-[रू]प उपकारः परशुरामकर्तृके क्रौञ्चगिरिभेदे विहितस्तावताप्यसौ स्वपराक्रमस्य [न्यू]नतामुत्प्रेक्ष्यमाणां मत्वा जिह्रेतीति परमं वीरत्वं तस्याभिहितम्। 'गौर्भूर्धे-[नु]' । शार्दूलविक्रीडितमेव वृत्तम् ॥ स्मर्यते चात्र मेघदूतस्य—'भृगुपतियशोवर्त्म [यत्] क्रौञ्चरन्ध्रम्' इति चरणम् ॥१७॥

शिखण्डकः=काकपक्षः (अलङ्कार इति भावः)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

रामः—भगवन्, भृगुकुलमौलिमाणिक्य, अनुगृहीतोऽस्मि ।

भार्गवः—(स्वगतम्)

(सकरुणम्) रामे चन्द्राभिरामे विनयवति शिशौ किं प्रकुप्याति
(विमृश्य सक्रोधम्) हुं चापं चन्द्रमौलेश्चपलमतिरसाविक्षुदण्डं व
(पुनः साकाशम्) बाला वैधव्यदीक्षां जनकनृपसुता नार्हतीयं मदस्त्रा
(पुनर्विचिन्त्य, सामर्षम्)
आः शान्तो मे कुठारः कथमयमधुना रेणुकाकण्ठशत्रुः ॥१

(प्रकाशम्) दाशरथे, इयमसौ मे त्वयि सदाचारानुसारिणी वाग्वृत्तिरे

रामः—(विहस्य) मनोवृत्तिस्तु कीदृशी ?

राम इति—(१) चन्द्राभिरामे=इन्दुसुन्दरे विनयवति=नम्रे शिशौ=
अतिमात्रं=प्रभुतं प्रकुप्य किम्—कोपो निन्दितः (कोपकारणानाम
दिति भावः)

(२) हुं, (इदं प्रागुक्तस्य विचारस्य परिवर्त्तकम्) असौ चपल
=चञ्चलप्रज्ञः चन्द्रमौलेः=शिवस्य चापं=धनुः इक्षुदण्डम् (इवेति पूरणी
बभञ्ज, शिवधनुषि कोपि तस्यादरो दया नाभूदिति तदीयाः सर्वेऽपि गुणा
उपेक्षणीया इति तदाशयः ।

(३) इयं बाला=अल्पवयाः जनकनृपसुता=सीता मदस्त्रात्=मद
वैधव्यदीक्षाम्=विधवात्वोपदेशं न अर्हति । जनकतनया मदस्त्रेण विधवा
तेति न युज्यत इति भावः ।

(४) आः (खेदं व्यञ्जयन् स्वस्य क्षमाऽक्षमतां व्यञ्जयति) रेणु
(परशुराममातुः) कण्ठस्य=गलनालस्य शत्रुः (खण्डकः) अयं मे कुठा
=केन कारणेन शान्तः=निवृत्तव्यापारः (अस्तीति शेषः) । रेणुकाकण्ठशत्रु
घात्यविवेकाभावो ध्वनितः । अत्र श्लोके दयाक्रोधविवेकोग्रतानां भा
क्रमशः शान्तिरुदयश्च । स्रग्धरावृत्तम् ॥१८॥

वाग्वृत्तिः=वचनव्यवहारः,
मनोवृत्तिः=हार्दिको भावः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

भार्गवः—चण्डीशकार्मुकविमर्दविबर्धमान—

दर्पावलेपसविशेषविकासभाजोः ।
बाह्वोस्तवाहमधुना मधुना समानै-
राराधयामि रुधिरैः कठिनं कुठारम् ॥१९॥

रामः—भगवन्, निग्रहानुग्रहयोः स्वाधीनोऽयं जनः; परं ते कोपबीजं ज्ञातुमिच्छामि ।

भार्गवः—अहो दर्पान्धता, यदात्मना कृतमस्माभिरुक्तमपि नावधारयति निजदुर्विनयम् । ननु रे—

येनापदिष्टमद्यापि पुरस्त्रीविरहव्रतम् ।
न भुग्नं तत्त्वया भग्नं जगद्गुरुशरासनम् ॥२०॥

चण्डीशकार्मुकेति—चण्डीशकार्मुकस्य=शिवचापस्य विमर्दः=भञ्जनम्, तेन विबर्द्धमानः=उपचीयमानः यो दर्पावलेपः=वीर्यमदः तेन सविशेषम्=अधिकं विकासं भजतस्तयोरीशानधनुर्भङ्गजन्यगर्वोच्छूनयोरिति यावत् । तव बाह्वोः =भुजयोः मधुना= क्षौद्रेण समानैः=तुल्यैः गाढ़ै रक्तैश्चेति भावः, रुधिरैः=शोणितैः अधुना=सम्प्रति अहम्=(यस्य गुरोर्धनुस्त्वयाऽवलिप्य भञ्जितं सः), कठिनं =दुर्ललितं घोरञ्च (निजं) कुठारं=परशुमाराधयामि=प्रसादयामि । 'आराधयामि' एतेन परशोरतिरुष्टता, अधुनापदेन विलम्बस्यासह्यता, विकासभाजोरित्यनेन कोपदीपकत्वं च व्यज्यते । वसन्ततिलकं वृत्तमुपमा चालङ्कारः ॥१९॥

निग्रहः=दण्डः, अनुग्रहः=दया, तयोः स्वाधीनः=वशः (स्वाधीनपदमधीनमात्रार्थकम्) स्वतन्त्रश्चेति पार्ष्ठिकोऽर्थः ।

निजस्य=स्वस्य दुर्विनयम्=औद्धत्यम् ।

येनापदिष्टमिति—येन=शिवधनुषा अद्यापि पुरस्त्रीभ्यः=पुराङ्गनाभ्यो विरहव्रतं=वैधव्यानुष्ठानम् उपदिष्टं=शिक्षितं—पुरःस्त्रियो विधवाः कृता इति भावः, तत् न भुग्नं=न कुण्ठं जगद्गुरोः=शिवस्य शरासनं=धनुस्त्वया (सम्प्रति मिष्टभाषिणा नम्रताभिनयशालिना च) भग्नं=खण्डितम् । तन्महानपराधः कृतस्त्वयाऽतो नोपेक्षामर्हसीति भावः ॥२०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

रामः—भगवन्, अलीकलोकवार्त्तया निरपराधे मयि मुधा कोपकलङ्कितो

भार्गवः—तत् किं स्वस्ति हरकार्मुकाय, ?

रामः—नहि नहि ।

भार्गवः—तत् कथं निरपराधोऽसि ?

रामः—मया स्पृष्टं न वा स्पृष्टं कार्मुकं पुरवैरिणः ।
भगवन्नात्मनैवेदमभज्यत करोमि किम् ? ॥२१॥

भार्गवः—आः, कथं रे चन्दनदिग्धं नाराचं निधाय हृदयं मे शीतल
तदलमनेन ? (कुठारमुद्यम्य) ।

हे राम कामरिपुकार्मुकमर्मघात-
सञ्जातपातक, तवैष कठोरधारः ।
सीताकरव्यतिकरप्रतिकूलबन्धुः
कण्ठं पुरा विशतु निष्करुणः कुठारः ॥२२॥

अलीकया=मिथ्याभूतया लोकवार्त्तया=जनवचनेन ।

मयेति—भगवन्, पुरवैरिणः=शिवस्य कार्मुकं=धनुर्मया स्पृष्टं न
स्पृष्टम्=मनाक् स्पृष्टमिव कृतमित्यर्थः (इयतैव) आत्मना=स्वेन परा
एव इदम्=धनुः अभज्यत=अदीर्यत, (अहम्) किं करोमि । मम किमपि
नास्त, येन मामपराधिनं गणयितुमुचितं स्यात् इत्यर्थः ॥२१॥

हे रामेति—कामरिपोः=शिवस्य कार्मुकं=धनुस्तस्य मर्मघातः=भञ्ज
सञ्जातं=समुद्भूतं, पातकं=पापं यस्य स तस्य सम्बुद्धौ रूपम् हे रामं, एष
धारः=निर्दयधारः तीक्ष्ण इति तात्पर्यम्, निष्करुणः=निरनुक्रोशः सीतायाः
ग्रहः=पाणिपीडनं तत्र प्रतिकूलबन्धुः=शत्रुत्वं गतः (तेन रुष्टः) यद्वा
करेण ग्रहणमालिङ्गनं तस्य व्यतिकरः=आवृत्तिः तस्य प्रतिकूलबन्धुः=
(निवारकः) अयम्=उद्यतः कुठारः तव कण्ठं पुरा विशतु=पूर्वं प्रवि
त्वां छिनत्तु इति भावः । 'निकटागामिके पुरा' इति कोशः । वसन्त
वृत्तम् ॥ २२ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

तत्प्रवीरो भव ।

रामः—हारः कण्ठं विशतु यदि वा तीक्ष्णधारः कुठारः
स्त्रीणां नेत्राण्यधिवसतु वः कज्जलं वा जलं वा ।
सम्पश्यामो ध्रुवमिह सुखं प्रेतभर्त्तुर्मुखं वा
यद्वा तद्वा भवतु न वयं ब्राह्मणेषु प्रवीराः ॥२३॥

जामदग्न्यः—आः, कथं मामपि प्रणतिपात्रं ब्राह्मणमात्रमिव मन्यसे
पुनः सामर्षम्)

जानीषे नहि जामदग्न्यमपि रे यद्दीर्घदोःकन्दल-
द्वन्द्वास्कन्दितबाहुना रणभुवि स्कन्देन मन्दौजसा ।

प्रवीरः=युद्धाय सज्जः उद्यतायुधः ।

हारः कण्ठमिति—यदि हारः=विवाहोचितं जयमाल्यं कण्ठं विशतु=प्रवि-
तु, तीक्ष्णधारः=शिताग्रः कुठारः=परशु र्वा । विवाहसामोदः कृत्तशिरा वा
याम् इति भावः, स्त्रीणाम्=अस्माकमङ्गनानां नेत्राणि=नयनानि कज्जलं जलम्=
श्रु वाऽधिवसतु । 'उपान्वध्याङ्वसः' इत्याधारे सप्तमीस्थाने द्वितीया ।
अस्मदङ्गनाः सौभाग्येन प्रसाधयन्तु स्ववदनानि, अश्रु वा मुञ्चन्तु) इह
खं=प्रमोदम् प्रेतभर्त्तुः=यमराजस्य मुखं वा पश्यामः, यद्वा तद्वा भवतु=यद्भवतु
द्भवतु वयं=रघुवंश्याः ब्राह्मणेषु प्रवीराः उद्यतायुधा न (भविष्यामः इति भावः)
ह्मणेषु' इति बहुवचनेन न केवलं वीरे त्वयि, किन्तु ब्राह्मणमात्रे इत्यर्थः ।
द्वा तद्वा' इति पदयुगेन फलाभिसन्धानशून्यो ब्राह्मणेष्वस्त्रोद्यमननिवृत्ति-
यमो रघुवंश्यानामिति च सूच्यते ॥ २३ ॥

माम्=भुवं निःक्षत्रियां कृतवन्तम् । प्रणतिपात्रम्=प्रणाममात्रसाध्यम्, अनु-
शीतं, कृतेऽप्यपकारे कोपमनाकलयन्तमिति भावः ।

जानीष इति—यस्य दीर्घेण=महता दोःकन्दलद्वन्द्वेन=बाहुदण्डद्वयेना-
स्कन्दितौ=पराभूतौ बाहू=भुजौ यस्य तेन तथोक्तेन रणभुवि=समराङ्गणे मन्दम्
ओजो=वीर्यं यस्य तेन युधि लज्जितेनेति भावः । स्कन्देन मम स्कन्दस्य
सम्पदं=बाहुसङ्ख्याम् कथं=केन हेतुना वक्त्रानुसारात्=मुखसङ्ख्यानुसारेण

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

नास्राक्षीद्भुजसम्पदं मम कथं वक्त्रानुसारादिति
क्रुद्धेनोद्धृतमैक्षि शङ्करकरन्यस्तं विधातुः शिरः ॥२४॥

(पुनः सामर्षम्) किमात्थ रे किमात्थ ? । 'न वयं ब्राह्मणेषु प्रवीराः' इ कथं क्षत्रियजातिगर्वितो ब्राह्मणजातिं तृणाय मन्यसे । तदिदानीमावयोः का सीति सङ्ग्रामतुलैव निर्णेष्यते ।

रामः—भो ब्रह्मन् भवता समं न घटते सङ्ग्रामवार्त्तापि नः
सर्वे हीनबला वयं बलवतां यूयं स्थिता मूर्द्धनि ।

लक्ष्मणः—जामदग्न्य, एवमेतत् ।

(मुखानि यदि षड्दत्तानि तदा तदनुसारेण द्वादशबाहून् किमिति ना तथा सत्यधुनाहमिमां हीनां दशाम्नाध्यगमिष्यमिति विधातारं प्रति स्क कोपे हेतुः) न अस्राक्षीदिति क्रुद्धेन=कुपितेन स्कन्देन शङ्करस्य=शिवस =बाहौ न्यस्तं=स्थापितं विधातुः शिरः=मुण्डम् उद्धृतम्=कुटिलं ती ऐक्षि=निरीक्षितम् । तं=प्रागुक्तपरिचयं जामदग्न्यमपि, रे न जानीषे । रे मधिक्षेपं, मन्दप्रज्ञताम्, आह । स्कन्देन क्रोधारुणदृशा रुषा विधातुः दृष्टम् इति कोपं व्यञ्जयितुं प्रोक्तम् । शिवेन कदाचित् क्रुद्धेन विधातुः पञ्च रश्छिन्नं स्वकरे च स्थापितमिति पुराणी वार्त्ता । शार्दूलविक्रीडितं वृत्तम् ॥

तृणाय मन्यसे=नाद्रियसे । हीनं मन्यस इति भावः ।

भो ब्रह्मन्निति—भो ब्रह्मन्=ब्राह्मण, भवता=त्वया समं=सह न स्माकम् (क्षत्रियवंश्यानाम्) सङ्ग्रामवार्त्ता=युद्धकथापि न घटते=न यु (यतः) वयं सर्वे=(परिचयनैरपक्ष्येण समस्ता क्षत्रजातिः) हीन =अल्पसामर्थ्याः, यूयं=ब्राह्मणाश्च बलवतां=शक्तिशालिनां मूर्ध्नि स्थिताः सीनाः । अतो भवता तुल्यतायाः सर्वथाऽनधिकारिणो वयमिति भा सति सामर्थ्यविषये संशये तन्निर्णयाय संग्रामः करणीयस्तदभावे तु दूरापास्तत्वमिति भावः ।

एवमेतत्=स प्रोक्तमन्यथा नेति भावः । रामस्य शुद्धाशयेनोक्तिः, स्तामेव कुटिलव्याकरणोक्त्या ऽन्यथयिष्यति यस्मादित्यादिना) ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

यस्मादेकगुणं शरासनमिदं सुव्यक्तमुर्वीभृता-
मस्माकं, भवतां पुनर्नवगुणं यज्ञोपवीतं बलम् ॥२५॥

रामः—अलमिह माननीये मुनौ दुर्विनयवैदग्ध्येन ।

जामदग्न्यः—अस्य को दोषः ?

दारैर्मुक्तकुचांशुकैः परिवृतं प्राचीनमेषां नृपं
नाहिंसीद्यदसौ कुठारहतकस्तस्यैतदुज्जृम्भितम् ।
यन्नारीकवचान्वयप्रणयिनां क्षत्राधमानामिमा
दुर्वाचः प्रविशन्ति मे श्रवणयोर्धिक् क्षत्रगोत्रे कृपाम् ॥२६॥

रामः—अलमिह क्षीरकण्ठे कठोरकोपतया, तत्क्षम्यताम् ।

यस्मादिति—यस्मात्=यतो हेतोः अस्माकम्=उर्वीभृतां=राज्ञां शरासनं=धनुरिदमेकगुणम्=एकप्रत्यञ्चम्, (गुणपदं सूत्ररूपमर्थमादाय न्यूनतां पर्यवसाययति) सुव्यक्तं=प्रकटम्, भवतां=पुनः युष्माकं तु नवगुणं=नवभिः सूत्रैर्निर्मितं यज्ञोपवीतं बलम् । बाहुबलाभावेऽपि यज्ञोपवीतेन भवन्तो जयिनः क्षत्रियास्तु केवलं शरासनेष्वलम्बन्ते तानि चैकगुणानि, तेनोभयोर्बले महत्तारतम्यमिति कटूक्तिः ॥२५॥

दारैर्मुक्तेति—मुक्तकुचांशुकैः=प्रसारिताञ्चलैः दारैः=वधूभिः परिवृतं=वेष्टितम् (स्त्रीभिः सहभूय स्वं स्वमञ्चलं च प्रसार्य तदन्तर्गोपायितमिति भावः) एषां=सम्प्रति विचेष्टमानानां राज्ञां प्राचीनं=पूर्वजं नृपं यदसौ=कुठारहतकः=निन्दितः परशुः (अपुरोदर्शिता निन्दाहेतुः) न अहिंसीत्=अवधीत् तस्य (अहननस्य) एव (अन्यव्यावृत्तय एवकारः) एतत्=निन्दाश्रवणम् उज्जृम्भितम्=विकासः (फलमिति भावः) यत् नारी=स्त्री कवचं=रक्षाहेतुर्येषां तेषां स्त्रीभी रक्षितानामिति यावत् अन्वयप्रणयिनां=वंशोद्भवानाम् क्षत्राधमानां=दुष्टराजन्यानाम् इमाः (अनुवदितुमप्यनर्हाः) दुर्वाचः=निन्दोक्तयः मे=(एकविंशतिवारान् धरित्रीमक्षत्रियां कृतवतः) श्रवणयोः=कर्णयोः (न तु कर्णस्य, द्विवचनं सुखश्रव्यताम्, तच्च निन्दाया उद्घोष्यमाणत्वं व्यञ्जयितुम्) अन्तः=मध्ये प्रविशन्ति । (अतः सम्प्रति) क्षत्रगोत्रे=क्षत्रियवंशे कृपाम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

जामदग्न्यः—आः, किमुच्यते क्षीरकण्ठ इति। विषकण्ठः खल्वसौ।

लक्ष्मणः—भगवन्, शितिकण्ठशिष्येण विशेषतः क्षन्तव्यम्।

जामदग्न्यः—आः, कथं विषकण्ठनामसाम्येन त्वमपि मे गुरुः।

लक्ष्मणः—(विहस्य) अन्याभिसन्धानेन मयेदमुक्तं यत् किल—

किरीटमधिरूढे बाले प्रालेयरोचिषि।
शितिकण्ठस्य किं चित्ते धत्ते कोपाङ्कुरः पदम्? ॥२७॥

भवांस्तदन्तेवासीति विशेषतः क्षन्तुमर्हति।

जामदग्न्यः—(स्वगतम्) अहो अस्य क्षत्रियवटोर्वाक्परिपाटीपा[टवम्।] भवतु। (प्रकाशम्) तदिदं क्षान्तमेव मया, अयं तु न क्षमते प्रकृति[...] कुठारः। शीलं न वेत्सि कथमस्य,

---

=अनुकम्पां धिक्; नोचिता कृपेत्याशयः। एकदा विहितायाः कृपाया [...] कटुतमं फलमुपलभ्यापि यदि भूयो दया दर्श्येत, महदनुचितमाचरितं स्या[त्।] अतो न तथा करणीयमित्यभिप्रायः। तदेव वृत्तम् ॥२६॥

क्षीरकण्ठः=दुग्धमुखः। अतिबाल इति भावः। विषकण्ठः=कटुभाषी। [...]

शितिकण्ठः=शिवः। विषकण्ठः=शिवः प्रोक्तस्तदीयमागोऽपि तच्छि[ष्ये] मर्षणीयमिति कटुतापक्षेऽर्थः।

अन्याभिसन्धानेन=अन्याभिप्रायेण, केवलं भवतो गुरुरतिक्षमी, [...] ताऽप्ययं क्षन्तव्य इत्याशयेन।

किरीटमिति—बाले=कलात्मके (शिशौ च) प्रालेयरोचिषि=हि[...] किरीटं=शिरः अपि अधिरूढे, शिरोपि समाश्रयति सतीति भावः, एतेन [...] चापल्यस्य तज्जन्यापराधस्य च गुरुतोक्ता। किं शितिकण्ठस्य=शिवस्य चित्ते=[...] कोपाङ्कुरः=क्रोधोदयः पदं=स्थानं धत्ते=करोति। नेति प्रत्ययेयोर्थः। [...] चन्द्रमसि शिवशिर आरोहति सत्यपि शिवो न क्रुध्यति तथा बाले कटु[...] माणेऽपि मल्लक्षणे जने तच्छिष्येण भवता न कोपः कर्त्तुमुचित इति [...] शयः। "प्रालेयं मिहिका चाथ हिमानी हिमसंहतिः" इत्यमरः। "वा[...] महादेवः शितिकण्ठः कपालभृत्" इति च ॥२७॥

वाक्परिपाटीपाटवम्=वचनचातुरी, विदग्धता।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

क्रीडाविनिर्मितसुदुर्मददोर्विलास-
निःशेषराजकवधस्य परश्वधस्य ।
कीलालकीकसकचैः परितो विचित्य
येन द्विधापि विदधे पृथिवी त्रिवर्णा ॥२८॥

(पुनः सामर्षम्) कथमस्य हरप्रसादपरशोः शीलमपरिशीलितं ते ।
यत्र क्रामति सङ्गराङ्गणभुवं दुर्वारधाराञ्चल-
क्षुण्णक्षत्रकिशोरकण्ठरुधिरैर्नीरेणुका भूरभूत् ।

क्रीडाविनिर्मितेति—क्रीडया=हेलयाऽनायासेन विनिर्मितः=कृतः, सुदुर्मदः=अतिदुर्ललितः दोर्विलासः=बाहुबलं यस्य तस्य निःशेषराजकस्य=सकलराजन्यकस्य वधः=घातो येन तस्य=अनायासविहितातिदृप्ताखिलक्षत्रियघातस्येत्यर्थः। परश्वधस्य=कुठारस्य कीलालकीकसकचैः=शोणितास्थिकेशैः परितः=सर्वतः विचित्य (सर्वत्र व्याप्तं कृत्वा) येन=कुठारेण द्विधा=द्विप्रकारेण अपि त्रिवर्णा (क्षत्रियाणां निधनेन वर्णत्रयशालिनी, ब्रह्मवैश्यशूद्राभिधवर्णत्रयोपेता, रक्त-श्वेत-कृष्णा च) पृथिवी=धरित्री विदधे=कृता । केशैः श्यामता, अस्थ्ना श्वेतता, रुधिरेण रक्तता चेति बोध्यम् । क्वचित्पुस्तके त्रिधेति पाठः स चापाततो रमणीयः प्रतिभाति, परन्तु तृतीयस्त्रिवर्णताप्रकारो न सुघटः । 'सुदुर्मद' इत्यस्य स्थाने 'सुदुर्दम' इति पाठस्तु पवित्रः प्रतीयते । 'शोणितेऽम्भसि कीलालम्' इत्यमरः, 'कीकसं कुल्यमस्थि च' "कचः केशः शिरोरुहः" इति च । वसन्ततिलकं वृत्तमिदम् ॥२८॥

यत्र क्रामतीति—यत्र=यस्मिन् परशौ सङ्गरस्य=युद्धस्य अङ्गणभुवं=प्राङ्गणभूमिम् क्रामति=अवतरति दुर्वारेण=निवारयितुमशक्येन धाराञ्चलेन=तीक्ष्णाग्रभागेन क्षुण्णानां=धर्षितानां (निहतानाम्) क्षत्रकिशोराणां=क्षत्रियाणां कण्ठानां=गलानां (प्रवहमानैः) रुधिरैः=शोणितैः भूः=पृथिवी नीरेणुका= निर्गता रेणवो=धूलयो यस्यास्तथा रजोरहिताऽभूत (अथ च) तादृशां=रणे हतानां वीरवराणां=शूरश्रेष्ठानां स्वयम्वरपराणां=वरणायोत्कण्ठितानां स्वर्लोककन्यानां=देवबालानां करेषु=हस्तेषु यानि क्रीड़ापुष्करदामानि=विलासार्थं

Raj Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

ताहग्वीरवरस्वयंवरपरस्वर्लोककन्याकर-
क्रीड़ापुष्करदामरेणुभिरभूद्द्यौरेव रेणूत्कटा ॥२९॥

लक्ष्मणः—भगवन्, एतत्सत्यम्, यत्किल भवत्कुठारधाराञ्चलविलो[ड़ि]नीरेणुका भूरभूदिति।

जामदग्न्यः—आः, कथं रेणुकावृत्तान्तेन मर्म विध्यति। भवतु। (प्रकाश[म्]) अये क्षत्रियपोत, अलमिह निरपराधे भवति मुधा परश्वधपातेन, तदयं मे प्र[...] कठोरभाषिणं भवत्कण्ठमेव शातयति कुठारः।

(नेपथ्ये)

अये जामदग्न्य, कथमतिप्रगल्भसे, तदिदमिदानीं भवच्छाशनाय [...]सनमानीयते।

जामदग्न्यः—(विहस्य) कथमयं जनकः, (उच्चैः) अये याज्ञव[ल्क्य]शिष्य, किं भवतः शरासनेन, पद्मासनमेवावलम्बस्व। (पुनः सोत्प्रासम्)[...]

स्थाप्यमानकमलमाल्यानि तेषां रेणुभिः=परागैः द्यौः=स्वर्ग एव रेणूत्कटा=[...] धूसरा जातेति भावः। अनेन मम परशुना युद्धे बहवः क्षत्रिया हता[...] शोणितैरस्या भुवो रजः शशाम, रणे मृतानां च तेषां स्वर्गंच्छतां वर[...] कुलानां देवबालानां करेऽवस्थितेभ्यः कमलपुष्पमाल्येभ्यश्च्यवमानेन पराग[...] सदा नीरजा अपि स्वर्गो रजोरूषितः समजनीति तात्पर्यार्थः। अत्र किशो[...] तेषां स्वकर्तृकस्य पराजयस्य सुकरतां व्यञ्जयति। शार्दूलविक्रीडितं वृत्त[म्।] अनेन भू रेणुकारहिता कृता, इत्यर्थोऽपि स्मारितः। तेन तस्य निर्द[य]त्वमुक्तम् ॥२९॥

नीरेणुका=रेणुकया परशुरामजनन्या रहिता।

मर्म=सुकुमारतरं स्थानम् (यत्र कृताघातः प्रभूतं क्लेशमनुभवति)।

भवत्कण्ठम्=त्वां न हन्मि तत्र गलं छिनद्मि (यतः कण्ठादिमा दु[...] निर्गतास्तमेव कृन्तामि, त्वयि तु दयापर एवाहमिति भावः)।

अतिप्रगल्भसे=बहु धाष्ट्‌र्यमवलम्बसे। भवच्छासनाय=त्वन्निग्रहाय।

पद्मासनम्=योगोक्तसुपवेशनप्रकारविशेषम् (याज्ञवल्क्यशिष्यत्वा[त्त]स्यायमुपहासः)।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

युष्माकं भोः सुघटितबहुन्यस्तपद्माक्षकण्ठा
मिथ्योत्कण्ठा किमिति समिति क्षत्रियश्रोत्रियाणाम् ।
तेऽन्ये चञ्चत्करतलचलच्चण्डनिस्त्रिंशधारा-
धौताराातिद्विपमदमसीपङ्कपूराः प्रवीराः ॥३०॥

तदलं भवता, एतावेव तावत् क्षत्रियप्रवीरौ निर्वापयामि ।

(पुनर्नेपथ्ये)

अये जामदग्न्य, कथं तथा शमघनसमृद्धस्य जमदग्नेस्तनयोऽपि शमदुर्ग-तोऽसि सम्वृत्तः ।

युष्माकमिति—भोः=(सोपहासं सम्बोधनम्) सुघटितानि=साधु रचितानि बहु=प्रचुरं न्यस्तानि=स्थापितानि पद्माक्षाणि=पद्मबीजानि येषु ते योक्ताः कण्ठाः युष्माकं सन्ति योगरसिकतया धृतपद्मबीजमालालङ्कृतगलोद्देशा यूयं स्थ इति भावः । योगिनां हि पद्मबीजमाला सिद्ध्युपायत्वात् प्रिया भवति, तथा च कालिदासः—"अथोपनिन्ये गिरिशाय गौरी, ताम्रोष्ठपर्यस्त-रुचाकरेण । विशेषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम् ॥" अत्र कृतां कण्ठा न्यस्तपद्माक्षा इति विवक्षितं तत्र कण्ठा उद्देश्यास्तथा चात्र समासो चित इति सुधियो विभावयन्तु । (तेषां) युष्माकं क्षत्रियश्रोत्रियाणां=क्षत्रि-याणां जन्मना कर्मणा ब्राह्मणानां समिति=युद्धे मिथ्या=विफला (साफल्य-स्यासाध्यत्वात्) उत्कण्ठा=अभिलाष उत्कटः किमिति=कुतो हेतोरित्यर्थः । अत्र क्षत्रियश्रोत्रियाणाम् इत्युक्त्या—'स्वधर्मे निधनं श्रेयः । परधर्मो भयावहः' इति मूलक उपहासः) चञ्चतः=चलतः करतलस्य=बाहोः चलता चण्डेन=भया-नकेन निस्त्रिंशेन=खड्गेन धारया=तीक्ष्णाग्रमुखेन धौताः=प्रक्षालिताः अरातीनां शत्रूणां द्विपानां=करिणां मद एव मसीपङ्कः=कालिमकज्जलं तस्य पूरः=समु-हो यैः (चलत्करतलवलत्करवालधाराशमितद्विषद्विपमदपङ्काः) प्रवीराः प्रयतायुधाः (तिष्ठन्ति) तेऽन्ये । न भवन्त इत्यर्थः । स्रग्धरावृत्तमिदम्॥३०॥

शमघनसमृद्धस्य=शान्तस्य । शमदुर्गतः=असहनः ।

Raj Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

जामदग्न्यः—कथमयमाङ्गिरसः (उच्चैः) अये शतानन्द, कथय त इदमेवंविधं शमाभिधानं कस्मादुपात्तम् ? भगवतो गौतमाद्वा गोत्रभिदो वा ?

(नेपथ्ये)

अये क्षत्रियापुत्र, निजजननीकण्ठताण्डवितकुठार, कुलाङ्गार, कथं त ङ्गमाङ्गिरसमपि कुलं कलङ्कयसि ?

जामदग्न्यः—आः, पाप, कुलपांसन, पांसुलापुत्र, कथं भृगूणामग्रे रताण्डवं मण्डयसि ?

रामः—भगवन्, सकललोकविख्यातमिदं भृगूणामङ्गिरसां च कुलम्, विशेषतस्तु भर्गशिष्यस्य । अत एव विज्ञापयामि—

तपः शान्तं चेतः स्फटिकमणिमालापरिकरः
कुशाः कुण्डी दण्डः सततमुटजावासनिरतिः ।
मुनीनामेतद्वः समुचितमुदग्रं न वचनं
न वक्रभ्रूभङ्गो न शरधनुषी नाऽपि परशुः ॥ ३१ ॥

गौतमाद्वा—गौतमः=शतानन्दपिता गोत्रभित्=इन्द्रः । अत्राहल्यादूषक न्द्रस्य तां शप्तवतो गौतमस्य च स्मारणं केवलं शतानन्दस्य दुष्कुलत्व नेनोपहासायेति बोध्यम् ।

निजजननीति—ताण्डवितः=नर्त्तितः कुठारो येन तत्संबुद्धौ ।

कुलपांसन,=कुलकलङ्क, पांसुलापुत्र,=व्यभिचारिणीतनय, ।

भर्गः=शिवस्तच्छिष्यस्य ।

तपः शान्तमिति—चेतः=हृदयम् तपसा शान्तम्=तपस्यया दा स्फटिकमालायाः परिकरः=सम्बन्धः (तदाख्यमालाभूषणम्) कुशाः= कुण्डी=आवपनम् (भिक्षापात्रम्) दण्डः=शास्त्रोक्तो यष्टिविशेषः, सदा उटजावासे=पर्णशालानिवासे निरतिः=निष्ठा । वः=युष्माकं मु एतत्=प्रागुक्तम् अखिलं साधनम् समुचितम्=युक्तम् । उदग्रं=कटु उद वचनं=वचः न, वक्रभ्रूभङ्गः=कुटिलकटाक्षनिक्षेपः न, शरधनुषी=बाणचा परशुरपि न, उचितानीति शेषः प्रत्येकं नञुपादानमत्यन्तानौचित्यव्यञ्ज

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

(पुनः सविस्मयम्) भवानेव तावद्विचारयतु ।

क्व परशुरशुभस्ते ? कुत्र गोत्रं पवित्रं ?
क्व धनुरिदमुदग्रं ? निर्मलं कुत्र शीलम् ? ।
घनसमरकराला कुत्र नाराचहेला ?
कुशकिसलयलीला कुत्र वा पर्णशाला ? ॥ ३२ ॥

जामदग्न्यः—कथमन्यमिव मां प्रणतिपात्रं मुनिमात्रं मन्यसे ? स एष जामदग्न्यः खल्वहं—

क्षुण्णक्षत्रकठोरकण्ठविगलत्कीलालधारासरि-
न्निर्वृत्ताभिषवस्य कृत्तशिरसां केशान्कुशान्कुर्वतः ।

ब्राह्मणेन तपस्विना स्ववर्णोचितं सर्वमपि परिहाय क्षत्रियपद्धतिग्रहणं नितान्तमयुक्तमिति भावः । शिखरिणीवृत्तमेतत् ॥ ३१ ॥

क्व परशुरिति—ते=तव अशुभः=अमङ्गलः परशुः=कुठारः क्व ? पवित्रं गोत्रं=कुलं क्व ? नोभयं सङ्घटत इति भावः । इदम्=उद्यतम् उदग्रम्=उद्धतं धनुः=शरासनं क्व ? कुत्र (च) निर्मलं=निर्दूषणं शीलम्=चारित्रम् । उभयोरेकदेशवासो नितान्तनिन्द्य इति तात्पर्यम् । घने=महति समरे=युद्धे कराला भीषणा नाराचहेला=धनुर्विलासः क्व ? कुशानां=दर्भाणां किसलयानां पल्लवानां च लीला=उपयोगजन्या खेला यत्र तादृशी पर्णशाला=कुटी च कुत्र ? उभयोरेकत्र भवति सत्ताऽत्यर्थमुपहासयति भवन्तमतोऽस्या अवस्थाया विरमणीयं भवतेति भावः । मालिनी वृत्तमिदम् ॥ ३२ ॥

क्षुण्णक्षत्रेति— क्षुण्णानां=धर्षितानां क्षत्राणां=राजन्यानां कठोरेभ्यः=कठिनेभ्यः कण्ठेभ्यो विगलतः=स्यन्दमानस्य कीलालस्य=शोणितस्य धारा=प्रवाहः एव सरित्=नदी तस्या निर्वृत्तः=विहितः अभिषवः=स्नानं येन तस्य स्वकरकृत्तक्षत्रियगलप्रवहमानरुधिरधारास्नातस्येत्यर्थः । कृत्तानां=खण्डितानां शिरसाम्=मस्तकानाम् केशान् कुशान् कुर्वतो=विदधतो यस्य (मम) रक्तजलाञ्जलीन्=शोणितरूपं जलं गृह्णन्=आददानः पितृगणः=पितृपितामहादिर्मृतः सम्बन्धिवर्गः क्षणं=कियन्तं कालं सन्तोषेण (क्रोधापनयजन्येन) निर्वृत्या

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

गृह्णन् रक्तजलाञ्जलीन् पितृगणो यस्य क्षणं विस्मितः
सन्तोषेण जुगुप्सया करुणया त्रासेन हासेन च ॥ ३३ ॥

तदलमिदानीमपि,

कृत्वा त्रिःसप्तकृत्वः समिति विशसनं पूर्वमुर्वीपतीनां
कृत्वान्यत्सप्तकृत्वः पुनरपि कदनं दुर्मदानां नृपाणाम् ।
निर्माय क्ष्मापतीनां प्रतिसमरहृतै-रुत्तमैरुत्तमाङ्गैः-
कापालीमक्षमालां झटिति भगवतो भैरवस्यार्पयामि ॥३४॥

जुगुप्सया=(रक्तपानभवया) घृणया, करुणया=(स्वभाविक्या हतेषु) कृ[illegible] त्रासेन=(बहुमृतकदर्शनोत्थेन) भयेन, हासेन=(तृप्तिजन्येन) विस्मि[illegible] =आश्चर्यचकितः । विस्मित इति तादृश्याः प्रीतेः कदापि पूर्वमजातत्वा[illegible] कोऽपि पितृतर्पणं चिकीर्षुः स्नातः कुशहस्तश्च जलं ददाति तदनुरोधेन क्ष[illegible] रुधिरमये जले स्नात्वा कुशस्थाने मृतमुण्डकेशानादायाहं स्वपितॄनतर्प[illegible] भावः । शार्दूलविक्रीडितं वृत्तम् । भङ्ग्यागम्यार्थप्रतिपादनात्मा पर्यायो[illegible] ङ्कारः । "शोणितेऽम्भसि कीलालम्" इत्यमरः ॥ ३३ ॥

कृत्वेति–पूर्वं=पुरा समिति=युद्धे त्रिःसप्तकृत्वः=एकविंशतिधा उर्वीप[illegible] राज्ञां विशसनं=हननं कृत्वा पुनरपि=भूयोऽपि अन्यत् (प्रागेकविंशति[illegible] कृतात्क्षत्रवधाद्भिन्नतया) सप्तकृत्वः=सप्तधा दुर्मदानां=गर्वोद्धतानां नृ[illegible] =क्षत्रियाणां कदनं=वधं कृत्वा=विधाय प्रतिसमरहृतैः=युद्धभूमेरानीतैः [illegible] तीनां=राज्ञामुत्तमैः=सुन्दरैरुत्तमाङ्गैः=शिरोभिः कापालीं=नृमुण्डमयीम् अक्ष[illegible] =जपमालिकां निर्माय=विरच्य झटिति=शीघ्रं भगवतो भैरवस्यार्पयामि=[illegible] रामि । अहं पुरा त्रिःसप्तकृत्वः क्षत्रियानवधिषमिदानीं पुनरपरथा सप्तधा [illegible] यान् विनिपात्य रणस्थलादानीतैस्तेषां शिरोभिरक्षमालां सन्दृभ्य त्वरया [illegible] वायार्पयामीति तदाशयः । अत्र भैरवस्येत्यस्मिन् शेषत्वेन विवक्षया [illegible] 'क्ष्माऽवनिर्मेदिनी मही' इत्यमरः । स्रग्धरावृत्तम् ॥३४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

रामः—प्रसीद त्वं, रोषाद्विरम कुरु मे चेतसि गिरं
चिरं यच्चायासैर्बहुभिरिह वारैर्जितमभूत् ।
यशोवृत्तं, वित्तं कितव इव विक्षोभतरलं
तदेतस्मिन्वारे भृगुतिलक, मा हारय मुधा ॥३५॥

जामदग्न्यः—कथं रे हारयिष्यामि ? । (विमृश्य) अथवा—

किं नाम वाग्डम्बरपण्डितेषु
युष्मासु वाणीः प्रचुराः प्रयुञ्जे ।
बाणान् रिपुप्राणहरान्मदीयान्
सर्वेऽपि यूयं सहिताः सहध्वम् ॥३६॥

रामः—किमन्यैः, नन्वहमेव हरशरासनारोपणोपनीतजानकीकरकिसलय-

प्रसीद त्वमिति—त्वं प्रसीद=प्रसन्नो भव, रोषात्=कोपात् विरम=निवर्तस्व। मे गिरं=वाचं चेतसि=हृदये कुरु=अवधानेन शृणु । चिरं=बहुना कालेन बहुभिः वारैः=पर्यायैः प्रचुरैरायासैः यत्=(यशोवृत्तम्) च जितम्=अर्जितमभूत् । तत् यशोवृत्तम्=कीर्त्तिकथाम् कितवः=शठः विक्षोभेण=अनवधानेन तरलं=चञ्चलं यथा स्यात्तथा वित्तमिव=धनमिव हे भृगुतिलक=जामदग्न्य, एतस्मिन् वारे=मया सह विवादरूपे पर्याये मुधा=अनर्थकम् मा हारय=मा नाशय । एतस्मिन् यशसि प्राप्तव्ये भवता चिरं बह्वायस्तमेकपदे वृथा मा तत् गमयेति रामस्याशयः । शिखरिणीवृत्तम् ॥३५॥

किन्नामेति—वाग्डम्बरपण्डितेषु=वाग्विलासरसिकेषु (न तु यथार्थतः शूरेषु कार्यदक्षेषु) युष्मासु किन्नाम=किमिति प्रचुराः=बह्वीः वाणीः=वाचः प्रयुञ्जे=व्याहरामीति भावः । यूयं सर्वेऽपि सहिताः=सम्मिलिताः सन्तो रिपुप्राणहरान्=शत्रुप्राणहरान् मदीयान् बाणान् सहध्वम् । अत्र वाकोवाक्यपण्डितं त्वां प्रति वचसि प्रयुज्यमाने वृथा वाग्विस्तराः समुद्भवेयुस्तदयं बाणराशिरेव भवतः सर्वान् स्मृतिशेषान् कर्त्तुं प्रयुज्यत इति भावः ॥३६॥

नन्विति । हरशरासनम्=शिवधनुस्तस्यारोपणम्=सज्यीकरणम् तेनोपनीतायाः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

लीलानिहितकमलमालिकामिलदलिपटलकोलाहलसङ्गीतयशःपरिमलेन वक्ष...
लेन सहिष्ये।

जामदग्न्यः—

ईशत्यक्तपुराणचापदलनप्रोद्भूतगर्वोद्धति-
व्यग्रस्त्वं कतरः, स मे तव गुरुः सोढुं न शक्तः शरान्।
तुष्टादिष्टवरप्रदाद्भगवतः पद्मासनात्सादरं-
मन्नाराचभयादयाचत किल ब्राह्मीं तनुं कौशिकः ॥३...

=आनीतायाः जानक्या सीतायाः करावेव किसलयौ=बालपल्लवौ ताभ्यां लील...
=(सात्त्विकभावसम्भूतकम्पादिकृतेन) विलासेन निहिता=स्थापिता कम...
मालिका=कमलपुष्पनिर्मिता वरणस्रक् तया मिलतः=सङ्गच्छमानस्य अलि...
लस्य=भ्रमरसमूहस्य कोलाहलेन=ध्वनिना सङ्गीतः=गानकर्मीकृत यशःपरि...
=कीर्तिसुगन्धो यस्य। शिवधनुरानस्य सीतया स्वयम्वरस्रजावृतोहम्...
स्रजि निपतन्तो ध्वनन्तश्च भ्रमरा मन्ये मदीयां कीर्त्तिमेव गायन्ति सोऽहं नि...
वक्षसा भवदीयान् बाणान् सोढुं सन्नह्यामि, तदलमन्यान् अकृतापरा...
ग्रहत्येति भावः।

ईशेति—ईशेन=शिवेन त्यक्तस्य=विसर्जितस्य पुराणस्य चापस्य=धनु...
दलनं=भञ्जनं ततः प्रोद्भूतः=प्रवृद्धो गर्वः=अहङ्कारस्तस्य=तत्कृता उद्धतिः=...
द्धत्यं तया व्यग्रः=अशान्तः (पुराणं शिवधनुर्भञ्जयित्वैव प्ररूढगर्वः)
कतरः=किं जातीयः ? (नितान्तासमर्थ इति भावः) स=प्रसिद्धपराक्रमः ...
गुरुः=विश्वामित्रः (अपि) मे शरान्=बाणान् सोढुं=प्रतिकर्त्तुं न श...
=समर्थः। गुरोरपि यत्र सामर्थ्यशून्यता तत्र कर्मणि शिष्यस्य सुतरामयो...
त्वमिति भावः। गुरोरयोग्यतां प्रमापयति तुष्टादिति। तुष्टात्=तपःप्रस...
इष्टवरप्रदात्=अभिलष्यमाणवरदात् भगवतः पद्मासनात्=ब्रह्मणः सादरं=...
नुरोधं कौशिकः=विश्वामित्रः (यत् किल=यतो हेतोः किल) मन्नाराच...
=मद्धनुर्जन्यभीतेः ब्राह्मीं=ब्रह्मणः ब्राह्मणस्येयं ब्राह्मी तां तनूम्=देहमया...
=प्रार्थयत। मद्धनुर्भयादिव कौशिकः पितामहाद्ब्राह्मण्यमयाचत, तथा...

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

रामः—(स्वगतम्) कथं भगवन्तं विश्वामित्रमधिक्षिपति ? तदतः परं सहिष्ये। (प्रकाशम्)

ईशत्यक्तपुराणचापदलनप्रोद्भूतगर्वोद्धति-
व्यग्रोऽहं कतरः स ते मम गुरुः सोढुं न शक्तः शरान्।
तुष्टादिष्टवरप्रदाद्भगवतः पद्मासनात्सादरं
त्वन्नाराचभयादयाचत किल ब्राह्मीं तनुं कौशिकः ॥३८॥

(इति पदव्यत्यासेन पुनः श्लोकं पठति। पुनः साटोपम्) अये जामदग्न्य,

तत्कोदण्डं कुलिशकठिनं भग्नमेतेन भग्नं
मग्नं शल्यं तव हृदि महन्मग्नमेतावता किम् ?
त्रैयक्षं वा भवतु यदि वा नाम नारायणीयं
नैतत् किञ्चिद्गणयति स मे दुर्मदो दोर्विलासः ॥३९॥

वध्यकोटिनिपातेन भयनिवृत्तेरित्याशयः। अतो न त्वयेत्थमिति तात्पर्यम्। शार्दूलविक्रीडितं वृत्तम् ॥ ३७ ॥

अधिक्षिपति=निन्दति।

ईशत्यक्तेति—अत्र परशुरामोक्तिरेव युष्मदस्मत्पदव्यत्यासपूर्वकं परशुरामं प्रति क्रोधं व्यञ्जयितुं पुनः पठिताऽतो न व्याख्यानमर्हति ॥ ३८ ॥

तत्कोदण्डमिति—तत् कुलिशकठिनं=वज्रसारं कोदण्डं=धनुर्भग्नम्, भग्नम्। न विशिष्यविचारणीयोऽयं विषय इति भावः। (एतावता=धनुर्भङ्गमात्रेण) (यदि) तव हृदि=चित्ते महत्=दीर्घं शल्यम्=दुःखशङ्कुः मग्नम्। (एतावता किम्) न मम कापि भीतिरित्यर्थः। त्रैयक्षं=त्र्यक्षस्य=शिवस्येदं त्रैयक्षं यदि वा=अथवा नारायणीयं=भागवतं भवतु (धनुरिदमिति योजनीयम्) एतत्=कस्य देवस्येदमिति मे दुर्मदः=दुर्ललितः दोर्विलासः=बाहुदर्पः न गणयति=न चिन्तयति। धनुर्नमनसमये तत्स्वामिनो विषये वीरैर्न विचार्यतेऽतो भवतात्र दुरभिसन्धिं विधाय यदि योद्धुं सन्नह्यते तदा स्वागतं भवत इति भावः ॥ ३९ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

जामदग्न्यः,—साधु रे क्षत्रियपोत, साधु, यत्किल जामदग्न्यनाम्नश्चण्ड पुरतः खद्योत इव विद्योतसे। किमात्थ रे किमात्थ ?

रामः—(तदेव पठति) नन्विदं भूयोऽप्युच्यते (पुनस्तदेव पठति)।

जामदग्न्यः—साधु स्मारितोऽस्मि।

रामः—किं तत् ?

जामदग्न्यः—कराघाताद्विष्णोस्तरलवनमालापरिमल-
भ्रमद्भृङ्गध्वानद्विगुणितविकासः समजनि।
स यस्य ज्याघोषः सुररिपुबधूवर्गरुदित-
ध्वनिस्वाध्यायानां प्रणव इव तत्कार्मुकमिदम् ॥४०॥

पोतः=बालकः, 'पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः' इत्य चण्डधाम्नः=सूर्यस्य। सूर्यसविधे खद्योतस्येव मम सविधे तव प्र मन्द इति तदाशयः।

स्मारितोस्मि—अत्र 'त्रैयक्षं वा भवतु यदि वा नाम नारायणीयम्' रामोक्तं श्रुत्वा परशुरामेण नारायणधनुः स्वकरे स्थितं स्मृतमिति तस्य तथो

कराघातादिति—विष्णोः कराघातात्=कर्षणकालिकात् करकृतात् नात् तरलायाः=चपलाया वनमालायाः परिमलाय=सुवासाय भ्रमतां= देशे मण्डलाकारेण चलतां भृङ्गाणाम्=अलीनां ध्वानैः=गुञ्जितैः द्विगु विकासः=प्रसारो यस्य तादृशः, यस्य, सुररिपुबधूनां=राक्षसाङ्गनानां =समुदयस्य रुदितध्वनिः=क्रन्दनजन्यशब्द एव स्वाध्यायो=यथा नियमम तेषां प्रणवः=ओङ्कार इव (आदितया तात्पर्यम्) ज्याघोषः=धनुष्टङ्कार जनि तदिदं कार्मुकं धनुः। अस्तीति शेषः। अयमाशयः— विष्णोः करेण माणस्य यस्य तदीयवनमालासौरभलोभभ्राम्यद्भृङ्गगणध्वनिभिः सुरस्त्री रवस्वाध्यायप्रणवरूपै ज्याघोषः-गुणशब्दो द्विगुणोऽजन्यत तदिदं कार्मुकमि ज्याघोषः असुरस्त्रीणां रोदनस्य प्रारम्भरूपः। वेदस्य प्रारम्भे च ओङ्कार सम्प्रदायः 'स्रवत्यनोङ्कृतमिति' स्मृतिरूपप्रमाणमूलः। अत एव चेदृशं रूप शिखरिणीवृत्तम् ॥४०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

रामः—करपङ्केरुहक्रोडे क्रीडितं येन शार्ङ्गिणः ।
तदेतत् ?

जामदग्न्यः—अथ किम् ? यदि शक्तोऽसि गृहाण विगृहाण वा ॥४१॥

रामः—गृह्णामि ।

जामदग्न्यः—तदेहि, वाष्पायमाणभवद्बन्धुजनबन्धुरां वसुन्धरामतिक्रम्य समभुमां क्षमामवतरामः ।

(इति निष्क्रान्तौ)

लक्ष्मणः—(विलोक्य सहर्षं सकौतुकञ्च)

मा शाम्भवं धनुरिवेदमपि प्रयातु
भङ्गप्रसङ्गमिति मन्दचलद्भुजेन ।
आर्येण कार्मुकमपीदमहो सहेलं
चक्रीकृतं भगवतो गरुडध्वजस्य ॥४२॥

करपङ्केरुहेति । येन शार्ङ्गिणः=विष्णोः करपङ्केरुहक्रोडे=करकमलाङ्के क्रीडितं=विलसितम् । क्रीडितमित्यनेन सुखनिवासः सूचितः । तदेतदिति एत उक्तेन सम्बन्धः ।

अथ किमिति—अथ किम्=त्वदनुमितोऽर्थः सत्यः । यदि शक्तः=समर्थः असि तदा गृहाण (इदं धनुरिति शेषः) विगृहाण=युद्ध्यस्व वा (मया सहेति बोध्यम्) तृतीयः प्रकारो न सम्भवतीति भावः ॥४१॥

मा शाम्भवमिति—शाम्भवं=हरसम्बन्धि धनुः=चाप इव इदमपि=नारायणीयमपि धनुः मा भङ्गप्रसङ्गम्=खण्डितत्वं प्रयात्विति मन्दं चलन्=उपसर्पन् भुजो बाहुर्यस्य तेन आर्येण=पूज्येन (रामचन्द्रेण) इदमपि भगवतो गरुडध्वजस्य=विष्णोः कार्मुकं धनुः अहो=आश्चर्यम् सहेलम्=अवहेलायासम् चक्रीकृतं नमितम् । एकत्र शिवधनुषि अल्पीयसाऽऽयासेन तद्भङ्गप्रसङ्गः समुपस्थितो नेदं तुमुलं युद्धमुपस्थितमिति द्वितीये धनुषि नमनीये मन्दा बाह्वोर्गतिः सहेलं च धनुरुत्थापनमिति बोध्यम् । वसन्ततिलकं वृत्तम् ॥४२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अहो कौतुकम् ।

उद्भिन्नश्चापचक्रादमरपरिहृतव्योमरन्ध्रावगाही
बाणोऽयं राघवस्य त्रिदशपुरगतिच्छेदकृद्भार्गवस्य ।
हंसीभूतः सुरस्त्रीकरकमलगलत्पुष्पसौरभ्यलुभ्य-
द्भृङ्गीसङ्गीतभङ्गीपरिचलितयशाः स्वर्गपर्यङ्कमेति ॥४३॥

(ततः प्रविशतो राम-जामदग्न्यौ)

जामदग्न्यः—(रामं विलोक्य निर्वर्ण्य च, स्वगतम्)

उद्भिन्न इति—चापचक्रात्=धनुर्मण्डलात् (नारायणीयधनुषः) उ =निर्गतः, अमरैः=देवैः (भयात्) परिहृतस्य=स्वतः पलाय्य रिक्तीकृतस्य व्यो =आकाशस्य रन्ध्रम्=अवकाशम् अवगाहितुं शीलमस्य तथा धनुर्मण्डला देवैर्भयात्त्यक्ते वियति गत इत्यर्थः । (किञ्च) भार्गवस्य=परशुरामस्य त्रि =देवास्तेषां पुरं=नगरं=स्वर्गस्तत्र गतिः=गमनम् तस्य च्छेदं करोतीति तेन परशुरामस्य भाविनः स्वर्गगमनस्य निवारक इत्यर्थः । (एतादृग्विशे त्रयशाली) राघवस्यायं बाणः हंसीभूतः=हंसवदाचरितः (स्वच्छत्वादु शीलत्वाच्च तथोक्तिः) (पुनः) सुरस्त्रियाम्=देवाङ्गनानां करा एव कमल (रक्तिम्ना मार्दवेन च) तेभ्यो गलतां=पततां पुष्पाणां सौरभ्ये=सुगन्धे लुभ्य नाम्=अभिलाषातिशयशालिनीनां भृङ्गीणां=भ्रमरीणां सङ्गीतभङ्गी=(गुञ्जि गीतपरिपाटी) तया परिचलितं=सर्वतः व्यापितं यशो यस्य तादृशः (रा बाणः) स्वर्गपर्यङ्कम् एति=प्राप्नोति । (सुखास्पदत्वद्योतकः पर्यङ्क सुरस्त्रीभिः पुष्पवृष्टिः क्रियते तदनुसारिण्यो भ्रमर्यश्च मञ्जु गुञ्जन्ति, राघवस्य कीर्तिरेव गीयते, गीयमाना च सा त्रिदशपुरे प्रसरतीत्याशयः । ण्डलादुत्पद्य व्योम व्याप्य स्वर्गं प्रसरतीत्युक्त्या यशसो व्याप्तिः सूचि रामेण नारायणधनुषि नतेऽमोघस्य स्वबाणस्य सार्थक्याय तदीयस्वर्ग निरोधस्तेन कृत इति कथात्रानुसन्धेया । उत्तरार्धे यमकमलङ्कारः । वृत्तम् ॥४३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

त्रिलोकी कोकीयं मुदमुदयतानेन लभते
विकासं वा धत्ते मुनिजनमनःपङ्कजवनम् ।
अये कोऽयं बालः कुवलयदलश्यामलतनु-
र्जगद्योनिर्ज्योतिः, कथमिदमहो तत् परिणतम् ॥४४॥

(पुनर्विमृश्य)

आपूरणाय पुरवैरिशरासनस्य
बाणात्मना परिणतः किल लीलया यः ।
आरोपणाय पुनरस्य स एव शङ्के
बालात्मना परिणतः पुरुषः पुराणः ॥४५॥

(प्रकाशम्)—वत्स, इतः ।

त्रिलोकीति—इयं त्रिलोकी=लोकत्रयी कोकी=चक्रवाकी उदयता=उदय- ... अनेन (रामेण) मुदं=प्रसादं लभते, (वा) मुनिजनस्य मन एव ...जस्य=कमलस्य वनम् (उदयतानेन) विकासम्=उत्फुल्लतां धत्ते । ...भयमपि-जगदनुरञ्जनं मुनिगणप्रीणनञ्चानेनाचर्यते) अये अयं कुवलयस्य ...लकमलस्य दलं=पत्रमिव श्यामला=श्यामा तनुः=काययष्टिर्यस्य सः कः ? ...स्य परिचय इति प्रश्नः । (एतद्गुणगणस्तु इमं जगदुत्पादकं ज्योतिः ...पयति) अहो=विस्मयद्योतकम्, जगतः=संसारस्य योनिः=उत्पत्तिस्थानं (... कथमिदं=रामरूपं परिणतम् (जगद्योनिः परं तेजः कथं रामरूपतयाऽव- ...मिति विस्मयः) रूपकमलङ्कारः । शिखरिणीवृत्तम्—"कोकश्चक्रवाकः" ..., ...लोत्पलं कुवलयम्" इति चामरः ॥४४॥

आपूरणायेति—यः पुराणः पुरुषः=पुराभवः पुमान् (ब्रह्मात्मा) ...रिणः=शिवस्य. शरासनस्य धनुषः आपूरणाय=समग्रतासम्पत्तये लीलया ...सेन (न तु पारतन्त्र्येण) बाणात्मना=बाणस्वरूपेण परिणतः=प्रकटितः ...णत्वं गत इत्यर्थः) शङ्के=सम्भावयामि स एव पुराणः पुरुषः पुनरस्य ...पणाय=नमनाय बालात्मना=रामरूपबालकभावेन परिणतः=अवतीर्णः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

(रामः सलज्जमधोमुखस्तिष्ठति)

जामदग्न्यः—(उपसृत्य) (रामस्य चिबुकमुन्नमय्य च) किमिति स्थानम् ?

कमलबन्धुविलोचन, यस्त्वया
स्वमहिमोन्नमनैरधरीकृतः ।
न किमसावधरीकुरुते नर—
स्त्रिदशकोटिकिरीटमणीनपि ॥४६॥

रामः—(अञ्जलिं बद्ध्वा) भगवन्, अलमनेन, दुर्विनयपङ्कमलिनीकृ त्मानं तावद्भवच्चरणनखकिरणतरङ्गिणीजलेन क्षालयामि ।

यो विष्णुः पूर्वकाले शिवेन त्रिपुरे दहनीये धनुषि हिमालये वासुकिना च सञ्जाते बाणत्वं स्वयमगमत्स एव मन्ये सम्प्रत्यस्य शैवस्य धनुषः क रामरूपबालकात्मनाऽवतीर्ण इत्याशयस्तेन न मया किमपि मनसि नादिकं कलुषं स्थाप्यमिति भावः । उत्प्रेक्षालङ्कारः । वसन्ततिलकं वृत्तम् ।

सलज्जम्=जिते प्रशंसापरे विजेतुर्लज्जोदयस्य स्वाभाविकत्वादिति भा

कमलेति—हे कमलबन्धुविलोचन,=राजीवलोचन (सादृश्ये बन्धुश त्वया=(विष्णुना) स्वमहिम्नः=स्वीयपराक्रमस्योन्नमनैः=बर्द्धनैः यः (क्षणो जनः) अधरीकृतः=नीचैः कृतः आत्मपराक्रमं प्रकटय्य हीनबलतया पित इति भावः । असौ=मल्लक्षण एव जनः नरः=मनुष्यः त्रिदशानां= कोटिः=समुदयस्तस्य किरीटमणीन्=चूडामणीन् देवगणशिरोरत्नानीत्य न अधरीकुरुते=नमयति । यो भवता पराभूतः सोऽपि देवैः प्रणम्यत तात्पर्यम् । काका विपरीतार्थाभिव्यक्तिः । अधरीकृतोऽधरीकरोतीति स्यापातप्रतीतिश्चमत्कारकरी । अत्र कमलबन्धुविलोचनेत्यनेन पुण्डरीक स्मारणमुखेन रामस्य विष्णुरूपताऽऽवेद्यते । द्रुतविलम्बितं वृत्तम्—'द्रुतवि तमाह नभौ भरौ' इति च तल्लक्षणम् ॥४६॥

दुर्विनयः=औद्धत्यं तदेव पङ्कः=कालिमा तेन मलिनीकृतम्=कलुषि तरङ्गिणी=नदी ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

चण्डमेव किल तिग्मरोचिषः
सौम्यमेव किल शीतरोचिषः ।
चण्डसौम्यमिति कौतुकावहं
नौमि तावकमहं महन्महः ॥४७॥

(इति पादयोः पतति)

जामदग्न्यः—अयि कल्याणनिधे, आशीरुक्तिरपि त्वयि पुनरुक्तिरेव । तथापीदमाशास्महे ।

यशःपूरं दूरं तनु सुतनुनेत्रोत्पलवनी-
तमस्तन्द्राचण्डातप तप सहस्राणि शरदाम् ।
इयं चास्तां युष्मच्छरशमितलङ्केश्वरशिरः-
श्रितोत्सङ्गा नन्दत्सुरनरभुजङ्गा त्रिजगती ॥४८॥

चण्डमेवेति—तिग्मरोचिषः=सूर्यस्य चण्डम्=उग्रमेव (न शीतलम्) शीतरोचिषः=चन्द्रमसः शीतं=शीतलम् एव (न चण्डम्) (महो भवतीति भावः) तावकं=त्वदीयम् महत्=प्रसिद्धं लोकान्तरानभिभवनीयं च महः=तेजः चण्डसौम्यम्=(विषयकालभेदेन) तीव्रं शान्तं च, (अतस्तत्) कौतुकावहं=कौतुकस्य=आश्चर्यस्य आवहं=दातृ (तव महः) नौमि। सर्वेऽपि सूर्यादयो धामशालिनः केवलं तीक्ष्णधामानः, शान्तशीतलतेजसो वा भवन्ति भवांस्तु शौर्ये तपसि च तुल्यतया प्रसिद्धो विरोधिगुणद्वयशालीति महत आश्चर्यस्य भूमये भवते मम नम इति तदाशयः। स्वागताच्छन्दः ॥४७॥

यशःपूरमिति—हे सुतनूनां=रमणीनां नेत्राण्येव उत्पलानि=कमलानि तेषां वनी=समुदाय स्तस्या स्तमस्तन्द्रा=निमीलनम् (अविकासदशा) तत्र चण्डातप=सूर्य (सुलोचनागणनयनकमलविकासभानो, इदं रामसम्बोधनम्) एतेन रमणीयताद्योतिता । शरदां=वर्षाणां सहस्राणि=चिरं तप=प्रकाशशालितां प्राप्नुहि, यशःपूरं=कीर्तिप्रसारं दूरं=दूरस्थप्रदेशनिचयव्यापकं तनु=विस्तारय। इयञ्च त्रिजगती=लोकत्रयी युष्मच्छरैः=भवद्बाणैः शमितस्य=हतस्य लङ्केश्वरस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

तदनुजानीहि माम् । (इति निष्क्रान्तः) ।

रामः—(लक्ष्मणं प्रति) ननु कथं नयनपथमतिक्रान्त एव भग तदेहि । भृगुकुलतिलकवियोगखिन्नमात्मानं बन्धुजनविलोकनेन विनोदयावः।

(इति निष्क्रान्ताः सर्वे)

इति चतुर्थोऽङ्कः ।

—०—

अथ पञ्चमोऽङ्कः

(ततः प्रविशतो गङ्गा-यमुने)

गङ्गा—सखि कालिन्दि, किमिति दुर्मनायसे ?

यमुना—भअवदि, भाईरहि, अत्थि कालणम् (भगवति, भागीरथि, कारणम्) ।

गङ्गा—कीदृशं तत् ?

यमुना—एक्कं दाव । अत्थि मह भादा सुग्गीवो त्ति । (एकं तावत्, मम भ्राता सुग्रीव इति) ।

गङ्गा—(सकौतुकम्) (आत्मगतम्) अये, कथमस्याः कपिकु

=रावणस्य शिरोभिः श्रितः=आश्रित उत्सङ्गः=क्रोडभागो यस्यास्तथा (कि नन्दन्तः=प्रसन्नाः सुराः=देवाः, नराः=मनुष्याः, भुजङ्गाः=सर्पाश्च यस्यां आस्ताम्=जायताम् । त्वं चिरं जीव, यशस्वी भव, तव बाणै रावणे हते शिरांसि पृथिव्याः क्रोडे विलुठन्तु, देवा मनुष्याः सर्पाश्च प्रसीदन्ति भावः । रावणे हते सर्वेषां प्रसन्नता भाविनीति बोध्यम् । शिखरिणीच्छन्द अनुप्रासोऽलङ्कारः ॥४८॥

नयनपथम्—अतिक्रान्तः=दृष्टिवर्त्मनो बहिर्भूतः । (दूरं गत इत्यर्थः)

इति श्रीरामचन्द्रमिश्रकृतप्रकाशव्याख्यासहिते 'प्रसन्नराघवे' चतुर्थोऽङ्कः ।

—०—

दुर्मनायसे—दुर्मनाः=खिन्ना भवसि । 'कर्त्तुः क्यङ् सलोपश्चेति' साध

RajGuru Math, Shrivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

ऽपि भ्राता ? (विमृश्य) उपपन्नमिदम् । अनयोः खल्वेक एवायं प्रसविता विता । (प्रकाशम्) अथ किन्तस्य ?

यमुना—सोतिबलिट्ठेण दुट्ठवलीमुहेण वालिणामहेएण परिहूदो एक्कदुग्गसरणो कइपअपरिवारो चिदि (सोऽतिबलिष्ठेन दुष्टवलीमुखेन वालिनामधेयेन रिभूत एकदुर्गमात्रशरणः कतिपय-परिवारस्तिष्ठति)।

गङ्गा—नन्विमावपि भ्रातरौ । तत् किमनयोरीदृशं वैरायितम् (इत्यर्धोक्त व) अथवा 'एकामिषाभिलाषो हि बीजं वैरमहातरोः' इति ख्यातमेतत् । किमनेन । द्वितीयमपि कारणं कथय तावत् ।

यमुना—कस्सिंपि दिअहे गहीअतवस्सा विअ मम्महवसन्ता दोवि तरुणा टाहरा एक्का चक्कवाकत्थणी चन्दवअणा मं उत्तरिअ दक्खिणं चलिदुं उवन्ता । (कस्मिन्नपि दिवसे गृहीततपस्याविव मन्मथवसन्तौ द्वावपि तरुणौ टाधरौ एका चक्रवाकस्तनी चन्द्रवदना मामुत्तीर्य चलितुमुपक्रान्ताः)।

गङ्गा—ततस्ततः ?

यमुना—तदो अ तीए खणं विलम्बिअ पणमिअ मुउलिअकरकमलजुअलाए अहमेरिसं विण्णत्ता । 'अयि देवि दिणअरणन्दिणि, पुणोविणिअकुडुम्बस्स दंसणपसादं करेसु' त्ति । (ततश्च तया क्षणं विलम्ब्य प्रणम्य मुकुलितकरयुगलयाऽहमीदृशं भणिता—अयि देवि दिनकरनन्दिनि, पुनरपि निजकुटुम्बस्य दर्शनप्रसादं (कुरुष्व) ।

उपपन्नम्—यमुनाभ्रातृत्वं सुग्रीवस्य युक्तम् । प्रसविता=जनकः ।

दुष्टवलीमुखेन—दुष्टवानरेणेत्यर्थः ।

एकामिषाभिलाषः—एकस्य=समानस्य आमिषस्य=मांसस्य (फलस्येत्यत्र बोध्यम्) अभिलाषः वैरम्=शत्रुत्वमेव महातरुः=महावृक्षस्तस्य मूलभूतम् बीजम् । एकं फलमभिलष्य प्रवृत्तयोर्द्वयोः स्वार्थसङ्घर्षकृतं वैरमवश्यं भावीत्यर्थः।

गृहीततपस्यौ—तपस्वित्वं गतौ । मन्मथः=कामः । चक्रवाकस्तनी, परस्परसम्मिलितत्वमौपम्यप्रयोजकं बोध्यम् ।

मुकुलितेति—मुकुलितम्=परस्परसंयुक्ततया मुकुलभावं प्राप्तम् (अञ्जलीकृतम्) ।

दिनकरस्य—सूर्यस्य नन्दिनि=तनये । निजकुटुम्बस्य=स्ववंशस्य । दर्शन-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

गङ्गा—तत्कथं सम्भावयसि ?

यमुना—(गङ्गायाः कर्णे) एव्वमेव (एवमेव)।

गङ्गा—असम्भावनीयमिदम्। तन्नूनमावर्त्तभ्रमितहृदया किमप्यलीकमनुभूतवती। (विमृश्य) अथवा को जानाति विधेः संविधानवैदग्ध्यम्।

यमुना—जइ संवुत्तो ता कहं भअवदीए ण गोअरो इमो वुत्तन्तो (यदि संवृत्तस्तत्कथं भगवत्या न गोचरोऽयं वृत्तान्तः)।

गङ्गा—न किञ्चिदेतत्। मया हि ब्रह्मलोकादागतायाः सरस्वत्याः समागमसुखव्यग्रचित्तया स्थितम्। तदेहि। इयमदूरे सरयूः। तेन हि तन्मुखान्निरूपयामः।

(इति परिक्रामतः)

(प्रविश्य)

सरयूः—देव्यौ, नमो वाम्।

उभे—आलि, अवितथमङ्गला भव।

गङ्गा—(सरयूं हस्ते गृहीत्वा) सखि, कथं तापनिमग्नमङ्गकन्ते ?

प्रसादम्=दर्शनप्रदानेन कृपाम्।

एवमिव—(रामवनवासवृत्तमिदमपवार्य भणितम्)।

आवर्त्तः—अम्भसां भ्रमः (स्यादावर्त्तोऽम्भसां भ्रमः) तस्य शब्दे भ्रमितं=चलीकृतं हृदयं यस्याः सा। अलीकम्=मिथ्या। विधेः=विधातुः संविधानस्य=रचनायाः।

वैदग्धीम्—चातुर्यम्।

गोचरः—ज्ञानविषयः, (सर्वज्ञतायां विश्वस्याऽयं प्रश्नः)।

समागमः—सम्मिलनं तेन सुखम्=आनन्दस्तेन व्यग्रं=सम्मूढं यस्यास्तया।

अवितथम्—सत्यम् मङ्गलं यस्यास्तथा।

प्रतीपम्—विपरीतम् ('वामौ वल्गुप्रतीपौ' इत्यमरः)

तापनिमग्नम्—सन्तप्तम् अङ्ककमित्यत्रानुकम्पायां कन्। सन्तापदर्शनाच्चानुकम्पोदयः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

सरयूः—भगवति, प्रतीपमाभाषसे । ननु लज्जापङ्कनिमज्जनमनुभवन्त्या ऽर्धावलम्बनोऽयमङ्गसन्ताप इति ।

गङ्गा—स्पष्टं तावदावेदय ।

सरयूः—बहलगलितैः सन्तापोष्णैस्तटान्तविहारिभि-
र्दशरथपुरीपौरस्त्रीणां विलोचनवारिभिः ।
उपचयवतीं सन्तापोष्णां निजां दधती तनू-
मिह मुहुरहं मातर्लज्जां वहामि जहामि च ॥ १ ॥

गङ्गा—(सातङ्कम्) किं पुनरासामश्रुवृष्टेः कारणम् ?

सरयूः—(गङ्गायाः कर्णे) एवमेवम् ।

गङ्गा—हा इन्दुमतिनन्दन, हा सकललोकहृदयानन्दनचन्दन, हा महाको-

अर्धावलम्बनः—अर्धांशेन विश्रामप्रदः । तापानुभवेनैव जीवाम्यन्यथा लज्जया म्रियेयेत्यर्थः ।

बहलगलितैरिति—बहलं=बहु गलितैः=च्युतैरत्यर्थप्रवृत्तैरित्यर्थः, सन्तापेन=रामवनवासदशरथमृत्युभवेन शोकेन उष्णैः=तप्तैः, स्तटान्ते=कूलप्रान्ते विहारिभिः=सञ्चरद्भिः, दशरथस्य पुरी=अयोध्या तस्याः पौरस्त्रीणां=पुरनारीणां विलोचनवारिभिः=अश्रुजलैः, उपचयवतीं=समृद्धजलां, सन्तापोष्णां=शोकसन्तप्ताम्, निजां=स्वीयाम् तनूम्=देहम् (प्रवाहमितीहप्रकृतोऽर्थः) दधती=धारयन्ती, अहं=सरयूः इह=अवसरेऽस्मिन् मातः=गङ्गे (श्रेष्ठतया तथा सम्बोधनम्) लज्जां=त्रपाम् वहामि=धारयामि (अनुभवामि) जहामि=त्यजामि च (लज्जामित्यत्राप्यनुषञ्जनीयम्) शोककार्श्यावसरे कायोपचयेन लज्जावहनोपपत्तिः, सन्तापेन शोके प्रकाशिते तत्त्यागस्य चोपपत्तिरनुमेया । अत्र विलोचनवारिविशेषणैरश्रुप्राचुर्यं तेन तत्पुरवनितानां दशरथविषय आदरातिशयः प्रकाश्यते । हरिणीवृत्तमेतत् ॥ १ ॥

एवमेवम्—(दशरथनिधनवृत्तं कथ्यमानं बोध्यम्)

इन्दुमतिनन्दन—इन्दुमती=अजपत्नी तस्याः नन्दन, पुत्र, ङ्यापोरिति ह्रस्वः (संज्ञायाम्) ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

दण्डपण्डित, हा आखण्डलप्रियसख, हा निजतनयनिर्विशेषप्रीतिपरिपालित लोक, हा रामभद्रैकजीवित, (इति मूर्च्छति)

सरयूः—(स्वगतम्) अस्यैव विलसितमेतत् ।

गङ्गा—हा महाराज, दशरथ, (इति मूर्च्छिता पतति)

यमुना—(अंशुकाञ्चलेन वीजयन्ती) भअवदि, समास्ससिहि समास्स णं इमेहिं जेव्व गुणेहिं असोअणिज्जो सो राआ । (भगवति, समाश्वसिहि स सिहि, नन्वेतैरेव गुणैरशोचनीयोऽसौ राजा)

गङ्गा—(सरयूं प्रति) सखि, तवैव न केवलमयं तापः, सर्वजनसा खल्वसौ । तदेनं रामभद्रच्छत्रच्छाययाऽपनोदयामः ।

सरयूः—(निश्वस्य) भगवति, न खल्वप्रोषितसलिलसेकः कमले परिशुष्यति ।

गङ्गा—स्पष्टं तावत्कथय ।

(सरयूधरस्फुरणं नाट्यति)

गङ्गा—अलमलम् । कथं दावानलशोषितायां तरुशाखायां कुठारमा तुमिच्छसि, अथवा कथय तावत् ।

सरयूः—(स्वगतम्) अहो,

निजतनयनिर्विशेषा—स्वपुत्रसदृशी प्रीतिः=स्नेहः ।

अस्यैव—रामभद्रैकजीवितत्वस्यैव, विलसितम्=कृत्यम् । रामवनव तत्प्राणा निर्गता इत्येवमुक्तिः ।

रामभद्रः—रामचन्द्रस्तस्य च्छत्रम्=आतपत्रम् तस्य च्छाया । तया द विरहकृतं तापं रामे राजनि तद्गुणगणगौरवेण विस्मराम इति प्रासङ्गिको

अप्रोषितः—अवियुक्तः, सलिलसेकः=जलकृतं सेचनं यस्य सः केदारः=कमलाकरः 'केदारः क्षेत्रमस्य तु' इत्यमरः । प्रसङ्गतस्त्वाकरो व्याख्या रामे राज्यधुरन्धरे दशरथस्य मरणं न सम्भवतीति हृदयम् । क्वचित् केदारः' इति पाठस्तत्र कलमाः=शालयः ।

दावानलेन—वनवह्निना शोषितायां=निर्जीवीकृतायाम् ।

इत्यन्तस्य वाक्यस्य हतं जिघांससीत्यर्थः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

न ज्ञातुं नाप्यनुज्ञातुं नेक्षितुं नाप्युपेक्षितुम् ।
सुजनः स्वजने जातं विपत्पातं समीहते ॥ २ ॥

(प्रकाशम्) रामभद्रमभिषेक्तुं कृतमनोरथं दशरथमेत्य कैकेयी प्रथमं वदिदमुक्तवती ।

इदमेव नरेन्द्राणां स्वर्गद्वारमनर्गलम् ।
यदात्मनः प्रतिज्ञा च प्रजा च परिपाल्यते ॥ ३ ॥

गङ्गा—(स्वगतम्) अनेनैव तावदकल्याणरुचिः सूचिता दुराशया । प्रकाशम्) चरमं च किम् ?

सरयूः—त्वया देयं यन्मे द्वयमभिहितं देहि तदिदं
वनं कौशल्येयो विशतु युवराजोऽस्तु भरतः ।

न ज्ञातुमिति—सुजनः=सज्जनः स्वजने=आत्मीयजने जातं=समुद्भूतं विपत्पातं=कष्टागमं न ज्ञातुं बोद्धुम्, नापि अवज्ञातुम्=अवधीरयितुम्, ज्ञात्वाऽप्यनुभवपथं नानेतुम्) नेक्षितुम्=न द्रष्टुम्, नापि उपेक्षितुम्=न पेयमितीदृशीं धारणां कृत्वा तिरस्कर्त्तुम् समीहते=वाञ्छति । सज्जनस्य हि हृदि जानतः कष्टमतिविषमा मनोदशा जायते, करणीयनिर्धारणाक्षमत्वापात त्यर्थः ॥ २ ॥

इदमेवेति—नरेन्द्राणां=राज्ञामनर्गलं=निष्प्रतिरोधं स्वर्गद्वारम्=स्ववर्त्म दम्=वक्ष्यमाणरूपमेव । तदेवाह—यदिति । यत् आत्मनः=स्वस्य प्रतिज्ञा=प्रति- तिः प्रजा च परिपाल्यते=रक्ष्यते । राज्ञां कृते स्वर्गतेरुपायेषु निष्प्रतिरोध एक पायः प्रजाप्रतिज्ञयोः पालनरूप इत्याशयः । अर्गला=कवाटकीलकम् । विष्कम्भोऽर्गलं न नेति कोशः ॥ ३ ॥

अकल्याणे=अमङ्गले रुचिः=अभिलाषो यस्यास्तथाभूता । दुराशया=दु- भिप्राया ।

त्वया देयमिति—यत् द्वयम् त्वया=दशरथेन मे=मह्यं कैकेय्यै देयम् दातव्यम् (वरदानरूपन्देवासुरयुद्धे बहूपकृतवत्याः कैकेय्याः प्रसादाय वरद्वयं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

गङ्गा—(सोद्वेगम्) ततः किं वृत्तम् ?

सरयूः—इतीदं कैकेय्या वचनमधिगम्या कुलमतेः

पितुः पादौ नत्वा मुदितहृदयोऽसौ वनमगात् ॥ ४ ॥

गङ्गा—यमुने, तदिदं यत्कथितवत्यसि । (सविषादम्) हा रघुकुल... निहतमिति ?

यमुना—भ अवदि एक्कं किं रघुकुलकुटुम्बअणं । मिअमहेसिवणदेव... परिहरिअ सअलो जेव्व जीअलोओ रामचन्दमुहचन्दविलोअणवेहीणत्तणेण ...

(भगवति, एकं किं रघुकुलकुटुम्बकम् । ननु मृगमहर्षिवनदेवताः परिहृत्य ... एव जीवलोको रामचन्द्रमुखचन्द्रविलोकनविहीनत्वेन निहतः)

सरयूः—एवमेतत् ।

प्रोषितवति रजनिकरे बन्धुतया न खलु कैरवाण्येव ।

म्लायन्ति किन्तु सहसा भुवनान्यपि तमसि मज्जन्ति ॥ ५ ॥

राजा दत्तवाँस्तदेवाऽत्र देयत्वेन विवक्ष्यते) तदिदं देहि । तदेव वरद्वयम्... (१) कौशल्यायाः अपत्यं पुमान् कौशल्येयो=रामः वनं=काननं विशतु=... (२) भरतः=कैकेय्याः प्रथमः पुत्रो युवराजः=भाविशासकतया निश्चि... राजकुमारः अस्तु=भवतु । कैकेय्या इति–उक्तप्रकारम् इदं वचनमधिगम्य=... बुद्ध्वा (न तु श्रुत्वा, तावता विश्वासानुदयादिति भावः) आकुलमतेः=... मनसः पितुः पादौ=चरणौ नत्वा=प्रणम्य मुदितहृदयः=प्रसन्नचित्तः (पितृ... पूरणावसरलाभादिति भावः) असौ=रामः वनं=काननमगात्=गतवा... शिखरिणीवृत्तम् ॥ ४ ॥

यत् कथितवत्यसि—पूर्वत्वयदेमुक्तम्='द्वौ सुन्दरौ तपस्विवेषौ ... एका सुन्दरी तरुणी च मामुत्तीर्य दक्षिणं दिगवकाशं गताः' इति ।

मृगमहर्षिवनदेवताः परिहृत्य—रामे वने निवसति तद्दर्शनशीत... त्वात्तद्दशामित्यमुक्तिः ।

प्रोषितवतीति—रजनिकरे=चन्द्रमसि प्रोषितवति=प्रवासं व्रजति (... इत्यर्थः) बन्धुतया=सौहार्देन कैरवाणि=कुमुदानि एव केवलं न खलु

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

गङ्गा—एवमेतत्। परं सखि सरयु, कथय तावत्, कीदृशी वृत्तिः सीतालक्ष्मणयोर्वत्सरामभद्रे।

सरयूः—तौ हि तस्य सदैव सन्निहितौ चन्द्रिकाप्रसादाविव चन्द्रमसः। अतो नास्त्येव यादृशी चन्द्रिकाप्रसादयोश्चन्द्रमसि।

गङ्गा—(स्वगतं, सहर्षम्) कथं सहैव वनं गतावित्युक्तं भवति। (प्रकाशम्) सखि, जीवितास्मि तावदनेन वागमृतेन। क्षणमपि हि रामचन्द्रविरहमनुभवितुमसहा मे वत्सा जानकी।

सरयूः—एवमेतत्। रामचन्द्रेण हीदमुक्ता जानकी—

'अम्बाः शुश्रूषमाणा मे शरदः कतिचिन्नय'।

न्ति=संकुचन्ति, कष्टमनुभवन्तीति भावः। किन्तु=परन्तु सहसा=हठात् (एकपद एव) भुवनानि=लोका अपि तमसि=अन्धकारे मज्जन्ति अप्रकाशा भवन्ति।। यथा चन्द्रमसि प्रोषिते कुमुदैः सह भुवनान्यपि दुःखायन्ते तथैव रामे वनं गते रघुकुलं भुवनं च क्लिश्यत इति भावः। वृत्तमार्याप्रभेदः। 'सिते कुमुदकैरवे' इत्यमरः॥ ५॥

वृत्तिः—व्यवहारः।

सन्निहितौ—समीपस्थौ। चन्द्रिका=कौमुदी, प्रसादः=औज्ज्वल्यात्मागुणः (यथा गुणानां गुणिवृत्तिता निश्चिता तथा रामसहवृत्तिता सीतालक्ष्मणयोरित्याशयः)।

असहा—असमर्था।

अम्बा इति—मे अम्बाः=मातॄः (न तु मातरम्) शुश्रूषमाणा=परिचरन्ती त्वं कतिचित्=कतिपयाः, शरदः=संवत्सरान् नय=व्यतिगमय। अत्र 'मे' इत्युक्त्या ममोपकारोऽनेन त्वया क्रियमाणेन मातृगणसेवाविधिना भवति, तेन त्वया स्थातव्यम्, इति अम्बा इति बहुवचनेन तिसृष्वपि मातृषु समवृत्तिता सूच्यते। 'कतिपयास्समा' इति तावतः कालस्य सुखव्यत्यापनीयतां द्योतयितुमुक्तम्॥ ६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

इदमाकर्ण्य तथा मूर्च्छिता जानकी यथा स्वजनकरोपनीतशीतशीक… सिक्ताऽपि न प्रबुद्धा।

यमुना—ता उण कहं पवुद्धा (तत्पुनः कथं प्रबुद्धा)

सरयूः—'वनं वनजपत्राक्षि समागच्छ सहैव वा ॥ ६ ॥

इत्यनेन रामवचनामृतेनैव।

गङ्गा—उचितमिद जानकी स्नेहस्य।

यमुना—अवि णाम रामलक्खणाणं वि कोवि संवादो संवुत्तो।
(अपि नाम रामलक्ष्मणयोरपि कोऽपि सम्वादः सम्वृत्तः।)

सरयूः—अथ किम्। इदमुक्तो हि रामचन्द्रेण लक्ष्मणः—

गमय वत्स, निमील्य विलोचने
कतिचिदत्र निमेषसमाः समाः।
अपि च मामिव शीलसुशीतलं
शुभरतं भरतं परिशीलय ॥ ७ ॥

स्वजनकरैः—आत्मीयजनबाहुभिः, उपनीतानां=शीतसीकराणाम्=शी… जलबिन्दूनाम् आसारैः=धारासम्पातैः सिक्ता=(आत्मीयवर्गेण शीतलजल… नोपचरितेत्यर्थः) 'शीकरोऽम्बुकणाः स्मृताः', 'धारासम्पात आस… इति चामरः।

वनमिति—वनजं=जलजं तस्य पत्रम्=दलं तद्वदक्षिणी यस्यास्तत्सम्बु… 'बहुव्रीहौ सक्थ्यक्ष्णो' रिति षच्, षित्त्वान्ङीष्। (मया) सहैव वा समाग… =आयाहि। श्वश्रूगणसेवातोऽपि यदि मया सह वनवासमेव रोचयसे तदनु… मामिति रामस्याशयः ॥ ६ ॥

गमयेति—वत्स, लोचने=नयने निमील्य=पिधाय निमेषः=पक्ष्मपात… युक्तः समयः तत्समाः=तत्तुल्याः कतिचित् समाः=वर्षाणि अत्र गमय=व्यति… पय। अपि च मामिव शीले=स्वभावे शीतलं=शान्तमनुग्रमिति यावत् शुभे… =कल्याणे रतं=प्रवृत्तं भरतं परिशीलय=सेवस्व। लोचने निमील्येत्युक्त्वा…

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

इदमुक्तं च लक्ष्मणेन । अये रघुनाथ,

त्वया समं मे चत्वारि यामा एव युगान्यपि ।
चतुर्दश समाः स्थातुं विना मन्वन्तराणि मे ॥ ८ ॥

अपि च—

त्वया मम समेतस्य कल्पा अपि समासमाः ।
भवता विप्रयुक्तस्य कल्पकल्पः क्षणोऽपि मे ॥ ९ ॥

गङ्गा—अपि नाम कौसल्ययाऽपि किञ्चिच्छिक्षितो रामभद्रः ?

सरयूः—अथ किम् । सा हि—'अयि वत्स, रामभद्र, सीताम्' इत्यर्धोक्त बाष्प, रुद्धकण्ठीदमुक्तवती । 'अथवा वत्स, लक्ष्मणे रक्षितरि को भवान् तासमीक्षणस्य ? तदिदं तावदभ्यर्थयामि ।

इह दुग्धमुखे वत्से लक्ष्मणे दक्षिणो भव ।
अपि राज्योपभोगेभ्यो यस्य त्वं सहजप्रियः ॥१०॥

ाध्यत्सु कोपस्याभाव आदिष्ट इति व्यज्यते । 'शुभरतं भरतं,' 'निमेषसमाः मा:' इति चानुप्रासः । द्रुतविलम्बितं वृत्तम् ॥ ७ ॥

त्वयेति—त्वया=रामेण समं=सह मे=लक्ष्मणस्य चत्वारि युगानि=कृता-युगानि अपि यामाः=प्रहरा एव अतिसुयाप्या इति भावः । (त्वया) विना चतुर्दशसमाः=चतुर्दशवर्षाणि स्थातुं मन्वन्तराणि कल्पतुल्याः । अतिकष्ट-तिगमनीया इति तात्पर्यम् । "मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः" ौ यामप्रहरौ समौ' इति चामरः ॥ ८ ॥

त्वया ममेति—त्वया=रामेण समेतस्य=सहितस्य मम कल्पाः=मन्वन्त-रयपि समासमाः=वर्षतुल्याः । 'हायनोऽस्त्री शरत्समाः' इत्यमरः । भवता प्रयुक्तस्य=वियुक्तस्य मे क्षणः=सूक्ष्मतमः कालः अपि कल्पकल्पः=मन्वन्तर-ल्यः । ईषदूने कल्पप् । त्वया सह स्थातुमेवं मम जीवितमितरथा नरक-त्रणेति तात्पर्यम् ॥ ९ ॥

को भवान् सीतासमीक्षणस्य—किमपि तत्र कर्त्तव्यं नास्तीति भावः, ुर्वस्यापि प्रबन्धस्य लक्ष्मणेन करणीयत्वमत्र द्योत्यम् ॥

इहेति—इह=अस्मिन् दुग्धमुखे=स्तन्यपायिनि (अतिबालत्वे तात्पर्यम्)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

इदमुक्तं च रामभद्रेण—अपि मातः, निजजीवितेऽपि दक्षिणेन भ मित्यपि शिक्षणीयमेव।

गङ्गा—तन्नूनं ततः प्रभृति सहजसौन्दर्यमेवाभरणं वत्सरामस्य।

सरयूः—अन्यदप्येकम्। विमुञ्चन्सकलमाभरणजातमित्थमभ्यर्थितः सल्यया रामभद्रः।

हस्तावलम्बदानाय सीतामाङ्गल्यसम्पदः।
इदं विमुञ्च मा वत्स राम रत्नाङ्गुलीयकम् ॥ ११ ॥

इदमन्यच्च ते कथयामि। धीरा समाकर्णय।

गङ्गा—तदेतावदाकर्णितवतीमपि मामधीरामाशङ्कसे।

सरयूः—निकामं रामस्य प्रमुदितमुखाम्भोरुहरुचे-
र्जटावल्लीर्मल्लीमुकुलसदृशैर्बाष्पपृषतैः।

वत्से लक्ष्मणे दक्षिणः=सावधानः (रक्षार्थमिति पूरणीयम्) भव=ज यस्य=लक्ष्मणस्य त्वं राज्योपभोगेभ्यः=राजकीयसुखेभ्यः अपि प्रियः=अ करः। यो राज्यसुखं हित्वा त्वामनुयाति तस्मिन् बाले लक्ष्मणे त्वया स हितेन स्थेयमिति तदाशयः॥ १०॥

सहजसौन्दर्यम्—स्वाभाविकी सुन्दरता, आभरणम्=अलङ्कारः। स्विवेषेण वनं गच्छता रामेण भूषणानां हीयमानत्वादिति तात्पर्यम्॥

हस्तावलम्बेति—हे वत्स राम, सीताया माङ्गल्यसम्पदः=सौ सम्पत्तेः हस्तावलम्बदानाय=आश्रयप्रदानाय इदं रत्नाङ्गुलीयकम्=रत्न मङ्गुलिपरिधेयं भूषणविशेषम् मा विमुञ्च=न त्यज। एतन्मात्रमाभूषणं येति भावः॥ सीतामाङ्गल्येत्युक्त्या भावि सीताकल्याणरूपतदन्वे सूच्यते, एतच्च नाटकीयं बीजं वस्तु॥ ११॥

एतत्-रामवनगमनम्, आकर्णितवतीम्=श्रुतवतीम्। अधीरां=दु (चपलाम्, यया रामवनगमनं श्रोतुं शक्तं तया किमपि कष्टं वृत्तं श्रोत मयि वृथाऽधीरात्वं संशय्यत इति भावः॥

निकाममिति—निकामम्=अत्यर्थं प्रमुदिता=प्रसन्ना मुखाम्भोरुहरु

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

निषिञ्चन् सौमित्रिः कथमपि वितेने खलु यदा
तदा जातं मातः, करुणमयमेतज्जगदपि ॥ १२ ॥

यमुना—अवि णाम तस्सिं समये सीदावि किंवि सिक्खिदा बन्धुअणेण
[अपि नाम तस्मिन् समये सीताऽपि किमपि शिक्षिता बन्धुजनेन]

सरयूः—अयि देवि, विपरीतमालपसि ।

गहनविपिनवासोत्कण्ठया सम्प्रयातं
प्रियतममनुयान्त्या तत्क्षणं राजपुत्र्या ।
चरणकमलगुञ्जन्मञ्जुमञ्जीरशब्दैः
स्फुटतरमुपदिष्टा बान्धवाः साधु वृत्तम् ॥ १३ ॥

कमलस्य रुचिः=कान्तिर्यस्य तस्य=प्रसन्नवदनकमलकान्तेरित्यर्थः, एतेन वनगमनाभिलाषो व्यक्तः । रामस्य, मल्लीमुकुलसदृशैः=स्वनामप्रसिद्धशुक्लवर्णपुष्पविशेषकलिकातुल्यैर्बाष्पपृषतैः=अश्रुविन्दुभिः कथमपि महता क्लेशेन, निषिञ्चन्=आर्द्रीकुर्वन् लक्ष्मणः यदा=यस्मिन्काले (रामस्य) जटावल्लीं वितेने कृतवान् खलु मातः, तदा=तस्मिन्समये एतत् जगत् अपि (न केवलमयोध्यापुरी) करुणमयं=करुणार्द्रं जातम् । प्रसन्नमुखे रामे वनं गच्छति रुदता लक्ष्मणेन रामस्य शिरसि जटायां निर्मीयमाणायां सम्पूर्णमिदं भूमण्डलं शुचा दुतमदूयतेति भावः । 'मल्लीमुकुलसदृशै'रित्यनेन वाष्पविन्दूनां स्थूलता ख्याप्यते । शिखरिणीवृत्तम् ॥१२॥

विपरीतम्—सीतया लोकाः किमपि शिक्षिताः इति प्रष्टव्ये सीतालोकैः किमपि शिक्षितेति विपरीतम् ।

गहनेति—गहने=घने विपिने=कानने वासः=स्थितिस्तत्र उत्कण्ठा=उत्कटकोटिकोऽभिलाषस्तया सम्प्रयातं=प्रचलितं प्रियतमं=दयितम् (एतेनानुगमस्य हेतुरुक्तः) तत्क्षणम्=तत्कालम् (एतच्च विलम्बाभावव्यञ्जनद्वारा सीतायाः सदा रामानुगतत्वमाह) अनुयान्त्या=अनुसरन्त्या राजपुत्र्या=सीतया चरणकमले =पादसरोजे गुञ्जतः=शब्दायमानस्य मञ्जुनः=सुन्दरस्य मञ्जीरस्य=नूपुरस्य शब्दैः बान्धवाः=आत्मीयजनाः साधुवृत्तम्=साधुजनोचितं समुदाचारम् स्फुटतरम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

इदं तु वृत्तम् ।

पुरः कान्तं यान्तं विपिनमनुयान्त्याः सरभसं
तदादौ सीतायाः किसलयनिभौ वीक्ष्य चरणौ ।
मुहुः शीतास्तप्ताः किमपि च मुहुर्बन्धुनयनैः
समं मुक्ता मुक्तासदृशरुचयो बाष्पकणिकाः ॥१४॥

गङ्गा—इदं बन्धुजनेन शिक्षितो रामभद्रः ।—

बाला विदेहतनया तरलौ भवन्तौ
दिग्दक्षिणा च रजनीचरचक्रदुष्टा ।

=स्पष्टम् उपदिष्टाः=शिक्षिताः । साधुवृत्तमाचरन्ती सीता स्वादर्शेन पुरि मनसि तं भावमुदपादयदिति भावः । मालिनीवृत्तम् । मञ्जीरशब्दा वचनानीवेति गम्योत्प्रेक्षा ॥१३॥

पुरःकान्तमिति— पुरः=अग्रे विपिनं=वनम् यान्तं=गच्छन्तं कान्तमिनम् सरभसम्=त्वरया अनुयान्त्याः=अनुगच्छन्त्याः सीतायाः तदादौ गमनप्रारम्भकाले किसलयनिभौ=बालपल्लवकान्तियुजौ चरणौ=पादौ =(स्नेहवेगात्) पुनः पुनः वीक्ष्य=दृष्ट्वा बन्धुनयनैः=बान्धवजनलोचनैः =शीतलाः तप्ताः=उष्णाश्च मुक्तासदृशरुचयः=मौक्तिकतुल्यकान्तयः बाष्प अश्रुविन्दवः समं=सहैव मुहुः=बहुवारं मुक्ताः=पातिताः । वनं व्रजन्तीं दृष्ट्वा बान्धवा रुरुदुरित्यर्थः । पुरोयान्तमिति रामस्यात्मनिर्भरता, 'किस निभौ' इति चरणविशेषणेन कष्टसहनाक्षमता, तया चाश्रुप्रवाहस्य त्वम्, 'शीतास्तप्ताः' इति पदाभ्यां=हर्षशोकजन्यत्वमित्यादयोऽर्था द्योत अत्र शीतत्वं सीतया पतिरनुव्रज्यत इति तदीयपतिपरायणतादर्शनहेतु त्वञ्चेदृशौ पल्लवकोमलौ चरणौ कथमुद्धातिनीं वनभूमिं गन्तुं पारयि दुःखकृतमश्रुणि बोध्यम् । शिखरिणीवृत्तम् ॥१४॥

बालेति— विदेहतनया=जानकी बाला=अल्पवयाः, एतेन तस्याः विकं भीरुत्वमुक्तम् । भवन्तौ=युवाम् तरलौ कैशोरकृतचाञ्चल्ययुतौ । तद्रक्षणानवहितत्वसम्भावना दर्शिता । दक्षिणा च दिक् रजनीचराणां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

तद्वत्स, वत्सलतयेदमुदाहरामो

मा राम, गच्छ नयदक्षिण, दक्षिणाशाम् ॥१५॥

गङ्गा—ततस्ततः ।

सरयूः—ततस्तामेव दिशं प्रति—

सुरमुरजगभीरधीरनाद – द्विगुणगुणध्वनिचापदत्तहस्तः ।

पुरजननयनैः कृतं दधानः कुवलयदाम जगाम रामभद्रः ॥१६॥

यमुना—को उण सो अवसरो सुरमुरअसद्दस्स (कः पुनः सोऽवसरः रजशब्दस्य) ।

गङ्गा—सखि, न जानासि? गभीरं ध्वनद्भिः खलु सुरमुरजैः किमपि गभीरमेव ध्वनितम् ।

दुष्टा=भीषणा । अनेन सीताया भयस्य भूयान्सम्भवः समर्पितः । तस्मात् वत्सलतया=स्नेहेन इदं=वक्ष्यमाणस्वरूपम् उदाहरामः=ब्रूमः । किमित्याह—हे वत्स !, नयदक्षिण, राम, दक्षिणाशाम्=दक्षिणदिशम् । मा गच्छ=न याहि । 'वत्सलतया' इत्यनेन वञ्चकत्वं निराकृतम्, 'नयदक्षिण' इत्यनेन च नीतिज्ञतया हितवचने बद्धादरतासम्भावना व्यक्ता । वसन्ततिलकं वृत्तम् ॥ अनेन श्लोकेन भावि सीताहरणलक्ष्मणतारख्यादिकमिङ्गितेन सूचितमनुसन्धेयम् ॥१५॥

सुरमुरजेति—सुराणां=देवानां मुरजाः=मृदङ्गास्तेषां गभीरो धीरश्च यो नादः=शब्दस्ततो द्विगुणो=द्व्यावृत्तो गुणस्य=ज्यायाः ध्वनिर्यस्य स चासौ चापः धनुस्तत्र दत्तः=न्यस्तो हस्तः=करो येन तादृशः, (देवमृदङ्गशब्दाधिकशब्दध्वनि धनुषि न्यस्तहस्तः) केचित्तु रामवनगमनसमये देवा मृदङ्गानवादयँस्तद्घोषे रामधनुर्ज्याशब्दो द्विगुणीकृत इत्याशयमाहुः । पुरजननयनैः=नगरवासिलोचनैः कृतं=रचितं कुवलयदाम=नीलकमलमालां दधानः=धारयन् पुरवासिजननयनानि प्रभासाम्येन नीलकमलमाला, तस्याः स्वदेशात्वजनं हरणं बोध्यम्) रामभद्रः=रामचन्द्रो जगाम, तामेव दिशमिति पूर्वोक्तमनुसन्धेयम् ॥ पुष्पिताग्रावृत्तम् ॥ परिणामश्चात्रालङ्कारः, आरोप्यस्य कार्योपयोगित्वात् ॥१६॥

ध्वनद्भिः—शब्दायमानैः, गभीरम्=गूढार्थम्, ध्वनितम्=व्यक्तीकृतम् ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

(पुनः सविषादम्) हा दशरथ, सकलगुणसम्पदां भाजनं भूत्वाऽपि भाजनं न जातोऽसि !

यमुना—कहं उण सो राआ तुह्मेहिं पसंसीअदि जेण तारिसो तुणं विअ मुक्को। (कथं पुनः स राजा युष्माभिः प्रशस्यते येन तनयस्तृणमिव मुक्तः ?)

सरयूः—शान्तं पापम्।

नरेन्द्रः कैकेयीवचनपरिपाटीविगलितः
क्षणं मोह–क्रोध–प्रसरभरयोरन्तरचरः ।
सुतं चोरग्रस्तो मणिमिव करस्थं न कृपण–
स्तृणानीव प्राणान् पुनरयममुञ्चद्दशरथः ॥१७॥

यमुना—अवि णाम भरदस्स णाणुमदमिदम् (अपि नाम भरतस्य मतम् इदम्)।

सरयूः—अये, भरतस्य मातुलकुलादागतस्य कैकेय्याश्च संवाद दास्यति।

नरेन्द्र इति—नरेन्द्रः=राजा दशरथः कैकेय्या वचनपरिपाट्या= विगलितः=च्युतधृतिः, क्षणं=कियन्तं कालम्—अत्यन्तसंयोगे मोहः=रामवनगमनविषयकाभ्यर्थनाश्रवणजन्मा खेदः क्रोधः=कैकेय्या स्थः कोपस्तयोः प्रसरभरौ=समुदायौ तयोरन्तरचरः=मध्यवर्त्ती, कदा कदाचिच्च कोपमनुभवन्नित्यर्थः। चोरग्रस्तः=तस्करैः ग्रस्तः=धृतः कृप =हस्तस्थितं मणिं=रत्नमिव दशरथः सुतं=रामचन्द्रं न अमुञ्चत (व एव तत्त्यागः) किन्तु तृणानि इव प्राणान्=जीवनममुञ्चत=त्यक्तवा कोऽपि कृपणश्चोरग्रस्तः करस्थं मणिं नार्पयति प्राणांस्त्वर्पयति तथैव द प्राणानेव तत्याज न राममित्यर्थः। अत्रोपमालङ्कारेण रामवनगमने कृपणेन धनहानाविव महत्कष्टमासादितमित्यर्थो ध्वन्यते ॥ शिखरि मण्युपमया च रामे जगदालोकप्रदत्वं, कृपणोपमया च राजनि रामे प्र प्रकटिते ॥१७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

गङ्गा—कीदृशः पुनरसौ ।

—मातस्तातः क्व यातः ? सुरपतिभवनं, हा कुतः ?, पुत्रशोकात्,
कोऽसौ पुत्र—? श्चतुर्णां त्वमवरजतया यस्य जातः, किमस्य ?
प्राप्ताऽसौ काननान्तं किमिति ? नृपगिरा, किन्तथाऽसौ बभाषे ?
मद्वाग्बद्धः, फलन्ते किमिह ? तव धराऽधीशता, हा हतोऽस्मि ॥ १८॥

गङ्गा—(सहर्षम्) वत्स भरत, भवसि रामानुजन्मा ।

मातरिति—मातः, तातः=पिता क्व यातः=कुत्र गतः ? इति भरतप्रश्नः । सुरपतेः=इन्द्रस्य भवनं=गृहं स्वर्गम् गत इति पूरणीयमिदं च कैकेय्यास्तत्प्रतिवचनम् । हा=खेदे, कुतः=कस्मात् (स्वर्गगमने तातस्य को हेतुः ?) इति प्रश्नः । पुत्रस्य शोकात्=तददर्शनजन्मनो मनोदुःखादिति कैकेय्या उत्तरम् । कोऽसौ पुत्रः ? (यद्वियोगे तातः प्राणानत्याक्षीदिति भरतजिज्ञासा । चतुर्णां पुत्राणां चतुष्टयस्य मध्ये त्वं यस्यावरजतया=कनिष्ठतया जातः असीति शेषः, तस्य ज्येष्ठस्य वियोगेन राजा प्राणानजहादिति तस्याः समाधानम् । अस्य=मज्ज्येष्ठभ्रातुः श्रीरामस्य किम्=कीदृशं वृत्तमजनि येन राजेश्वरीमतिभूमिं गतं खेदमनुभवति स्मेति भरतस्य प्रश्नः । असौ रामः काननान्तं=वनप्रान्तं प्राप्तः=गतः । तस्य वनवासो दत्त इति तदुत्तरम् । किमिति ? कुतो रामो वनं गत इति प्रश्नः । नृपगिरा=राजादेशेन, स वनं गत इति पूरणीयमित्युत्तरम् असौ=राजा किम् (येन रामो वनं गच्छेत्) किं=कस्मात् कारणात् बभाषे इति भरतस्य प्रश्नः । मद्वाग्बद्धः=मया स्वदत्तयोर्वरयोः पूरणायागृहीतस्तथोक्तवान् इति कैकेय्या उत्तरम् । इह=एतादृशे दुष्कर्मणि ते=तव (राजमान्याया राजपुत्र्याश्च) किं फलम् ? किमुद्दिश्य त्वयैतादृशे दुःखे रामः राजा च पातिताविति भरतस्य जिज्ञासा । तव=भरतस्य धराधीशता=पृथिवीपतित्वम् (एव मदीदृशदुरभिसन्धेः) फलमिष्टमिति कैकेय्या उत्तरस्याशयः । हा हतोऽस्मि, यदि मामेवाऽत्र कार्ये हेतुभूतं विहितवत्यसि तदा मदुद्धारप्रकारो नास्तीति मम महदनिष्टमापतितमिति भावः ॥ स्रग्धरा छन्दः ॥१८॥

रामानुजन्मा—रामकनिष्ठः । रामवदुदारहृदयतया तथोक्तिः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

सरयूः—रामे प्राप्ते वनान्तं कथमपि भरतश्चेतनां प्राप्य तातं
नीत्वा देवेन्द्रलोकं मुनिजनवचनादूर्ध्वदेहक्रियाभिः ।
भ्रातुः शोकाभितप्तः स्वजनपरिवृतः पालयामास नन्दि-
ग्रामे तिष्ठन्नयोध्यां रघुपतिपुनरागामिभोगापवीरः ॥१९॥

यमुना—तदो तदो (ततस्ततः)

सरयूः—अहमेतावदेव जानामि । ततः परं तद्वृत्तान्तनिरूपणा[य] कमलवनवासी कोऽपि कलहंसः प्रस्थापितो मया ।

(प्रविश्य)

कलहंसः—देव्यः, इदं नमो वः ।

तिस्रः—अयि कमलावतंस, कलहंस, मङ्गलमन्दिरं भव ।

गङ्गा—अये, कथय तावद्वत्सानां मे प्रथमतः प्रभृति पथि चरितानि ।

रामे प्राप्ते इति—भरतः रामे वनान्तं=विपिनप्रान्तं प्राप्ते=गते [मुनि]जनानां=वसिष्ठादिमुनिगणानां वचनात्=अनुरोधप्रसूतात् प्रवर्त्तनवचसः क[थमपि] =केनापि प्रकारेण चेतनां=संज्ञां (न तु प्रागिव सुस्थताम्) प्राप्य=[लब्ध्वा] ऊर्ध्वदेहक्रियाभिः=श्राद्धादिभिः तातं=दशरथं देवेन्द्रलोकं=स्वर्गं नीत्वा=[प्रापय्य] भ्रातुः=रामस्य शोकेन=वियोगजन्यदुःखेन अभितप्तः=सन्तप्तः, स्वजनेन=[स्वजन]वर्गेण परिवृतः=वेष्टितः, नन्दिग्रामे=तदाख्येऽयोध्यानिकटावस्थिते नगरे [तिष्ठन्] =निवसन् रघुपतेः=रामस्य पुनः आगामिनो=भविष्यतो भोगस्य=राज[सुखस्य] अपवीरः=अभोक्ता अयोध्यां पालयामास=ररक्ष ॥ रामे आगते राजसुखं [तस्मै] प्रत्यावर्त्तनीयमिति स्वयं ततो विरक्तो नन्दिग्रामे वसन्भरतः शास[नम्] (रामसेवकरूपेण) चालयामासेति सारांशः ॥ स्रग्धरावृत्तम् ॥१९॥

तद्वृत्तान्तस्य—तत्समाचारस्य, निरूपणाय=निश्चयात्मकज्ञानाय, [प्रस्था]पितः=प्रेषितः ।

वत्सानाम्—वत्सौ (रामलक्ष्मणौ) वत्सा (जानकी) तेषाम्, '[पुमान्स्]त्रिया'त्येकशेषः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

हंसः—विघ्नानिवानुसरतो विनिवार्य पौरा-
नग्रे स्वयं नय इवैष जगाम रामः ।
एनं विभूतिरिव सानुजगाम सीता
तां लक्ष्मणस्तु सुखलाभ इवान्वगच्छत् ॥२०॥

गङ्गा – ततस्ततः ।

हंसः—ततः कियत्यपि दूरे पथिकलोकेनेदमुक्तस्ते वत्सवर्गः—

पन्थाः समः सिकतिलो मृदुशाद्वला भू-
र्वेतस्वती सरिदियं शिशिरा न दूरे ।
अग्रे चकास्ति सरसी सकुमुद्वतीयं
कादम्बकूजित-करम्बितहंसनादा ॥ २१ ॥

विघ्नानिवेति—अनुसरतः=पश्चाच्चलतः पौरान्=नागरिकान् विघ्नान् (पित्राज्ञापालनस्य, देवकार्यानुष्ठानस्य वा) प्रत्यूहानिव विनिवार्य=परावर्त्य (ए)ष रामः स्वयम्=आत्मना नयः=नीतिरिव अग्रे=पुरतो जगाम । एनम्=अग्रे (गच्छ)न्तं रामं विभूतिः=सम्पदिव सा सीताऽनुजगाम=अनुवव्राज, तां=सीतां (ल)क्ष्मणस्तु (विभूतिं) सुखलाभ इव अन्वगच्छत्=अन्वसरत् । विघ्नानपसार्य (नी)त्या वर्त्तमानस्य सुखसम्पत्ती अतिसुलभे, तदयमर्थः कविनात्राऽलङ्कारमार्गेण (क)थायां निर्दिष्टः, रामो नयः, सीता विभूतिः, लक्ष्मणः सुखलाभः, पौरा विघ्ना (इ)ति यथोचितं सादृश्यप्रतियोग्यनियोग्यादिकं निरूपणीयम् । उपमाऽत्रालङ्कारः । (व)सन्ततिलकं छन्दः ॥२०॥

पन्था इति—पन्थाः=मार्गः समः=अनिम्नोन्नतः, सिकतिलः=बालुकावान् (देशः-सिकतावान्-सिकतिलः, तथा चामरः—"स्त्री शर्करा शर्करिलः शार्करः (श)र्करावति, देश एवादिमावेव मुन्नेयाः सिकतावति") भूः=पृथिवी मृदुशाद्वला (=)कोमलघासा इयं शिशिरा=शीतला वेतस्वती=वेत्रलतायुता (च) सरित् (=)नदी (च) न दूरे=समीपे एव अस्तीति शेषः । अग्रे=पुरः सकुमुद्वती=कुमुदिनीसहिता-सरसी-सरः चकास्ति=प्रकाशते, सरस्याः प्रकाशवत्त्वे कारणमाह–

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अन्यच्च--तरुरयमितः शीतच्छायः स्रवन्मधुशीकरः
सरिदियमितः स्वच्छस्वल्पप्रवाहमनोहरा ।
इदमिदमितः स्निग्धामोदं मुहुर्मधुरध्वनन्-
मधुकरवधूमुग्धाभोगं वनं सरसीरुहाम् ॥ २२ ॥

गङ्गा—अहो, अध्वभ्रमशमनानि पथिकजनवचनानि ।

यमुना—तदो तदो [ततस्ततः]

भीतं विलोक्य हरिणं करुणार्द्रचित्ता
पत्युर्निजेन पिदधे धनुरंशुकेन ।

कादम्बेति । कादम्बाः=कलहंसाः तेषां कूजितानि=शब्दास्तैः करम्बिताः=मिश्रिताः हंसानां नादाः=ध्वनयो यत्र तथाभूता (सरसी प्रकाशत इत्याशयः) 'समः' 'सिकतिलः' इत्याभ्यां मार्गस्य सुगमता, 'मृदुशाद्वला' इति भुवो पिच्छिलता, वेतस्वतीत्युक्त्या सरित्तटस्य नितान्तशीतता, 'सकुमुद्वती' इति प्रसादजननक्षमता, कादम्बेत्यादिना च श्रवणसुखावहत्वं प्रकटितानि ॥ 'शाद्वलो ऽल्पतृणं घासः' 'कुमुद्वती कुमुदिन्याम्' 'कादम्बः कलहंसस्तु' 'हंसः श्वेतगरुतः' इति सर्वत्राऽमरः । वृत्तं तदेव ॥ २१ ॥

तरुरयमिति—इतः=अस्मिन् भागे (सार्वविभक्तिकस्तसिः) शीता=अनुष्णा च्छाया यस्य तथा, (तथा) स्रवन्तः=च्यवमानाः मधुनः=पुष्परसस्य शीकराः=विन्दवो यतस्तादृशः, अयम्=अङ्गुल्या निर्दिश्यमानः तरुः=वृक्षो (अस्तीति शेषः) इतः स्वच्छः=अमलिनः स्वल्पः=पादतरणीयः प्रवाहो=जलवेगो यस्यास्तथा भूता इयं सरित्=नदी । अत्राप्यस्तीति सम्बन्धनीयम् । इतः स्निग्धः=प्रिय आमोदः=सुगन्धो यस्य तत्, मुहुः=पुनः पुनः मधुरं=रक्तकण्ठं ध्वनन्तीभिः=शब्दायमानाभिः मधुकरवधूभिः=भ्रमरीभिः मुग्ध रमणीय आभोगः=मण्डलं यस्य तथाभूतं सरसीरुहां=कमलानां वनम् इदम् अस्तीति पूरणीयम् । शीतच्छाय इति वासयोग्यता, नद्याः स्वच्छस्वल्पप्रवाहतया पेयजलोपलब्धिः पारगमनचिन्ताराहित्यं च द्योत्यन्ते ॥ हरिणीवृत्तमेतत् ॥ २२ ॥

भीतमिति—करुणया=निरुपधिपरदुःखप्रहाणेच्छया आर्द्रं=क्लिन्नं युक्तमि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

केदारसीम्नि सदयं च यवप्रवाह-
मानाय साधु विदधे श्रवणावतंसम् ॥२३॥

अन्यच्च—तटभुवि सरसीनां सैकते निम्नगानां
परिसरमपहातुं चक्रवाकीं प्रियस्य ।
क्षणमपि न समर्था लोलमालोकयन्ती
पथि जनकतनूजा प्राप हर्षं शुचं च ॥२४॥

गङ्गा—एवमनुकम्पनीयवत्सला मे जानकी । (पुनः सखेदम्) अपि तावत् पथि-

---

...श्रित्तं=हृदयं यस्यास्सा (सीता) भीतं=भययुतं (रामधनुषो दर्शनेन) ...णं विलोक्य=निरीक्ष्य, स्वीयेन अंशुकेन=परिधेयवस्त्राञ्चलेन पत्युः=स्वामिनो ...=चापं पिदधे=तिरोदधे । केदारस्य=क्षेत्रस्य सीम्नि=सीमप्रदेशे यवप्ररोहं ...वमञ्जरीं सदयम्=सकृपम् (न तु निरनुक्रोशम्) आदाय=गृहीत्वा (नतू- ...त्य) साधु=यथासङ्गतं श्रवणावतंसम्=कर्णभूषणं विदधे=कृतवती । अत्र ...नेत्यनेन साधनान्तरान्वेषणकृतविलम्बासहत्वसूचनया पराकोटिर्दयायाः ...टिता । वसन्ततिलकमेव वृत्तम् ॥ २३ ॥

तटभुवीति— सरसीनां=सरोवराणां तटभुवि=तीरदेशे, निम्नगानां=नदीनां ...ते वालुकामये पुलिने प्रियस्य=दयितस्य परिसरं=पार्श्वदेशं क्षणम्=कियन्तं ...मपि अपहातुं=त्यक्तुम् न समर्थां चक्रवाकीं=कोकीं लोलं=चञ्चलम् आलोक- ...न्ती जनकतनूजा=सीता पथि=मार्गे (वनगमनवर्त्मनि) हर्षं=प्रीतिम् शुचं ...न्तापञ्च प्राप=प्राप्तवती । अत्र चक्रवाकवध्वाः सततपतिसहवासदर्शनेन ...स्या अपि नित्यसहस्थितेः स्मृत्या हर्षः भाविना तस्या निशि निजप्रियेण ...हेण चानुसन्धीयमानेन सीतायां अपि सम्भाव्यस्वप्रियतमवियोगजन्यः शोक ...बोध्यम् । रामदृष्टितो गोपयित्वा सीता चक्रवाकीं यथोक्तगुणां वीक्षते, ...नुरागाणां स्वानुरागप्रकटने वैरस्यापातादिति लोलमित्युक्तम् ॥ मालिनी- ...न्दः ॥ २४ ॥

अनुकम्पनीयेषु—कृपापात्रेषु वत्सला=सस्नेहा, पथिकनीतिः=पान्थरीति- ...पा शीतलानि=समसुखानि ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

कनीतिशीतलानि मे वत्सानां शीलानि ?

हंसः—कीदृशी पुनः पथिकनीतिः ?

गङ्गा—यावत्कर्णं तपति तपनस्तावदेव प्रयाणं
विश्रामश्च प्रसरति रवेरंशुजाले कराले ।
यात्रोद्योगः पुनरपि रवेर्लम्बमाने विमाने
यावन्मीलत्यथ कमलिनी तावदावासबन्धः ॥२५॥

हंसः—भगवति, अनवस्थितमिदं नित्यपथिकानाम् ।

गङ्गा—हन्त, कथं कठोरातपस्पर्शमपि जानन्ति जानकीललिताङ्गानि।

हंसः—अलं कातरतया ।

अपि तपति पतङ्गे चण्डचण्डैर्मयूखैः
पथि जनकतनूजा नैव सन्तापमाप ।

यावदिति—तपनः=सूर्यः यावत्=यत्कालावधिकर्णं तपति, (... दिशं प्रस्थितस्योदितः प्रभातकालिकः सूर्यः प्रहरमेकं सार्द्धं वा प्रहरमेकं ... तपेत्ततः परतस्तु व्योममध्यगतः स शिरस्तपेन्न कर्णम्, अतः प्रहरमेकं सा... प्रहरमित्यर्थः) तावत्=तत्कालपर्यन्तमेव प्रयाणं=यात्रा रवेः कराले=भी... जाले च प्रसरति=व्यापके विश्रामः=विरामः । रवेः विमाने=रथे (... लम्बमाने=अस्ताचलोन्मुखे पुनः अपि यात्रायाः=पुरः प्रयाणस्य उद्योगः। यावत् कमलिनी मीलति=सङ्कुचिता भवति (सूर्यास्तसमसमयम् इत्यर्थः) ... आवासबन्धः=निवासोद्योगः (करणीय इत्यर्थः) मन्दाक्रान्तावृत्तम् । ... शब्दः पाणिनीयसूत्रैः साधयितुमशक्यत्वेऽपि प्रचुरप्रयुक्तः ॥ २५ ॥

नित्यपथिकानाम्—ते हि प्रतिदिनमितस्ततः प्रचरेयुरतो यथोचितस्था... लाभेनेमं नियमं पालयितुं न शक्नुयुरिति भावः ॥

अपि तपतीति— पतङ्गे=सूर्ये चण्डचण्डैः=अत्युग्रैः अपि मयूखैः=... तपति=प्रकाशमाने जनकतनूजा=सीता पथि=वनगमनमार्गे सन्तापं=घर्म... कष्टम् नैव आप=प्राप्तवती । तत्र कारणमाह—अपरिचितेति । प्रियस्य (...

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

गङ्गा—(सकौतुकम्) कथमिव ?

हंसः—अपरिचितनिमेषालोकमालोकयन्ती
कुवलयदलदामश्याममङ्गं प्रियस्य ॥ २६ ॥

गङ्गा—प्रियतमस्नेहशीलतया सीतया न केवलमात्मा वयमपि जीविताः ।

सरयूः—पालिताश्च ।

हंसः—अप्युच्चण्डैस्तपनकिरणैस्तापितायां पृथिव्या-
मप्यन्येषां कठिनवपुषां दुर्गमे मार्गसीम्नि ।
प्रेमार्द्रेण प्रगुणितधृतिश्चेतसा शीतशीतान्
मेने सीता प्रियतमपदैरङ्कितान्भूमिभागान् ॥ २७ ॥

पत्युः) कुवलयदलं=कमलपत्रं तस्य दाम=माल्यम् तद्वत् श्यामं=कृष्णवर्णम् अङ्गं=तनुम् अपरिचितः=अज्ञातः निमेषस्य=पक्ष्मपातस्यालोकः=प्रकाशो यत्र तथेति क्रियाविशेषणम्=निर्निमेषमित्यर्थः । आलोकयन्ती=पश्यन्ती । कमल-कोमलं रामवपुः पश्यन्ती प्रचण्डेऽप्यातपे पद्भ्यामेव वनप्रान्ते सञ्चरमाणा सीता न कष्टमनुबभूवेति भावः। अत्र रामाङ्गस्य कुवलयदलश्यामतोक्त्या संताप-हरणसामर्थ्यम्, अपरिचितनिमेषेत्युक्त्याऽनुरागप्राचुर्यम्, चण्डचण्डैरपीत्यपिना मन्दातपस्यागणनीयत्वं चोक्तम् । मालिनीवृत्तम् ॥ २६ ॥

आत्मा—यथोचिताचरणजन्यपुण्यवत्तया सार्थकीकृतः, वयं तच्छुभैकानुध्या-यिनः प्रसादिताः इत्यर्थः ।

अप्युच्चण्डैरिति—उच्चण्डैः=अतितीव्रैस्तपनकिरणैः= सूर्यकरैस्तापितायाम् =उष्णीकृतायां पृथिव्याम् भुवि, कठिनं=वातातपसहतया कठोरं वपुः=शरीरं येषां तेषाम् अन्येषामपि दुर्गमे=दुष्प्रचरेऽपि मार्गसीम्नि=पथि प्रेमार्द्रेण=स्नेहसि-क्तेन चेतसा=हृदयेन प्रगुणितधृतिः=सधैर्या, सीता प्रियतमपदैः=रामचन्द्र-चरणैः अङ्कितान्=चिह्नितान् भूमिभागान्=पृथिवीखण्डानि शीतशीतान्=अतिशी-तलान् मेने=मन्यते स्म । यत्र वर्त्मनि चण्डातपतापिते कठोरवपुषोऽपि गन्तुम-शक्तास्तत्रापि पुरश्चलतो रामस्य चरणचिह्नानि पश्यन्त्याः सीतायाः शीतताप्रत्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

यमुना—अइ ताद, दिणअर, कहं णिअकुडुम्बेवि णिक्करुणो सि संवुत्तो

[अयि तात दिनकर, कथं निजकुटुम्बेऽपि निष्करुणोऽसि संवृत्तः]

सरयूः—अयि देवि वसुधे, कथं निजसुतायामपि सीतायामेवं, निर्दया संवृत्ता ?

गङ्गा—(विहस्य) अलमनयोरुपालम्भनेन, न खलु स्नेहानुगुणप्रवृत्त- महाभूतवृत्तयः ।

हंसः—कान्तेनाथ प्रणयमधुरं किञ्चिदाचञ्चलेन
श्रान्ता श्रान्ता जनकतनया वल्कलस्याञ्चलेन ।
चक्रे वीतश्रमजलकणस्निग्धमुग्धाननश्रीः
श्रान्तः श्रान्तः स पुनरनया लोचनस्याञ्चलेन ॥ २८ ॥

यजन्मा त्वरितः पदविन्यासोऽजायतेति भावः । स्वाभाविकः स्नेहः प्रकृतिम- परिवर्त्तयतीति तात्पर्यम् । स्रग्धरावृत्तम् ॥ २७ ॥

निष्करुणः—निर्दयः, यदेवं तापयसीति भावः ।

अनयोः—सूर्यवसुधयोः, उपालम्भनेन=तिरस्कारेण । महाभूतानां=क्षित्या- बादीनाम् । वृत्तयः=व्यवहाराः ।

कान्तेनेति—अथ श्रान्ता श्रान्ता=परिश्रान्ता जनकतनया=सीता कान्तेन =प्रियतमेन रामेण किञ्चिदाचञ्चलेन ईषच्चलता वल्कलस्य=तरुत्वग्विनिर्मि- तस्य परिधानीयस्य अञ्चलेन=एकदेशेन प्रणयेन=प्रेम्णा मधुरं=रुचिरं यथा स्यात् तथा सस्नेहमित्यर्थः, वीताः=अपसृताः श्रमजलस्य=परिश्रमकृतस्वेदवारिणः कणाः=बिन्दवस्तैः स्निग्धा=मनोहरा आननश्रीः=मुखरुचिर्यस्यास्तथाभूता वल्कलाञ्चलवायुना शमितश्रमस्वेदरुचिरवदनेत्यर्थः चक्रे=विहिता, पुनः श्रान्तः श्रान्तः स=रामः अनया=सीतया लोचनस्य=एकस्य नेत्रस्य अञ्चलेन प्रान्तेन कटाक्षेणेत्यर्थः (वीतश्रमजलकणस्निग्धमुग्धाननश्रीश्चक्रे इत्यन्वयः) अत्रापि पक्षेऽस्य विशेषणस्य प्रागुक्त एवार्थः । श्रान्तायाः सीतायाः श्रमापनो- दाय रामो वल्कलाञ्चलेन वीजयति स्म श्रान्तं च पुना रामं कटाक्षेणेक्षमाणा सीता प्रह्लादयति स्मेति भावः । अत्र अन्योन्यालङ्कारः—'अन्योन्यमेकक्रियायाः करणं मिथः' इति तल्लक्षणम् । मन्दाक्रान्तावृत्तम् ॥ २८ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

गङ्गा—अहो, विनिमयस्य कमनीता।

यमुना—तदो तदो [ततस्ततः]

हंसः—ततः।

प्रत्यासन्ने भवति निलये सम्प्रयाता पुरस्ता—
त्तूर्णं क्षिप्तैः कतिपयपदैश्चापमादाय हस्तात्।
श्रान्तं कान्तं नवकिसलयैः सानुजं वीजयन्ती
जाता सीता समुचितविधिप्रक्रियावैजयन्ती ॥ २९ ॥

(पुनः सकौतुकम्) इदमन्यच्च सरसपेशलं कथयामि ते।

जनकतनया हस्तन्यस्तैर्मुहुर्नवपल्लवैः
शिशिरमसृणस्तत्कालं यः समेति समीरणः।

विनिमयस्य—परिवर्तनस्य।

प्रत्यासन्ने इति—निलये=आवासस्थाने प्रत्यासन्ने=समीपस्थे भवति=जायमाने तूर्णं=त्वरया क्षिप्तैः=न्यस्तैः कतिपयपदैः=कतिभिश्चित् पादप्रक्षेपैः पुरस्तात्=अग्रतः सम्प्रयाता=गता सती सीता (रामस्य) हस्तात् चापं=धनुरादाय=गृहीत्वा नवकिसलयैः=बालपल्लवैः सानुजं=सलक्ष्मणं श्रान्तं=परिश्रान्तं कान्तं=प्रियतमं रामं वीजयन्ती=व्यजनवायुना सेवमाना समुचितो=यथोचितो विधिः=व्यवहारः (कुलाङ्गनोचितसमुदाचारः) तस्य प्रक्रियाऽनुष्ठानं तत्र वैजयन्ती=पताका जाता। वने चरतां तेषामावासे समीपमागच्छति सीता द्रुतपदन्यासमग्रतो गत्वा पूर्वमावासभूमावुपस्थाय पश्चादागतस्य रामस्य हस्ताद्धनुरादाय यथोचितस्थाने न्यस्य सानुजं श्रान्तं रामं नवकिसलयव्यजनेन वीजयित्वा कुलाङ्गनासमुदाचारपताकापदमलभतेति तात्पर्यार्थः॥ "पताका वैजयन्ती स्यात्" इति कोशः। तदेव वृत्तमत्रापि ॥ २९ ॥

जनकतनयेति—जनकतनयायाः=सीतायाः हस्तन्यस्तैः=करस्थितैः नवपल्लवैः=बालकिसलयैः तत्कालं=रामवीजनकाले यः शिशिरमसृणः=शीतलः सुन्दरः (सुगन्धयुतः) च समीरणः=वायुः समेति=उद्गच्छति। अमुना =सीताकरस्थकिसलयसमुत्थेन वायुना (रामस्य) कपोलयोः स्वेदोद्भूत

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

प्रशममुना स्वेदोद्भूतं जगाम कपोलयोः
सलिलमनयोः शोकोद्भूतं शशाम न नेत्रयोः ॥ ३० ॥

अपि च—कृतः स्थाने स्थाने विहितवरिवस्यापरिकरः
सुमित्रापुत्रेण श्रमशमनशीतो रघुपतिः ।
असावेतेनापि क्षणविरहवाष्पाञ्चितदृशा
कृतालोकश्चक्रे गलितसकलायासशिशिरः ॥ ३१ ॥

सरयूः—कियतां पुनरह्नां परिवर्त्तेन रघुराश्रमतिक्रान्तं वत्सैः ?

हंसः—अयि, कथमजानती वर्त्तसे रघूणामाधिपत्यम् ?

=श्रमजलसम्भवं सलिलं=वारि प्रशमं=समाप्तिं जगाम, (किन्तु) अ =सर्वं पश्यतोः नेत्रयोः=नयनयोः शोकोद्भूतं=मनोवेदनाप्रसूतं (सलिलं) शशाम=निवृत्तम् । सीतया नवकिसलयेनोपवीज्यमानस्य रामस्य का सन्तापजन्यकपोलप्रसृमरस्वेदविन्दुसमुदयशान्तावपि परिचरणकरणावस्था सीतासमीक्षणसमुत्पद्यमानमनोव्यथाजन्माश्रुप्रवाहस्तदक्षणोर्न व्यरमदित्याशय हरिणीच्छन्दः ॥ ३० ॥

कृतः स्थान इति—स्थाने स्थाने सुमित्रापुत्रेण=लक्ष्मणेन विहितः= वरिवस्यायाः=सेवायाः परिकरः=सम्भारो यस्य स रघुपतिः श्रमशमनेन=आ सशान्त्या शीतः=स्वस्थः कृतः (लक्ष्मणेन कृतशुश्रूषो रामः स्वं श्रममशमय त्यर्थः) क्षणविरहः=कादाचित्कः किञ्चित्कालव्यापी च यो विरहः=कार्यस दनादिना कारणेनान्यत्र गमने वियोगस्ततो वाष्प=मश्रु तेनाञ्चिता=युता यस्य तेन एतेन=रामेण अपि कृतालोकः=दृष्टः असौ=लक्ष्मणः अपि गलि =अपगतः सकलः=समस्त आयासः=परिश्रमस्तेन शिशिरः=शान्तसुस्थ =विदधे । लक्ष्मणः शुश्रूषया रामस्य श्रम मशमयत्, रामोऽपि कियन्तमपि का वियुज्य गतं पुनरायातं च लक्ष्मणं साश्रुनयनः पश्यँस्तस्य सकलमपि परि शिथिलमकरोत्, इत्याशयः । अत्राप्यन्योन्यालङ्कारः । शिखरिणीवृत्तम् ॥ ३१ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

एते हि स्वरसावनम्रनिखिलक्ष्मापालमौलिज्वलन्-
माणिक्यस्फुरदंशुमांसलपदप्रेङ्खन्नखज्योतिषः ।
दूरोन्मुक्तचतुःसमुद्रलहरीविक्षिप्तशुक्तिस्खलन्-
मुक्तापङ्क्तिविनिर्मितैकवलयं भूमण्डलं भुञ्जते ॥३२॥

उत्तरकोशलाधिपचतुरैरेवाहोभिरतिक्रान्ताः । अथ पुरमथनमौलिमालतीमालां मन्दाकिनीमचिरेण च कलिन्दगिरिकरिकपोलमदवारिधारां कालिन्दीमप्यतिक्रान्ताः ।

गङ्गा—(यमुनां प्रति) सखि, तदिदं यत्कथितवत्यसि ।

सरयूः—तपनसुतया देव्या यद्वा भगीरथकन्यया
विपुलविपुलैर्वीचीहस्तैश्चिरादपि किङ्कृतम् ।

एते हीति—स्वरसेन=स्वेच्छयाऽवनम्राणां=नतानां निखिलक्ष्मापालानाम् अखिलक्षत्रियराज्ञां मौलिषु=मूर्द्धसु ज्वलताम्=भासमानानां माणिक्यानां रत्नानां स्फुरद्भिः=दीप्यमानैः, अंशुभिः=किरणैः मांसलानि=समृद्धानि पदयोः चरणयोः प्रेङ्खतां=द्योतमानानां नखानां ज्योतींषि=कान्तयो येषां ते तथोक्ताः स्वेच्छाप्रणतसमस्तभूपालचूडामणिकिरणसमेधितचरणनखद्युतयः, इत्यर्थः । एते=रघुवंश्याः दूरादुन्मुक्ताः=प्रक्षिप्ताः चतुर्णां समुद्राणां=सागराणां लहर्यः=तरङ्गाः ताभिर्विक्षिप्ता याः शुक्तयः ताभ्यः स्खलन्त्या=पतन्त्या मुक्तापङ्क्त्या विनिर्मितं=रचितम् एकं वलयं=प्राकाररूपं मण्डलं यत्र तथा (चतुरुदधितरङ्गाहृतशुक्तिपतितमुक्ताप्रकरप्राकारपरिवृतं) भूमण्डलं=पृथ्वीवलयं भुञ्जते=पालयन्ति । अतः कियद्भिरनेहोभीरघुराज्यमतिक्रान्तं वत्सैरिति प्रश्नो न प्राप्तावसर इति भावः) शार्दूलविक्रीडितं वृत्तम् । उदात्तालङ्कारः ॥३२॥

पुरमथनस्य—शिवस्य, मौलेः=शिरसः, मालतीमाला=धावल्येन सरलतया च तत्त्वारोपः । कलिन्दस्तन्नामा गिरिः=पर्वत एव करी=हस्ती तस्य कपोलयोः=गण्डयोः मदवारिणः=दानवारिणः धाराम् । कालिन्दीमिति विवक्षा, नीलवर्णतया दानवारित्वोपचारः ।

तपनसुतयेति—तपनसुतया=यमुनया यद्वा=अथवा देव्या भगीरथकन्यया=गङ्गया विपुलविपुलैः=अतिदीर्घैः=वीचीहस्तैः=तरङ्गरूपैर्बाहुभिः चिरा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

ललितलवलीभङ्गैरङ्गैर्वनं चलिता सती
जनकतनया पाणौ धृत्वा न यद्विनिवारिता ॥३३॥

गङ्गा—(विहस्य) सखि, कथं परोक्ष इव समक्षेऽपि नितान्तमुपाल...

यमुना—तदो तदो (ततस्ततः)

हंसः—ततश्च शबरशरदलितविन्ध्यकरिकुम्भतटीविमुक्तमुक्ताफलप्र... किततीरलतावितानपरिच्छदां शर्मदां नर्मदामतीत्याचिरेण चपलक... रिमिलित-मदकरिकपोलचलितसहचरसमागममुदितमधुकरवधूमधुरसरसकु... गोदावरीपरिसरं प्रयाताः।

दपि=चिरकालेनापि किं कृतम्=न किमपि कृतमिति काक्वा व्यक्तम्। ... गङ्गा च वृथैव तालदीर्घान् वीचीकरानवहताम् इति भावः। तयोस्त... वैयर्थ्यं उपपादकमाह—ललितलवलीति-ललिता=सुन्दरी या लवली (ल... 'हरफावेर' नाम्ना हिन्दीभाषायां प्रसिद्धः फलविशेषः) तस्या भङ्गः=... =तत्सदृशैः (सादृश्यकृतोऽत्र तत्त्वारोपः) अङ्गैः=शरीरावयवैः (उपल... सती=पतिव्रता वनं=काननं चलिता=गन्तुं प्रवृत्ता (वनाय प्रस्थिता)... तनया=सीता पाणौ=करे (अवच्छेदकत्वमत्र सप्तम्यर्थः) धृत्वा यत्=... न विनिवारिता=रुद्धा। वनं गच्छन्तीं सीतां करे गृहीत्वा यदिमे गङ्... न न्यवारयतामतस्तयोरयं तरङ्गनिवहो वृथेति भावः। सीताप्रत्यावर्त्तन... कर्त्तव्यताद्योतनायेत्थमुक्तिः॥ हरिणीवृत्तम् ॥३३॥

शबराः—किराताः, शराः=बाणाः, दलिताः=भिन्नाः, विमुक्तानि=प्रक्षि... तारकितं=संजाततारकम्, वितानम्=मण्डपम्, शर्मदाम्=कल्याणप्रदाम्, ... लम्=चञ्चलम्, मदकरी=मदस्रावी हस्ती, सहचरः=सखा, मधुकरवधूः=... केसरः=किञ्जल्कः, परिसरः=पर्यन्तभूः। शबराणां शरैर्दलिताभिर्विन्ध्यक... तटीभिर्विमुक्तानां मुक्ताफलानां प्रकरेण तारकिताः=संजाततारका इव ('तदस्य संजातं तारकादिभ्य इतच्' इतीतच्) तीरलतास्तासां वितानानि प... =आवरणं यस्यास्ताम्, शर्म ददाति या तां नर्मदामचिरेण=त्वरयाऽतीत्य... चपलैः कर्णाञ्चलैः परिमिलितात्कपोलाच्चलितस्य सहचरस्य समागमेन मुदि... =प्रसन्नाभिर्मधुकरवधूभिर्मधुरं=सुन्दरं सरसं कुसुमकेसरं यत्र तथाभूतम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

यमुना—हद्धि, हद्धि, तत्थ हि लङ्केसरभइणी क्खणेण पमत्ता सुप्पणहा णाम रक्खसी परिब्भमई (हा धिक्, हा धिक्, तत्र हि लङ्केश्वरभगिनी क्षणेन प्रमत्ता शूर्पणखा नाम राक्षसी परिभ्रमति)।

गङ्गा—(तदाकर्ण्य) (सातङ्कम्) किं प्रतिपन्नं जनस्थाननिवासिना निशाचरचक्रेण ?

हंसः—करकलितकराल-कुन्तलकरवालकार्मुकेण निशाचरचक्रेण रामं प्रति प्रचलितम्।

गङ्गा:—ततस्ततः।

हंसः—ततश्चेदं विज्ञप्तः सौमित्रिणा रामभद्रः। आर्य, अयं मे

नक्तञ्चरेन्द्रभगिनीसुकुमारनासा-
निर्मुक्तरक्तलवलिप्तशितैकधारः ।
उत्कण्ठते कठिनराक्षसकण्ठजानां
पानाय कर्दमसृजामसृजां कृपाणः ॥३४॥

इदमुक्तश्च रामभद्रेण—'वत्स, अस्त्येतत्। किन्तु प्रकृतिभीरुः खल्वबलाजनः इति जानकीसनाथगर्भां पर्णशालामेव समुत्खातकरवालः पालयतु भवान्।

क्षणेन—क्षणं प्रमत्ता क्षणं सुचित्ता चेत्यभिप्रायमिदम्।

करेति०—करैः कलितानि=धृतानि करालानि=भीषणानि, कुन्तलः, करवालः खड्गः, कार्मुकं=धनुश्च तानि येन तत्तथा, तेन। निशाचरचक्रेण=राक्षसगणेन।

नक्तञ्चरेन्द्रेति—नक्तञ्चरेन्द्रस्य=राक्षसराजस्य भगिनी=शूर्पणखा तस्याः सुकुमारनासायाः=कोमलात् नासिकाग्रात् निर्मुक्तस्य=बहिर्भूतस्य रक्तस्य=शोणितस्य लवः=अंशस्तेन लिप्ता शिता=तीक्ष्णा एकधारा=तीक्ष्णाग्रभागो यस्य तादृशः, रावणभगिन्या शूर्पणखायाः कृत्ताया नासिकायाः वहमानेन शोणितेन सिच्यमान- इत्यर्थः, मे=मम लक्ष्मणस्य कृपाणः=खड्गः कठिनराक्षसानां=भयानकराक्षसानां कण्ठेभ्यो जाताः=कठिनराक्षसकण्ठजास्तेषां कर्दमसृजां=कर्दमोत्पादकानाम् असृजां शोणितानाम् पानाय=आस्वादनाय उत्कण्ठते=अभिलष्यति। अत्र कर्दमसृजाम् इत्यस्य प्रवाहरूपेण वहनम् आवेद्यते॥ वसन्ततिलकं वृत्तम्॥३४॥

जानकीसनाथः—तया सहितः, गर्भः=अभ्यन्तरं यस्यास्ताम्, समुत्खातः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

'अयमहमचिरात्' इत्यर्धोक्त एव निशाचरचक्रं प्रति प्रचलितः सम्मिलितश्

गङ्गा—(सत्रासम्) अनन्तरं किं वृत्तम् ।

हंसः—अथाहूतस्तादृक्समरजयसंरम्भरभस—
प्रसर्पद्गम्भीरध्वनिगरिमगर्जद्दशदिशम् ।
मुहूर्तात् सौमित्रिः ।

सरयूः—तत् किं रामेण ?

हंसः—नहि नहि ।

सरयूः—अयि देवि भागीरथि, त्रायस्व माम्, नूनं निशाचरच
वक्ष्यति ।

हंसः—विपिनचरनक्तञ्चरचमू—
वधक्रीडाकिञ्चिन्मुकुलितरुषा रामधनुषा ॥३५॥

=कोशादुद्धूतः करवालः=खड्गः ।

अथेति—अथ=रामे निर्गते मुहूर्त्तात्=क्षणमात्रेणैव तादृशि=महति =युद्धे जयः=साफल्यं तत्र=तद्विषये संरम्भरभसः=क्रोधवेगस्तेन प्रसर्पन्= शीलः गम्भीरः ध्वनिः=शब्दस्तस्य गरिमा=गौरवं तेन गर्जन्त्यः= दशदिशो यत्र कर्मणि तथा सौमित्रिः=लक्ष्मणः आहूतः=आकारितः मह जाते दशदिशोऽपि धनुष्टङ्कारादिरवेण प्रपूर्य लक्ष्मण आहूत इत्यर्थः । इति कर्त्ताऽत्र नोक्तोऽतः सरय्वा अग्रिमसन्देहकोटिद्वयोदयो बोध्यः ॥

किं रामेणेति—किं रामेणाहूतः ? इति प्रश्नस्य किं रामो विपत्तिग्रस्त लक्ष्मणमाहूतवान् इत्याशयो बोध्यः । एषा सरय्वाः प्रथमा शङ्का नहि त्युक्त्याऽस्यां समाहितायां परस्या उदयः ।

निशाचरचक्रेणेति—तैरेव जितवद्भिः प्रधानापराधी लक्ष्मण आहूतः त्यस्यां वीजम् ॥

विपिनेति—विपिनचरी=वनवर्त्तिनी या नक्तञ्चराणां=रक्षसां चमू तस्या बधः=घात एव क्रीड़ा (अनायासकृतत्वात्) तया किञ्चि मुकुलिता=फलाभिमुखी रुट्=कोपो यस्य तेन रामधनुषा—(सौमित्रिरा पूर्वोक्तेन सम्बन्धः) ॥३५॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

सरयूः—दिष्ट्या जीवितास्मि । सेयं प्रथमदर्शिततीव्रातपा पीयूषवृष्टिः ।

यमुना—तदो तदो [ततस्ततः] ।

हंसः—ततः प्रमुदितमुनिजनशतसमुद्भूतसाधुवादश्रवणविनोदेन कतिचिदहानि ...न्ति स्म ।

अथाविरासीत् कुरुविन्दलोचनो
द्रुमान्तरे विद्रुमशृङ्गशोभितः ।
विभक्तमुक्तामयचित्रमण्डनो
मनोऽपहारी हरिणो हिरण्मयः ॥३६॥

गङ्गा—(स्वगतम्) नूनमयमनर्थाङ्कुरः । (प्रकाशम्) ततस्ततः ।

हंसः—भ्रूवल्लीविजितमनोजचारुचाप-
श्चापश्रीजितयुवती-मनोरम-भ्रूः ।
सीतायास्यमनुससार लोचनान्तः
कान्तश्च स्फुरदसितोत्पलाभिरामः ॥३७॥

प्रथमं दर्शितस्तीव्रातपः=प्रचण्डातपो यया तादृशी पीयूषस्य=अमृतस्य ... वृष्टिः । अत्र रामविपत्तिसम्भावनाऽऽतपस्तद्विजयवार्त्ता चामृतवृष्टिः ।

अथाविरिति—अथ=कियत्सु दिनेषु व्यतीतेषु कुरुविन्दः=पद्मरागो लोचनं ...स्य स रक्ताक्ष इत्यर्थः । विद्रुमः=प्रवालः शृङ्गं=विषाणं तेन शोभितः=भूषितः, ...क्ता=परस्परव्यपवृक्ता या मुक्तास्तन्मयं=तत्स्वरूपं चित्रं=नानावर्णं मण्डनं ...भूषणं यस्य तादृशः, हिरण्मयः=स्वर्णमयः, मनोऽपहारी=हृदयग्राही हरिणः ...मान्तरे=वृक्षराशिमध्ये आविरासीत्=प्रकटितः । अथ कोऽपि विलक्षणस्तत्त-...णिगणरचितत्तदवयवः स्वर्णमयः सुन्दरश्च हरिणः कुतश्चिदागत्य तत्र द्रुमान्तरे ...टित इति भावः । वृत्तं वंशस्थम् ॥ अत्र हिरण्यशब्दान्मयटि यलोपश्चिन्त्यः ॥ ...सि दृष्टानुविधित्वात्कविकर्मणश्छन्दस्त्वाद्वासाधुत्वम् ॥३६॥

भ्रूवल्लीति—भ्रूरेव बल्ली=लता तया विजितः=अतिशयितो मनोजस्य=का-...देवस्य चारुः=सुरेः चापो=धनुर्येनेति (प्रथमं चरणं सीताया लोचनान्तस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

ततः—त्रासातुरेण हरिणेन सहैव तेन
दूरं प्रयाति हृदये जनकात्मजायाः ।
सौमित्रिराश्रमपदात्कृतचापपाणि-
र्द्राङ्निर्जगाम च विवेश च कोऽपि भिक्षुः ॥३८॥

गङ्गा—ततस्ततः ?

हंसः—ततः—

इतो वाणं रामः क्षिपति हरिणे मुक्तकरुणः
सचापः सौमित्रिः स्वजनमनुयाति द्रुतमितः ।

विशेषणम्) चापस्य=धनुषः श्रिया=शोभया जिताः=पराजिता युवतीनां ... रमाः भ्रुवो येन तथा (द्वितीयं चरणं रामस्य विशेषणम्) सीतायाः=(... कविशेषणः) लोचनान्तः, कान्तः=प्रियश्च तम्मृगमनुससार=अनुदधा... उभयोरपि साधारणं विशेषणमाह—असितं=नीलमुत्पलं=कमलं त... =तत्तुल्यकान्तिः, दृशि नीलवर्णस्य चमत्कारकरत्वाद्रामस्य च श्यामवर्णत्... मुक्तिः । सीतयाऽभिलाषसूचकदृशा हरिणे निरीक्ष्यमाणे रामस्तदा... तमन्वसरदित्यर्थः । अत्र यथासङ्ख्यमलङ्कारः । प्रहर्षिणीवृत्तम् ॥३७॥

त्रासातुरेणेति—त्रासातुरेण=सन्नद्धरामनाराचमुक्तशरभीतेन तेन=... कपरिचयेन हरिणेन=मृगेण सहैव जनकात्मजायाः=सीताया हृदये (रामे... विपयर्कचिन्तया क्षुभ्यमाने) चेतसि दूरं प्रयाते=गतवति कृतश्चापः पाणौ... व्यधिकरणबहुव्रीहिः, तादृशो लक्ष्मणः द्राक्=शीघ्रम् आश्रमपदात् नि... कोऽपि भिक्षुश्च (आश्रमपदं) विवेश=प्रविष्टः । यदैव हरिणो दूरम... लक्ष्मणो रामं विपन्नमुत्प्रेक्षमाणया सीतया बलवदनुरुद्धो धनुष्पाणि... द्बहिरभूद्रक्षकशून्ये चाश्रमे रावणः प्राविशदिति भावः ॥ वसन्ततिलकं वृ...

इतो वाणमिति—मुक्तकरुणः=निर्दयः राम इतः हरिणे=मृगे (... श्येत्यर्थः) वाणं=शरं क्षिपति=प्रहरति, इतः सचापः=धनुर्धरः सौमित्रिः=... त्रायाः पुमपत्यं=लक्ष्मणः द्रुतं=शीघ्रम् स्वजनं=निजात्मीयं राममनुयाति=... सरति । इतः सीता भिक्षोः=याचकस्य करतले=हस्ते भिक्षामुपनयति=...

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

इतः सीता भिक्षामुपनयति भिक्षोः करतले
त्रयं व्योम्नि प्रेङ्खन्युगपदहमालोकयमिदम् ॥३९॥

सरयूः—ततस्ततः ?

हंसः—ततः—

कनकहरिणगात्रे बाणपातावलोका-
द्विमुखहृदयवृत्तिर्लोचने सन्निमील्य ।
कथयितुमयि, चेदं रामवृत्तान्तजातं
सरयु ! तव तटान्तं तूर्णमेवाऽवतीर्णः ॥४०॥

तदनुजानीत मां देव्यः सलिलावगाहनाय, श्रान्तोऽस्मि ।

ोम्नि=वियति प्रेङ्खन्=उड्डीयमानः अहम्=हंसः । इदं=प्रागुक्तं त्रयं=रामकर्त्तृक-
रिणोद्देश्यकबाणप्रक्षेप, लक्ष्मणकर्त्तृकरामानुसरण, सीताकर्त्तृकभिक्षुसम्प्रदानक-
क्षार्पणरूपं कार्यत्रितयम् युगपत्=एककालावच्छेदेन आलोकयम्=अपश्यम् ।
तत्त्रयं समकालमेव समपद्यत मया चादृश्यतेति भावः, शिखरिणीवृत्तम् ।
त्र 'मुक्तकरुण' इति रामविशेषणेन तद्बाणस्यावश्यफलप्रदत्वम्, 'व्योम्नि
ङ्खन्' इत्यनेन च विभिन्नदिक्षु क्रियमाणकार्यत्रयावलोकनयोग्यत्वमावेदितम् ॥

कनकेति—कनकहरिणस्य=स्वर्णमृगस्य गात्रे=देहे बाणपातस्य=शरस-
र्कस्य अवलोकात्=दर्शनात् (हेतोः) विमुखी=ततःपरभाविवृत्तावलोकन-
रका वृत्तिः=मनोदशा यस्य सः (अहं हंसः) लोचने=नयने सन्निमील्य
मुद्रयित्वा (त्वरितमुपायान्तरस्य विधातुमशक्यत्वात् तथाविधानम्) अयि
रयु, इदं रामवृत्तान्तजातं रामसम्बन्धिसमाचारनिचयं कथयितुं त्वयि
निवेदयितुं च (चकारेण स्वमनोदशां परिवर्त्तयितुमपीत्यर्थोऽवगन्तव्यः) तव
टान्तं=कूलप्रान्तं तूर्णं=शीघ्रमेवावतीर्णः=आगतः (अस्मीति सम्बन्धनीयम्)
मोदयवशान्मृगस्य बाणवेधं द्रष्टुमशक्तस्त्वयि समाचारनिवेदनायाजिगमिषु-
ऽहं तव तटमागतोऽस्मीति भावः ॥ मालिनीवृत्तम् ॥४०॥

अनुजानीत—आज्ञापयत ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

तिस्रः—विहरास्मिन् रमणीये शुचिपयसि स्मेरनीरजे सरसि।
पुरतरुणीचरणरणन्मणिनूपुरकूजितोत्कुतुकः ॥४१॥

गङ्गा—सखि, सरयु, अनेन वृत्तान्तक्रमेण कातरं मे मनः।

सरयूः—अलं कातरतया, नन्वनेन हि नूपुररोद्भेदेन स्मृतं मया—वनगमनोद्यतां जानकीमिदमुक्तवती करकलितनूपुरद्वया पतिव्रता सीमन्ति[नी] अरुन्धती।

अधिचरणममू चमूरुनेत्रे
मृदुरणितौ मणिनूपुरौ विधेहि।
अहरपि विरहं न यन्महिम्ना
हरिणदृशः सह वल्लभैर्लभन्ते ॥४२॥

विहरेति—पुरतरुणीनां=नागररमणीनां चरणेषु=पादेषु रणतां=शब्दायमानानां मणिनूपुराणां=मणिमयमञ्जीराणाम् कूजितैः=शब्दायनैः उत्[कुतुकः] =समेधितविस्मयरसस्त्वम् अस्मिन्=पुरोदृश्ये शुचिपयसि स्वच्छ[जले] स्मेराणि=विकसितानि नीरजानि=कमलानि यत्र तस्मिन् रमणीये=सुन्दरे [सरसि] =सरोवरे विहर,=क्रीड़। अत्र तरुण्यां पुरेति विशेषणेनाग्राम्यताप्रतिपाद[नम्] विलासरसिकत्वप्रयुक्तं सलीलचरणन्यासकृतनूपुरध्वननम्, शुचि पयसील[...] च सरसो विशेषणत्रयेण विलासोपयुक्तत्वं ध्वन्यते ॥ आर्यावृत्तम् ॥४१॥

कातरं—खिन्नम्।

करकलितनूपुरद्वया—हस्तधृतमञ्जीरयुगला, सीमन्तिनी=नारी, ता[...] =अत्युत्तमा।

अधिचरणमिति—चमूरुनेत्रे=मृगनयने (सीते) अमू=इमौ मृदु[रणितौ] =मधुररवौ मणिनूपुरौ=मणिमयमञ्जीरौ अधिचरणं-चरणयोः निधेहि=[...] आग्रहे हेतुमाह—यन्महिम्नेति। ययोर्नूपुरयोर्महिम्ना=प्रतापेन हरिणदृशः=[...] लोचनाः वल्लभैः=प्रियपतिभिः अहः=एकं दिनमपि (अत्यन्तसंयोगे द्वि[...] विरहं=वियोगं न लभन्ते=आप्नुवन्ति। 'मृदुरणितौ' 'मणिनूपुरौ' इत्यु[...] पुनर्मञ्जीरयुगलप्रतापवर्णनं सीतायास्तादृशनूपुरेऽलोलुपत्वं व्यञ्जयति। पु[...] [...]वृत्तम् ॥ अधिचरणमित्यत्र विभक्त्यर्थेऽव्ययीभावः ॥४२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

कृतवती च तथा जानकी ।

गङ्गा—इदानीं किमपि निर्वृतास्मि । सत्यवादिनी हि मे सखी वसिष्ठगृहमे-...नी । तदागच्छत इमं वृत्तान्तं रघुकुलवत्सलाय सागराय निवेदयामः ।

(इति परिक्रामन्ति) ।

गङ्गा—(सविस्मयम्) अहो, प्रवाहवेगातिशयात्तत्क्षणादेव दूरमुपयाताः ...स्मो यदयमदूर एव गोदावरीसहचरः सागरः किमपि समाकल्पन्नालोक्यते कल्लो-...लिनीकान्तः ।

(ततः पविशति गोदावरीसहचरः सागरः)

सागरः—ततस्ततः ?

सरयूः—कथमिहापि किमपि वृत्तान्तशेषः प्रस्तूयते ?

यमुना—अवि णाम तं जेव्व हविस्सदि जं किर हंसेण णावगअम् ।

[अपि नाम तदेव भविष्यति यत्किल हंसेन नावगतम्]

गोदावरी—ततो—

रामोन्मुक्तैकवाणप्रणिहतहृदयः काञ्चनाङ्गः कुरङ्गः
सद्यो मारीचनामाऽजनि रजनिचरः सान्द्ररक्ताक्तवक्षाः ।

निर्वृता—शान्ता, सत्यवादिनी=अमिथ्याभाषिणी, (एतेन तत्प्रत्तनूपुर-...धारिण्याः सीताया रक्षसा हरणविषयकचिन्ताया अयुक्तत्वं ध्वनितम्) ।

वेगातिशयात्—वेगाधिक्यात् । कल्लोलिनीकान्तः=नदीनाथः ।

वृत्तान्तशेषः—प्रक्रान्तकथाचरमांशः ॥

नावगतम्—ज्ञातुं न पारितम् । हरिणमरणदर्शनविरक्तचेतस्तया यदज्ञात्वैवं ...हंसेन निवृत्तमिति भावः ॥

रामोन्मुक्तैकेति—रामेण उन्मुक्तः=प्रहृतो य एको वाणः=शरस्तेन प्रणिहतं ...=भिन्नं हृदयम्=उरःस्थलं यस्य तादृशः काञ्चनाङ्गः=सुवर्णघटितशरीरावयवः ...कुरङ्गः=मृगः (तद्वेषधर इत्यर्थः) 'मारीच' नामा-तदाख्यः रजनिचरः राक्षसः ...सद्यः=तत्क्षणात् (प्रहारसमकालमेव) सान्द्रेण=गाढ़ेन रक्तेन=शोणितेन अक्तं ...=रञ्जितं वक्षः—उरोदेशः यस्य तादृशो=सान्द्ररुधिराप्लावितवक्षा इत्यर्थः । अजनि ...=जातः । रामवाणाहतः कुरङ्गस्तमाकारं परिहृत्य रुधिराक्तवक्षोमारीचनामकासु-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

भिक्षुः सोऽपि क्षणार्धान्मणिखचितचलत्कुण्डलश्रेणिशोभा-
वीचीखेलत्कपोलस्फुरितदशशिराः कुम्भकर्णाग्रजोऽभूत् ॥४३॥

गङ्गा—हा, हतास्मि। (विमृश्य) अथवाऽस्ति तन्मणिनूपुरद्वयम्।

सागरः—अपि नाम मम वधूटिका स्पृष्टा निशाचरेण।

गोदावरी—न स्पृष्टा।

सागरः—कथमिव।

गोदावरी—तथाहि—

रजनिचरकराग्रस्पर्शसम्पातविघ्नं
रचयितुमनसूयादत्तहस्ताङ्गरागाम्।
बहलमनलपुञ्जः पिङ्गरज्योतिरुद्यन्
कुवलयदलशीतां संवृणोति स्म सीताम् ॥४४॥

रविशेषरूपेण परिणत इत्यर्थः ॥ सः=रामाश्रमप्रविष्टः भिक्षुरपि मणिखचि... =प्रत्युप्तरत्नानि यानि कुण्डलानि=कर्णाभरणानि तेषां श्रेणी=परम्परा ... शोभा सैव वीची (प्रवाहरूपतया) तरङ्गस्तया खेलद्भिः=क्रीडद्भिः कपोलैः... रितानि=चमत्कृतानि दश शिरांसि=मस्तकानि यस्य तादृशः कुम्भकर्णस्या... =ज्येष्ठभ्राता (रावणः) अभूत्=तदात्मना परिणतः। मणिखचितकुण्डल... ललितकपोलभासितदशसङ्ख्यकशिरा रावणः समपद्यतेति भावः ॥ स्र... वृत्तम् ॥४३॥

रजनिचरेति—रजनिचरस्य=राक्षसस्य रावणस्य कराग्रेण=हस्तपुरोभा... स्पर्शसम्पाते=स्पर्शकृतोपद्रवे विघ्नं=प्रत्यूहं रचयितुम्=विधातुमिव अनसू... =अत्रिमुनिपत्न्याः हस्तेन दत्तः अङ्गरागः=अनुलेपनद्रव्यविशेषः यस्यै सा... (राक्षसकरस्पर्शनिवारणाय इवानुभवन्त्या तत्सम्भावनामनसूयया दत्तः सी... एकोऽङ्गराग इति भावः) तादृशीं बहलम्-अत्यर्थम् उद्यन्=आविर्भवन् पि... ज्योतिः=पिङ्गलकान्तिः अनलपुञ्जः=वह्निसमूहः कुवलयदलं=कमलपत्रं ... शीतां=(भयविह्वलतया) शीतलाङ्गीम् सीतां संवृणोति स्म=परिवेष्टते ... अत्रिपत्नीदत्तोऽङ्गरागो रावणकरस्पर्शावसरे सीतायाः सर्वतो वह्निर्भूत्वा ताम...

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

सागरः—अहो, अत्रिपत्न्यास्तपःप्रभावः ।

गोदावरी—ततो वरुणमन्त्रचिन्तनाहूतनूतनवलाहकाञ्चननिचुलितपाणिर-यदेव ।

हा राम, हा रमण, हा जगदेकवीर,
हा नाथ, हा रघुपते, किमुपेक्षसे माम् ।
इत्थं विदेहतनयां मुहुरालपन्ती-
मादाय राक्षसपतिर्नभसा जगाम ॥४५॥

सरयूः—अयि भागीरथि, कथमस्मद्भागधेयादरुन्धतीवाचोऽपि मृषा विष्यन्ति ।

त्याशयः । 'शीताम्' अनेनात्यन्तभीतिहक्ता, वह्निवेष्टनजन्मानुपहतिश्च । लिनीवृत्तम् ॥४४॥

तपःप्रभावः—यदङ्गरागेण वह्निं प्रकटय्य सीता रक्षितेति भावः ।

वरुणेति—वरुणस्य=जलाधिष्ठातृदेवतायाः मन्त्रस्तस्य चिन्तनं=स्मरणं तेन हूताः=आकारिताः नूतनाः=सम्भृतसलिलाः वलाहकाः=मेघास्तेषामञ्चलेनाग्र-भागेन निचुलितः=वेत्रलतावत् कृतः पाणिर्यस्य तथाभूतः । यथा जलावृतो निचुलः पावकस्पर्शमपि सहते तथैवायमपि अनसूयादत्ताङ्गरागप्रकटितमग्निं ना-सारणयदिति भावः ॥

हा रामेति—रमण=प्रिय, एतेनानुपेक्षायां कारणमुक्तम् । जगदेकवीर संसारप्रधानपराक्रमिन्, एतेन त्राणसामर्थ्यं, तेन चोपेक्षायाः सर्वथाऽनौचित्यम् । नु मां किमुपेक्षसे=ह्रियमाणां न त्रायसे, नैतत्तवोचितमिति भावः । इत्थं=पूर्वोक्त-प्रकारेण मुहुः=पुनः पुनः आलपन्तीम्=अनुक्रोशन्तीं विदेहतनयाम्=सीताम् । आदाय=गृहीत्वा राक्षसपतिः=रावणः नभसा=आकाशमार्गेण जगाम । वसन्त-तिलकं वृत्तम् ॥४५॥

अस्मद्भागधेयात्—अस्माकं भाग्यविपर्ययात् । अरुन्धतीवाचः=वसिष्ठ-पत्नीवचनानि । 'अहरपि विरहं न यन्महिम्ना हरिणदृशः सहवल्लभैर्लभन्ते' इत्येवं रूपाः । अपिशब्दस्तत्सत्यतायां विश्वासमाह ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

गङ्गा—नहि नहि ।

सागरः—(सविषादम्) ततः ?

गोदावरी—ततः शैलशिखराधिवासिना विहङ्गराजेन जटायुना प...
रुध्येदमुक्तो राक्षसेन्द्रः ।

आः पापिन्! पश्यतो मे, रघुतिलकबधूं चोरवृत्त्याऽपहर्तुं
सीतां शीतांशुलेखामिव गिरिशशिरःशायिनीमुद्यतोऽसि ।
एष च्छित्त्वा शिरांसि प्रखरनखमुखैर्दीप्तचूडामणीभि-
स्त्वामद्याहं गरुत्मानुरगमिव सुधाकाङ्क्षिणं संहरामि ॥४६॥

गङ्गा—स एष नूपुरप्रसादः ।

सागरः—(सहर्षम्) ततस्ततः ?

गोदावरी—नखैस्तदीयैः कुलिशात्कठोरै-

भिन्दद्भिरङ्गानि निशाचरस्य ।

शैलशिखराधिवासिना—पर्वतशृङ्गोपरिवासिना ।

आः पापिन्निति—आः (क्रोधे) पापिन्, पश्यतः=अवलोकमान... (पश्यन्तं मामनादृत्येत्यर्थः, 'षष्ठीचानादरे' इति षष्ठी) गिरिशो=... शिरस्तत्र शायिनीं=स्थितिशीलां शीतांशोः=चन्द्रमसः लेखां=कलामिव (... न्दनीयाम्) रघुतिलकस्य=रघुवंशभूषणस्य रामस्य बधूं=स्त्रियं चोरवृत्त्या... (न तु बलाद् विजेतुम्, तादृशशक्त्यभावात्) उद्यतः=सन्नद्धः असि । ... तव निन्दास्थानमिति भावः । तथाविधानेऽप्यनिस्तारमाह—एषच्छि... एषः=अहं (यं त्वं न बहुमन्यसे) प्रखरनखमुखैः=तीक्ष्णैः करजाग्रैः ... =प्रकाशयुता श्चूडामणयः=शिरोरत्नानि येषु तानि (तव) शिरांसि ... =खण्डयित्वा गरुत्मान्=गरुडः सुधाकाङ्क्षिणम्=अमृताभिलाषिणम् उरगम्= इव त्वाम् अद्य संहरामि । त्वदीयापराधस्य प्राणयातनं दण्ड इति ... स्रग्धरावृत्तम् ॥४६॥

नखैरिति—कुलिशात्=वज्रात् कठोरैः=कठिनैस्तदीयैः=जटायुसम्बन्धि... निशाचरस्य=रावणस्य अङ्गानि=शरीरावयवान् भिन्दद्भिः=अवदारयद्भिः ...

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

रथः सहेमाभरणो बभञ्जे
न जानकीलाभमनोरथोऽस्य ॥४७॥

सागरः—ततः ?

गोदावरी—ततश्च निशितनखनिस्त्रिंशनिर्घातभैरवे समरसंरम्भे संभ्रमकातरायां रावणैककरस्थितायां जानक्यां—

तस्याः क्वणन् किमपि नूपुर एक एव
क्रन्दन्निवातिकरुणं चरणात् पृथिव्याम् ॥

गङ्गा—हा, अधुना निराशाः स्मः ।

गोदावरी—आस्तिष्ठ तिष्ठ निहतोऽसि खलेति जल्पन् ।
दूराज्जटायुरपि खड्गहतः पपात ॥४८॥

करजैः अस्य सहेमाभरणः=स्वर्णभूषणसहितः रथः=यानम् बभञ्जे=भग्नः,(किन्तु) जानकीलाभमनोरथः=सीताप्राप्त्याशा (न बभञ्जे इत्यर्थः) जटायोस्तीक्ष्णक्रमानुखैर्विदारिताङ्गस्यापि नष्टरथस्यापि रावणस्य जानकीप्राप्तिमनोरथो न शिथिलीबभूवेति भावः । उपजातिवृत्तम् ॥४७॥

निशितम्—तीक्ष्णम्, निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः=खड्गः । निर्घातः प्रहारः, भैरवः=भयानकः, सम्भ्रमकातरा=भयभीता ।

तस्या इति—किमपि=अर्थहीनं क्वणन्=शब्दायमानः तस्या एक एव नूपुरः=मञ्जीरः अतिकरुणं=प्रचुरममत्वं क्रन्दन्=रुदन्निव चरणात् पृथिव्यां=भूमौ पतितः=अपप्तत् । जानकीचरणवियोगदुःखादिव रुदन् भूमौ पपात, तदीय एको नूपुर इत्युत्प्रेक्षा ।

आस्तिष्ठेति—आः, तिष्ठ तिष्ठ (ससंभ्रमे द्विरुक्तिः) खल=दुष्ट, (अयं त्वम्) निहतोऽसि इति जल्पन्=ब्रुवाणः खड्गेन (रावणप्रहतेन) हतः जटायुरपि दूरात् पपात । जटासु आयुः यस्य स जटायुः । षान्तोऽयं शब्दः क्वचिदुकारान्तोऽपि शम्भुशब्दवत्प्रयुज्यते । यथाऽत्रैवेतः पूर्वं जटायुनेति । तादृशप्रयोगे महाजनपरिग्रह एव प्रमाणम् ॥४८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

सागरः—हा वत्से जानकि, अधुना नीताऽसि निशाचरेण (इति मूर्च्छ

गङ्गा—(उपसृत्यांशुकान्तेन वीजयन्ती) अये रघुकुलतिलक, समा समाश्वसिहि ।

सागरः—कथमिह गङ्गापि ।

गङ्गा—यमुना-सरय्वौ च ।

सागरः—तन्मां मिलिताः सर्वा एव धारयत । अयमहं हतोऽस्मि शोकस्रो

गङ्गा—अलमतिकातरतया, यतः—

प्रायो दुरन्तपर्यन्ताः सम्पदोऽपि दुरात्मनाम् ।
भवन्ति हि सुखोदर्का विपदोऽपि महात्मनाम् ॥४९॥

सरयूः—सखि, गोदावरि, अपि जानासि नूपुरवृत्तान्तम् ।

गोदावरी—अथ किम् । कथितमेव वनदेवतया—'तमादाय कोऽपि ऋष्यमूकसम्मुखं गतः' इति ।

सागरः—रामभद्रस्य तु को वृत्तान्तः ?

गोदावरी—रामभद्रोऽपि सीताविरहविह्वलः सौमित्रिणा वार्यमाणस्त दिशं प्रतस्थे ।

(नेपथ्ये)

सखि, कालिन्दि, वर्धसे ।

यमुना—का उण इमाहं सूईसलाआविद्धाइं मह णहाइं अलत्त

धारयत—पतनान्निवारयत । शोकस्रोतसा=दुःखवेगेन ।

प्राय इति—दुरात्मनाम्=पाप्मनाम् सम्पदः अभ्युदया अपि प्रायः=भू शेन दुरन्तः=दुष्टावसानः पर्यन्तः=समाप्तिर्यासां तादृश्यः, अतिकष्टाव भवन्तीति भावः । 'अधर्मेणैधते तावत्ततो भद्राणि पश्यति, ततः सपत्नान् समूलस्तु विनश्यति' इति शास्त्रप्रामाण्येन पापिनां सम्पदोऽपि परिणामविप तात्पर्यम् । महात्मनाम्=महासत्त्वानां विपदः=दुःखान्यपि सुखमुदर्कः कालो यासां तथा परिणामसुखा भवन्ति, विपदन्तरतः कस्यापि सुखवि दयस्य तत्पुण्यपरिपाकतः सम्भूतोदयत्वादिति सारांशः ॥४९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

वदि ? (का पुनरिमानि सूचीशलाकाविद्धानि मम नखान्यलक्तकरसेन ति ?)

(प्रविश्य)

तुङ्गभद्रा—जयतु जयतु नदीनाथः ।

सागरः—कथं पुनर्वर्द्धते कालिन्दी ।

तुङ्गभद्रा—भ्रातुः सुग्रीवस्य चक्रवर्त्तिपदलाभेन ।

यमुना—दाणिं चन्दणचण्डातपलिम्पन्तपासजुअला वट्टामि [इदानीं न्दनचण्डातपलिप्यमानपार्श्वयुगला वर्ते]

सागरः—कथं पुनर्वालिपालितापि कपिराजलक्ष्मीः सुग्रीवमनुसङ्क्रान्ता ? ।

तुङ्गभद्रा—कथमद्यापि बालिकथा ?

सागरः—कथमिव ?

तुङ्गभद्रा—ननु नूपुरप्रदानविश्वासितेन रामचन्द्रेणात्मानं सुग्रीवं च समर्प्य ता हनूमता तथा व्यवसितं यथा—

सहेलं हत्वैनं हरिणमिव हैमं रघुपतिः
कपीनां साम्राज्ये प्रणतमभिषिञ्चन् रविसुतम् ।
अपि ध्वंसात्पत्युर्नृपति मपचक्रे पलभुजा-
मपि प्रीतं चक्रे निजकुलगरिष्ठं दिनकरम् ॥५०॥

चक्रवर्त्तिपदलाभेन—बालिनिधने रामेण कृते सुग्रीवः किष्किन्धां स्वाधिनां व्यधादिति मध्यकथा । "चक्रवर्त्ती सार्वभौमो नृपः" इत्यमरः ॥

चन्दनेति—भ्रातुः सुग्रीवस्य राज्यावाप्तिः सुखप्रदत्वाच्चन्दनलेपत्वेनोपरिता । सीताहरणवृत्तं च मर्मनिकृन्तनत्त्वादत्यर्थदुःखतापप्रदत्वाच्च चण्डातप-वाऽध्यवसितम् ।

सहेलम्, इति— एनम्=बालिनम् हैमं=स्वर्णमयं हरिणं=मृगं मारीचमिव सहेलम्=अनायासं हत्वा कपीनां=वानराणां साम्राज्ये=वानराधिपतित्वे प्रणतं =नम्रं रविसुतं=सूर्यतनयं सुग्रीवम् अभिषिञ्चन्=राज्याभिषेकयुक्तं कुर्वन् रघुपतिः =रामः सख्युः=सुहृदो मारीचस्य ध्वंसात्=प्रणाशात् पलभुजां=क्रव्यादानां रक्षसां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सागरः – ततः किं वृत्तम् ?

तुङ्गभद्रा—ततः सुग्रीवेणापि—

परिम्लानां मालामिव ललितसौरभ्यरहिता-
मपि स्थाने स्थाने विचिनुत बधूटीं दिनमणेः ।
इति स्वेनैवोक्ताः कुमुदनलनीलाङ्गदमुखा
हनूमत्संयुक्ता दिशि दिशि नियुक्ताः कपिभटाः ॥५१॥

सागरः—इदानीमुज्जीवितोऽस्मि ।

गोदावरी—किं भवानेव ? नन्विदानीमखिलोऽपि जीवितो जनः ।

सागरः—एवमेतत्–सकलजनमनःसाधारणी हि रामचन्द्रमाधुरी । नन्वि... हैव पश्य—

नृपतिं=राजानम् रावणमित्यर्थः । अपचक्रे=क्षतिभाजं विदधे, निजकुला... =स्ववंशश्रेष्ठं दिनकरं च प्रीतं प्रसन्नं चक्रे । मारीचवधेन सुहृत्प्रणाशाद्रावणस्या... पकारः, बालिवधद्वारकसुग्रीवराज्याभिषेकृता च रवेः प्रीतिः ॥ अत्र केचि... 'सख्युः' इत्यस्य 'बालिनः' इति व्याख्यान्ति, परं तन्न रोचयामहे, तथाऽर्थे क्रिय... माणे प्रथमचरणस्य वैयर्थ्यापत्तेः स्वोत्प्रेक्षितार्थस्याऽकस्मिकत्वाच्च । मदुक्तार्थे ... -यथासङ्ख्यमन्वयेन यथासङ्ख्यमलङ्कारः फलति, शिखरिणीवृत्तम् ॥५०॥

परिम्लानामिति—परिम्लानां=च्युतां शुष्काञ्च मालां=स्रजमिव ललिते... =मनोमोहकेन सौरभ्येण=सुगन्धेन रहितां=हीनां (सीतापक्षे सौरभ्यं=शरीर... प्रसाधनम्) स्थाने स्थानेऽपि=सर्वत्रेत्यर्थः दिनमणेः=सूर्यस्य बधूटीं=स्नुषां ... विचिनुत=गवेषयत, इति उक्तप्रकारेण स्वेन=आत्मना सुग्रीवेण एव उक्ताः... =आज्ञप्ताः (न तु दूतमन्त्रिमुखेन, तथासत्यनादरोदयसम्भवात्) हनूमता... संयुक्ताः=सहिताः कुमुदनलनीलाङ्गदमुखाः=तत्प्रभृतयः कपिभटाः=वानरवीराः... दिशि दिशि=प्रतिदिशं नियुक्ताः । 'म्लानमुखीं सीतां, म्लानकुसुमां मालामिव... सर्वेषु स्थानेषु गवेषयतेत्यात्मनैवानुशिष्य कुमुदनलनीलादयो वानरमुख्याः... सुग्रीवेण प्रतिदिशं प्रेषिता इत्याशयः । प्रागुक्तमेव वृत्तम् ॥५१॥

सकलानां जनानां मनस्सु=हृदयेषु साधारणी=समानादरा, रामचन्द्रस्य... माधुरी=कोमलशीलता ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

नेदीयसी हि सरयूस्तपनोद्भवेयं
भागीरथीयमुदयः सगरान्ममापि ।
इत्यन्वयाद्रघुकुले यदि पक्षपात-
स्तद्वत्सला किमिति वामपि चित्तवृत्तिः ॥५२॥

(ऊर्ध्वमवलोक्य, सविस्मयम्)

विलासैर्दम्भोलेर्दलितगुरुतः सर्वगिरयः
स चैको मैनाकः पयसि मम मग्नो निवसति ।

नेदीयसीति—सरयूः नेदीयसी=अतिसमीपस्थिताऽयोध्यापरिसरवासिनी, तपनोद्भवा=सूर्यप्रसूताऽतोऽस्या अपि समानकुलजन्मता, इयं भागीरथी, रथाद्रामपूर्वजादुत्पन्ना, एतञ्चेयमपि तदीयपरिवारसम्बद्धा, ममापि सागरस्य सगरात्, उदयः=उद्भवः, अतोऽहमपि तद्वंश्य एव । इत्यन्वयात्=एतादृशात्सम्बन्धात् यदि (अस्माकं) रघुकुले=रघुवंशे पक्षपातः=आदराधिक्यम् (तत्र उचितं सम्भाव्यहेतुकञ्च) वामपि=युवयोर्गोदावरीतुङ्गभद्रयोरपि (नितान्तासम्बद्धयोः) चित्तवृत्तिः=मनोदशा किमिति=कुतःकारणात् स्नेहशालिनी । अस्माकं यदि सम्बन्धकृत एव रघुवंशे पक्षपातस्तर्हि नितान्तव्यधिकरणयोर्भवतोर्गोदावरीतुङ्गभद्रयो स्स न स्यात्, दृश्यते तु, अतः सर्वमनस्साधारणी रामभक्तिरिति प्रागुक्तं समर्थितमित्याशयः । वसन्ततिलकं वृत्तम् ॥५२॥

विलासैरिति—सर्वे गिरयः=पर्वताः दम्भोलेः=वज्रस्य ('दम्भोलिरशनिर्द्वयोः' इत्यमरः) विलासैः=लीलाभि=र्दलितगरुतः=निर्भिन्नपक्षाः (अतो नैव तेषु गमनम्) स च (यः सम्प्रत्यपि सपक्षः) एकः स मम (नान्यस्य अतो ज्ञानस्य विषयरूपता) पयसि=जले मग्नः (न तु मङ्क्ष्यन्) निवसति=सम्प्रति वर्त्तते (अतो मैनाकोऽपि नायम्) अग्रे=(आश्चर्येऽत्रायमन्वयः) स्फुरन्=प्रकटीभवन् अमितगव्यूतीनां=निस्सीमक्रोशद्वयपरिमितभूमिभागानां महिमा=विस्तारो यत्र तादृशः अयं=दृश्यमानः कः शैलः ? किमाख्यः पर्वतः ? हिमाद्रिः=प्रालेयाचलः, विन्ध्यो वा ? (अन्यपर्वतास्तु विस्तारेण संशयवर्त्म नारोहन्तीति भावः (यः) लघुगतिः=शीघ्रगामी मां लङ्घयति=अतिक्रामति । इन्द्रो वज्रेण सर्वेषां पर्वतानां

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अये कोऽयं शैलः स्फुरदमितगव्यूतिमहिमा
हिमाद्रिर्विन्ध्यो वा लघुतरगतिर्लङ्घयति माम् ॥५३॥

तदागच्छत, निरूपयामस्तावत्कोऽयमिति ।

(इति निष्क्रान्ताः सर्वे)

इति पञ्चमोऽङ्कः ।

—०—

षष्ठोऽङ्कः ।

(ततः प्रविशतो राम-लक्ष्मणौ)

रामः— सौमित्रे, ननु सेव्यतां तरुतलं चण्डांशुरुज्जृम्भते,
लक्ष्मणः—चण्डांशोर्निशि का कथा रघुपते चन्द्रोऽयमुन्मीलति ।
रामः— वत्सैतद्विदितं कथं नु भवता
लक्ष्मणः—धत्ते कुरङ्गं यतः,
रामः— क्वासि प्रेयसि हा कुरङ्गनयने चन्द्रानने जानकि ॥१॥

पक्षांश्चिच्छेद, योऽप्यलूनपक्षो मैनाकः समयि निमज्ज्यवसति अतो नाऽयं पर्वतः अमितगव्यूतिविस्तारवत्त्वाच्च पर्वतोऽयं, तत्रापि हिमालयो विन्ध्य एव वा तदेवं विकल्प्यमानः कोऽयं पर्वतो मामतिक्रामतीति सागरस्य वितर्कः ॥ अ सन्देहः अलङ्कारः । शिखरिणीवृत्तम् ॥ 'गव्यूतिः' स्त्री क्रोशयुगमित्यमरः ॥५३॥

निरूपयामः—निर्णयामः ।

इति श्रीरामचन्द्रमिश्रकृत-'प्रकाश'व्याख्यासहिते प्रसन्नराघवे नाम नाटके पञ्चमोऽङ्कः ।

सौमित्र इति—सौमित्रे=लक्ष्मण, तरुतलं=वृक्षाधोदेशः, सेव्यताम्=आश्रीयताम् आतपनिवारणायेति भावः, स्वोक्तौ हेतुमाह—चण्डांशुरिति । चण्डांशुः सूर्यः उज्जृम्भते=तपति । तपति सूर्ये तत्तापापनोदाय जनाश्छायायां विश्राम्यतो रामस्य लक्ष्मणाय तथादेशः । निशि=रात्रौ चण्डांशोः=सूर्यस्य का कथा =वार्त्ता, अयं यस्त्वया चण्डांशुत्वेनावगतः अयं चन्द्र उन्मीलति=उदयते

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(पुनर्विलोक्य) हन्त, सन्तापेन प्रतारितोऽस्मि । कथमयं गगनतलाधिरोही रोहिणीहृदयनन्दनश्चन्द्रः । (चन्द्रं प्रति)

रजनिकर, करास्ते बान्धवाः कैरवाणां
सकलभुवन-चेष्टाजागरूका जयन्ति ।
कथयसि न कथं तत्कुत्र सा जानकी मे
त्वमसि मृगसहायः किन्तु नक्तञ्चरोऽसि ? ॥२॥

...त्वया चण्डांशुनैंष मन्तव्य इति लक्ष्मणः । अयं चन्द्रो न चण्डांशुरिति एतत् वत्स !, त्वया कथं विदितम्=ज्ञातम्, उत्तापकत्वस्य स्पष्टमवगतेश्चन्द्रधर्मस्य ...प्रकटनस्यात्राऽदर्शनाच्च त्वदुक्तस्य प्रमाणरहितत्वमित्याक्षिपति रामः । यतः ...ं चन्द्रश्चण्डांशुर्वेति सन्दिह्यमानः कुरङ्गं धत्ते=मृगं धारयति—अतो मृगाङ्क-...द्र एव न सूर्य इति लक्ष्मणेन स्वपक्षे प्रमाणभूतस्तर्क उपन्यस्तः । अत्र लक्ष्म-...क्तं कुरङ्गपदं श्रुत्वा कुरङ्गनयनां जानकीं स्मृत्वा राम आह—क्वासीति—कुरङ्गनयने !=मृगनेत्रे चन्द्रानने=विधुमुखि, जानकि=विदेहतनये प्रेयसि=प्रिय-...(त्वं) क्वासि=कुत्र विद्यसे । सर्वाण्यपि विशेषणानि सीताविषयकरामनि-...रागस्यौचित्यवचनानि, कुरङ्गनयने चन्द्रानन इति परमसुन्दरता, जानकीति ...कुलोत्पत्तिः, प्रेयसीति हृदयमैत्रीत्यादिकं बोध्यम् ॥ अत्र भ्रान्तिमानलङ्कारः, ...र्दूलविक्रीडितं वृत्तम् ॥ १ ॥

प्रतारितः—वञ्चितः, यः चन्द्रत्वेन ज्ञातव्यस्तं सूर्यत्वेन ज्ञातवान्, इत्यर्थः । रोहिण्याः—चन्द्रबध्वा हृदयस्य नन्दनः=प्रसादकः, प्रियदर्शनानन्दस्वभावता सतीनामित्याशयेनेदम् ।

रजनिकरेति—हे रजनिकर=चन्द्र, कैरवाणां=कुमुदानां बान्धवाः=सुहृदः ...दागमे तन्मुखविकासदर्शनात्) सकलस्य=समस्तस्य भुवनस्य=संसारस्य ...ासु=प्रवृत्तिषु जागरूकाः=सावधानाः तद्विषयकज्ञानवन्तः (साक्षिण इव) ...व कराः=किरणाः जयन्ति=वर्त्तन्ते । असकलजनलभ्यत्वात्तद्गुणस्य तस्य ...त्कः । तत्=यदेवं तस्मात् सा मे=रामस्य हृयद्वल्लभा इति स्वरसः । ...नकी, न तु काचिदन्या प्रिया । एतेन तल्लाभविषयकपरिश्रमकथा स्मारिता ।

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

लक्ष्मणः—(स्वगतम्) कथमयमभिषङ्गतरङ्गस्तरलीकरोत्यात्मानम् ! त
न्यतो नयामि । (प्रकाशम्) आर्य, अयमितो विलोक्यतां चपलचञ्चुपुटाचान्त
शीतकरशीकरश्चकोरः ।

रामः—(चकोरं प्रति)

> तन्मे विदेहतनयावदनं निवेद्य
> भ्रातश्चकोर कुरु मां चरितार्थवृत्तिम् ।
> पीता यदीयकमनीयकपोलकान्तिः
> कान्तासखेन भवता शशिनं विहाय ॥३॥

(हे चन्द्र !) त्वं मृगसहायः हरिणबान्धवः-असि ? किन्तु नक्तञ्चरः असि, ...
प्रथमोऽसि तदा तु साहायककरणस्य त्वत्स्वभावसिद्धतयाशातन्तु ममापि फलस्या
भाक्, परपक्षाश्रयणे तु निश्चयेन मम बधो निशाचरत्वात्तवेति भावः। अ स
चन्द्रस्य सकलभुवनचेष्टा जागरूकत्वे—'आदित्यचन्द्रावनिलोऽनलश्च, द्यौर्भूमि
रापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च सन्ध्ये, धर्मश्च जानाति नरस्य वृत्त
इति पञ्चतन्त्रं प्रमाणम् । मालिनीवृत्तम् ॥२॥

अभिषङ्गः—खेदः=तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेनेति कुमारे कालिदास
तरलीकरोति=चपलयति ।

आचान्तः—पीतः । शीतकरस्य=चन्द्रमसः, करशीकरः=किरणबिन्दु
'शीकरोऽम्बुकणाः स्मृताः" ।

तन्मे इति—भ्रातः=बन्धो चकोरे, मे=मह्यं रामाय तत् विदेहतनया
=सीतायाः वदनं=मुखं निवेद्य=प्रतिपाद्य (दर्शयित्वा) मां=रामं चरित
=सफला वृत्तिः=जीवितं यस्य स तं=सफलजीवितं कुरु=विधेहि, ननु ...
चकोरस्य सीतावदनपरिचयस्तथा चेदमकाण्डताण्डवत्वं भजत इति समाद
— पीतेति—यदीयस्य=यन्मुखस्य कमनीयस्य=सुन्दरस्य कपोलस्य=गण्डदेश
(सुवर्णवर्णा,) कान्तिः कान्तासखेन=स्त्रिया सहितेन भवता (कपोलका
पेक्षया न्यूनकान्ति) शशिनं=चन्द्रमसं विहाय=त्यक्त्वा (उपेक्ष्य) ...
=आचान्ता, चकोरो हि चन्द्रमयूखमाचामतीति कविसमयः । अत्र 'भ्राव

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

लक्ष्मणः—आर्य, इयमितो विलोक्यतां शरत्कृशा निशाकरकिरणानुकारि-तरङ्गिणी।

रामः—(विलोक्य)

कल्लोलिनि, त्वमिव साऽपि कुरङ्गनेत्रा
नूनं किमप्यनुदिनं कृशिमानमेति।
एतावदस्ति भवतीह निसर्गशीता
सीता पुनर्वहति कामपि तापमुद्राम् ॥४॥

लक्ष्मणः—इतो विलोक्यतामनिद्रनीलनलिनीवनविलीनोऽयमलिनीनाथः।

रामः—(विलोक्य) अये, कोऽयं विहङ्गः ?

…त्याऽनुपेक्षणीयवचनता, 'चरितार्थवृत्तिम्' इत्यनेन सीतावदनदर्शनेन जीव-सफलताया अभिधानेन रामस्य तद्विषयः प्रेमप्रकर्षः, 'कान्तासखेन' इत्यनेन केवलस्य न, किन्तु तव प्रियाया अपि प्रियं जानकीवदनमिति प्रश्नस्यौ-…मित्याद्यर्था व्यज्यन्ते। वसन्ततिलकं वृत्तम् ॥३॥

शरदि—तदाख्यऋतौ कृशा—ह्रस्यमानप्रवाहा। निशाकर=श्चन्द्रस्तत्…नुकारी=तत्तुल्यः, (स्वच्छः) तरङ्गो यस्याः सा। तरङ्गिणी—नदी।

कल्लोलिनीति—कल्लोलिनि=नदि, नूनम्=उत्प्रेक्षे सा कुरङ्गनेत्रा=मृग-…सीताऽपि त्वमिव किमपि अनुदिनं=दिने दिने कृशिमानं=तनुतरङ्गतां…एति=गच्छति, यथा प्रावृडपगमेन त्वमनुदिनं कृशत्वमुपयासि तथैव…पि मद्वियोगेन क्षीयत इति तात्पर्यम्। तुल्यत्वमुक्त्वा विशेषमाह—एता-…तीति। इह=भवत्या सह सीतायाः सादृश्ये एतावत् (अन्तरम्) अस्ति…) भवती निसर्गशीता=स्वभावशीतला (जलमयतनुत्वात्) सीता पुनः-…ता तु कामपि=वचोऽगोचरां तापमुद्रां=सन्तापदशाम् वहति=धारयति। …दिनं कृशिमानं भजन्त्योः कल्लोलिनीसीतयोः प्रथमा स्वभावतः शीतला-…ता पुनर्वियोगकृततापज्वलितदेहेति भावः। व्यतिरेकोऽत्रालङ्कारः। वृत्तं तु …कमेव ॥४॥

अनिद्रा—विकसिता, नलिनी=कमलिनी तस्या वनं=समुदायस्तत्र निलीनः

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

उन्मीलन्नयनान्तकान्तिलहरीनिष्पीतयोः केवला-
दामोदादवधारणीयवपुषोः कान्तासखेन क्षणम् ।
यत्कर्णोत्पलयोः स्थितेन भवता किञ्चित्समुद्गुञ्जितं
भ्रातस्तिष्ठति कुत्र तत्कथय मे कान्तं प्रियाया मुखम् ? ॥५॥

लक्ष्मणः—(सातङ्कम्) अपीमं न विलोकयेदार्यः ।

रामः—(विलोक्य) अये, कोऽयं विहङ्गः ।

=प्रच्छन्नः । वर्णसाम्यकृता गुप्तिः । इह च समानाभिहारलक्षणदोषेण भ्रमर... द्रूयता । अलिनी=भ्रमरी तस्या नाथः=पतिः ।

उन्मीलदिति—यत्कर्णोत्पलयोः=यस्य सीतावदनस्य कर्णालङ्करणभूत... नीलकमलयोः उन्मीलन्ती=प्रकटन्ती या नयनान्तकान्तिः=कटाक्षप्रभा तस्या लह... तरङ्गस्तया निष्पीतयोः=निगीर्णयोः (कान्तेर्नैल्येन स्वस्य विस्तारेऽन्तर्भावितयो... केवलात् आमोदात् (न तु वर्णात्) सुगन्धात् अवधारणीयं=निर्णेयं वपुः=श... ययोस्तयोः स्थितेन=वर्त्तमानेन भवता=कान्तासखेन=अलिनीसद्वितीयेन कि... समुद्गुञ्जितं=मधुरं शब्दायितम् , भ्रातः, तत् कान्तं=रमणीयं मे प्रियाया मु... =वदनं कुत्र तिष्ठति=वर्त्तते तत् (मे) कथय=ब्रूहि । सीताया नीलनील्या नय... कान्त्या प्रसरन्त्या कर्णभूषणीभूतनीलकमलमात्मनि तथा प्रच्छादितं यथा त... केवलेन तदीयसुवासेनैव सत्ताऽनुमेयाऽभवत्तत्र सुगन्धाकृष्टः कान्तासहितश्च भ्र... किमपि मञ्जुलमरौत् । सम्प्रति तमेव भ्रमरं प्रति सीतावियोगदूनस्य राम... तद्विषया जिज्ञासेयम् । 'निष्पीतयोः' इत्यन्तर्धानस्यातिशयस्तेन च सीता... यन्तानामतिरमणीयता, 'यत्कर्णोत्पलयोः' इति सीतया भ्रमरस्योपकारः क... त्पलसुगन्धकरणकतर्पणात्मा कृत इति तद्विषयकजिज्ञासाया अवश्योत्तरणीय... 'भ्रातः' इत्यनेन चाऽनुपेक्ष्यवचनताऽऽत्मन इत्याद्यर्थाः सूच्यन्ते । अत्र मीलि... लङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥५॥

न विलोकयेदार्यः—न पश्येद्रामः । जाते दर्शने पुनस्तद्धृदयव्यथायाः प्र... दीभावस्यावसरस्योपस्थितेरिति भावः ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

योऽयं बहिः कलितकुङ्कुमरेणुराग-
मन्तस्तु सम्भृतदयं हृदयं दधानः।
पारेतरङ्गिणि मुहुः करुणं रटन्ती-
मालोकते सहचरीं न तु सन्निधत्ते ॥६॥

(विमृश्य) नूनमयं वल्लभाविरहविदारितहृदयो वराकश्चक्रवाकः।

लक्ष्मणः—अहो प्रमादः।

रामः नूनमयमेकः समदुःखतया समानशीलो मे, अथवा कुतोऽस्य मम च [समान]शीलता।

अयमुदयति चन्द्रे विप्रयोगं प्रियायाः
श्रयति तपति सूर्ये सङ्गमङ्गीकरोति।

[यो]ऽयमिति—बहिः=उपरिभागे कलितः=धृतः कुङ्कुमस्य=काश्मीरजस्य [रेणु?]धूले रागः=कान्तिर्यत्र तथा बहिरुपलिप्तकुङ्कुमधूलिधूसरम्, अन्तः—तु [सम्भृ]ता=एकत्र स्थिता दयाऽनुकम्पा यत्र तादृशं=समेधितदयम् हृदयं दधानः, [पारेत]रङ्गिणि=नद्याः पारे करुणं=दयाजनकं रटन्तीं=तारं शब्दायमानां सहचरीं [प्रिय]ाम् मुहुः आलोकते पुनः पुनः पश्यति न तु सन्निधत्ते=समीपस्थो भवति [...]ो तथा विधातुमसामर्थ्यात्) अत्र 'बहिःकलितकुङ्कुमरेणुरागम्' इत्यनेन [...]ी रूक्षता, 'सम्भृतदयं हृदयं दधानः' इति तदीयदुःखप्रहाणेच्छावत्त्वम्, 'मुहुः [करुण]ं रटन्ती'मित्यनेन तदीयक्लेशानुभूतिः, तुना खेदः, इत्याद्यर्था आवेद्यन्ते। [ता]दृशः स को विहङ्ग इति रामस्य प्रश्नः। वसन्ततिलकं वृत्तम् ॥ 'पारेतर[ङ्गि]णि' इत्यत्र 'पारे मध्ये षष्ठ्या वा' इति सूत्रेण समासः, पारशब्दस्यै[कार]त्वं च ॥६॥

वल्लभा—प्रेयसी, विरहः=वियोगस्तेन विदारितं=द्विधाकृतं (सखेद-[...]यं) हृदयं यस्य तथा।

समानशीलः—समावस्थः। कान्तावियुक्ततया समदशत्वमुत्प्रेक्षितम्।

अयमुदयतीति—अयम्=चक्रवाकः चन्द्रे=चन्द्रमसि उदयति=उदयं लभ-[माने] प्रियाया वियोगं=प्रेयस्या विरहं सूर्ये तपति=प्रकाशमाने च सङ्गं=सङ्गमम्

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

मम तु जनकपुत्री-विप्रयुक्तस्य यातं
शतमधिकमपीदं चन्द्रसूर्योदयानाम् ॥७॥

लक्ष्मणः—आर्य, इहं तावन्मुकुलितकमलिनीपरिसरानुसारिणि दीयतां दृष्टिः ।

रामः—(विलोक्य)

निजनखशिखालेखालीढस्फुरत्कमलस्तनीं
निरतमधुपश्रेणीगीतां चलन् कलहंसकः ।
अकरुणशशिप्रेङ्खत्पादप्रहारविमूर्च्छिता—
महह नलिनीं क्लान्तक्लान्तां मुहुर्मुहुरीक्षते ॥८॥

(प्रिययेति शेषः) अङ्गीकरोति=प्राप्नोति । निशि वियुज्यते दिने च स सुखमनुभवतीति भावः । मम तु जनकपुत्री=जानकी तया वियुक्तस्य=विरहित इदं चन्द्रसूर्योदयानाम्=अहोरात्राणाम् शतम्=अधिकमपि यातम्=व्यतिगतम् एकयैव निशा वियोगकष्टमनुभूय यदेतेन पुनः प्रेयस्या संयुज्यते, मया तु शतमप्यहोरात्राणामेकक्रमेण प्रियाविप्रयोगे एव गमित, मतो ममाऽस्य वाकस्य च का समशीलतेति भावः । अत्र तु शब्दोऽनुस्यूतस्य वियो मर्मव्यथकतां व्यनक्ति ॥ मालिनीवृत्तम् ॥७॥

मुकुलिता— सूर्यास्तमनेन निमीलिता या कमलिनी तस्याः परिसरं= पदेशमनुसरति तस्मिन् ।

निजनखेति—निजानां=स्वीयानां नखानां=करजानां शिखा=अग्रभाग स्या लेखा=पङ्क्तिस्तया आलीढः=क्षतः स्फुरत्=विकसत् कमलमेव स्तनो य स्सा, तां=स्वनखाग्रदत्तनखक्षतभूषितकमलकुचशालिनीमित्यर्थः । निरता =विशेषतोऽनुरक्तानां मधुपानां=भ्रमराणां श्रेणी=समूहस्तया गीतां=स्तु (नलिनीं) चलन्=गच्छन् (उपाचर्छन्) कलहंसकः=हंसः अकरुणः=नि शशी=चन्द्रमास्तस्य प्रेङ्खन्=प्रसरन् उदयमान इति भावः पादः=किरणम् वा पादः=चरणस्तेन प्रहारः=ताडनं तेन विमूर्च्छितां=सञ्जातमूर्च्छाम् क्लान्तक्लान्तां तिशयश्रान्तां नलिनीं=कमलिनीम् अहह !=खेदे मुहुर्मुहुः=पुनः पुनरीक्षते स

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(विमृश्य) वरमेवंविधानामपि सहचरीजनानुकम्पया कोमलं चेतो न तु निसर्गकठिनस्य रामस्य ?

लक्ष्मणः—(स्वगतम्) कथमिदानीमप्यस्य चेतसि जानकीयमिन्द्रजाल- मुन्मीलति ?

(नेपथ्ये)

सखे, रत्नशेखर, चिराद्दृश्यसे ।

लक्ष्मणः—(आकर्ण्य) किमेतत् ?

(पुनर्नेपथ्ये)

वयस्य चम्पकापीड, एवमेतत्, मया ह्येतावन्तं कालमखिलमायानिर्मयनाम्नो दानवस्य पुत्रीं निजसहोदरीं मन्दोदरीमनुवर्तितुं लङ्कायां कृतालयाच्चित्ररूपनाम्नो दानवात्सकलामिन्द्रजालकलामाददानेन स्थितम् ?

लक्ष्मणः—नूनं कृतकर्णकौतुकामोदोऽयं कयोरपि पथिकयोः संवादः ।

(पुनर्नेपथ्ये)

सखे रत्नशेखर, ! तन्मे धारयसि निजकलादर्शनम् ।

(पुनर्नेपथ्ये)

वयस्य चम्पकापीड,

सदयं चेति भावः । हंसः स्वेन दत्तनखक्षतस्तनीं=कमलिनीं भ्रमररूपतदभि- लाषिभिः स्तूयमानां तत्प्रत्याख्यानप्रकुपितेनेव चन्द्रमसा स्वकिरणपादप्रहारेण मूर्च्छां च गमितां पश्यतीति भावः । अन्योऽपि नायकः स्वेन विलसितवतीं पुरुषान्तरेण प्रार्थ्यमानां, प्रत्याख्यातकामुकान्तरेणोपद्रूयमाणां च कामिनीं क्लान्तां पश्यन्नन्त- र्व्यथत इति तत्सादृश्यं हंस आरोपितम् । अत्र हंसे नायकस्य पद्मिन्यां नायिका- याश्च व्यवहारस्य समारोपात्मा समासोक्तिरलङ्कारः । हरिणीवृत्तम् ॥८॥

निसर्गकठिनस्य—स्वभावकठोरस्य ।

जानकीयम्—जानक्या इदं जानकीयम् ।

कृतालयात्—कृतनिवासात् । चित्ररूपः, मयस्य पुत्रः, मन्दोदर्या भ्राता, मन्दोदर्या सह लङ्कां गतः ।

कृतकर्णकौतुकामोदः—दत्तश्रवणाश्चर्यहर्षः ।

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

असुरसुरनिशाचरोरगाणामपि नरकिन्नरसिद्धचारणानाम् ।
सकलजनविलोकनैकचित्रं स्फुटमिह कस्य विजृम्भते चरित्रम् ॥९॥

(अथवा) किमन्येन, लङ्कानुभूतमेव नूतनं किमपि सरसरमणीयं चरित्रमुपदर्शयामि ते ।

लक्ष्मणः—आर्य, इतोऽवधार्यताम्, नन्विदमयत्नोपनीतं प्रेक्षणीयम् ।

रामः—(अनाकर्णितकेन)

देवि, त्वदीयमणिनूपुरजृम्भमाण-
कोलाहलोत्तरलहंसकुलाकुलासु ।
वैदेहि, लक्ष्मणपदाम्बुजलाञ्छितासु
गोदावरीपुलिनभूमिषु देहि दृष्टिम् ॥१०॥

असुरसुरेति—असुराः=सुरविरोधिनो राक्षसाः, सुराः=देवाः, निशाचराः=रात्रिञ्चरा राक्षसभेदा एव उरगाः=सर्पास्तेषाम्, नराः=मनुष्याः, किन्नराः=यक्षाः, सिद्धाः=देवयोनिप्रभेदाः चारणाः=बन्दिनः, एषामपि सकलानां जनानां विलोकनस्य=दर्शनस्य एकचित्रम्=एकं लक्ष्यं कस्य चरित्रं स्फुटं विजृम्भते (यदहमुपदर्श्य त्वामाराधयामीति चन्द्रापीडस्य वितर्कविषयः । पुष्पिताग्रावृत्तम् ॥९॥

अयत्नोपनीतम्—अनायासलब्धम् । प्रेक्षणीयम्=द्रष्टव्यम्, 'उपनतमयत्नीयन्त्यभव्याः' इति हि प्राञ्चः ।

देवीति—देवि=वैदेहि सीते !, त्वदीयः=त्वत्सम्बन्धी यो मणिनूपुरः=रत्ननिर्मितो मञ्जीरस्ततो जृम्भमाणं=समुत्पद्यमानं यत्कोलाहलं=रणरणत्कारशब्दस्तेनोत्तरलम्=सम्भ्रान्तचपलम् हंसकुलम् तेनाकुलासु=व्याकुलीकृतासु, लक्ष्मणपदाम्बुजलाञ्छितासु=लक्ष्मणचरणसरोरुहचिह्नितासु गोदावर्याः=तदाख्यनद्याः पुलिनभूमिषु=तटप्रदेशेषु दृष्टिं देहि=नयनं व्यापारय । लक्ष्मणपदाम्बुजलाञ्छितासु इत्युक्त्या तत्र लक्ष्मणस्य भूयो गमनं तेन तस्य भूभागस्य सीतया परिचितत्वम्, हंसकुलाकुलासु इत्यनेन रमणीयता, संहत्याभ्यां च दर्शनयोग्यता व्यज्यते । वसन्ततिलकं छन्दः ॥१०॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

लक्ष्मणः—क्व पुनरिह वैदेही ? क्व वा गोदावरी ?

रामः—(विमृश्य) कथं प्रतारितोऽस्मि मति-विभ्रमेण। (विचिन्त्य) कृतार्थीकृतोऽस्मि। अनेन हि मे—

गोदावरीतीरतपोवनेषु, सौमित्रिसीतापरिपूर्णपार्श्वः।
मुदा निमेषानिव यान्यनैषं, दिनानि तान्येव पुनः स्मृतानि ॥११॥

(पुनः) सप्रत्याशम्) अपि नाम,

तान्येव पक्ष्मलदृशो वचनामृतानि
भूयोऽपि कर्णचुलुकैरहमापिबेयम्।
यैर्मामदर्शयदसौ विकचप्रमोदा
गोदावरीकमलवीचिविचेष्टितानि ॥१२॥

कृतार्थीकृतः—कृतकृत्यतां नीतः, सीतास्मरणेन मानसिकानन्दस्योदयात्तथा। अथवा सुखमयदिनस्मरणात्तथा।

गोदावरीति—सौमित्रिणा=सुमित्रातनयेन, लक्ष्मणेन सीतया च परिसम्पूर्णे पार्श्वे=सव्यतदितरभागौ यस्य सः (अहम्) गोदावरी=तदाख्या तस्यास्तीरे=तटे तपोवनेषु=पुण्यकाननेषु गोदावरीतटवर्तितपोवनेषु इत्यर्थः। हर्षेण यानि=दिनानि निमेषानिव=क्षणानीव (सुखमयत्वात्तथोक्तिस्तथाह म० परमेश्वरः=सङ्कल्पाप्तः समयसमयो ह्रस्यते द्राघितोऽपि) अनैषम् नीतवान्, तान्येव दिनानि पुनः संस्मृतानि मयेति शेषः। अतः स्मरणद्वारा रोऽयं मम प्रमाद इति रामस्याशयः। उपजातिश्छन्दः ॥११॥

तान्येवेति—अहं=रामः भूयोऽपि=पुनरपि पक्ष्मलदृशः=अरालनयनायाः दृशः) तान्येव वचनामृतानि=वाक्सुधाः कर्णचुलुकैः=कर्णरूपैः पुटकाकारतां करैः आपिबेयम्=सस्नेहं शृणुयाम्। अत्र वचनस्य अमृतेन रूपकेणातिशयता कर्णयोश्चुलुकेन रूपणेनाधिकग्रहणसामर्थ्यप्रतीतोत्कण्ठा, आपिबेयम् अनेन सादरं श्रवणं च व्यज्यते। विकचप्रमोदा=प्रसन्नाऽसौ यैः=वचनैः माम्=रामम् गोदावर्याः कमलानि=सरोरुहाणि वीचयः=तरङ्गाश्च तेषां विचेष्टितानि=विलासान् अदर्शयत्=प्रत्यक्षीकारयति स्म, अथवा कमलपदं जलपरं तथा

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(नेपथ्ये)

तुह सुहअ उक्खिवन्ती तरङ्गसिअचामरं रहुमिअङ्क ।
धवलकमलादपत्तं धारइ गोलाणई सहत्थेण ॥ १३॥
[तव सुभग उत्क्षिपन्ती तरङ्गसितचामरं रघुमृगाङ्क ।
धवलकमलातपत्रं धारयति गोदानदी स्वहस्तेन ॥]

रामः—(सहर्षम्) अये, स एवायं प्रियतमायाः समालापः । तथा हि—

परिमितकमनीयः कोमलो वाग्विलासः
सरसमधुरकाकुस्वीकृता काऽपि लेखा ।
ध्वनिरपि च विपञ्चीपञ्चमस्यानुवादी
श्रुतिरपि कलकण्ठीकण्ठसंवादभूमिः ॥ १४॥

च कमलस्य जलस्य वीचयस्तरङ्गास्तासां विचेष्टितानीत्यर्थः । 'सलिलं कमलं जलम्' इत्यमरः । मामदर्शयत् इत्यत्र प्रयोज्यकर्त्तरि द्वितीया । वसन्ततिलकं वृत्तम् ॥१२॥

तव सुभगेति—हे सुभग=सुन्दर, रघुमृगाङ्क=रघुवंशचन्द्र, (प्रकाशकत्वात्तापहरत्वाच्च तथोक्तिः) तव, तरङ्गसितचामरं=वीचीश्वेतचामरम् (तद्रूपं वालव्यजनमित्यर्थः) उत्क्षिपन्ती=उपरि चालयन्ती गोदानदी स्वहस्तेन=निजकरेण धवलकमलातपत्रं=श्वेतसरोजच्छत्रं धारयति=वहति । अत्र गोदावरीकर्त्तृकरामसम्बन्धितरङ्गचामरश्वेतकमलातपत्रधारणाभिधानेन वनेऽपि राज्यसुखमव्याहतमित्यर्थो ध्वनितः । गोदावर्यां चामरवाहिनीत्वारोपणात् समासोक्तिः, तरङ्गसितचामरम्, धवलकमलातपत्रमित्यत्र परिणामश्चालङ्कारः । आर्याप्रभेदो वृत्तम् ॥ १३ ॥

परिमितेति—परिमितः=मिताक्षरः, अत एव कमनीयः=सुन्दरः, (प्रलापो हि वचोदूषणमाहुः) कोमलः=अनिष्ठुरः वाग्विलासः=वचोविन्यासः सरसः=रसमयः मधुरः=श्रुतिप्रियश्च यः काकुः=भिन्नप्रकारः कण्ठध्वनिः स्वीकृता=अङ्गीकृता (युक्ता) काऽपि=अनिर्वाच्या लेखा=रेखा (वचोभङ्गिभावः) ध्वनिः=अव्यक्तवर्णभावः शब्दः अपि विपञ्चीपञ्चमस्य=वीणा

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

तत्कुत्र पुनः प्रेयसी ? (विलोक्य) तत्कथमयमदृष्टचन्द्रलेखश्चन्द्रालोकः ।

(ततः प्रविशति यथा निरूपयिष्यमाणा जानकी)

रामः—(ससंभ्रमम्) प्राप्तेयं प्रेयसी (इति गन्तुमिच्छति)

लक्ष्मणः—(रामं हस्ते धृत्वा) अलमिह संभ्रमेण, विद्याधरोपनीतमिन्द्रजालकं खल्वेतत् ।

रामः—(निर्वर्ण्य) अये, क एष सन्निवेशविशेषः ? तथा हि—

एकेनालम्बितेयं शिथिलभुजलताशोभिना शाखिशाखा,
हस्तेनान्येन चापं दिनकरकिरणक्रान्तकान्तिः कपोलः ।
एष स्रस्तो नितम्बे लुलति कुचभरस्त्यक्तकाञ्चीकलापे
नेत्रोत्सङ्गे च वाष्पस्तबकनवकणैः पक्ष्मला पक्ष्मलेखा ॥१५॥

...स्वरस्य अनुवादी=अनुकर्त्ता, श्रुतिः=तदुक्तशब्दाकर्णनम् अपि कलकण्ठी=कोकिला ...स्याः कण्ठस्य संवादः=सादृश्यं तस्य भूमिः=स्थानम् । मिताक्षरः कोमलबन्धः ...रसकाकुः वीणाविनिन्दकस्वरः कोकिलाहृतिश्रव्यश्च सीतायाः समालाप इति ...वः । 'वीणा तु बल्लकी, विपञ्ची सापि' इत्यमरः । मालिनीवृत्तम् ॥१४॥

अदृष्टेति—अदृष्टा लेखा=कला यत्र तादृशः चन्द्रालोकः=शशिप्रकाशः । ...याऽदृश्यमानस्य चन्द्रमसः प्रकाशः कौतुकाय, तथैव सीतामपश्यतस्तदुक्ति...वणमाश्चर्यकरमिति भावः ।

एकेनेति—शिथिला=दुर्बला श्रान्ता च या भुजलता=बाहुवल्ली तया ...शोभते तच्छीलेन एकेन हस्तेन=करेण इयं शाखिशाखा=वृक्षशाखा आलम्बिता =आश्रिता । अन्येन च (हस्तेन) दिनकरस्य=सूर्यस्य किरणैः=अंशुभिः ...क्रान्ता=वान्ता (रक्तिमानमानीता) कान्तिः=प्रकाशो यस्य तादृशः कपोलः ...आलम्बितः' इत्यत्रापि सम्बन्धनीयम् । एवं स्रस्तः=असंस्काररूक्षतया विकीर्णः ...कचभरः=केशपाशः नितम्बे=कटिभागे लुलति=इतस्ततो लुठति, नितम्बविशे...षणमाह=त्यक्तेति । त्यक्तः (विरहकृतदुःखेन) विसृष्टः काञ्चीकलापः=रशना ...येन तादृश इत्यर्थः । नेत्रोत्सङ्गे=नयनप्रान्ते च वाष्पस्तवकस्य=अश्रुप्रवाहस्य ...नवकणैः पक्ष्मलेखा=नेत्रकेशपङ्क्तिः पक्ष्मला घना (दृश्यत इति शेषः) एकेन

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

नूनमियमशोकशाखिशाखां सखीमिवाऽवलम्ब्य निद्रामुपगता। तथा हि-

आमीलन्नवनीलनीरजतुलामालम्बते लोचनं
शैथिल्यं नवमल्लिकासहचरैरङ्गैरपि स्वीकृतम्।

(पुनर्विमृश्य) नूनमनया हृदयप्रमोददायी कोऽपि स्वप्नो दृष्टः। तथा हि-

आलापादधरः स्फुरन्कलयति प्रेङ्खत्प्रवालोपमा-
मानन्दप्रभवाश्च वाष्पकणिका मुक्ताश्रियं बिभ्रति ॥१६॥

सीता—(उन्मील्य लोचने) हद्धि हद्धि, अण्णारिसो मे जीअलोओ गोअ-
णई। कहिं सा, णीलुप्पलसामलो कहिं रामो, लङ्का कहिं, कहिं वा हद्धि, रो-
क्खीविदा सीदा (इति मूर्च्छति) (हा धिक् हा धिक्, अन्यादृशो मे जीवलोके

हस्तेन वृक्षशाखामाश्रयति, परत्र च करे कपोलं धत्ते, मुक्ता कवरी काञ्चीशून्ये
नितम्बे व्यस्तभावेन लुलति, अक्ष्णोः पक्ष्माणि चाश्रुप्रवाहघनानि दृश्यन्ते तदयं
विलक्षणः सीतायाः (शयनकालेऽपि) सन्निवेशविशेष इति भावः। स्रग्धरा
वृत्तम्। 'वृक्षो महीरुहः शाखी' पक्ष्माक्षिलोम्नि' इति चामरः ॥१५॥

सखीमिव—सहचरीमिव [विस्रब्धभावेनेत्यर्थः।]

आमीलदिति—आमीलतः=सङ्कुचतो नवस्य=नूतनस्य नीलनीरजस्य
=श्यामकमलस्य तुलां=सादृश्यं लोचनं=नयनम् (सीताया इति शेषः) आल-
म्बते=आप्नोति। नवा=अचिरविकचा मल्लिका=श्वेतपुष्पभेदस्तत्सहचरैः=सुहृद्भिः
(साम्यकृतं साहचर्यम्) अङ्गैरपि शैथिल्यं=व्यस्तत्वं स्वीकृतम्=धृतम्।
आलापात्=किञ्चित्कथयितुं प्रवृत्तेः (हेतोः) स्फुरन्=किञ्चिच्चलन् अधरः
प्रेङ्खतः=कम्पमानस्य प्रवालस्य=नवपल्लवस्य उपमां=सादृश्यं धत्ते=धारयति,
आनन्दात् (स्वप्ने दृश्यमानाभीष्टपदार्थदर्शनजात्) प्रमोदात् प्रभवः=उत्पत्तिः
यासां ताः वाष्पकणिकाः अश्रुविन्दवः मुक्तायाः=मौक्तिकस्य श्रियं बिभ्रति=शोभां
धारयन्ति। निद्रया निमीलितं नयनं सङ्कुचतो नवनीलकमलस्य, मल्लिकायाः
शिथिलस्य पुष्पभरस्याङ्गानि, चलतः प्रवालस्याधरः, सादृश्यमावहन्तीति भावः।
शार्दूलविक्रीडितं वृत्तमुपमाचाऽलङ्कारः ॥१६॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

...देहानदी। क्व सा, नीलोत्पलश्यामलः क्व रामः, लङ्का क्व, क्व वा हा धिक् रामै-...जीविता सीता)।

रामः—अयि वसुधे,

यां वै गर्भे त्रिजगदबलारत्नभूतां दधाना-
लब्धार्थत्वाज्जगति भवती रत्नगर्भा बभूव।
तामुत्सङ्गे तव विलुलितां वीक्षमाणा च सीतां
द्रागुद्दीर्णासीन्न कथमथवा देवि! सर्वंसहासि ॥१७॥

तदेनामभ्यर्थयामि तावदस्याः समुद्बोधनाय, अथवा किमभ्यर्थनया?

निजामपि सुतां सीतां नेयमुद्बोधयिष्यति
निजेऽप्यपत्ये करुणा कठिनप्रकृतेः कुतः? ॥१८॥

अन्यादृशः—भिन्नप्रकारकः।

यामिति—यां=सीतां त्रिजगदबलारत्नभूतां=लोकत्रयरमणीभूषणभूतां गर्भे ...कुक्षौ (प्रजननार्थम्) दधाना=धारयन्ती भवती लब्धार्थत्वात्=प्राप्तयाथार्थ्यात् (यथार्थतः) जगति=संसारे रत्नगर्भा (सीतारूपललनारत्नसनाथगर्भतया ...र्थतो रत्नगर्भा) बभूव=जाता। ताम् सीताम् तव=तज्जनन्याः उत्सङ्गे=क्रोडे ...विलुलितां=व्यस्तभावेन पतितां वीक्षमाणा=पश्यन्ती (भवती) द्राक्=(तत्का-...लमेव) झटिति न दीर्णा=विदलिता आसीत्=अजायत (अविदीर्णहृदयैवास्ते-...त्यर्थः) अथवा देवि, त्वं सर्वंसहा=सकलकष्टसहनसमर्थासि, यदेतादृशमप्य-...तिविपत्पातं सोढुमपारयः। सर्वापि जननी निजां स्वयौवनपनकुठारभूतामपि ...सन्ततिमापदि पश्यन्ती द्रवति, 'भवत्यास्तु रत्नरूपेयं पुत्री सीता, यामुत्पाद्य ...भवं रत्नगर्भा इत्यभिधानं सार्थकीकृतवत्यसि, तामेव तवैव क्रोडे व्यस्ततया ...पतितां दृष्ट्वापि तवोरो न विदीर्णमतस्त्वमवश्यं सर्वंसहासीति तात्पर्यम्॥ ...मन्दाक्रान्ता वृत्तम् ॥१७॥

निजामिति—इयं=पृथिवी निजां=स्वीयां सुतां=दुहितरमपि सीतां न ...उद्बोधयिष्यति=जागरिष्यति (उत्थाप्य समाश्वासयिष्यति) अत्रार्थे कारणमाह—निजेऽपीति। कठिना=स्वतो निर्ममा प्रकृतिः=स्वभावो यस्य तस्य स्वभावकठोरस्य

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

तदेनं तावदभ्यर्थयामि ।

स्निग्धाशोकद्रुम, निजसखीं तूर्णमुद्बोधयैनां
सिक्त्वा सिक्त्वा किसलयकरस्रंसिना सीकरेण ।
एतस्याः किं नयनकमलस्यन्दिभिः सान्द्रसान्द्रै-
र्वाष्पोत्पीडैरनुदिनमपि त्वं न सिक्ताऽऽलवालः ॥१९॥

कथमनाकर्णितकेन प्रत्याख्यातमनेन, अये, कृतघ्नता पलाशिनः । (विलो
कथं प्रकृतिप्रियंवदाया मे प्रियायाः सखीजनोऽपि न कश्चिदिह ।

निजे=स्वीयेऽपि अपत्ये=सन्ताने करुणा=दया कुतः? न भवतीत्यर्थः । सामान्ये
विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥१८॥

स्निग्धेति—स्निग्ध=स्नेहकोमल, (अत एवानुरोधपालनाशा) अशोक
द्रुम=अशोकवृक्ष, एनां=भूमौ शयानां निजसखीम्=निजसहचरीम् (अत
कर्त्तव्यप्रबोधोऽयम्) सीतां तूर्णं=शीघ्रम् उद्बोधय=जागरय । जागरणस्याशक
तयाऽशोकस्याप्रवृत्तिमुत्प्रेक्ष्य तां वारयति-सिक्त्वेति किसलयेभ्यः=प्रवाले
स्रंसिना=स्यन्दमानेन सीकरेण=पयोविन्दुना सिक्त्वा सिक्त्वा=पुनः पुनः सिक्त्
(जागरयेति सम्बन्धः) नन्वनुपकारिणि जने किमिति जायतामशोकस्य त
प्रवृत्तिरत आह—वाष्पेति एतस्याः=सीतायाः नयनकमलस्यन्दिभिः=नेत्रसरो
हात्प्रवहमानैः सान्द्रसान्द्रैः=अतिनिविडैः वाष्पोत्पीडैः=नेत्रजलप्रवाहैः अनुदि
=प्रत्यहं किं त्वं सिक्तालवालः=अभिषिक्तमूलः न असि । प्रत्यहं नयनच्यु
स्तवालवालमियमसिञ्चदतः सम्प्रति भूमौ लुलन्तीमिमामुत्थापयितुं त्वं सर्व
युज्यसे कृते च प्रतिकर्त्तव्यम्' इति न्यायादिति भावः । आलवालम्=पयो
दानाय निर्मितो वृक्षाधो गर्त्तविशेषः । मन्दाक्रान्तावृत्तम् । 'अम्भसां य
धारणम् । स्यादालवालमावालमावापोऽथ' इत्यमरः ॥१९॥

पलाशिनः—वृक्षस्य, 'पलाशीद्रुद्रुमागमाः' इत्यमरः । पलं=मांसमश्नाति
तच्छीलस्य=राक्षसस्येति वाऽर्थः । 'तलं स्याच्चामिषे पलम्' इत्यमरः ।

प्रकृतिप्रियंवदायाः—स्वभावतो मिष्टभाषिण्याः, एतेन सुलभास्वत्सख
इति सूचितमथापि कोऽपि सखीजनो नास्तीति विस्मयः ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(प्रविश्य)

त्रिजटा—जानकि, समाश्वसिहि समाश्वसिहि

सीता–(समाश्वस्य) कहं पिअसही मे तिअडा (कथं प्रियसखी मे त्रिजटा)

त्रिजटा—सखि, अनया ते मधुरया मुखरेखया तर्कयामि यत् किल प्रियं (अ)पि दृष्टवती भवती ।

सीता—अत्थि दाणिं हि मए सिविणाअम्मि सअं गोलाणईए सहत्थकलिद-(तरंग)चामरधवलकमलादवत्ताए परिचरिज्जन्तो अज्जउत्तो दिट्ठो। (अस्तीदानीं हि (मया) स्वप्ने स्वयं गोदानद्या स्वहस्तकलिततरङ्गचामरधवलकमलातपत्रया परिचर्य-(मान) आर्यपुत्रो दृष्टः)

त्रिजटा—तर्हि वर्द्धसे। सुखस्वप्नः खल्वसौ ।

सीता—केरिसो मे रामेक्कचित्ताए सिविणअम्मि विस्सासो (कीदृशो मे रामै-(कचि)त्तायाः स्वप्ने विश्वासः)

त्रिजटा—तत्किं चिन्तास्वप्न इति सम्भावयसि । नहि । चिन्तास्वप्नोऽपि नैवम-(चिन्ति)तावगाही भवति ?

सीता—किं उण अचुम्बिदम् (किं पुनरचुम्बितम्)

त्रिजटा—यन्न सम्भाव्यते ।

सीता –जं णहु संभावीअदि तं पि हला अत्थि अत्थ लोअम्मि ।
जं जीवइ जणअसुदा अपुलोअन्तीवि रामचन्दमुहम् ॥२०॥

मधुरया=प्रसन्नया, मुखरेखया=आननकान्त्या ।

परिचर्यमाणः—सेव्यमानः ।

चिन्तास्वप्नः—यदहर्निशं मनसि ध्यायते, तदेव यदि स्वप्नसमये दृश्यते (तदा) स चिन्तास्वप्नः कथ्यते । एतस्य च न स्वप्नविशेषफलप्रदत्वमिति, तस्या-(भ्या)सकृतया मनोगोचरत्वाभावादिति तद्विद आहुः ।

अचुम्बितविगाही—असम्भूतविषयकः ।

यन्न खल्विति—यत् न संभाव्यते=उत्प्रेक्ष्यते तदपि अत्र (विचित्रे) (अस्मिन्) लोके=संसारे अस्ति=विद्यते स्वसिद्धान्तं पोषयति=यज्जीवतीति, यत् जनक-(सु)ता=जानकी रामचन्द्रमुखं=रामवदनम् अनालोकयन्ती=अपश्यन्ती अपि

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

ता किं इमिणा सिविणएण जीविदेण वा। उवेक्खिदह्मि अज्जउत्तेण।
[यत्र खलु सम्भाव्यते तदपि हला अस्त्यत्र जीवलोके।
यज्जीवति जनकसुता अनालोकयन्त्यपि रामचन्द्रमुखम् ॥२०॥
तत् किमनेन स्वप्नेन जीवितेन वा, उपेक्षितास्म्यार्यपुत्रेण]

रामः—शान्तं पापम्। अयि प्रिये, हृदयस्थितापि मे कथमजानतो व...
चित्तवृत्तिम्?

सीता—अहवा किन्ति हरमुउडमिअङ्के कलङ्कं आरोपइस्सम्। ...
अज्जपुत्तो अज्जवि अकलिदउत्तन्तो मे (अथवा किमिति हरमुकुटमृगाङ्के क...
मारोपयिष्ये। जानाम्यार्यपुत्रोऽद्याप्यकलितवृत्तान्तो मे)

रामः—प्रिये, इदानीमुचितमनुसन्दधासि।

सीता—(विमृश्य) कहं।

वाआलेणवि कहिदाणादं णाहस्सं नेउररएण।
अहवा विहि विहुरवलात्तेणवि मूअत्तणं पत्तम् ॥२१॥
[वाचालेनापि कथिता नाहं नाथस्य नूपुररवेण।
अथवा विधिविधुरबलात्तेनापि मूकत्वं प्राप्तम् ॥]

जीवति। यदि (सर्वथाप्यसम्भावितं) राममपश्यन्त्या जानक्या जीवनं सम्भवति...
तर्हि सर्वविधमपि अदृष्टश्रुतपूर्वं कयापि दृशाऽसम्भावितं किमपि वस्तु ज...
भवितुमर्हति, ततश्च अचुम्बितावगाह्यपि स्वप्नः सम्भवतीति सीतातात्पर्यम्॥२...

हरमुकुटमृगाङ्के—शङ्करचूडामणीभूतचन्द्रे (अतिपवित्र इति तात्पर्यं)
कलङ्कम्=असत्यंदोषम्।

वाचालेनापीति—वाचालेन=मुखरेणापि नूपुररवेण=मञ्जीरशब्देन ...
=सीता नाथस्य न कथिता रामाय न निवेदिता, तत्र साधकमाह—अथवा वि...
=भाग्यस्य विधुरं=वक्रत्वं तद्बलात्=ततः तेन नूपुररवेणापि मूकत्वं=वाक्शक्ति...
राहित्यं प्राप्तम्। प्रबलेन भाग्यदोषेण साधनान्यप्यसाधनतामापाद्यन्तेऽत ...
खरेणापि नूपुरेण (स्वस्वभावमपि हित्वा) नाहं रामाय निवेदितवृत्ता ...
भावः ॥२१॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(नेपथ्ये)

अये लङ्कानिवासिनः, सावधानमवस्थीयताम्, नन्वितः—

प्राकारमुन्नतमसीमबलो विलङ्घ्य
प्राप्तो रुषारुणितदृक्कपिवीर उच्चैः ।

(उभे आकर्ण्य त्रासं नाट्यतः)

(पुनर्नेपथ्ये)

तत्सम्मुखं प्रचलति स्वयमक्षनामा
नन्वेष राक्षसपतेः कुपितः कुमारः ॥२२॥

सीता—कहं उण सह महीअलेण वेवदि व्व असोअवणम् (कथ पुनः सह महीतलेण वेपत इवाशोकवनम्)

त्रिजटा—(विमृश्य)

तुहिनकरमयूखैर्दीप्तकन्दर्पदर्प-
स्तपनकुलबधूटीं त्वामयं मुक्तलज्जः ।

प्राकारमिति—असीम=निरवधि बलं=सामर्थ्यं यस्य सः, रुषा=क्रोधेन अरुणिता=रक्तीकृता दृक्=दृष्टिर्यस्य तादृशः कोपपाटलनयन इत्यर्थः, उच्चैः=महान् कपिवीरः उन्नतं=शिखरिणं प्राकारं=प्राचीरं विलङ्घ्य=अतिक्रम्य प्राप्तः=आयातः । अयं कमपि महान्तमुपद्रवं रचयिष्यतीति चिन्तोदयः । एष राक्षसपतेः=रावणस्य प्रथितः=स्वीयपराक्रमादिना ख्यातः कुमारः अक्षनामा स्वयं तत्सम्मुखं=तदभिमुखं प्रचलति—तेन सह योद्धुमुपयातीति भावः ॥ वसन्ततिलकं छन्दः ॥२२॥

तुहिनेति—तुहिनकरस्य=हिमकरस्य (चन्द्रमसः) मयूखैः=किरणैः दीप्तः=प्रज्वलितः कन्दर्पस्य=कामस्य दर्पः=वेगो यस्य सः=समेधितमदनज्वाल इत्यर्थः, मुक्ता=त्यक्ता लज्जा=त्रपा येन तादृशः अयम् सः पुरोदृश्यमानः, अयमयम्—(घृणां द्योतयितुमयं शब्दो द्विरावृत्तः) रामचन्द्रैकचितां=रामचन्द्रैकबद्धभावां तपनकुलस्य सूर्यवंशस्य बधूटीं=स्नुषाम् त्वाम् अनुनेतुम्=अनुकूलयितुम् प्रार्थनाचाटुभाषणादिना स्वस्मिन् कृतप्रणयां विधातुमित्यर्थः, विपिनवीथीम्=वनपद्धतिम् एति=आयाति । अत्र रामचन्द्रैकचित्ताम् इति 'तपनकुलबधूटीम्' इति

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अयमयमनुनेतुं रामचन्द्रैकचित्ता-
मपि स विपिनवीथीमेति लङ्काधिनाथः ॥२३॥

(सीता त्रासं नाटयति)
(ततः प्रविशति रावणः)
(सीता पराङ्मुखी तिष्ठति)

रावणः—अयि जानकि,

कन्दर्पज्वरवेदनापरिपतद्बाष्पस्रुतिक्षालितं
स्वर्गस्त्रीकुचकुम्भकुङ्कुमरजस्तेयापराधोज्ज्वलम् ।
एतत्त्वां सुरदन्तिदन्तशिखरोल्लेखाङ्कविख्यापित-
प्रस्फूर्जच्चतुरन्तविश्वविजयं वक्षःस्थलं याचते ॥२४॥

चोक्त्वा तादृशोदात्तनायकानुरागिण्याः परमपवित्रकुलवधूटीत्वमागतायाश्च तत्
तत्प्रार्थनाऽश्रवणं युक्तमेवेति स्वाशयः प्रकटितः ॥ मालिनीवृत्तम् । अनेन श्लोके
रावणकृतप्रार्थनाया वैफल्यं भावीत्यावेदितम् ॥२३॥

कन्दर्पेति—कन्दर्पज्वरस्य=कामतापस्य वेदनया=पीड़या परिपततः=प्र
हमानस्य वाष्पस्य=अश्रुणः स्रुत्या प्रवाहेण क्षालितं=धौतं, कामवेदनानव
प्रवृत्ताश्रुझरधौतमित्यर्थः, (पुनः) स्वर्गस्त्रीणाम्=स्वर्बालानां कुचा एव कुम्भा
तेषु यत्कुङ्कुमरजः=काश्मीरजपरागस्तस्य स्तेयम्=अपहरणं तेन योऽपराधस्ते
उज्ज्वलं=प्रकाशमानम्, स्वर्गाङ्गनालिङ्गनजन्यतदीयस्तनलिप्तकुङ्कुमपरागघृष्ट
मिति भावः, (किञ्च) सुरदन्तिनां=दिग्गजानां दन्तशिखरैः=दन्ताग्रैरुल्लेख
=भेदनं तस्याङ्कः=चिह्नं तेन विख्यापितः=प्रसिद्धिं नीतः स्फूर्जन्=द्योतमानश्च
-रन्तस्य दिगन्तपर्यन्तस्य विश्वस्य=संसारस्य विजयो यस्य तादृशम्=दिग्गजदन्त
ग्रोल्लेखचिह्नितया ।दिगन्तमेदिनीविजयप्रशस्तिशालित्वेन प्रख्यापितमेव
रावणीयं वक्षःस्थलम्=उरोदेशस्त्वां याचते=प्रार्थयते मां शीतलयेत्यर्थयत इ
भावः । प्रथमविशेषणेन त्वद्विषयकानुरागवत्ता, द्वितीयविशेषणेन वह्वभान्य
काम्यत्वेऽपि त्वदभिकृतत्प्रार्थनाया अवधेयता, विश्वविजयसूचकतृतीयविशेषणे

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सीता—(अनाकर्णितकेन) अवि णाम पुणोवि रामचन्दमुहचन्दं पुलोवइस्सम्।
(अपि नाम पुनरपि रामचन्द्रमुखचन्द्रं प्रलोकयिष्ये)

त्रिजटा—जानकि, एवं प्रलापिनि लङ्केश्वरे कर्णावधानमपि तावद्देहि।

रामः—साधु, त्रिजटे, प्रलाप इत्युक्तवत्यसि।

रावणः—यत्सन्तुष्टवतः पुरः पुरभिदश्छन्दोत्सवच्छेदिनो
न क्रोधानमन्नवोद्गतशिरःश्रेणौ नमन्त्यामपि।
एतत्तद्दशमं शिरो मम नमत्त्वत्पादपाथोजयो-
रव्याजं मिथिलेन्द्रपुत्रि, भवतीं प्रेमातुरं याचते ॥२५॥

...वद्ध्वायास्तवोद्धारो न सम्भवतीत्यगत्या मदनुरोधस्य अवश्यपालनीयत्वे ...त्येव तदौचित्यमित्याद्यर्था व्यज्यन्ते। शार्दूलविक्रीडितं वृत्तम् ॥२४॥

प्रलापः—अनर्थकं वचनम्। एतेन सीताया आत्मविश्वासो व्यज्यते।

यत्सन्तुष्टवत इति—सन्तुष्टवतः=प्रसन्नस्य (आराधनप्रीतस्य) छन्दः ...त्मेच्छा तस्य उत्सवः=पूर्त्तिविनोदस्तं छिनत्ति तच्छीलस्य (दशापि शिरांसि ...मिति कामयमाने रावणे नवस्वेव शिरस्सु छिन्नेषु हरः प्रसादपरो बभू- ...कथां मनसि कृत्य तथोक्तिः) आत्मेच्छापूरणविनोदविघ्नकरस्य पुरभिदः ...तस्य पुरः=अग्रे नवोद्गता=प्रत्यग्रप्ररूढ़ा या शिरःश्रेणी=मूर्द्धपरम्परा तस्यां ...त्याम्=कृतप्रणामायामपि यत्=(रावणस्य शिरः) क्रोधात्=दशमशिरश्छेदा- ...पविघ्नविधानजन्यकोपात् न अनमत्=न नम्रतामगच्छत्। तत् एतत् ...पादपाथोजयोः=त्वच्चरणकमलयोः नमत् नम्रीभवत् मम दशमं शिरः=रावणस्य ...मो मूर्द्धा, हे मिथिलेन्द्रपुत्रि !=विदेहतनये ! अव्याजं=निश्छलं प्रेमातुरं ...हपराधीनं सत् भवतीं=त्वाम् याचते=प्रार्थयते (प्रसादमिति शेषः) पुरा ...ने हरप्रसादनाय दशापि निजशिरांसि च्छेत्तुं तत्परे नवस्वेव शिरस्सु छिन्न- ...षु प्रसन्नः शिवः छिन्नान्यपि तस्य नवशिरांसि प्रारोहयत् तैश्च नवोद्गतैः ...रोभिः प्रसन्नं दत्तवरं च शिवं रावणः प्राणमत्, दशमं तु शिरः स्वावमान- ...तमिव नानमत्। इयमत्र कथा। एतावता रावणस्त्वं गौरवं प्रकटय्य ...मनुकूलयितुमिच्छति। प्रागुक्तमेव वृत्तम्। 'अभिप्रायश्छन्द आशयः' व्याज- ...पधयश्छद्मकैतवे' इत्युभयत्राऽमरः ॥२५॥

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सीता—(संस्कृतमाश्रित्य)

निजे पाणौ कृत्वा कमललतिकाबालमुकुलं
ययोश्चक्रे गुञ्जन्मधुपमवतंसं रघुपतिः ।
अपीमौ कर्णौ मे वचनमिदमाकर्ण्य न कथं
विशीर्णौ युक्तं वा चरितमिदमन्तः कुटिलयोः ॥२६॥

रावणः—अयि जानकि, अवलोकनमात्रेणापि तावन्मां सम्भावय ।

सीता—अयि निशाचर, एतावत्प्रार्थनाभङ्गलाघवात् कथं राघवा[त्] न बिभेषि ।

रावणः—अये, क एष राघवो नाम, यं किल जनो राम इति जल्पति (विहस्य) ।

काम: कियानसिलतानिहितैकबाहु-
क्रीडार्दितत्रिभुवनस्य दशाननस्य ।

(संस्कृतमाश्रित्य) स्त्रीपात्रस्य प्राकृतया गिरा व्यवहरतोऽपि क्वचित्सं[स्कृ]तया गिरा व्यवहारो नाट्याचार्यसम्मतः ।

निजे पाणाविति—रघुपतिः निजे=स्वीये पाणौ गुञ्जन्मधुपं=शब्दायमा[नं] भ्रमरं, कमललतिकायाः=नलिन्या बालमुकुलं=कोरकं कृत्वा=आदाय य[योः] =(मम श्रवणयोः) अवतंसं=भूषणं चक्रे=विहितवान् । इमौ=रामेण नि[जे] करेण कमलकोरकद्वारा भूषितौ मे=सीतायाः कर्णौ=श्रवणे इदं=रावणोक्तं, व[चन]माकर्ण्य=श्रुत्वा कथं न विशीर्णौ=न भग्नौ ? वा=पक्षान्तरे, अन्तः=[अ]न्तः कुटिलयोः (अनयोः=श्रवणयोः) इदं युक्तं चरितम्=उचितमाचरणम् । [य]द् रामस्य मयीयान् स्नेहो यद्भ्रमरकृतं दंशनमविगणय्यापि गुञ्जद्भ्रमरेण कमलको[र]केण मम श्रवणममण्डयदथ च तदेव कर्णविवरमीदृशं पुनरनुवदितुमप्ययो[ग्यं] रावणवचनमाकर्ण्याऽपि न विशीर्णं तदिदं तदीयान्तःकुटिलत्वकृतमिति हृदय[म्] । शिखरिणीवृत्तम् । सामान्येन विशेषसमर्थनादर्थान्तरन्यासोऽलङ्कारः ॥२६॥

कामः कियान् इति—असिलता=खड्गयष्टिस्तत्र निहितः=स्थापित ए[को] बाहुः=हस्तस्तेन अर्दितं=पीडितं त्रिभुवनं=लोकत्रयं येन तस्य=एकत्रकरे [धृ]...

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रामस्तु केवलमयं सुमुखि, त्वदर्थे
मां हन्ति हन्त न चिरान्निशितैः शरौघैः ॥२७॥

सीता—सत्यमेतत् ।

रावणः—(स्वगतम्) कथमन्यदेव किमप्युक्तवानस्मि (तदेव विपरीतं ...ता) अयि जानकि, तावन्मां जीवय नयनामृतेन ।

सीता—तदा त्वामपि लङ्केश, विलोकयिष्यति जानकी ।

रावणः—(सप्रत्याशम्) तत्कथय समयम् । अयं हि—

मन्दोदरीमपि विमुञ्चति राज्यमेत-
दप्युन्मदं तव पदाब्जतले करोति ।
किं जल्पितेन बहुना सुमुखि त्वदर्थे
स्वान्युच्छिनत्त्यपि शिरांसि पुनर्दशास्यः ॥२८॥

...य त्रिलोकीं कम्पितवतः दशाननस्य=रावणस्य (पुरः) कामः=कामदेवः ...न्=कतरः ? (अगण्य इति भावः) सुमुखि=सुवदने (सीते) त्वदर्थं ...वदर्थं केवलमयं रामस्तु हन्त ! निशितैः=तीक्ष्णैः शरौघैः=बाणैः मां न ...रात्=अचिरेण हन्ति=घातयति । अत्र रावण आत्मनः शौर्यं प्रचिकाशयिषुरामं ...न्दितुमिदं ब्रुवाणः सात्त्विकभावान्यतमव्यग्रतया रामस्थाने कामं कामस्थाने ...ं पठति स्म तेन सम्पूर्णा भित्तिरेवान्यथा जाता । वसन्ततिलकं वृत्तम् ॥२७॥

तदा—यदा त्वदुक्तं फलिष्यति (अर्थाद्रावणे रामेण निहते सीता घृणामयीं ...ं त्वयि प्रक्षेप्स्यति नततः पूर्वमिति भावः) ।

मन्दोदरीम् इति—दशास्यः=रावणः त्वदर्थे=तव कृते मन्दोदरीम्=स्वम- ...षीम् अपि विमुञ्चति=परिहरति एतत् उन्मदं=समृद्धं (सर्वथा सम्पन्नं) ...ज्यमपि तव पदाब्जतले=चरणकमलादधः (तवाधीन्ये) करोति=स्थापयति, ...हुना=इदं करोति, इदं करोत्यादिना जल्पितेन=भाषितेन किं=न किमपि ...लमित्यर्थः, पुनः स्वानि शिरांसि=मस्तकानि अपि छिनत्ति=खण्डयति (त्वदर्थे इत्यनुषञ्जनीयम्) अत्र मन्दोदरीपदं राज्यस्य प्रतीयमानायाः सौन्दर्यम्, ...मदमिति राज्ये लब्धे तत्राभिलाषः क्वापि न प्रतिबध्येतेति 'शिरांसि छिनत्ति'

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सीता—अपि खद्योतभासापि समुन्मीलति पद्मिनी ।

रावणः—(सक्रोधम्) आः पापे, यावत् किल तपनखद्योतयोस्तावदेवा रामरावणयोः ? यदियं हन्यसे । (इति खड्गमुत्पाटयति) ।

रामः—हा जानकि, त्वमधुनासि कथं भवित्री

(सविचिकित्सम्)

धिग्दैवतं तव सुदारुण एव पाकः ।

(सक्रोधम्)

आः पाप, राक्षसकुलाधम, संहृतोऽसि

(ससंभ्रमम्)

हे वत्स, लक्ष्मण, धनुर्धनुरेष कालः ॥२९॥

लक्ष्मणः—आर्य, किमिदमैन्द्रजालिक-विलोकनादलीकमेव संभ्रम्यते ।

रावणः—अयि जानकि, अयमसावुदीर्णकरालकरवालः कालभुजङ्गः, त दानीमपि दशकण्ठभुजाश्लेषभेषजमनुजानीहि ।

इत्यनेनात्यन्तिकी स्वस्य सीतां प्रत्याज्ञाकारितेत्याद्यर्थाः प्रकाश्यन्ते । वृत्तमत्रापि ॥२८॥

हा जानकीति—हा जानकि=सीते अधुना=रावणखड्गे उद्यते कथं भवि असि=कथं स्थातासि दैवतं=देवं (विधिमिति विवक्षा) धिक् । तव=वि एष=दृश्यमानः सुदारुणः=अतिभीषणः पाकः=परिणामः । आः पाप=पापकर्म राक्षसकुलाधम=नीचराक्षस, एष संहृतः=मारितः असि (मयेति शेषः, त्वामहं हन्मीति भावः) हे वत्स, लक्ष्मण, धनुः, धनुः, (कुत्र वर्त्तत इ जिज्ञासा) एष कालः, उद्यतखड्ग एवायं हननीयो येन सीता जीव्येत, पाति खड्गे तु रावणे सीतायां मृतायां सर्व आरम्भ एव वृथा स्यादिति भावः धनुर्धनुरिति ससम्भ्रमे द्विरुक्तिः । वसन्ततिलकमेव वृत्तम् ॥२९॥

उदीर्णः—कोशादुद्धृतः, करालः=भीषणः, करवालः=खड्गः, कालभुज =कृष्णसर्पः ।

दशकण्ठेति—सविषेण सर्पेणाहतस्य यथौषधसेवनं विना नास्ति

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सीता—विरम विरम रक्षः किं मुधा जल्पितेन
स्पृशति नहि मदीयं कण्ठसीमानमन्यः ।
रघुपति-भुजदण्डादुत्पलश्यामकान्ते-
र्दशमुख, भवदीयान्निष्कृपाद्वा कृपाणात् ॥३०॥

रामः—अहह !!!
विधिरकरुणः, स्फीतं स्फीतं तमः परिजृम्भते
जलधिसलिले मग्नं विश्वं, युगं परिवर्त्तते ।
कुवलयदलस्रक्संश्लेषोत्सवैकपदे पदं
यदयमदयः सीताकण्ठे करोति कृपाणकः ॥३१॥

जीवनोपायस्तथा तवापि रावणालिङ्गनात्परः प्राणरक्षोपायो नास्ति तदधुना-लिङ्गनं विधेहीति रावणस्याशयः ।

विरमेति—हे रक्षः=राक्षस, रावण, विरम विरम=निवर्त्तस्व, मुधा=मृषा व्यर्थं जल्पितेन=उक्तेन किम्=न किमपि फलमित्यर्थः । तमेवार्थं द्रढयति स्पृशतीति, उत्पलश्यामकान्तेः=कुवलयकृष्णकलेवरात् रघुपतेः=रामस्य भुज-दण्डात्=बाहुदण्डात्, निष्कृपात्=दयाशून्यात् भवदीयात्कृपाणात्=खड्गाद्वा अन्यः=भिन्नः, हे दशमुख, मदीयं कण्ठसीमानं=गलप्रदेशं न स्पृशति । मम कण्ठग्रहणं कृत्वैव भवतेदं परीक्षणीयमतो वृथा विभीषिकाव्यापारः, मम त्वयं निश्चयो यद्रघुपतिबाहुं रावणकृपाणं वाऽऽलिङ्गानि, तदन्यः कोऽपि पन्था मम नास्तीति भावः, मालिनीवृत्तम् ॥३०॥

विधिरिति—विधिः=ब्रह्मा अकरुणः=निर्दयः, (यदेवं भवति) स्फीतं स्फीतम्=अति निबिडं तमः=अन्धकारः परिजृम्भते=सर्वतः प्रसरति (दुःखमत्र तमः) विश्वं=संसारः जलधिसलिले सामुद्रे पयसि मग्नं=ब्रुडितं—(सर्वथा नष्टमित्यर्थः) यत्=यस्मात् कुवलयदलस्रक्=कमलपत्रकृतं माल्यं तस्य संश्लेषः=ग्रहणं तेन उत्सवः=प्रमोदस्तस्यैकपदे=एकमात्रस्थाने कमलमालामात्रग्रहण-योग्येऽतिकोमल इति भावः, सीताकण्ठे अयम्=उद्यतः अदयः रावणस्य कृपाणकः

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(पुनर्विभाव्य) हन्त भोः !!

चान्द्रीं लेखां दशति दशनैर्दारुणः सैंहिकेयो
नव्यां वल्लीं दवदहनकश्चान्दनीं दन्दहीति ।
अप्युन्मत्तः कुवलयमयीं मालिकामालुनीते
मूलादुन्मूलयति नलिनीं दुष्टहस्तीकरेण ॥३२॥

सीता—चन्द्रहास, हर मे परितापं, रामचन्द्रविरहानलजातम् ।
त्वं हि कान्तिजितमौक्तिकचूर्ण,-धारया वहसि शीतलम्भः ॥३३॥

पदं=स्थानं करोति विधत्ते । सीताया एवंविधो मृत्युमर्म कृते प्रलय ए स्यादिति रामस्याशयः । हरिणीवृत्तम् ॥३१॥

चान्द्रीमिति—दारुणः=अतिनिर्मलः सैंहिकेयो=राहुः चन्द्रस्येयं चान्द्री तां चान्द्रीं=वैधवीं लेखां=कलां दशनैः=दन्तैः दशति=चर्वयति, दवदहनः=वन-वह्निः नव्याम्=अचिरप्ररूढां चान्दनीं वल्लीं=श्रीखण्डलतां दन्दहीति=अतिशये दहति । उन्मत्तः=प्रमत्तबुद्धिर्जनः कुवलयमयीं=नीलकमलनिर्मितां मालिकां =स्रजम् आलुनीते=खण्डयति, दुष्टहस्ती=मत्तो गजः करेण=शुण्डादण्डेन नलिनीं =कमलिनीं मूलात्=आमूलम् उन्मूलयति=उत्पाटयति । विधातुः प्रपञ्चे यदि राहुदवदहनप्रमत्तजनदुष्टकरिभि श्चन्द्रलेखाचन्दनलताकुवलयमालिकानलिन्यो विनाश्यन्तेऽथ च स ब्रह्मा ध्यानमग्न एव तिष्ठति तदा सीताया अपि रावण-कृपाणेन वधे नायं स्वासनात् स्पन्दितापि तदयमतिनिर्दयो विधातेत्यर्थः। मन्दाक्रान्तावृत्तम् । वयं तु सीताया वधः सैंहिकेयकर्तृकचन्द्रलेखादंशनकल्पः, दवदहनकृतचन्दनलतादाहसमः, प्रमत्तक्रियमाणकुवलयमालाखण्डनसम इत्या-द्यर्थमभिप्रेमः । अत्रार्थे सीताया चन्द्रलेखा, चन्दनलता, कुवलयमालादिभिः सौन्दर्य, गुण, सौरभादिकृतं साम्यं व्यज्यमानं चेतश्चमत्करोतीति ॥३२॥

चन्द्रहासेति—चन्द्रहास=रावणकृपाण रामचन्द्रस्य विरहः=वियोग एव (सन्तापकत्वात्) अनलः=वह्निः तस्माज्जातम्=उत्पन्नं मे परितापं=कष्टं हर =निवारय । त्वया हताया मम विरहवेदना निवर्त्तेतातस्तथा कुर्वित्याशयः । कान्त्या चाकचिक्यप्रभया जितं=पराजितं मौक्तिकचूर्णं=मुक्ताचूर्णं येन तादृश, त्वं धारया

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रावणः—कः कोऽत्र भोः ! सत्वरं मम करे कपालपात्रमर्प्यतां येनास्याः रुधिरं प्रतीच्छामि । (इत्यशोकविटपान्तराले हस्तं प्रसार्य) कथं न्यस्तमेव पि मम करतले कपालम् । (विलोक्य) (सचमत्कारम्) अये न कपाल-म्, किन्त्वशस्त्रच्छिन्नं शिर एव कस्यापि (विमृश्य) कस्य पुनरिदम् ? नून-कुमारस्य । (इति मूर्च्छितः पतति) ।

त्रिजटा—अयि लङ्केश्वर, समाश्वसिहि समाश्वसिहि ।

रावणः—(समाश्वस्य) नूनमिदं तस्य दुष्टकपेर्विजृम्भितम् । तेन तमेव ग्रे पातयामि ।

(इति निष्क्रान्तः)

राम-लक्ष्मणौ—(सहर्षम्) अहो संविधानवैदग्धी ।

त्रिजटा—(सीतामालिङ्ग्य) सखि, पुण्येन जीवितासि ।

सीता—अपुण्णेणेत्ति भणिज्ज (अपुण्येनेति भण) ।

त्रिजटा—कथमिव ?

सीता—कहं उण तं अपुण्णं ण होइ जं किर रामचन्दविरहतावणिव्वापणीए हासधाराए उवेक्खिदह्मि । ता किं इमिणा जीविदेण । इह दारुसंचअम्मि पज्जालेहि जत्थ इमाइं अङ्गाहं सीअलअम्मि (कथं पुनस्तदपुण्यं न भवति ल रामचन्द्रविरहतापनिर्वापण्या चन्द्रहासधारयोपेक्षितास्मि । तत्किमनेन तेन ? इह दारुसञ्चयेऽग्निं प्रज्वालय यत्रेमान्यङ्गानि शीतलयामि) ।

भागेन शीतलं=तापनिर्वापणम्, अम्भः वहसि, त्वया निहतस्य सर्वेऽपि निवर्त्तन्तेऽतस्त्वं जलं धारया वहसीति मे तर्कोऽतो ममापि तापं हरेति याः प्रार्थना । स्वागतावृत्तम् ॥३३॥

प्रतीच्छामि=गृह्णामि, तथा च दुर्गासप्तशत्यां-'रक्तबिन्दोः प्रतीच्छ त्वं णानेन वेगिता' इति ।

अशस्त्रच्छिन्नम्—उत्पाटितं, त्रोटितं वा ।

संविधानवैदग्धी—रचनाचातुरी, तत्र लक्ष्मणमते 'ऐन्द्रजालिकस्य, राममते, मत इति शेषः ।

रामचन्द्रविरहतापनिर्वापण्या=तत्सन्तापशमन्या (तया वधे ताप निवृत्ते-क्तिः) ।

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

त्रिजटा—शान्तं पापम्, नन्वचिरादेव निजाङ्कानां—

हिमकरकिरणकरम्बित-मरकतमयपीनपट्टकप्रतिमे ।
मलयजपरागरजसि रामोरसि तापमपहरसि ॥३४॥

सीता—हला, किं इमिणा अलीअजप्पिदेण, सव्वं जेव्व अणलपवेसेण ... सिदह्मि । ता उवणेहि मे अङ्गालखण्डअम् [हला, किमनेनालीकजल्पितेन सर्वमेवानलप्रवेशेन व्यवसितास्मि । तदुपनय मेऽङ्गारखण्डकम्]

रामः—हन्त भोः ! । कथमपि शार्दूलमुखान्मुक्तायाः पुनरपि शवरवागुरा... पतीर्णायाः कुरङ्गबध्वा भङ्गीमङ्गीकृतवती जानकी ।

त्रिजटा—(निर्गत्य, प्रविश्य च) असुलभानलोऽयं प्रदेशः ।

रामः—(सहर्षम्) त्रिजटे, दिष्ट्या रक्षितस्त्वया रामः ।

सीता—(संस्कृतमाश्रित्य, अशोकं प्रति)

कुरु सकरुणं चेतः श्रीमन्नशोकवनस्पते
दहनकणिकामेकां तावन्मम प्रकटीकुरु ।

हिमकरेति—हिमकरस्य=चन्द्रमसः किरणैः करम्बितं=विच्छुरितं (प्र... शितम्) यत् मरकतमयं=नीलमणिमयं पीनपट्टकं=दीर्घविस्तृतशिलाशकलं ... प्रतिमे, भूम्या श्यामे शशाङ्ककरविच्छुरिततया क्वचित्क्वचिदुज्ज्वलिते च, मल... जस्य=चन्दनस्य परागः=धूलिरेव रजो यत्र तादृशे रामोरसि=रामवक्षसि (त्वमचिरादेव निजाङ्कानां) तापम्=सन्तापम् अपहरसि=शमयिष्यसि ... वर्त्तमानसामीप्ये लट् । रामस्य श्यामगात्रतया मरकतमणिपट्टकेन तदुप... चन्दनरजसा च चन्द्रकिरणानां तुल्यत्वं निपुणं निर्व्यूढम् । आर्यावृत्त... उपमालङ्कारः ॥३४॥

शार्दूलमुखात्=व्याघ्रवदनात् । शवरवागुरा=वनेचरपाशः । अकस्मा... णाल्लब्धत्राणाऽनले दह्यत इत्येवमुक्तिः ।

असुलभः—दुरापः अनलो=वह्निर्यत्र तादृशः ।

रक्षितस्त्वया रामः (अन्यथा सीतायामग्नौ प्रविष्टायां निश्चयेनाऽहं प्रा... त्यक्ष्यमिति तद्रक्षा ममैव रक्षा)

कुरु सकरुणमिति— श्रीमन्, अशोकवनस्पते=अशोकतरो, चेतः...

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

ननु विरहिणां सन्तापाय स्फुटीकुरुते भवा-
न्नवकिसलयश्रेणी व्याजात्कृशानुशिखावलिम् ॥३५॥

(विलोक्य, सहर्षम्) हला, पेक्ख पेक्ख। निवणिदं दाव इमस्स सिहरादो ...ालखण्डअम् (हला, पश्य पश्य, निपतितं तावदस्य शिखरादङ्गारखण्डकम्) ...रत्युपसृत्य ग्रहीतुमिच्छति)

रामः—अये, कथमशोकोऽपि ममायं शोकतां गतः।

लक्ष्मणः—आर्य, अनुपपन्नमिदं यत्किल तरुशिखरमङ्गारखण्डकमुद्गिरति।

रामः—किं न सम्पादयेद्वत्स, रामस्य विधिवैधुरी ॥३६॥

(सीताऽङ्गारखण्डं हस्तेनादत्ते)

रामः—अनल, नलिनकोमले करेऽस्याः
स्फुरदरुणोत्पलकुड्मलोपमः स्याः।

...रुणं=समुदितदयं कुरु=विधेहि, मम सीतायाः (कृते) तावत् एकाम्, ...कणिकाम्=अङ्गारखण्डं प्रकटीकुरु=आविर्भावय। नन्वरण्यवृक्षस्य कुतो ...प्रकटनसामर्थ्यमिति चेदत्राह—नन्विति। ननु=निश्चयेन भवान् विरहिणां ...योगविधुराणां सन्तापाय=दाहाय नवानां=नूतनानां किसलयानां=बालपल्ल... ...नां श्रेणीसमूहस्तस्य व्याजात्=छलात् कृशानोः=वह्नेः शिखावलीम्=ज्वालाराशिं ...ी कुरुते=प्रकटयति। यतो भवान् वियोगिजनसन्तापाय नवकिशलयच्छलेन ...ानुराशिं प्रकटयति तेन मयि कृतानुकम्पेन भवताल्पपरिमाणमङ्गारखण्डं ...तं दातुं शक्यते समुचितं च, तत्र केवलं तव दयोदयमात्रमपेक्षितमिति भावः। ...णी वृत्तम् ॥३५॥

अये कथमिति—अये कथम्=कुतो हेतोः अशोकस्तन्नाम्ना प्रसिद्धः अयं ...ः मम (रामस्य) शोकतां=सन्तापकारणतां गतः। अत्र शोकपदं तत्कारणं ...यति यथाऽऽयुर्घृतमित्यादौ। अतिशयसन्तापजनकत्वं च प्रयोजनम्। ...शोकः शोकतां गत इति विरोधः। वत्स, लक्ष्मण, रामस्य विधिवैधुरी=भाग्य... ...ता किन्न सम्पादयेत् (असम्भाव्यमपि) सर्वं कुर्यादिति भावः ॥३६॥

अनलेति—हे अनल=अग्ने! अस्याः=सीताया नलिनकोमले=कमलमृदुले

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(विमृश्य)

चरितमुचितमस्ति वा कुतस्ते
ननु भुवने विदितोऽसि कृष्णवर्त्मा ॥३७॥

सीता—(हस्ते गृहीत्वा सविषादम्) कहं मह अपुण्णेण अग्गीवि सीअ संवुत्तो। (निपुणं निरूप्य सचमत्कारम्) अये, अङ्गालखण्डअं ण हु एदं अवि उण पम्मराअरअणखण्डअम् (कथं ममापुण्येनाग्निरपि शीतलः संवृत्तः अये, अङ्गारखण्डकं न खल्वेतत्, अपि पुनः पद्मरागरत्नखण्डकम्)

त्रिजटा—अये, पुण्यवतामग्निरेव रत्नं भवतीति प्रवादः सत्य एव संवृत्तः।

सीता—(पुनर्विलोक्य) कहं सा रअणमुद्दिआ (पुनः संस्कृतमाश्रि मुद्रिकां प्रति)

या शैशवावधि मनोरमरामचन्द्र—
हस्ताङ्गुलिप्रणयिनी सुभगा सुवृत्ता।
अन्येव सा जनकराजसुता कथं नु
लङ्कामुपागतवती मणिमुद्रिकेयम् ॥३८॥

करे=हस्ते स्फुरन्=विकसन् यः अरुणोत्पलकुड्मलः=रक्तकमलकोरकस्तदुप =तत्तुल्यः (शीतकोमलः) स्याः=भवेः सीतया करे कृतोऽपि तां न दहेरित्यर्थः वा=पक्षान्तरे ते=तव चरितम्=आचरणम् कुतः=कुत्र उचितमस्ति, तत्र दृष्टा माह—ननु भुवने=संसारे कृष्णवर्त्मा विदितः=ख्यातः असि। यस्य कृष्णवर्त्म जगति प्रसिध्यति, ततः साध्वाचरणस्याशा वृथेति भावः। पुष्पिता वृत्तम् ॥३७॥

या शैशवावधीति—या=मणिमुद्रिका शैशवावधि=बाल्यकालात् प्रभृ मनोरमाया=रामचन्द्रहस्ताङ्गुल्याः प्रणयिनी=प्रेयसी (मणिमुद्रिका करे तिष्ठ प्रिया पत्न्यपि कर गृह्णन्ती तिष्ठति, तदनुरोधेनायमर्थश्लेषः) सुभगा=सुन्द सौभाग्यवती च सुवृत्ता=वर्त्तुलाकारा, सुचरिता च अन्या=अपरा=द्वितीया जन राजसुता=विदेहनृपतिपुत्रीव सा इयं मणिमुद्रिका लङ्कामुपागतवती=प्राप्त श्लेषमूलक उपमालङ्कारः। वसन्ततिलकं वृत्तम् ॥३८॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(पुनः सादरं कराङ्गुलिकिसलयेन लालयन्ती) अए रअणङ्गुलीअ, अविदाव कुसलं सलक्खणाणं रामचन्दचलणाणं (अये रत्नाङ्गुलीयक, अपि तावत्कुशलं सलक्ष्मणयो रामचन्द्रचरणयोः)

(पटाक्षेपेण प्रविश्य)

हनूमान्—कुशलं देवि, कुशलम् ।

सीता—अमिअमुह, कोसि तुमम् (अमृतमुख, कोऽसि त्वम् ?)

हनूमान्—तारापते रनुचरो, रघुनन्दनस्य

दूतः सुतोऽस्मि मरुतः प्रथितो हनूमान् ।
त्वां हन्तुमुद्यतवतो दशकन्धरस्य
न्यस्तं करे निभृतमक्षशिरो मयैव ॥३९॥

रामः—अहो, कथं हनूमन्नामधेयस्य मद्बान्धवस्य विलसितमेतत् ।

लक्ष्मणः—अहो, सच्चमत्कारता संविधानस्य ।

सीता—अइ, भद्दमुह, को उण इमो तारावई (अयि भद्रमुख । कः पुनरयं तारापतिः)

हनूमान्—यो वालिनः शौर्यनिधेरमित्रं त्रैलोक्यबन्धोस्तपनस्य सूनुः ।
रामस्य पादाब्जतलाभिवर्त्ती सुग्रीवनामा कपिचक्रवर्त्ती ॥४०॥

भद्रमुख—रामकुशलनिवेदकतया सम्बोधनम् ।

तारापतेति—तारापतेः=सुग्रीवस्य अनुचरः=दासः, रघुनन्दनस्य=रामस्य दूतः=प्रेष्यः, मरुतः=वायोः सुतः=पुत्रः, हनूमान्=तन्नामा, प्रथितः=प्रसिद्धः । त्वं को ऽसि इति पृष्टस्य स्वपरिचयप्रदानमिदं हनूमतः । सुखसंवादान्तरमाह—त्वां हन्तुमिति । त्वां हन्तुं=घातयितुमुद्यतवतः=प्रयतमानस्य दशकन्धरस्य=रावणस्य करे अक्षस्य=रावणपुत्रस्य शिरः मया एव निभृतं=प्रच्छन्नभावेन न्यस्तं=स्थापितम् । अहमेव प्रच्छन्नो रावणस्य करे तत्प्रियपुत्रस्याऽक्षस्य शिरः स्थापितवानिति भावः ॥ तदेव वृत्तम् ॥३९॥

यो वालिन इति—यः शौर्यनिधेः=पराक्रमनिधानस्य वालिनः अमित्रं=शत्रुः, त्रैलोक्यबन्धोः=भुवनत्रयसुहृदः (प्रकाशकत्वात्सौहार्दम्) तपनस्य=

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सीता—केण उण णरवाणराणं एरिसं सखित्तरमं णिम्मिदम् (केन पुनर्नर-वानराणामीदृशं सखित्व निर्मितम्)।

हनूमान्—रामबाणेनैव,

बालिने विसृजता धनुरङ्कं नाकलोकललनाकुचकेलिः ।
तारया सममदीयत चास्मै वानरेन्द्रपदवीमणिमौलिः ॥४१॥

सीता—कहेहि दाव, अवि णाम मए मन्दभाइणीए किदे दुब्बलो दा-किंपि रहुणाहो (कथय तावत्, अपि नाम मम मन्दभागिन्याः कृते दुर्बल इदा-किमपि रघुनाथः)।

हनूमान्—किमपीति किमुच्यते ? इदानीं हि—

बहुलपक्षशशीव दिने दिने रघुपतिः कृशतामुपयाति सः।

सूर्यस्य सूनुः=पुत्रः रामस्य पादाब्जस्य=चरणकमलस्य तले=अधोभागे अमिवर्त्ते हि यस्तथाभूतो रामचरणशरण इत्यर्थः सुग्रीवनामा कपिचक्रवर्त्ती=वानरसम्राट् अस्ति, स एव तारापतिरिति सीताजिज्ञासासमाधानं हनूमताऽत्र कृतम् । इन्द्रवज्रावृत्तम् ॥४०॥

बालिन इति—बालिने=तदाख्याय कपिराजाय धनुरङ्कं=चापक्रोडं विसृज-नाकलोकस्य ललना=स्वर्गाङ्गना,तासां कुचैः=स्तनैः केलिः=विलासः (अदीयत) (बालिनं बाणैः प्रहरता तस्मै स्वरङ्गनासम्भोगावसरो दत्तः) अस्मै=सुग्रीवा- च तारया=बालिबध्वा समं=सह वानरेन्द्रपदवीमणिमौलिः='वानरेन्द्र' इ- प्रशस्ततमा पदवी अदीयत=दत्ता । बलिनोऽपहृत्य तारा राज्यं च सुग्रीवा-यादायिषातामिति भावः । एवं च नरवानराणां मैत्री केन कृतेति प्रश्न-रामबाणेनैव इत्युत्तरं विश्वासयोग्यं कृतम् । अत्र सहोक्तिरुत्तरार्धे, पूर्वार्धे विषमालङ्कारः । स्वागतावृत्तम् ॥४१॥

बहुलेति—स रघुपतिः=रामः बहुलपक्षस्य=कृष्णपक्षस्य शशी=चन्द्र इ-दिने दिने=अनुदिनं कृशतां=दुर्बलताम् उपयाति=प्राप्नोति । तु=किन्तु अनुभाववशंवदा=प्रभावपराधीना कुवलयप्रतिमद्युतिः=नीलकमलतुलितकान्ति-प्रविकसति=(अत्राप्यनुदिनमिति योज्यम्) उत्कृष्टतां व्रजति । त्वद्वियोग-

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सीता—हद्धि हद्धि, (हा धिक् हा धिक्)।

कुवलयप्रतिमद्युतिरस्यतु प्रविकसत्यनुभाववशंवदा ॥४२॥

हनूमान्—अयि देवि, आकर्णय तावद्यत् सन्दिष्टं देवेन देव्याः।

हिमांशुश्चण्डांशु, र्नवजलधरो दावदहनः,
सरिद्वीचीवातः कुपितफणिनिःश्वासपवनः।
नवा मल्ली भल्ली, कुवलयवनं कुन्तगहनं
मम त्वद्विश्लेषात्सुमुखि विपरीतं जगदिदम् ॥४३॥

...ं कृष्णपक्षचन्द्रवत् कृशिमानमुपयानपि रघुपतिः प्रभावातिशयमहिम्ना ...लीढो मणिरिवाधिकं दीप्यत इति भावः ॥ 'अनुभावः प्रभावे च' ...लोऽनौ शितौ त्रिषु" इति चामरः ॥ द्रुतविलम्बितं वृत्तम् ॥४२॥

हिमांशुरिति—हिमांशुः=चन्द्रः चण्डांशुः,=सूर्यवत्तापक इत्यर्थः, नव...रो=जलपूर्णो मेघः दावदहनः=वनवह्निः, तथैव सन्तापजनकः, सरितः= ...वीचयः=तरङ्गास्तासां वातः=समीरः, नदीतरङ्गानीतः शिशिरसमीरणः ...स्य (आघातादिना) रुष्टस्य फणिनः निश्वासः=श्वासः तस्य पवनः, ...सर्पनासाविरोकसमुत्थसमीरवद्दाहक इति तात्पर्यम्, नवा=नूतना (अवि...कसिता) मल्ली=मल्लिका (श्वेतपुष्पभेदः) भल्ली (तीक्ष्णमुखास्त्रविशेषः) ...र्मव्यथकः, कुवलयवनं=कमलाकरः कुन्तगहनं=शक्त्याख्यशस्त्रवद्व्यथाकरम् ...र) सुमुखि, त्वद्विश्लेषात्=त्वद्वियोगात् मम=रामस्य (कृते) इदं ...=संसार एव विपरीतम्=अन्यथाभूतं=भिन्नवृत्ति अजायतेति शेषः। ...मपि प्रोक्तानां पदार्थानां विरहोद्दीपकत्वाद्रामस्येत्थमुक्तिः। अत्र एकस्य ...स्य स्वभिन्नपदार्थान्तरेणाभेदेनान्वयासम्भवात्सम्बन्धान्तरेणान्वयस्य च ...तरविभक्तिसमवधान एव सम्भवेन द्वितीयप्रथमान्तपदानां तत्तुल्येषु लक्ष...न्वय उपपादनीयः, सादृश्यनियामकधर्माश्च यथायोगं निरूपणीयाः। ...शुश्चण्डांशुतुल्य इति प्रतिपादनादलभ्यस्य सन्तापकत्वातिशयस्य प्रतीतिश्च ...नं बोध्यमेवमन्यत्रापि। निरङ्गं रूपकमलङ्कारः। कुन्तगहनमित्यत्रोपमा। ...रिणीवृत्तम् ॥४३॥

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अपि च-कस्याख्याय व्यतिकरमिमं मुक्तदुःखो भवेयं
को जानीते निभृतमुभयोरावयोः स्नेहसारम् ।
जानात्येकं शशधरमुखि, प्रेमतत्त्वं मनो मे
त्वामेवैतच्चिरमनुगतं तत् प्रिये ! किं करोमि ॥४४॥

(सीता लज्जते)

त्रिजटा—सखि त्वमपि रघुपतेः किमपि संदेशं प्रत्यभिज्ञानं च समर्पय।

सीता—इमो मे पडिसन्देशो ।

बहलगलन्तणअणजलणिज्झरपज्जाउलावि मह दिठ्ठी ।
तुह सुहअ वअणससहर लावेण्णरसं पिपासेदि ॥४५॥

[बहलगलन्नयनजल निर्झरपर्याकुलापि मम दृष्टिः ।
तव सुभग, वदनशशधरलावण्यरसं पिपासति ॥४५॥]

कस्येति—इमं=सम्प्रत्यनुभूयमानं व्यतिकरं=त्वद्वियोगजन्यं स... कस्य आख्याय=कस्मै कथयित्वा मुक्तदुःखः किञ्चिदाश्वस्तो भवेयम् ? ता... कोऽपि नास्ति यस्मै मनोव्यथां कथयित्वा कियतीं शान्तिं विन्देयमिति भा... तत्र कारणमाह—आवयोः=तव मम च निभृतं=प्रच्छन्नं (तुषाग्निव... ऽसृतं) स्नेहसारं=प्रेमरहस्यं को जानीते=वेत्ति ? न कोऽपीति ... व्यज्यते । (अयि) प्रिये शशधरमुखि=चन्द्रवदने एकं=सजातीयान्तरा... मे=मम रामस्य मनः=हृदयं प्रेमतत्त्वं=स्नेहस्थितिं जानाति=वेत्ति ननु ... तस्मै सर्वमाख्याय । 'शोकक्षोभे हि हृदयं प्रलापैरेव धार्यते' इति ... स्वास्थ्यमुपयाहीति चेदत्राह—त्वामेवेति० एतत्=मे मनः चिरं=बहुदि... त्वामेवानुगतम्=त्वामेवानुसृतं तत्=कस्यापि स्नेहतत्त्वज्ञस्यालाभे किङ्क... केन प्रकारेण निजं तापं लघूकरवाणि ? अत्र सीतां प्रति रामस्य सन्दे... मनस्त्वामनुगतमित्युक्त्या रामस्य तदेकचित्तता तेन वक्तव्यान्तरास्फूर्ति... त्यादिकोऽर्थो व्यक्तः । मन्दाक्रान्तावृत्तम् ॥ ४४ ॥

बहलेति—बहलं=बहु गलतः=च्यवमानस्य नयनजलस्य=अश्रुणः नि... =प्रवाहेण व्याकुला=परिपूर्णाऽपि मम=सीताया दृष्टिः=लोचनम्, हे सु...

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(चूडारत्नमाकृष्य हनूमतः करे समर्पयन्ती) अइ चूडारअण,
वि च्छालअ णिअमङ्गं रअणीअर दिट्ठिपंसुपंसुलिअम् ।
रहुवइपअणिम्मलणहरअणीअरजोह्णनीरणिअरम्मि ॥४६॥

अयि चूडारत्न,
[अपि क्षालय निजमङ्गं रजनीचरदृष्टिपांसुपांसुलितम् ।
रघुपतिपदनिर्मलनखरजनिकरज्यौत्स्ननीरनिकरे ॥४६॥]

हनूमान्—देवि, अनुजानीहि, त्वरयति मां रामचन्द्रचरणदर्शनोत्कण्ठा ।

सीता—(सबाष्पगद्गदम्) अइ अकारणसिणिद्ध, पडिगदे तुह्मि पुणोवि को कहिस्सदि रहुणाहस्स पउत्तिम् (अयि अकारणस्निग्ध, प्रतिगते त्वयि पुनरपि को कथयिष्यति रघुनाथस्य प्रवृत्तिम्) ।

वदनमेव शशधरः=चन्द्रः तस्य लावण्यरसं=सौन्दर्यवारि पिपासति=पातुमिच्छति । बहलगलदित्यादिना दृष्टिविशेषणेनाहं सततं रोदिमि, अश्रुप्रवाहेण मदीया तनुराप्लाविता, परं त्वं न दृश्यसे, इत्यर्थः । अत्र जले निमज्जन्त्या पिपासा, सापि लावण्यमयजलविषया इति विरोधः, लावण्यरसपदं सौन्दर्यपरमिति तदपासनं च । पिपासतीति सोत्कण्ठत्वं व्यज्यते । आर्याप्रभेदो ...म् ॥४५॥

अपि क्षालयेति—रजनीचरस्य=राक्षसस्य दृष्टिरेव पांसुः=धूलिस्तया पांसुलितम्=धूसरितमपवित्रीकृतं=रावणदृष्टिपातदोषदुष्टमित्यर्थः, निजमङ्गं स्वतनुम् रघुपतेः=रामस्य निर्मलं=स्वच्छं नखमेव रजनीकरश्चन्द्रस्तस्य ज्योत्स्नायाः समूहः—ज्यौत्स्नं=कान्तिसमुदयस्तदेव नीरं=जलं तस्य निकरे क्षालय शोधय । रावणदृष्टिपातापवित्रीकृतचूडारत्न, चिरं रामचरणनखमयूखवारिप्रवाहे निमज्जनमेव तव शुद्धिरित्यर्थः । अत्र 'दृष्टिपांसु' इत्यनेन दृष्टेः कामपूर्णता, तेन च रामं प्रति नाहमुपेक्षणीया इत्याशयकः सन्देशः, पांसुलितम् इत्येतेन तावदंश एव कलुषितत्वभावनाया निवेदनेन सीताया अचलाघसंपृक्तताबोध्यः स्नेहः, तेनापि न चिरादुद्धार्यता, इत्याद्यर्था व्यज्यन्ते । तदेव ...तम् । रूपकमलङ्कारः ॥४६॥

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

हनूमान्—अयि देवि, दिष्ट्या स्मारितोऽस्मि । नन्विदं ते श... देवेन देव्याः ।

मा ताम्य तामरसपत्रविशालनेत्रे
विख्याप्यते पुनरपि त्वयि मत्प्रवृत्तिः ।
सौमित्रिकार्मुकगुणध्वनिभिर्गभीरै-
स्तैः किञ्च राक्षसवधूरुदितैरुदारैः ॥४७॥

(नेपथ्ये)

हत्वा कथञ्चिदपि राजकुमारमक्षं
रे वानरापसद ! कुत्र पलायितोऽसि ।
त्वां हन्तुमिच्छति दशाननशासनेन
दर्पोद्धतो धृतधनु र्ननु मेघनादः ॥४८॥

मा ताम्येति—तामरसपत्रं=कमलदलं तद्वद्विशाले नेत्रे यस्यास्तत्सम्बुद्धौ कमलदलदीर्घनयने मा ताम्य,=अधीरा न भव, सौमित्रेः=लक्ष्मणस्य कार्मुकं =धनुस्तस्य गुणः=प्रत्यञ्चा तस्य ध्वनिभिः=टङ्कारैः, (गभीरैः=घोरैः लक्ष्मण चापज्यानिनादैः) (तथा) किञ्च तैः=प्रसिद्धैः उदारैः=अतिमहद्भिः राक्षस वधूरुदितैः राक्षसानां निधने रुदन्तीनां तदङ्गनानां क्रन्दनचीत्कारैः त्वयि= समीपे मत् प्रवृत्तिः=मदीया वार्त्ता पुनरपि विख्याप्यते=प्रस्तूयते । अतोऽधी ताया अवसरो नास्तीति भावः । लक्ष्मणेन लङ्कायां धनुष्यास्फाल्यमाने तट्टङ्का निहतराक्षसवधूचीत्काराश्च मदीयां वार्त्तां तुभ्यमचिरेण निवेदयिष्यन्ति भावः । 'तामरसं सारसं सरसीरुहम्' इत्यमरः । वसन्ततिलकं वृत्तम् ॥४७॥

हत्वेति—कथं चित्=केनापि प्रकारेण (नतूचितेन युद्धेन, हनूमतः परा प्रत्यनास्था व्यक्ता) राजकुमारम् अक्षं=तन्नामानं हत्वा, रे वानरापसद—दुष्टक कुत्र पलायितोऽसि ? ननु दशाननशासनेन=रावणाज्ञया दर्पोद्धतो=बलगर्वि धृतधनुः=कराकलितचापः मेघनादः त्वां हन्तुमिच्छति । अत्र राजकुमारमित्य तत्कृतापराधस्य गुरुता, पलायितोऽसीति हनूमतो भीरुत्वम् । दशाननशास

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

हनूमान्—देवि, कृतकार्योऽस्मि, तदक्रमतः परमात्मापकापेक्ष । तदिदं ...म्यसे, आपृच्छयसे च ।

सीता—अए पवणणन्दण, अणाआसेण इमं दुण्णिसाअरसाअरं अदिक्कमेहि (अये पवननन्दन, अनायासेनेमं दुर्निशाचरसागरमतिक्रमस्व) ।

हनूमान्—अयं मूर्ध्नि गृहीता देव्याः प्रसादः (इति निष्क्रान्तः) ।

सीता—हला, तिअडे, खेअरी भविअ पेक्ख दाव इमस्स उत्तन्तम् (हला ...जटे, खेचरी भूत्वा प्रेक्षस्व तावदस्य वृत्तान्तम्) ।

त्रिजटा—तथा (इति निष्क्रान्ता) ।

(नेपथ्ये)

बाणौघानेकवीरः कलयति च रुषा मेघनादेन मुक्तान् ।

(सर्वे हर्षं नाटयन्ति)

(पुनर्नेपथ्ये)

बद्धोऽयं राक्षसेन ज्वलदनलशिखादीप्तपुच्छः कृतश्च ।

(सर्वे विषादं नाटयन्ति)

...युक्त्या प्रार्थनादिना रावणं प्रसाद्य क्षमायाचनाया अपि वीतावसरत्वम्, ...भवतु:' इत्यनेन युद्धसन्नद्धता चेत्याद्यर्था व्यज्यन्ते । तदेव वृत्तम् ॥४८॥

आपृच्छयसे—प्रस्थानकाले आतिथेयो यद्गमनायानुमतिं याच्यते समाया-...तिथिना स आप्रश्नः । तथा च मेघे कालिदासः—"आपृच्छस्व प्रियसखममुं ...मालिङ्गय शैलम्" ।

बाणौघानिति—एष वीरः=पराक्रमशाली हनूमान् मेघनादेन=रावण-...येन तन्नाम्ना रुषा=क्रोधेन मुक्तान् बाणौघान् शरनिकरान् कलयति=सहते ...कलतेरनेकार्थत्वात्सहनेऽपि प्रयोगः, तथाऽऽह मल्लिनाथः शिशुपालवधटीका...यां 'कलतिः कामधेनु'रिति ।

अयं=हनूमान् राक्षसेन=मेघनादेन बद्धः=ब्रह्मास्त्रप्रयोगेण निगडितकरचरणो-...ऽः, ज्वलन्ती=दीप्यमाना याऽनलशिखा तया दीप्तपुच्छः=प्रदीप्तलाङ्गूलश्च कृतः, ...च्छदेशे वह्निं प्रज्वाल्य दग्धुमुपक्रान्तश्चेत्यर्थः । अट्टालिकामुपरि=प्रासादशिखरे ...परदः=न्यस्तचरणः क्रामन्=धावन् (च) एष लङ्कां दन्दहीति=भस्मसात्

...jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(पुनर्नेपथ्ये)

क्रामन्नट्टालिकानामुपरि कृतपदो दन्दहीत्येष लङ्कां

(सर्वे हर्षविषादौ नाटयन्ति)

(पुनर्नेपथ्ये)

अक्लान्तोऽयं पयोधेः पयसि शमयति स्वाङ्गलग्नं कृशानुम् ॥४९॥

(सर्वे हर्षं नाटयन्ति)

(पुनर्नेपथ्ये)

अहो, आश्चर्यमाश्चर्यम् ।

वेलाद्रेरस्य हेलाक्रमणपरिणतस्तुङ्गमाक्रम्य शृङ्गं
मौलिं पूर्वाचलस्य द्युमणिरिव नभो लङ्घयत्यम्बुराशिम् ।
वेगप्रोद्भूतवातप्रतिहतसलिलोन्मुक्तगम्भीरगर्भ-
व्यक्तीभूतोरगेन्द्रस्तुतिशतविलसत्कीर्त्तिहारो हनुमान् ॥५०॥

कुरुते । गृहाद्गृहान्तरमुपसर्पन् लङ्कां निरशेषं दहतीत्यर्थः । अक्लान्तः=अव... द्वारकबन्धनपुच्छदाहाद्युपद्रवेऽप्यक्लान्तवदनः अयम्=हनूमान् पयोधेः=समु... पयसि=जले स्वाङ्गलग्नं=स्वकायप्रसृतं कृशानुं=वह्निं शमयति=निर्वापयति... स्रग्धरावृत्तम् ॥४९॥

वेलाद्रेरिति—हेलया=अनास्थया यदाक्रमणम्=लङ्घनं तत्र परिणतः=... र्यमेधिततनुः (हनूमान्) अस्य=पुरःस्थितस्य वेलाद्रेः=समुद्रतटस्थितत्रि... चलस्य तुङ्गं शृङ्गं=महोच्चं शिखरमाक्रम्य=आरुह्य हनूमान् पूर्वाचलस्य मौलि... =शिखरदेशम् (आक्रम्य) द्युमणिः=सूर्यः नभः=व्योम इव अम्बुराशिं लङ्घ... =अतिक्रामति । यथोदयशैलमारुह्य सूर्यः क्रमश आकाशं लङ्घयति तथैवा... र्धिततनुर्हनूमान् अम्बुधितटावस्थितत्रिकूटाचलमारुह्य सागरमतिक्रामतीत्यर्थः... तमेव विशिनष्टि-वेगेति वेगेन=समुद्रलङ्घनजन्येन तरसा प्रोद्भूतः=समुदि... वातः=वायुस्तेन प्रतिहतं=समाकृष्योपरि नीतं यत् सलिलं=जलं तेन उन्मु... =रिक्तीकृतः यो गम्भीरः निम्नतमो गर्भः=वेगाकृष्टजलाश्रयदेशखातं तत्र ...

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सीता—(नेपथ्याभिमुखमवलोक्य) हला तिअडे, अवतोण्णावि महीअलम्, पिअंवदाए तुह आलिङ्गेमि अङ्गाइं (हला त्रिजटे, अवतीर्णापि महीतलम्, नु प्रियम्वदायास्तवालिङ्गयाम्यङ्गानि) (इति निष्क्रान्ता)।

रामः—प्रिये ! मामपि प्रतीक्षस्व ।

लक्ष्मणः—आर्य, किमिदं लङ्कावृत्तान्तानुसारिणि विद्याधरप्रणीते महेन्द्रजाले ...नः संभ्रम्यते ।

रामः—तर्हि दिष्ट्याऽस्माभिर्निजविक्रमकथापराङ्मुखस्यापि हनूमतश्चरितरह-स्यमाकलितम् ।

(नेपथ्ये)

भये रघुनाथ, अयमसौ—

दर्पोद्धतं दधिमुखं तरसा निपीड्य
पीत्वा चिरं मधुवने स्वरसं मधूनि ।

...=प्रकृष्टतां गतो य उरगेन्द्रः=शेषः तेन (कृतानाम्) स्तुतीनां=प्रशस्तीनां ...=तेन विलसन्ती=शोभमाना कीर्तिः=यश एव हारो=माल्यं यस्य तादृशः । ...दुरलङ्घनीयत्ववेगाकृष्टस्य पयसः स्थानं रिक्तं, तत्रत्यजलस्य वेगाद्गतत्वा-...त्तत्र गर्भे शेषः प्रकटीभूय रामकार्यप्रवृत्तं हनूमन्तं तुष्टाव तदीयस्तुतिजन्ययश ...हनूमतोहारकृत्यमकार्षीदित्याशयः । पूर्वार्द्धे उपमा, परार्द्धेऽतिशयोक्तिश्चा-लङ्कारौ । स्रग्धरावृत्तम् ॥५०॥

प्रियंवदायाः—हनूमतः कुशलवृत्तकं निवर्तनमेव प्रियं वदतीति यस्याः ।

प्रतीक्षस्व—आलिङ्गितुमिति शेषः ।

'संभ्रम्यते'ऽत्र सम्भ्रमः=भावावेशः, सत्य इवेन्द्रजालिकेऽपि व्यवहियत ...ति भावावेशः ।

निजविक्रमेति—निजस्य=स्वस्य विक्रमकथा=पराक्रमवृत्तम् ततः पराङ्मुखस्य ...विरतस्य, स्वपराक्रमं वर्णयितुमयतमानस्येत्यर्थः । यद्यत्र न दृश्येत तदा ...हनूमतो लङ्कादहनकथाऽस्माभिर्नैव ज्ञायेत, तस्य तद्विषये मौनावलम्बितानिश्चा-...नायं सर्वोऽप्यर्थो दिष्ट्येति पदेनोक्तः ।

दर्पोद्धतमिति—नीलाङ्गदप्रभृतिभिः=तदादिवानरैः सहितो हनूमान्=प्रश-

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

दृष्टुं समेति भवतः पदपद्मलीलां
नीलाङ्गदप्रभृतिभिः सहितो हनूमान् ॥५१॥

रामः—वत्स, आकर्णितम्, तदागच्छ, कृतकार्यं हनूमन्तं प्रत्युद्गच्छावः।

(इति निष्क्रान्ताः सर्वे)

इति षष्ठोऽङ्कः ।

—०—

अथ सप्तमोऽङ्कः ।

(ततः प्रविशति पुलस्त्यशिष्यः)

पुलस्त्यशिष्यः—(परितो विलोक्य) अपरिशीलितसंनिवेशोऽस्मि । तत्...
पृच्छामि तस्य भवनम् ? (पुनर्विलोक्य) कथमयं लङ्केश्वरमहामन्त्रिणो माल्यव...
परिचारकः करालकः । (उच्चैः) सखे करालक, इत इतः ।

...स्तहनुशाली (प्राशस्त्ये मतुप्) दर्पोद्धतं=गर्वोद्धुरं दधिमुखं=तन्नामानं सुग्री...
...स्योद्यानपालम् तरसा=वेगेन निपीड्य=ताड़यित्वा मधुवने=तदाख्ये सुग्रीवोद्या...
स्वरसं=निजेच्छया चिरं=बहुसमयपर्यन्तं मधु=मद्यं (क्षौद्रं वा) पीत्वा भव...
=रामचन्द्रस्य पदे=चरणावेव पद्मे=कमले (तद्वल्लौहित्यसुकुमारतादिगुण...
...गात्) तयोः=पदपद्मयोः लीला=शोभा (विलासो वा) तां द्रष्टुमायाति । ...
पूर्वार्द्धेन हनूमतः कृतकार्यता तदीयाचरणप्रकटितमानसोल्लाससूचनमुखेनाख्या...
यतेऽत एव चाऽयं समाचारो रामाय सूच्यतेऽपि । वसन्ततिलकं वृत्तम् ॥५१॥

प्रत्युद्गच्छावः—आगच्छतः सत्कारायोत्थाय कियन्ति पदानि गत्वा...
यत्पुनर्नवागतेन सहागम्यते स प्रत्युद्गमः । अत्र हनूमतः सत्करणेन रामस्य...
सीताविषयकोत्कण्ठाया अतिशयः प्रकाश्यते ।

इति श्रीरामचन्द्रमिश्रकृत 'प्रकाश' व्याख्यासहिते प्रसन्नराघवेनाम नाटके

* षष्ठोऽङ्कः *

—०—

अपरिशीलितः—अज्ञातः सन्निवेशः कुत्र किमित्यात्मकः स्थितिपरिच...
येन तादृशः । परिचारकः=सेवाधिकृतः ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(प्रविश्य)

करालकः—मुने, प्रणम्यसे ।

मुनिः—समीहितं लभस्व । कथय तावन्मे विभीषणस्य भवनम् ।

करालकः—किन्तत्र ?

मुनिः—आदिष्टोऽस्मि भगवता पुलस्त्येन कमपि सन्देशमुपनेतुं पौत्रस्य ।

करालकः—न तावदिदानीमिह विभीषणः ।

मुनिः—कथय किमेतत् ?

करालकः—एकदाभिप्रणमतो विभीषणस्य करात्सकौतुकं लिखिताक्षरपङ्क्ति मेकं गृहीतं लङ्केश्वरेण वाचितं च—

उदर्कभूतिमिच्छद्भिः सद्भिः खलु न दृश्यते ।
चतुर्थीचन्द्रलेखेव परस्त्रीभालपट्टिका ॥ १ ॥

मुनिः—अहो, प्रभुविज्ञप्तिचातुरी विभीषणस्य ।

करालकः—ततो विहस्यैवं लङ्केश्वरेणोक्तम्—नूनं केनापि भीरुणा भाषितमे तत् । ख्यातं हि यत् किल—

परस्त्रीकुचकुम्भेषु कुम्भेषु परदन्तिनाम् ।
निपतन्ति न भीरूणां दृष्टयः शरवृष्टयः ॥ २ ॥

सन्देशः=संवादः ।

लिखिताक्षरपङ्क्ति,—लिखिताऽक्षराणां पङ्क्तिः=रेखा यत्र तथेति मेव पदम् ।

उदर्कभूतिमिति—उदर्के=भविष्यतिकाले (उत्तरकाले) भूतिं=सम्पत्तिम् इच्छद्भिः=कामयमानैः चतुर्थ्याः=तत्सङ्ख्यापरिमितायास्तिथेश्चन्द्रस्य=लेखा कला इव परेषां स्त्रियः तासां भालं=ललाट एव पट्टिका सा न दृश्यते । उदर्कभूतिं) भाविनि जन्मनि सुखैषिभिर्यथा चन्द्रलेखा चतुर्थीतिथे न द्रष्टव्या थोत्तरकालभाविसम्पत्तये परस्त्रिया मुखं न द्रष्टुमुचितमित्यर्थः । उदर्कभूति- दि श्लेषः । उपमाऽलङ्कारः ॥ १ ॥

विज्ञप्तिः—सूचना ।

परस्त्रीकुचेति—परेषाम्=आत्मभिन्नानां स्त्रियः=दारास्तासां कुचा एव

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

मुनिः—अहो, निजचित्तवृत्तिभित्तिभूमिकानुसारीणि वाक्चित्राणि लोकस्य

करालकः—ततः सप्रणयकोपविषादमिदमाह लङ्केश्वरं विभीषणः—

यस्य त्र्यम्बकमौलिखेलदमलस्वर्लोककल्लोलिनी-
लीलालङ्घनलम्पटेन यशसा दिग्भित्तयः क्षालिताः।
सोऽपि त्वं जनकाधिराजतनयाबद्धाभिलाषः कथं
हा जातोऽसि पुलस्त्यसन्ततियशःशीतद्युतेर्लाञ्छनम् ॥ ३ ॥

मुनिः—(सकौतुकम्) ततस्ततः ?

करालकः—ततश्च—

कोपपाटलितलोलदृष्टिना किञ्चिदुन्नमितखड्गयष्टिना।
रावणेन नयधर्मभूषणस्ताडितो हृदि पदा विभीषणः ॥ ४ ॥

कुम्भास्तेषु परदन्तिनां शत्रुसम्बन्धिकरिणां कुम्भेषु=मस्तकेषु (च) भीरु =भयशीलानां दृष्टयः=नेत्राणि शरवृष्टयः=शरासाराश्च न पतन्ति। भीरवः पु स्तत्पतिकर्तृकताडनभयात्परेषां स्त्रियो न कटाक्षयन्ति, परेषां सैन्यं च नाक्र न्तीति भावः। यथासङ्ख्यमलङ्कारः ॥ २ ॥

यस्येति—यस्य (तव रावणस्य) त्र्यम्बकस्य=शिवस्य मौलौ=शि खेलन्ती=विहरमाणा अमला=निष्कलङ्का च या स्वर्लोककल्लोलिनी=स्व तस्या लीलया=अनायासेन लङ्घनं=तरणं तत्र लम्पटेन=प्रसक्तेन=हरशिरोभू भुवनिर्दोषाकाशगङ्गातरणरसिकेन=यशसा दिग्भित्तयः=दिशावकाशाः क्षालि =धौताः (धवलीकृताः) स्वर्गङ्गयापि यदीयं यशो दिशोऽधवलयदिति भा सोऽपि=एतादृशयशोभूषितोऽपि त्वं जनकाधिराजतनया=विदेहराजतनया त बद्धाभिलाषः कृतलिप्सः तत्कामुक इत्यर्थः (सन्) हा=खेदे, पुलस्त्यसन्त =तदाख्यऋषिवंशस्तस्य यशस एव शीतद्युतिः= चन्द्रः तस्य लाञ्छनम्=कल (तद्वंशनिन्दाकरचरिताचरणात् कलङ्कत्वारोपः) जातोऽसि। एवं विध अपि परस्त्रियं कामयित्वा स्वं कदर्थयसीति परः खेदविषय इति भा शार्दूलविक्रीडितं वृत्तम् ॥ ३ ॥

कोपेति—कोपेन=क्रोधेन पाटलिता=रक्तीकृता लोला=चपला दृष्टि

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

मुनिः—हन्त, नूनं—

लङ्केश्वरेण दुष्टेन नयधर्मविभूषणः ।
विभीषणश्च न परं विभवोऽपि पदा हतः ॥ ५ ॥

ततस्ततः ?

करालकः—ततः कतिपयपरिवारेण विभीषणेन लङ्केश्वरं विहाय राम समाश्रितः ।

मुनिः—(स्वगतम्) अनुष्ठितं तर्हि पुलस्त्यसन्देशरहस्यं विभीषणेन । (प्रकाशम्) भवान्पुनः किमधुना कर्तु कामः ?

करालकः—अहमादिष्टोऽस्मि माल्यवता जानकीविरहविह्वलहृदयस्य लङ्केश्वरमनोविनोदनाय केनापि चित्रकारेण विरचितं चित्रमिदं दृग्गोचरीकरणीयमिति ।

मुनिः—(विहस्य) कथमित्थमासन्नशत्रौ लङ्केश्वरे तादृशस्य महामन्त्रिणो माल्यवत एवमुपचरितुमुचितम् ? तन्नूनं प्रस्तुतोचितमेव किमप्येतद् भविष्यति ।

(नेपथ्ये)

रोषारुणचपलनयनेन किञ्चित्=ईषत् उन्नमिता=उपरि कृता खड्गयष्टिः करवाललता येन तेन=(विभीषणजिघांसयैव) उपरिदेशानीतकरबालेनेत्यर्थः, ...गेन नयधर्मौ=नीतिसुकृते भूषणे=अलङ्कारौ यस्य स विभीषणस्तदाख्यः ...नुजः पदा=चरणेन हृदि=उरोदेशे ताडितः=आहतः । रोषघूर्णत्पाटलनयनः ...ग्रदाकृष्टखड्गश्च रावणो नीतिधर्मविशारदं विभीषणं हृद्देशे पदा जघानेत्याशयः, ...मोद्गतावृत्तम् ॥ ४ ॥

लङ्केश्वरेणेति—दुष्टेन=दुर्मतिना लङ्केश्वरेण=रावणेन नयधर्मौ विभूषणे ...अलङ्कारौ यस्य तादृशः विभीषणः (एव केवलं) न च=न, परं नयधर्मौ ...भूषयति यस्तादृशो नीतेर्धर्मस्य चाऽलङ्कारभूतः विभवः=सर्वा सम्पदपि पदा ...प्रहारेणेन हतः, विभीषणापमानेन सहैव तस्य दुर्भाग्यं प्रवृत्त इति भावः ॥ ५ ॥

कतिपयपरिवारेण—स्वल्पसङ्ख्यकपरिजनेन ।

आसन्नः—पुरद्वारमायातः शत्रुर्यस्य तस्मिन् । उपचरितुम्=कर्तुम् ।

चित्रदर्शनानुमननं न सम्प्रति युक्तमित्यर्थः) ।

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रे रे चन्दनमिन्दुमण्डलशिलापट्टे समुद्घृष्यताम्
रे रे चामरमुज्ज्वलैः शशिकरैः श्वेतं विनिर्मीयताम् ।
रे रे बालमृणालतन्तुलतिकासूत्रेण पाथोजिनी-
पत्रस्थैरुदविन्दुभिर्मणिमयो हारः समासूत्र्यताम् ॥६॥

मुनिः—(सोपहासमात्मगतम्) यादृशोऽयं शीतोपचारस्तादृश एव ... पचारो लङ्केश्वरस्य भविष्यतीति । (प्रकाशम्) कथमिदं विरहतप्तस्य दशक... शीतोपचारार्थमादिश्यन्ते निशाचराः ।

प्रस्तुतोचितम्=अवसरयोग्यम् (महामायो रावणः किमपि चिन्तयि... बन्धुविरोधमधुना विधातेति भावः) ।

रे रे चन्दनमिति—रे रे, (परिचारकाः) इन्दुमण्डलं=चन्द्रबिम्ब... शिलापट्टं=घर्षणशिलाखण्डं तत्र चन्दनं=मलयजः समुद्घृष्यताम्=सम्मृद्य... रे रे, उज्ज्वलैः शशिकरैः श्वेतैश्चन्द्रकिरणैः श्वेतं=धवलं चामरं=बालव्य... विनिर्मीयताम्=विरच्यताम् । रे रे, बालमृणालस्य=नूतनबिसाङ्कुरस्य या त... लतिका=अन्तःसूत्रं तेन सूत्रेण पाथोजिनीपत्रस्थैः=कमलिनीदलवर्तिभिः उ... विन्दुभिः=जलशीकरैः मणिमयः=रत्ननिर्मितः हारः=माल्यं समासूत्र्यतां=र... ताम् । अत्र रे रे इत्यतित्वरासूचकं सम्बोधनं रावणस्यातिसन्तापं, तदवस्थे... स्वामिनि भृत्यानां सुस्थिरत्वेनाधिक्षेपपात्रत्वम्, 'इन्दुमण्डलशिलापट्टे' इ... समेधिततापापनुत्तयेऽतिशीतोपचारौचित्यं, 'बालमृणालतनुसूत्रेणेति' माल्य... सूत्रकृतमपि कियदंशस्थितं काठिन्यमसह्यं रावणस्येति, उदविन्दुभिरिति ... मानं माल्यशीतलत्वं, तत्रापि न केवलं जलविन्दुभिः किन्तु तैरपि 'पाथोजि... पत्रस्थैः' इत्युक्त्याश्रयकृतं जले शैत्यातिशयं प्रतिपाद्यापेक्ष्यमाणं माल्यशै... धिक्यं व्यञ्जयति, एतेन सर्वेण रावणोतिसन्तप्त इति द्योत्यते ॥ शार्दू... विक्रीडितं वृत्तम् ॥६॥

सीतोपचारः—सीतायां व्यवहारः । सीताप्यनेनानेकधास्वदुरभिप्रायसू... वृथा कदर्थिता भविष्यतीति दुरभिसन्धिशालितयोपहासः ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

करालकः—खेचराश्च, इदानीं हि—

अङ्गं लिम्पति चन्दनेन मृदुभिः शीतद्युतिः स्वैः करैः
किञ्चिच्चञ्चलतालवृन्तकलनव्यग्रो वसन्तानिलः ।
किं चायं नलिनीदलैर्वितनुते तल्पं प्रतीचीपति-
र्देवैरित्थमनङ्गतप्तहृदयो लङ्केश्वरः सेव्यते ॥७॥

मुनिः—(स्वगतम्) अये, अलीकवाग्डम्बरं निशाचरस्य ।

करालकः—(नेपथ्याभिमुखमवलोक्य) कथमयं प्रहस्तो राजद्वारमुपसर्पति, तस्य हस्ते चित्रपटमर्पयिष्ये । भवानपि समीहितं साधयतु ।

(इति निष्क्रान्तौ)

इति विष्कम्भकः

(ततः प्रविशति रावणश्चित्रहस्तः प्रहस्तश्च)

रावणः—(स्वगतम्)

अङ्गमिति—शीतद्युतिः=सुधाकरः (न तु चन्द्रः) मृदुभिः=कोमलैः (न तु सर्वसाधारणैः) स्वैः करैः=किरणैः (हस्तैश्च) चन्दनेन=मलयजरसेन (रावणस्य) शरीरं लिम्पति=स्थगयति (न तु सिञ्चति, भूषयति वा) वसन्तानिलः=मधुमासवातः (न तु केवलो वातः) किञ्चिच्चञ्चलस्य=समरसं चल्यमानस्य तालवृन्तस्य=तालपत्रकृतव्यजनस्य चलनं=कम्पनं तत्र व्यग्रः=सातिशयावधानः (न तु नियुक्तमात्रः) किञ्चायं प्रतीचीपतिः=(जलाधिष्ठाता) वरुणः नलिनीदलैः=(न तु पल्लवैः) कमलिनीपत्रै स्तल्पं=शयनीयं वितनुते=विरचयति, इत्थं=कथितपथेन देवैः=चन्द्रवातवरुणादिभिः सुरै रनङ्गेन=कामेन सन्तप्तं=भृशव्यथितं हृदय यस्य तादृशो लङ्केश्वरः सेव्यते=उपचर्यते । देवानामत्यासन्नसमयविशेषनियोज्यतया सन्तापस्याधिक्यं व्यज्यते । प्रागुक्तमेव वृत्तम् ॥७॥

विष्कम्भकः—'वृत्तवर्त्तिष्यमाणकथानिर्देशकनाट्याङ्गविशेषः, लक्षणं प्रथमाङ्कव्याख्यायामुक्तम् ।

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

राजल्ललाटफलका कमनीयकूज-
त्काञ्चीगुणप्रणयिनी धृतकेशपक्षा ।
हा किं करोमि मम सा हृदयं प्रविष्टा
नाराचयष्टिरिव पुष्प-शिलीमुखस्य ॥८॥

(विमृश्य) अहो, कथमद्यापि हठाहरणखिन्नां नितान्तकृशधूसरा जानकीं जनस्थानस्थितामिवाहमखण्डमण्डनां पश्यामि । अथवोचितमिदम् ।

आचान्तकान्तिरुन्निद्रैर्मयूखैरहिमत्विषः ।
धूसरापि कला चान्द्री किन्न बध्नाति लोचनम् ॥९॥

प्रहस्तः—अयि देव, इदमालोक्यतां चित्तविनोदनं चित्रम् ।

राजदिति—राजत्=शोभमानं ललाटं=भालमेव फलकं=पट्टं यस्या (पक्षे फलकं बाणमुखं यस्याः सा) कमनीयं=मञ्जुलं कूजतः=शिञ्जा काञ्चीगुणस्य=रशनायाः प्रणयिनी=स्नेहशीला मञ्जुशिञ्जानकाञ्चीकलापेति (गुणप्रणयिनी=ज्याशालिनी) धृतौ केशस्य पक्षौ=रक्षती (त्रिकोणौ पार्श्वयोः पक्षतया प्रतीयमानौ) यया सा विरहकृतासंस्काररूक्षत्वपक्षावित मासमानकुन्तला, (पक्षे धृतः केशस्य=स्वर्गाधिपतेः पक्षो यया सा, काम इन्द्रोपकारित्वादेतदुक्तम्, यद्वा केशपक्षः=बाणपुङ्खः, तस्यापि केशपूक्ष गत्वात्) सा=सीता पुष्पशिलीमुखस्य=कुसुमेषोः नाराचयष्टि=र्धनुर्लतेव हृदयं प्रविष्टा=मम हृदयमाश्रिता । पूर्वोक्तविशेषणा सीता मम मनसि क धनुर्लतेव प्रविष्टेत्याशयः ॥ वसन्ततिलकं वृत्तम् ॥८॥

आचान्तेति—अहिमत्विषः=चण्डदीधितेः (सूर्यस्य) उन्निद्रैः प्रसृतैश्च मयूखैः=किरणैः आचान्ता=पीता (तिरोभाविता) कान्तिः=ज्यो यस्यास्सा (अत एव) धूसरा=मलिना अपि चान्द्री=वैधवी कला=लेखा लोचनं न बध्नाति=आकर्षति । अहनि भानुमयूखैर्लंघितापि शशिलेखा पश्यतां दृश आवर्जयति तथैवेहाशोकवनिकामध्ये निकाममलिनवेशा राक्षस धकर्शिता चापीयं सीता मया पुरेव रमणीया प्रतीयत इत्यर्थः ॥९॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रावणः—किं पुनरिहालिखितम् ।

प्रहस्तः—अथ तावत्तरलतिमिनिकरकरालकल्लोलकोलाहलोज्जागरः सागरः ।

रावणः—(विलोक्य) किमिदमुत्तरेण तरङ्गमालिनमनुतमालखण्डमाखण्डःलधनुःसहस्रानुकारि कपिशयति गगनतलम् ? ।

प्रहस्तः—तदिदं सुग्रीवपालितं कपिकुलम् ।

रावणः—(विहस्य) अयि वालिपालितमिति वक्तव्यम् । भवतु । किं पुनः । कौ पुनरिमौ कार्मुकधरौ ?

प्रहस्तः—ताविमौ रामलक्ष्मणौ, ययोरग्रजस्य बाणपातविलसितेन सुग्रीवपालितमधुना कपिकुलम् ।

रावणः—(अनाकर्णितकेन) कः पुनरयं नितान्तकृशकमनीयतनुरमन्दराघातनिर्मन्थनोत्थतरलतरङ्गदूरविक्षिप्तःशङ्करशिरःशेखराधिरोहणकुतूहली शशिनिधिरिव तरङ्गमालिनस्तटभुवमधिशेते ।

प्रहस्तः—स एव लङ्कागमनकुतूहली निजकुलगुरुं सागरमुपचरितुं कुशशयनविन्यस्तगात्रः प्रथमो दाशरथिः ।

रावणः—(विहस्य) कथमित्थमेव जानकीलाभकौतुकः सोऽयमस्मानप्युपचरिष्यति ?

तिमिः—दीर्घकायमत्स्यभेदः । तरङ्गमालिनमुत्तरेण=तदुत्तरतः (एनया योगेति द्वितीया) ।

कपिशयति—ईषत् पीत मिवकरोति ।

कमनीया—रमणीया, अमन्दः=घोरः, निर्मन्थनोत्थितः=मन्थनतः प्रकटितः । तरलेन=चञ्चलेन तरङ्गेण=वीच्या दूरविक्षिप्तः=बहिर्दूरे प्रक्षिप्तः, शङ्करस्य=शिरोधिरोहणम्=मस्तकाधिश्रयणं तत्र कुतूहली=आग्रही । एतेन रामव्यापारेऽसाध्यसाधनत्वोक्त्या निजाऽजेयभाव उक्तः । तटभुवम्=तीरदेशम्=अधिशेते=आश्रयति (अधिशीङ्स्थासां कर्मेति द्वितीया)

उपचरितुम्—प्रसादयितुम् । कुशशयनविन्यस्तगात्रः=कुशासनशयितः (एतेन रामाशक्तत्वमुक्तम्) इत्थमेव—यथासागरं तटेऽनशनव्रतं विधायोपचरति तथैव ममापि पुरःकरिष्यतीति रावणस्य रामविषयकदौर्बल्योपहासः ।

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

प्रहस्तः—इतो विलोक्यतामयं रामनाराचनिर्मुक्तबहलानलहेलातरलदीन-
निकरपरिवारः पारावारः।

रावणः—कौ पुनरिमौ ज्येष्ठतापसस्य सादरं वानरवीरैः पार्श्वपरिसरमानीतौ

प्रहस्तः—अयं तावत्सागर एव। अयमपि देवस्यैव-(इत्यर्धोक्ते) अ
किमस्य बन्धुविरोधिनो नामग्रहणेन?

रावणः—कथमयं विभीषणोऽस्मद्विरोधेन राममाश्रयति। भवतु।

निशाचरशिरोरत्नरञ्जिताङ्घ्रिसरोरुहः।
प्रियोऽपि दशकण्ठस्य नैष दर्शनमेष्यति ॥१०॥

रावणः—(सकौतुकम्) किं पुनरिदमक्षरपङ्क्तिद्वयम्?

प्रहस्तः—नूनमिदं समुद्रविभीषणौ प्रति लक्ष्मणस्य वचनद्वयं भविष्यति।

रावणः—एकं तावद्वाचय।

प्रहस्तः—(वाचयति)

१√६१ त्रासं मुञ्च समुद्र, कोपदहनो रामस्य पास्यत्ययं
बन्दीभूतसुरेन्द्रसुन्दरदृशामक्ष्णोरमुद्रं पयः।
कामं ते मकरीगणा विहरतामेते च लङ्केश्वर-
स्त्रीगण्डस्थलपत्रभङ्गमकरीविध्वंसिनः सायकाः ॥११॥

निशाचरेति—निशाचराणां=रक्षसां शिरोरत्नानि=चूडामणयस्तै
=क्षालिते अङ्घ्रिसरोरुहे=चरणसरोरुहे यस्य सः (मदाश्रयस्थितौ राक्षसैः
मानः) प्रियोऽपि एषः=विभीषणः दशकण्ठस्य=रावणस्य दर्शनं न ए
(मदीयदर्शनप्रसादं नाप्स्यति) एतेन तं प्रति कोपो व्यक्तः स च विभीषण
रामानुगमनजन्य इति बोध्यम् ॥ १० ॥

त्रासं मुञ्चेति—हे समुद्र,=सागर, त्रासं=मद्बाणकर्तृकस्वशोषण
वनासम्भवं भयं मुञ्च=परिहर, रामस्य अयं साम्प्रतिकः कोपदहनः=क्रोधा
बन्दीभूताः=रावणेन बन्दिन्यः कृता याः सुरेन्द्रसुन्दरदृशः=इन्द्रवनिता
मक्ष्णोः=नयनयोः अमुद्रं=मुद्रणनिरोधप्रवाहं पयः=जलम् (अश्रु) पा

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रावणः—अन्यदपि वाचय ।

प्रहस्तः—(वाचयति)

अद्यैवास्य विभीषणस्य शरणापन्नस्य मूर्ध्ना नते-
रानृण्यं विदधात्ययं रघुपतिर्लङ्काधिपत्यश्रियम् ।
तस्यैव भुजाविह प्रतिभुवौ च सुग्रीवराजार्पण-
त्रैलोक्यप्रथमानसत्यचरितौ सर्वे वयं साक्षिणः ॥१२॥

...शमपहरिष्यति, रावणविनिपातेन तासां मुक्त्या तदश्रुप्रवृत्तेरनवसरत्वादिति ... । ते=तव मकराणां=ग्राहाणां स्त्रियो=मकर्यस्तासां गणः=समूहः कामं ... विहरताम्=विहारं करोतु तत्र मदश्रुशोषितत्वमुत्प्रेक्ष्य यत्तवदन्तर्गसि-... विशोदन्ति तं विषाद मपास्य यथेच्छं तत्रदम्भसामास्फालनं विदधता-... तात्पर्यम्, एते=रामेण सन्धीयमानाश्च सायकाः=बाणाः लङ्केश्वरस्य रावणस्य ...म्=अङ्गनानां गण्डस्थलानि=कपोलदेशास्तेषु याः पत्रभङ्गमकर्यः=मृगमदा-...र्मितकामिजनकृतनायिकाप्रसाधनचित्राणि च तासां विध्वंसिनः, एते हि ... तत्क्षोषणाय, किन्तु केवलं लङ्कागमनापेक्षितमार्गप्राप्तये संहिता इति ...र्थः । एतेन च लङ्कागमस्य विजये सत्यास्यन्तिको विश्वास उक्तः । ...र्दूलविक्रीडितं वृत्तम् ॥११॥

अद्यैवेति—अयं=संहितशरो रघुपतिः=रामः अस्य शरणापन्नस्य=शरणा-... विभीषणस्य मूर्ध्ना=शिरसा नतेः=नमस्कारस्य (नम्रतायाः) लङ्का-...रस्य या श्रीः=सम्पत् तां लङ्काधीश्वरताम्—आनृण्यं=प्रतिशोधं (प्रतिदानं) ...दधाति=करोति (वर्तमानसामीप्ये लट्) विभीषणकर्तृकनमनस्य यावत्फलं ...ते तावत्तेन नतो रामस्तं प्रत्यधमर्णः स्यातेति हेतोरद्यैव रावणं हत्वा ...यं लङ्काधिपत्यं विभीषणाय दत्त्वा स्वमाधमर्ण्याद्रामो मोचयिष्यतीत्यर्थः । ...आधमर्ण्यमोचने एतस्य=रामस्य भुजावेव प्रतिभुवौ=न्यासार्पकौ, कोदृशौ ... इत्याह सुग्रीवेति—सुग्रीवाय यद्राज्यार्पणं=वालिमारणपूर्वकतद्राज्यप्रदानं ... त्रैलोक्ये=लोकत्रये प्रथमानं=प्रसिध्यत् सत्यं=निश्छलं चरितम्=आचरणं ...दृशौ । वयं सर्वे साक्षिणः=विभीषणाय राज्यं दत्तमित्यर्थे साक्षिभूताः ।

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रावणः—अहो, वाग्डम्बरैकसारता कनिष्ठतापसस्य। भवतु। किं पु मध्येसमुद्रमालोक्यते।

प्रहस्तः—स एष कपिकुलोन्मूलितशैलशिखरनिमितः काकुत्स्थकुल प्रसक्तिप्रबन्धः सेतुबन्धः।

रावणः—अहो चित्रकरस्य चातुरी। यदलीकमपि सत्यमिव दर्शितवान्।

प्रहस्तः—कथमद्यापीदमलीकमिति सम्भावना देवस्य।

(नेपथ्ये कलकलः)

रावणः—किमेतत् ?

प्रहस्तः—एषामयं रामचमूचराणां दर्पोद्धतानां कपिकुञ्जराणाम्।
नवोद्गतानामिव नीरदानां कोलाहलः कोऽपि समुज्जिहीते॥

प्रहस्तः—तदिदं शङ्कितव्यं प्रतिविघातव्यं वा।

रावणः—आः, किमह शङ्कया प्रतिविघानेन वा। अनेन हि—

अन्योऽपि कोऽप्यधमर्णः कञ्चनप्रसिद्धसत्यव्यवहारं प्रतिभुवं कृत्वा त स्वोत्तमर्णायार्पणीयं ददाति कतिचन साक्षिणश्च स्थापयति। अत्र सुग्रीव रामोऽधमर्णः, देयं लङ्काधिपत्यं, रामभुजौ प्रतिभुवौ (मध्यस्थौ) स्थिताः साक्षिण इति यथायथं बोध्यम्। तदेव वृत्तम्। अद्यैवेत्यनेन रा शुप्रसादस्वभावता व्यज्यते। रामेऽधमर्णव्यवहारारोपणात्मकं साङ्गं रूप ङ्कारः॥ 'प्रतिभूः समिकः' इत्यमरः॥१२॥

काकुत्स्थकुलम्—रघुवंशः, तस्य कीर्त्तिः=यशस्तस्य-प्रसक्तिः= (प्रसरणं) तस्य प्रबन्धः=सन्दृभ्यमाणा प्रशस्तिः (रामयशोघोषितया से रूपकम्)।

एषाम् इति—रामचमूचराणां=रामचन्द्रसैन्यान्तःपातिनां दर्पोद्ध =सगर्वाणाम् कपिकुञ्जराणां=वानरेन्द्राणाम् नवोद्गतानां=सद्यः समेधमा नीरदानां=मेघानामिव कोऽपि=अवर्णनीयः—कोलाहलः=कलकलः समुज्जि =उद्गच्छति। रामसैन्यसम्बन्धिवानरेन्द्रकोलाहलः सद्यो व्योमप्रसृतमे गर्जनवदुदयत इति भावः। उपजातिर्वृत्तम्॥१३॥

प्रतिविधातव्यम्—प्रतिकारः कर्त्तव्यः।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

कोलाहलेनोल्लसता कपीनां मनो मदीयं मुदमेव धत्ते ।
मन्दोदरीभूषणनूपुराणां महामणीनामिव शिञ्जितेन ॥१४॥

(प्रविश्य)

मन्दोदरी—जेदु जेदु देवो (जयतु जयतु देवः)

रावणः—देवि, इत आस्यताम् ।

(मन्दोदरी यथोचितमुपविश्याऽधोमुखी तिष्ठति)

रावणः—भुग्नालकं स्मितपराजितचन्द्रलेखं
दृग्लीलया कुवलयश्रियमादधानम् ।
एतन्मुखं दिविषदामिव दुर्निरीक्ष्यं
तन्वङ्गि, मामिव मुधा किमधःकरोषि ? ॥१५॥

कोलाहलेनेति—उल्लसता=उद्गच्छता कपीनां=वानराणां कोलाहलेन किलकिलाशब्दकृतकलकलेन मदीयं=मम रावणस्य मनः=हृदयम् मन्दोदर्याः=स्वमहिष्या भूषणनूपुराणां=अलङ्कारभूतमञ्जीराणां महामणीनाम्=गारुत्मतादिरत्नभेदानां शिञ्जितेन=शब्देन इव मुदम्=प्रसन्नताम् एव धत्ते=धारयति । यथा मन्दोदरीचरणनूपुररणरणत्कारेण मम मनो मोदते तथा कपिसैन्यकोलाहलध्वनिनेति भावः । अत्रोपमालङ्कारेण यथा मणिनूपुरध्वनौ ममाभयं प्रत्युतप्रमोदस्तथाऽमीषु कपिष्वपि शब्दायमानेषु न भयं, वरं प्रसन्नतैव, पराक्रमप्रकटनावसरलाभादित्यर्थो व्यज्यते । पूर्वोक्तमेव वृत्तम् ॥१४॥

भुग्नालकमिति—भुग्नालकं=कुटिलकुन्तलं, स्मितेन=ईषद्धसितेन पराजिता=जिता चन्द्रलेखा=इन्दुकला येन तत्तथा, दृग्लीलया=नयनविलसितेन कुवलयश्रियम्=नीलकमलकान्तिम् आदधानम्=धारयत्, दिविषदां=देवानां दुर्निरीक्ष्यं=द्रष्टुमशक्यम् एतत्तव मुखम् (दिविषदां=देवानां दुर्निरीक्ष्यं=भयेन द्रष्टुमशक्यं) मामिव किम्=केन हेतुना अधः करोषि=नीचैर्नमयसि । अत्र त्वदीयतादृशमुखनमनं त्वया क्रियमाणं मां खेदयति तन्मा तथाकार्षीरित्यर्थः । त्वदीयात्ममुखाधःकरणं मत्खेदजनकत्वान्मदधःकरणतुल्यमित्युक्त्या पतिव्रतायास्तव पत्यधःकरणमेकान्ततोऽकर्त्तव्यमित्यर्थः सूच्यते । वसन्ततिलकं वृत्तम् ॥१५॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

प्रहस्तः—देव, कपिसेनाकोलाहलचिन्तयैव नूनमधरीकृतमुखो तर्कयामि ।

रावणः—आः, क एष चिन्ताविषयः ?

इयं लीलालोलाङ्गदभुजलता नीलचिकुरा
समुन्मीलत्तारा कुमुदहसिता चारुनयना ।
प्लवङ्गानां सेना युवतिरिव तारापतिमुखी
ममाऽग्रे कन्दर्पं प्रकटयितुमद्य प्रभवति ॥१६॥

मन्दोदरी—देव, अण्णं पि अत्थि कारणं । अज्ज हि मए देवस्स सउ... रूवणत्थं गिरिसिहरगहणगब्भट्ठिदां सबरपल्लीं पट्ठाविदा णि अपरिआरिआ। ...

इयमिति—लीलया=विलासेन (युद्धोत्साहप्रसूतेन) लोलः=चञ्च... अङ्गदो=वालिपुत्र एव भुजलता बाहुवल्लीस्थानीयो यस्यां सा, पक्षे लो... =कामचेष्टया लोलाङ्गदा=चलकेयूरा भुजलता यस्यास्तादृशी, (केयूरम... मित्यमरः) नीलः=तदाख्यो वानरविशेषश्चिकुरः=केशो यस्याः सा, पक्षे नील... =श्यामलः चिकुरो यस्यास्तथाभूता, समुन्मीलन्=प्रकाशमानस्तारः=तदभिध... वानरो यस्यां सा, यद्वा समुन्मीलन्=समुद्गच्छँस्तारः=तुमुलध्वनिर्यस्यां ... पक्षे समुन्मीलन्ती कामेन घूर्णन्ती तारा=(नयन) कनीनिका यस्यास्तथावि... कुमुदः=तन्नाम्ना ख्यातः कपिर्हसितं=हासस्थानीयो यस्यास्तथा पक्षे कुमुद... (श्वेतं) हसितं=स्मितं यस्याः सा, चारु नयनं=नेतृत्वं सञ्चालनं यस्या... पक्षे रमणीयलोचना, तारापतिः=सुग्रीवो मुखम्=मुखमिव मुखं प्रधानत्वान्मु... यस्यास्सा, पक्षे तारापतिश्चन्द्र इव मुखं यस्यास्सा, प्लवङ्गानां=वानराणां से... युवतिः=कामिनीव अद्य ममाग्रे=मत्पुरतः कन्दर्पं=कं किम्प्रकारं गर्वं, ... कन्दर्पं=कामप्रकर्षम् प्रकटयितुम्=प्रकाशयितुं प्रभवति=क्षमते । वानरसे... युवतिरिव मम पुरतः कमपि गर्वं न प्रकाशयितुमीष्टे परं (कोममेव प्रकाश... दिति भावः) श्लेषोत्थापितोपमालङ्कारः ॥ शिखरिणीवृत्तम् ॥१६॥

शबरपल्ली—भिल्लग्रामटिका, परिचारिका=दासी, पर्यन्तम्=समीप... कुटुम्बिनी=स्त्री ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

वि सबरकुडुम्बिणीए णिअत्तपेरन्तचारिणं केसरिकिसोरअं उल्लावअन्तीए वअणं आअण्णिदम् ।

'मा होहि णाअवइणो परिहवमेत्तेण गव्वणिव्वूढो ।

वसुहमिमं गिरिसंकडं मइन्द सरहस्स णन्दणो पत्तो ॥१७॥'

[देव, अन्यदप्यस्ति कारणम्, अद्य हि मया देवस्य शकुननिरूपणार्थं वनगहनगर्भस्थितां शबरपल्लीं प्रस्थापिता निजपरिचारिका । तथा च अपि शबरकुटुम्बिन्या निजपर्यन्तचारिणं केसरिकिशोरकं लालयन्त्या वचनमाकर्णितम् ।

मा भव नागपतेः परिभवमात्रेण गर्वनिर्व्यूढः ।

वसुधामिमां गिरिसङ्कटां मृगेन्द्र, शरभस्य नन्दनः प्राप्तः ॥१७॥]

रागः—किमिह विषादस्थानम्, अस्मान् प्रत्युदासीनमेवैतत् । तथाहि:—

मा भव नागपतेः परिभवमात्रेण गर्वनिर्व्यूढः ।

वसुधामिमां गिरिसङ्कटां मृगेन्द्र, शरभस्य नन्दनः प्राप्तः ॥१८॥

हस्तः—देव, अन्यथा घटमानमिदम् ,

मा भव नाकपतेः परिभवमात्रेण गर्वनिर्व्यूढः ।

वसुधामिमां गिरिसङ्कटमयीं दशरथस्य नन्दनः प्राप्तः ॥१९॥

मा भवेति—मृगेन्द्र=सिंह, नागपतेः=करिराजस्य परिभवमात्रेण=परा- गर्वनिर्व्यूढः=अहङ्कारसम्भृतः मा भव=(करिणं निपात्य मा मनसि आमवगाम, इत्यर्थः) इमां गिरिसङ्कटां=पर्वतपरिवृतां वसुधां=देश. =‘शरभो रामः सृमरो गवयः शशः’ इत्युक्तस्य अष्टपदश्वापदविशेषस्य =पुत्रः प्राप्तः । तथा च ततो भयेन पुरत एवात्मरक्षाप्रकारश्चिन्त्य इति । नागपतेः इत्युक्त्या मृगेन्द्रस्य बलं प्रशंसितम्, ‘गिरिसङ्कटां प्राप्तः’ इत्यनेन रक्षाया असम्भाव्यता तस्यातिदुर्गमार्गलङ्घनचातुर्येण भयस्यौचित्यमित्यादि, ’ (न तु पुत्रः) एतेन पराक्रमशालिता, (गुणैरेव पितुः नन्दन-) इत्याद्यर्था व्यज्यन्ते । अप्रस्तुतप्रशंसालङ्कारः । आर्याप्रभेदो वृत्तम् ॥१७॥

मा भवेति—नागपतेः=इन्द्रस्य । दशरथस्य नन्दनः=रामः । अत्र महत्त्व

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रावणः— आः, केयं निसर्गनिश्शङ्के लङ्केश्वरे मयि शकुनोपश्रुतिपरं

(नेपथ्ये)

हेलास्फालितरामलक्ष्मणधनुर्ज्यावल्लरीझल्लरी–
झाङ्कारप्रसरप्ररूढपुलकप्राग्भारनीरन्ध्रिताः ।
व्यावल्गत्कपिकण्ठकाण्डकदनक्रीडत्कृपाणाञ्चल–
स्फूर्जद्दुर्जयदोर्बलैकचपलाश्चञ्चन्ति रात्रिञ्चराः ॥२०

रावणः—(सहर्षम्) अये, निशाचरवीरविजयोत्तरः समरः ।

(पुनर्नेपथ्ये)

अग्रेसरी रघुपतेः परिणद्धपाक–
किंपाकपाटलमुखी कपिवीरसेना ।

पूर्वानुवृत्तामेव गाथां कियन्ति पदानि परिवर्त्य प्राक्तनपाठसूचितमर्थं सङ्गतं विधाय तथोपविश्य चेमामार्यामपठदिति बोध्यम् । शेषं पूर्वश्लोक एव ॥ १८–१९ ॥

हेलेति— हेलया=अनायासेन आस्फालितयोः=आकृष्टयोः धनुषोः=तच्छरासनयोः ज्यावल्लरी=प्रत्यञ्चालता एव झल्लरी=झण वाद्यभेदस्तस्य झाङ्कारप्रसरः=शब्दविस्तारस्ततो यः पुलकप्राग्भा स्थितसर्वाङ्गरोमाञ्चनिचयः) रोमहर्षविस्तारः, तेन नीरन्ध्रिताः (व्याप्ता इत्यर्थः) किञ्च व्यावल्गतां=शब्दायमानानां कपिकण्ठकाण्ड कण्ठाङ्कुराणां यत् कदनं=छेदनं तेन क्रीडता=खेलता कृपाणाञ्चलेन स्फ स्फुरमानं, दुर्जयं=पराभवितुमशक्यं दोर्बलं=बाहुपराक्रमस्तत्रैके=प्रख्यात रात्रिञ्चराः=राक्षसाः चञ्चन्ति इतस्ततः सहर्षं विचरन्तीति । राम नादश्रवणेन राक्षसानां रोमहर्षोक्त्या तेषां विजयविश्वस्तत्वम्, कपिकण्ठच्छेदनस्य सुखसाध्यत्वम्, च व्यज्यते । 'झल्लरीडुण्डुके इत्यमरः । शार्दूलविक्रीडितं वृत्तम् ॥२०॥

विजयोत्तरः— विजयावसानः ।

अग्रेसरीति— अग्रेसरी=पुरोगमा परिणद्धः=विस्तृतः पाकः=

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

निश्शेषमापिबति राक्षसवीरचक्रं
प्रातः प्रभेव तपनस्य तमिस्रजालम् ॥ २१ ॥

गः—आः, कथमुत्कण्ठायितं मर्कटैः ! (उच्चैः) कः कोऽत्र भोः ! ।

—

कृत्वा विनिद्रमपनिद्रभुजावलेपः
प्रोद्दामरामसमराय स कुम्भकर्णः ।
आदिश्यतां निजभुजार्दितवज्रपाणि-
रद्यैव लक्ष्मणरणाय च मेघनादः ॥ २२ ॥

(पुनर्नेपथ्ये)

, भवदाशयविदा महामन्त्रिणा माल्यवता पूर्वमेव संविहितमिदम् ।

हि—

द्वतः किंपाकः=फलविशेषस्तद्वत्=पाटलमुखो=रक्तानना रघुपतेः=रामस्य
सेना=वानरचमूः तपनस्य प्रातःप्रभा=प्रभातकालिकी तपनदीप्तिः तमिस्र-
अन्धकारकूटमिव राक्षसवीरचक्रं=रक्षोयोधगणं निःशेषम्=सर्वथा आपि-
ष्यति । प्रातःप्रभायामपि किंपाकपाटलमुखो, इति विशेषणं सुयोजं,
पि रक्तत्वात् । उपमाऽलङ्कारः । वसन्ततिलकं छन्दः ॥ २१ ॥
कण्ठायितम्—अत्याहितं कृतम्,=अत्युपद्रुतम् ।
त्वेति—विनिद्रं=निद्राक्षयं कृत्वा (जागरयित्वा) अपनिद्रः=प्रोद्बुद्धः
पः=बाहुगर्वो यस्य स कुम्भकर्णः प्रोद्दामरामसमराय=अत्युद्धतरामचन्द्रेण
य आदिश्यताम्=आज्ञाप्यताम्, स=प्रसिद्धकर्मा निजभुजार्दितवज्रपाणिः
हुविजितेन्द्रः मेघनादः (च) अद्यैव लक्ष्मणरणाय आदिश्यतामिती-
षमनुवृत्तम् । अपनिद्रभुजावलेप इति कुम्भकर्णस्य पराक्रमातिशयः,
णि' पदोपादानेन उग्रवज्रमपि देवेन्द्रमर्दितवता मेघनादेन सुकरो
य इति 'अद्यैव' इति रावणस्य विलम्बासहनत्वम् इत्याद्यर्था व्यज्यन्ते ।
तम्, विनिद्रमित्यव्ययीभावो निद्राया अभाव इति ॥ २२ ॥
विहितमिदम्—कुम्भकर्णमेघनादौ रामलक्ष्मणाभ्यां सह युध्येते इति भावः ।

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रामेण सार्धमथमुद्धतबाहुदर्पः संग्रामभूमिमधितिष्ठति कुम्भकर्णः ।
रक्षःशिखण्डिहृदयोत्सवमेघनादः सौमित्रिणा सममसावपि मेघनादः ॥

(पुनर्नेपथ्ये)

यद्दंष्ट्रावज्रघातैः समिति विदलिताः शैलकल्पाः कपीन्द्रा-
यन्नाराचाम्बुवर्षैर्दवदहनसमाः शामिता वानरेन्द्राः ।
वीरोऽसौ कुम्भकर्णः, स च समरकलाकौतुकी मेघनादः
संजातौ,

रावणः—किमतः परं वदिष्यति ?

(पुनर्नेपथ्ये)

हा पतङ्गौ दशरथसुतयोर्दारुणे वाणवह्नौ ॥ २

रामेणेति—उद्धतबाहुदर्पः=प्रकटभुजबलाहङ्कारः (अयं कुम्भकर्णः) सार्द्धं=सह सङ्ग्रामभूमिं=युद्धस्थलम् अधितिष्ठति=आश्रयति युध्यत इ... रक्षांसि=निशाचराः एव शिखण्डिनो=मयूरास्तेषां हृदयानां=चेतसामु... =हर्षाय मेघनादः=घनाघनस्तनिततुल्यः असौ मेघनादः=तदाख्यो रा... अपि सौमित्रिणा=लक्ष्मणेन समं (सङ्ग्रामभूमिमधितिष्ठति) युध्य... अत्र मेघनादे दृढबद्धभावानां रक्षसां तदीयशब्दश्रवणादिना मनो नृत्यति... धाराधरशब्देन मयूराणां मनो माद्यति, इत्युक्त्या मेघनादोत्साहित... प्राणांस्तृणाय मत्वा योत्स्यन्ते इत्यर्थकृतं रावणस्याश्वस्तत्वं व्यक्ती... साङ्गं रूपकमलङ्कारः । वृत्तमविपरीतम् ॥ २३ ॥

यद्दंष्ट्रेति—यस्य=कुम्भकर्णस्य दंष्ट्राघातैः=दशनप्रहारैः शैलकल्पाः=... निभाः कपीन्द्राः=वानरश्रेष्ठाः समिति=युद्धे विदलिताः=निपातिताः । ... =मेघनादस्य नाराचो = धनुस्तदम्बुवर्षैः=जलवृष्टितुल्यशरासारनिपातैर्दव... =वनाग्निना समाः सदृशाः वानरेन्द्राः शामिताः=निहता निर्वापिताः ... =पूर्वोक्तविशेषणः कुम्भकर्णः, स च समरकलाकौतुकी=युद्धविद्याविनोदी मे... (इमौ) दशरथसुतयोः=रामलक्ष्मणयोः दारुणे=भयानके वाणवह्नौ हा ...

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(मन्दोदरी-रावणौ मूर्च्छतः)

प्रहस्तः—देव, समाश्वसिहि समाश्वसिहि ।

रावणः—(समाश्वस्य) देवि, समाश्वसिहि समाश्वसिहि ।

मन्दोदरी—(समाश्वस्य) परित्ताअदु मं अज्जउत्तो । एसा णिमग्गम्हि तिमिरे [परित्रायतां मामार्यपुत्रः, एषा निमग्नास्मि शोकतिमिरे]

रावणः—अयि, अलं कातरतया, अयं चन्द्रहासचन्द्र एव शोकतिमिरादुद्धरिं भवतीम् ।

पश्यायमसौ मे—

भिन्नप्रभिन्नसुरकुञ्जरकुम्भमुक्त-मुक्ताफलैर्विचलितैः कलिताधिवासः ।

अद्यैव खेचरनिशाचरलोचनानामुन्मीलयन्मुदमुदञ्चति चन्द्रहासः ॥२५॥

(इति प्रहस्तेन सह निष्क्रान्तः)

(ततः प्रविशति विद्याधरमिथुनयुगम्)

विद्याधरी—अज्जउत्त को इमो रणरहसविअसन्तपुलअभरकुड्मलिदभुअवणो विचमूचक्कं अहिवट्टदि । (आर्यपुत्र, कोऽयं रणरभसविलसत्पुलकभरकुड्मलित-वनः कपिचमूचक्रमभिवर्त्तते)

क्षौ=शलभौ संजातौ । रामलक्ष्मणाभ्यां निहताविति तात्पर्यम् ॥ धरावृत्तम् ॥ २४ ॥

शोकतिमिरात्—दुःखान्धकारात् [शोकस्य सकलप्रकारकज्ञानतिरोधायक-तमस्त्वारोपः]

भिन्नप्रभिन्नेति—भिन्नाः प्रभिन्नाश्च क्षतविक्षता ये सुरकुञ्जरकुम्भाः=ऐरा-वतादिगजमूर्द्धानस्ततो युक्तैः=निस्सरद्भिः विचलितैः=स्थानाच्च्युतैर्मुक्ताफलैः कलितो विहितः अधिवासः=निवासो यत्र विदारितदेवदन्तिमूर्द्धनिस्सरन्मुक्ता-फलैः कृतास्पदइत्यर्थः । चन्द्रहासः,=रावणकरवालः अद्यैव खेचराः=(युद्धदिदृक्षया) आकाशमाश्रिता ये निशाचराः=राक्षसास्तेषां लोचनानां=नयनानां मुदं हर्षम् उन्मीलयन् समुत्पादयन् उदञ्चति=समुच्छलति । 'आकाशवासिरक्षोगण-हृदय मानन्दयन्' एतेन रावणविजय उक्तः । वसन्ततिलकं वृत्तम् ॥२५॥

रणरभसः—युद्धोत्साहः, पुलकभरः=रोमाञ्चनिचयः, कुड्मलितम्=प्रफुल्लम्

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

विद्याधरः—प्रिये, स एष रामसमरकौतुको दशकण्ठः ।

विद्याधरी—को उण इमो अञ्जणपुञ्जच्छवि सरीरो कविवीरो तस्स सम्मुहं परावट्टदि ।

[कः पुनरयं मञ्जनपुञ्जच्छविशरीरः कपिवीरस्तस्य सम्मुखं परावर्त्तते]

विद्याधरः—प्रिये, स एष विचित्रसमरशीलो नीलः । (विलोक्य) (विस्मयम्) अहो,

वक्षःस्थले किमपि नीलकरोज्झितेन
नीलाचलस्य शिखरेण कृतप्रहारः ।
लङ्केश्वरः स्मरति नूनमसौ वसन्त-
नीलोत्पलप्रहरणं हरिणेक्षणानाम् ॥२६॥

(पुनः सकौतुकम्) पश्य पश्य,

नीलोऽयं दशमुखपाणिपङ्कजाना-
मङ्केषु भ्रमरतुलां भ्रमन् बिभर्त्ति ।

भुजवनम्=बाहुसमूहः, (विंशतिसम्मितत्वाद् बाहूनां वनत्वारोपः) अभि... वर्त्तते=सम्मुखं गच्छतीत्यर्थः ॥

अञ्जनपुञ्जच्छवि—कज्जलश्यामकान्ति,

वक्षःस्थल इति—नीलकरोज्झितेन=नीलनामककपिप्रहृतेन नीलाचलस्य =नीलगिरेः शिखरेण=शृङ्गेण वक्षःस्थले=उरसि किमपि कृतप्रहारः=किञ्चि... ताडितः असौ लङ्केश्वरः=रावणः नूनं=निश्चयेन हरिणेक्षणानाम्=मृगदृशा... वसन्तनीलोत्पलप्रहरणं=वसन्तर्त्तौ क्रीडन्तीनां मृगेक्षणानां करैः नीलकमल... करणकं लीलाप्रहारं=स्मरति=अनुध्यायति । यथा मधुमासावतारे माद्यन्ती... निजावरोधकुरङ्गनयनाभिरधिकमलाकरं भ्रमन् रावणः कयापि प्रमोदमानम... सया क्रीडार्थं निजकरे धृतेन कुवलयेन मन्दमुरोदेशे ताडितो रावणो न प्रह... व्यथामनुभवति तथैव नीलप्रहृतनीलाचलशिखरेणात्र रणे प्रहृतोऽपि का... व्यथां नानुभवतीति भावः । स्मरणमलङ्कारः । वसन्ततिलकं वृत्तम् ॥२६॥

नीलोऽयमिति—दशमुखपाणिपङ्कजानां=रावणकरसरोजानाम् अङ्के...

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अप्येको दशसु किरीटपीठिकासु

द्राक्प्रेङ्खन्ननुभवतीन्द्रनीललीलाम् ॥२७॥

विद्याधरी—को उण इमो णिसा अरेन्देण समं समरसाहसमङ्गीकरिअ चिट्ठदि।

[कः पुनरयं निशाचरेन्द्रेण समं समरसाहसमङ्गीकृत्य तिष्ठति]

विद्याधरः—स एष स्वामिपक्षपाती विभीषणः। (सविषादम्) हन्त भोः,

येयं विभीषणे शक्तिर्मुक्ता क्रूरेण रक्षसा।

विद्याधरी—अह किं ताए ? [अथ किं तस्याः ?]

विद्याधरः—लक्ष्मणेन गृहीतेयं प्रियेव निजवक्षसा ॥२८॥

विद्याधरी—हद्धि हद्धि [हा धिक् हा धिक्]

विद्याधरः—वर्षन्नेव समन्ततो दशमुखं चापच्युतैः सायकैः

सौमित्रिं च विसंज्ञमङ्कनिहितं नेत्रच्युतैरम्बुभिः।

...ण्डदेशेषु (समीपे) भ्रमन्=सञ्चरन् अयं नीलः=तदाख्यः कृष्णकायः कपि-
...रः, भ्रमरस्य=तुलां=सादृश्यं बिभर्ति=धारयति। कमलसादृश्यशालिरावण-
...समीपे परिभ्रमन् नीलनामा कपिः भ्रमरवद्भासत इति पूर्वार्द्धार्थः। एकः
...(स नीलनामा कपिः) दशसु=तत्सङ्ख्यामितासु (रावणस्य) किरीट-
...ठिकासु=शिरोभूषामणिषु द्राक् प्रेङ्खन्=त्वरितं भ्राम्यन् इन्द्रनीललीलां=तदा-
...मणिकान्तिम् अनुभवति=लभते। दशस्वपि रावणकिरीटभूशामणिषु शोभ-
...कि अयमनील एकस्सन्नपि दशस्वपि तेषु प्रत्युप्तस्येन्द्रनीलमणेस्साम्यमावहतीति
...नः। प्रहर्षिणीच्छन्दः। एतेन रावणस्यातिविशालतनुत्वम्, नीलस्यातिनील-
...म्, आशुगतित्वञ्चोक्तम्। असम्बन्धे सम्बन्ध रूपातिशयोक्तिरलङ्कारः ॥२७॥
...येयमिति—या इयं शक्तिः=तदाख्यं प्रहरणं क्रूरेण=नृशंसेन रक्षसा
...निशाचरेण विभीषणे=(तं घातयितुम्) मुक्ता=प्रक्षिप्ता, इयं (सा शक्तिः)
प्रह...मणेन प्रियाप्रेयसी इव निजवक्षसा स्वोरःस्थलेन गृहीता=प्रतीष्टा, विभीषण-
का...दिश्य निशाचरेण क्षिप्तां शक्तिं विभीषणरिरक्षिषया लक्ष्मणो निजोरसा प्रतीष्ट-
...निति भावः। उपमालङ्कारः ॥२८॥
अ... वर्षन्नेवेति—चापात्=शरासनात् च्युतैः=मुक्तैः सायकैः=बाणैः समन्ततः

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

एतत्तर्कय हर्षशोकतरलाः कुर्वन् कपीनां दृशो
रामश्चामलकेलिवीरकरुणाव्यामिश्रतां गाहते ॥२९॥

(विलोक्य) कथमपगत एव रामबाणपीडितो दशकण्ठः ।

(नेपथ्ये)

हा वत्स, लक्ष्मण, विकासय नेत्रपद्मे
मागादिदं युगपदेव समस्तमस्तम् ।
भाग्यं दिवाकरकुलस्य, च, जीवितं च
रामस्य, किञ्च नयनाञ्जनमूर्मिलायाः ॥३०॥

=सर्वतो दशमुखं=रावणं वर्षन्=आप्लावयन् (एव) विसंज्ञं (शक्ति... घातेन) गतचैतन्यं मूच्छितमित्यर्थः, अङ्कनिहितं=क्रोडेऽवस्थापितं च सौमि... =लक्ष्मणं नेत्रच्युतैः=नेत्रात् पतितैः अश्रुभिः वर्षन्=निषिञ्चन् (रुदन्) क... =वानराणां दृशो=नयनानि हर्षशोकाभ्याम्=आनन्दखेदाभ्यां तरलाः=वि... कुर्वन्, (रामकृतबाणप्रहारव्यरतं रावणं दृष्ट्वा हर्षः, विसंज्ञं लक्ष्मणमा... रुदन्तं च रामं दृष्ट्वा खेदो बोध्यः) रामः, अमला = पवित्रा केलिः=वि... ययोस्तयोरतिपूतसङ्गत्योः वीरकरुणयोः=तदाख्यरसयोः (उत्साहखेदयो... प्रसङ्गार्थः) व्यामिश्रतां=संहतिं गाहते=आसादयति । रावणरणप्रवर्त्तकोत्सा... कृतो वीरो, लक्ष्मणमूर्च्छाजनितविषादविहितश्च शोको रामं युगपद्विषमां स्थि... मानयदिति भावः । एतत्तर्कय—पश्य । इति विद्याधरस्य स्वप्रेयसीं प्रत्युक्... तुल्ययोगितालङ्कारः, शार्दूलविक्रीतं वृत्तम् ॥२९॥

हा वत्सेति— हा वत्स, लक्ष्मण, नेत्रपद्मे=नयनसरोरुहे विक... (प्रबुद्धस्व) इदं समस्तं=वक्ष्यमाणं सकलं युगपत्=तुल्यकालम् एव ... =समाप्तिं मागात्=मा गमत् । तत्समस्तमेवाह—दिवाकरकुलस्य=सूर्यवंशस्य ... ग्यम्-अदृष्टम्, रामस्य-जीवितम्-प्राणधारणम्, किञ्च ऊर्मिलायाः=लक्ष्मणप... नयनाञ्जनं=नेत्रकज्जलं च । लक्ष्मणे मृते तद्गतप्राणस्य रामस्याप्यवश्यंभा... विनिपातेन सूर्यकुलवधूः परैरपहृतेति सूर्यवंशस्य भाग्यमस्तं, यत एतादृ... कलङ्कोदयः । रामस्य जीवितं गतमिति स्पष्टमेव । ऊर्मिलाया नयनयोरञ्ज...

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(नेपथ्ये)

देव, समाश्वसिहि समाश्वसिहि ।

विद्याधरी—कहं, सुग्गीवेण समासासीअदि रामचन्द्रो। ता किं दाणीं आळविस्सदि [कथं, सुग्रीवेण समाश्वास्यते रामचन्द्रः । तत् किमिदानीमाळपिष्यति]

(नेपथ्ये)

सखे, सुग्रीव, कथमाश्वस्यते ।

अयि राघवाविति सुधामधुरं विनिपीय पौरमुनिलोकवचः।
अयि राघवेति गरलप्रतिमं कथमद्य रामहतकः पिबतु ॥३१॥

अपि च—

कनीयस्या मातुः कृतचरणपातः कथमहं
सहिष्ये मत्पार्श्वे विफलपरिवर्त्तं नयनयोः ।

लक्ष्मणे मृते तस्यां विधवायामस्तमेवेति प्राकरणिकानां त्रयाणां सूर्यवंशरामजीवितोर्मिलानयनकज्जलानामेकत्रास्तंगमनरूपे धर्मेऽन्वयात्तुल्ययोगिताऽलङ्कारः। वसन्ततिलकं वृत्तम् ॥ ३० ॥

अयीति—अयि राघवौ, रघुकुलोत्पन्नौ, इति सुधाप्रतिमं तुलितामृतं पौराः=ग्रामजनाः, मुनयः, लोकाश्च तेषां वचो विनिपीय=श्रुत्वा अयि राघव, इति गरलप्रतिमं=विषमिव (तेषां वचः) अद्य=लक्ष्मणापायात्परेऽहनि रामहतकः=निन्दनीयो रामः कथं पिबतु शृणोतु । 'राघवौ' 'राघव' इत्यनयोः प्रकृत्यंशे साम्येऽपि प्रथमस्य द्विवचनान्ततया द्वित्वविशिष्टार्थाभिधायितास्मरणेन नाऽहमसहायः, किन्तु सहास्तिमया समानसुखदुःखो बन्धुरिति ज्ञानजनकत्वेन सुधासादृश्यं, परस्य चातथात्वेन निस्सहायतासूचनया गरलप्रतिमत्वमवगन्तव्यम् । 'विनिपीय' इति 'पी'धातोर्ल्यपा निष्पाद्यं, पिबतेस्तु नेदं रूपं ल्यपि कृत ईत्वाप्राप्तेः । 'निपीय यस्य क्षितिरक्षिणः कथाः' इति नैषधीयेऽप्येषैवगतिः, तथा प्रोक्तमपि नारायणीये तद्व्याख्याने । प्रमिताक्षरावृत्तम् ॥ ३१ ॥

कनीयस्या मातुरिति—कृतश्चरणयोः पातः=प्रणामो येन तथा चरण-

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अये शान्तं पापं कठिन इव चेज्जीवितुमना
विना वत्सं रामः पुनरयमयोध्यां प्रविशति ॥३२॥

विद्याधरः—अहह !!! करुणैकार्णवो वर्त्तते । (विमृश्य) कः पुनरि प्रतीकारः ? (विचिन्त्य) अथवा का प्रतीकारकथा ? वक्रो हि विधिः ।

विद्याधरी—वक्कदरोत्ति भणिज्जं । इदं पेक्ख । णं इमो वाणरो जेव्व कोवि लङ्केसरकिदसन्धाणो करकलिदसेलसिहरो रामसंमुहं जेव्व परिवट्टदि (वक्रतर इति भणितव्यम्, इदं पश्य । नन्वयं वानर एव कोऽपि लङ्केश्वरकृतसन्धानः करकलितशैलशिखरो रामसम्मुखमेव परिवर्त्तते)

विद्याधरः—(कर्णौ पिधाय) शान्तं पापम् । अयि मुग्धे, मैवं वादीः, अयं हि—

महोषधीनामाधारं भूधरं गन्धमादनम् ।
आदाय लक्ष्मणप्राणत्राणायाभ्येति मारुतिः ॥३३॥

प्रणतः अहन् मत्पार्श्वे=स्वदक्षिणभागे (लक्ष्मणेनाधिष्ठेये) कनीयस्या मातुः =सुमित्रायाः नयनयोः=लोचनयोः विफलपरिवर्त्तं=निष्फलमितस्ततः सञ्चरणं कथं सहिष्ये=मर्षयिष्यामि । लक्ष्मणमन्विष्यन्त्याः सुमित्रायाः मयि चरणप्रणते, लक्ष्मणे चाप्राप्ते, शून्यशून्यया दृशा यन्मम पार्श्वे दर्शनं, तदतितरामसह्यं, मर्मव्यथकत्वान्ममेति भावः । अये, शान्तं पापम्=निवर्त्ततां दुःखदायिनी घटना, (तदेदं चिन्त्यते) यदि वत्सं विना लक्ष्मणेन विरहितो जीवितुमनाः=प्राणधारणं वाञ्छन् कठिनः=कठोर इव अयं रामः पुनः=भूयः अयोध्यां प्रविशति=याति। तदेव तु न सम्भाव्यते, रामस्य लक्ष्मणैकायत्तप्राणत्वात् तदपायेऽवश्यं प्रणाशात् । तथा चाऽयोध्यां गते मयि सुमित्रायाः पुत्रान्वेषणप्रवृत्तयोर्दृशोः प्रेक्षणस्य कथैव नोदयत इत्यलं वृथामनःखेदजनकतच्चिन्तनेनेति भावः । शिखरिणीवृत्तम् । 'मातृ'पदमकृत्रिमस्नेहशीलताम्, 'नयनयो'रिति द्विवचनं परां कोटिमाटीकमानामुत्कण्ठां, परिवर्त्त'पदं च पीड़ासहनखिन्नताम् आह । जीवितुं मनो यस्य स जीवितुमनाः, 'तुं काममनसोरपीति' मलोपः ॥३२॥

महौषधीनामिति—मारुतिः=मरुतः पुत्रो हनूमान् लक्ष्मणप्राणत्राणाय =लक्ष्मणजिजीवयिषया महौषधीनाम्=अवन्ध्यभेषजभूतानां लतागुल्मादीनाम्

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

(पुनर्विलोक्य) (सहर्षम्)

आमोदमाघ्राय महौषधीनां सौमित्रिरुन्मीलितपद्मनेत्रः ।
भूयोऽपि चक्रीकृतचारुचापः करोति रामं परिपूर्णकामम् ॥३४॥

विद्याधरी— कहं पुणो वि रामरणकोदूहल्लफुल्लन्तभुअमण्डलो णिसाअराखण्डलो परावडिदो जेव्व (कथं पुनरपि रामरणकौतूहलफुल्लद्भुजमण्डलो निशाचराखण्डलः परापतित एव)

विद्याधरः—प्रिये, तदिदानीं सावधानं विलोकय । तुलाधिरोहः खल्वयं वीरलक्ष्म्याः, यन्नाम रामरावणयोः समर इति ।

विद्याधरी— कहं उण स अलजलोअवीरस्स रामचन्दस्स अणेकवीरपरिहूदस्स रावणस्स तुलाधिरोहो वीरलच्छीए हविस्सदि (कथं पुनः सकललोकवीरस्य रामचन्द्रस्य अनेकवीरपरिभूतस्य रावणस्य तुलाधिरोहो वीरलक्ष्म्या भविष्यति)

आधारं=स्थितिस्थानम् गन्धमादनं=तदाख्यं भूधरमादाय=गृहीत्वा (वहन्) अभ्येति=आयाति । अतो रावणकृतसन्धानः कोऽपि कपिरयं पर्वतेन रामं निहन्तुमायातीति न शङ्कनीयमिति भावः । अत्र 'महौषधीनामाधारम्' इत्यनेन लक्ष्मणजीवनसम्भवो व्यक्तः ॥३३॥

आमोदमिति— महौषधीनां=सिद्धभेषजानाम् आमोदं=गन्धमाघ्राय=घ्राणप्रत्यक्षेणानुभूय उन्मीलितपद्मनेत्रः=विकासितकमलोपमलोचनः, भूयोऽपि चक्रीकृतचारुचापः=सज्यीकृतकमनीयचापः सौमित्रिः=लक्ष्मणः रामं परिपूर्णकामं करोति=सफलमनोरथं विधत्ते, राक्षसनाशयज्ञोपक्रमणादिति भावः । उपजातिर्वृत्तम् ॥३४॥

रामरणो— रामेण सह युद्धे यत्कौतूहलम्=उत्कण्ठा तेन फुल्लत्=विकसत् भुजमण्डलं=बाहुवर्गो यस्य सः, (बाहूनां विकासो रोमाञ्चः, उच्छूनता वा) ।

तुलाधिरोहः—परीक्षावसरः, कस्य कियती वीरतेति निर्णयाय द्वावपि स्वं सामर्थ्यं निरवशेषं प्रकटयिष्यतः, ततो द्रष्टव्योऽनयो रण इति भावः ।

Raj Guru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

विद्याधरः—प्रिये, न जानासि । कथं दशकण्ठं विना—

विन्यासं नाकनारीकुचकलशलसत्कुङ्कुमस्थासकाना-
मस्पृष्ट्वा माष्टुं मासीदसिकलहकलाकोविदः को विदग्धः ।
भिन्नस्वर्गेभकुम्भस्थलबहलगलन्मौक्तिकव्यक्तहासः
कस्याक्रीड़त्कराग्रे त्रिदशपतियशश्चन्द्रहा चन्द्रहासः ॥३५॥

अपि च,

किं ब्रूमो दशकन्धरं निजचमूरक्षाकपाटोभव-
द्वक्षःपीठपतत्कठोरकुलिशाघातेषु जातस्मितम् ।

विन्यासमिति—नाकनारीणां=स्वर्बालानां कुचकलशेषु—कलशो=घटस्त-दुपमेषु स्तनेषु लसतां=विराजमानानां कुङ्कुमस्य काश्मीरजस्य=स्थासकानां=पत्रलेखानां विन्यासं=विरचनचमत्कारं कः=कतरः, असिकलहः=करवालयुद्धं तस्य कला=चातुर्यं तत्र कोविदः=पण्डितः, अस्पृष्ट्वा=स्पर्शमकृत्वैव विनैव पाणि-संयोगमित्यर्थः । माष्टुं=परिमार्जयितुं (स्तनमण्डलादपसारयितुं) विदग्धः=चतुरः आसीत् न कोऽपीत्यर्थः । स्वर्ललनाकुचमण्डललिख्यमानपत्रलेखामस्पृष्ट्वाऽपसारयितुं को रणपण्डितः प्राभूद्वते रावणादयं तु देवान् विद्राव्य तदङ्गनाः शुचा द्रुमा रुदतीर्विधायास्पृष्ट्वैव तासां स्थासकमक्षालयादिति पूर्वार्द्धार्थः, किंच कस्य करोग्रे भिन्नेभ्यः=विपाटितेभ्यः स्वर्गेभकुम्भेभ्यः=देवगजमस्तकेभ्यः स्थलेभ्यः=स्थानेभ्यो बहलं=प्रचुरं गलद्भिः=प्रकटीभूय निष्पतद्भिः मौक्तिकैः=मुक्ताफलैः व्यक्तः=प्रकाशितो हासो=हसितं यस्य तादृशस्त्रिदशानां=देवानां पत्युः=इन्द्रस्य यश एव चन्द्रस्तं हन्ति=विनाशयति तथा भूतश्चन्द्रहासः अक्रीड़त=अखेलत् निजकरवालेन देवकरिणां शिरांसि भित्त्वा देवेन्द्रमभिभवितुं कस्य रावणमिवस प्रभुत्वमभवदिति भावः । पर्यायोक्तालङ्कारः ॥ "स्थासकोऽथप्रबोधनम्, अनुबोधः पत्रलेखा" विद्वान् विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः' इत्युभयत्राप्यमरः । स्रग्धरावृत्तम् ॥३५॥

किं ब्रूम इति—निजानां चमूनां=सेनानां रक्षाकपाटीभवति=सर्वतो रक्षणाय कपाटतुल्ये वक्षःपीठे=उरोदेशे पततां कठोरकुलिशानां=भृशकठिनवज्राणाम्

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

व्योमाभोगसरो विलासिनि वने यत्पाणिपङ्केरुहां
कैलासेन शिरःस्थितेन्दुकलिकोत्तंसेन हंसायितम् ॥३६॥

(नेपथ्ये)

हेलोन्मूलितचन्द्रचूड़गिरयस्त्रैलोक्यदत्तापदो
लङ्कातङ्कहराः पुरन्दरपुरस्त्रीवृन्दवन्दीकृतः ।
वैदेहीकुचकुम्भकुङ्कुमरसव्यासङ्गबद्धस्पृहाः
सोत्कण्ठं दशकन्धरस्य जयिनः खेलन्ति दोःकेलयः ॥३७॥

…घातेषु=प्रहारेषु जातस्मितम्=स्मयमानवदनं दशकन्धरं=रावणं किं ब्रूमः …वर्णयामः (वाचामगोचरस्तत्पराक्रम इत्यर्थः) यत् पाणिपङ्केरुहां=यदीय…कमलानां वने=समूहे व्योमाभोगः=वियत्प्रदेश एव सरः=सरोवरस्तद्विला…नि=तत्र वर्त्तमाने, शिरःस्थितः=श्टङ्गे वर्त्तमान इन्दुकलिकोत्तंसः=शिवो यस्य …तादृशेन कैलासेन=हराचलेन हंसायितम्=हंसवदाचरितम् । यस्मिन्=रावणे …र्भिः कैलासमादाय नभसाप्रतिष्ठमाने नभसि भासमाने तद्बाहुमण्डले …वने मध्ये स्थितेन कैलासेन शशाङ्कचूड़ाधिष्ठिततयातिधवलेन हंसशो…ध्यगम्यतेति भावः । अत्र रक्षा कपाटीभवदित्यनेन रावणस्य युद्धेऽप्रगामि… पराक्रमप्रकर्षः, कुलिशाघातेषु इति बहुवचनेन 'जातस्मितम्' इत्यनेन च …ऽपि वज्रप्रहाराणामप्यचिन्तता 'विलासिनि' 'वने' इत्याभ्यां कैलासोत्थापन…क्लेशासम्पाद्यत्वम्, स्थितेन्दुकलिकोत्तंसेनेति कैलासधावल्यं, हंसायित…त्वेन च बाहूनां विस्तारप्रकर्ष इत्याद्यर्थाः सूचिताः । रूपकोत्प्रेक्षयोः …रः । शार्दूलविक्रीडितं वृत्तम् ॥३६॥

हेलेति—हेलया=अनायासेन उन्मूलितः=उत्पाटितश्चन्द्रचूड़गिरिः=कैलासो …स्ते तथाभूताः, त्रैलोक्याय=भुवनत्रयाय दत्ता आपदः=आपत्तयः कष्टानि यैस्तथा…ताः, लङ्कायाः आतङ्कस्य=भयस्य हराः=हर्त्तारः, पुरन्दरपुरी=स्वर्गस्तस्य स्त्री…वृन्दं=ललनाजनस्तस्य वन्दीकृतः=वन्दीविधायिनः, वैदेही=जानकी तस्याः …कुचौ=स्तनावेव कुम्भौ=घटौ तत्र यत् कुङ्कुमरजः=काश्मीरजपरागः तत्र व्यासङ्गः …क्रीड़ाविनोदः तत्र बद्धस्पृहाः=कृताभिलाषाः जयिनः=विजयशीलस्य दशकन्धर-

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(पुनर्नेपथ्ये)

हेलोन्मूलितचन्द्रचूडधनुषस्त्रैलोक्यदत्ताभया-
लङ्कातङ्ककराः पुरन्दरपुरस्त्रीवृन्दवन्दीमुचः ।
वैदेहीकुचकुम्भकुङ्कुमरसव्यासङ्गलब्धोत्सवाः
सोत्कर्षं रघुनन्दनस्य जयिनः खेलन्ति दोःकेलयः ॥३८॥

विद्याधरः—नूनमयं राक्षसवानरयोर्निजस्वामिवर्णनानुसारी व्याहारः।

विद्याधरी—कहं उण रहट्ठिदेण रावणेणसमं भूमिट्ठिदस्स रामस्स हविस्सदि । [कथं पुना रथस्थितेन रावणेन समं भूमिस्थितस्य रामस्य भविष्यति]

विद्याधरः—प्रिये, पश्य । आनीत एव मातलिना पुरुहूतरथः, अं... विनयाभिरामेण रामेण ।

(नेपथ्ये)

अये, कथं—

पूर्वमेव प्रयातानां खरमारीचवालिनाम् ।
सौजन्यमुग्धः पन्थानमधिवर्त्तितुमीहसे ॥३९॥

स्य-रावणस्य दोःकेलयो=बाहुविलासाः सोत्कण्ठं=सोत्कलिकं खेलन्ति विहर... हेलापदं तादृशे महत्यपि कर्मणि निरायासतां व्यञ्जयति । 'द्रवकेलिप... क्रीडा लीला च नर्म च' इति कोशः ॥ शार्दूलविक्रीडितमेव वृत्तम् ॥ ३...

हेलेति—रावणपराक्रमं तदनुचरैरुद्घोष्यमाणं श्रुत्वा रामानुवर्ति... राममस्तुवँस्तमेव स्तवमत्रोपनिबध्नाति । व्याख्यानं पूर्वश्लोकव्याख्या... क्योन्नेयम् । 'धनुषः'=चापस्य, अभयं = भयाभावः, कराः, कर्तारः... मोचकाः, लब्धोत्सवाः=प्राप्तानन्दाः, सोत्कर्षं=सप्रकर्षम्, इतीयद्भिद्यते ॥...

पुरुहूतः—पुरु-प्रचुरं (सत्यज्ञलौ किं पुरुधान्नपान्त्या'इति भा... हूतमाह्वानियस्य स इन्द्रः । इन्द्रो हि यज्ञभागग्रहणाय बहुत्राहूयते ।

पूर्वमेवेति—पूर्वमेव प्रयातानां=गतवतां (स्वां गतिम्) खरमा... लिनाम्=तत्तदाख्यस्वसुहृदाम् पन्थानं=मार्गं सौजन्यमुग्धः=सद्भावमू...

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

विद्याधरः—आकर्णयाम(स्ता)वदनेन रामवचनेन पीडितः किमाह रावणः ?

(नेपथ्ये)

खरः कीदृग् बालीकपि रपि च, मारीचहतकः
कुरङ्ग, स्तान् हत्वा कथमपि कथं दृप्यसि मनाक् ।
अयं पश्य प्राप्तो दशवदननामा सुरपुरी-
करीन्द्राणां हेलारचितकदनः पञ्चवदनः ॥४०॥

अथवा—कालीकेसरिकेसराञ्चलसटासाटोपसम्पादित—
क्रीडाचामरकोमलानिललवाचान्तश्रमाम्भःकणः ।
श्रीमानेष दशाननो विजयते तस्यास्यपञ्चानन—
व्यापारप्रतिपादनैरपि यशः कीदृक्समुन्मीलति ? ॥ ४१ ॥

[अनु]वर्त्तितुम्=अनुसर्त्तुम् ईहसे=इच्छसि ? यथा पद्धत्या मया निहताः खरमारी-[चबा]लिनो गतास्तामनुसर्त्तुमिच्छसि ? 'सौजन्यमुग्धः' इत्यनेन तवेयं सुहृद-[्वृ]त्तिर्नोचितेति, 'पूर्वमेवेति' त्वया पश्चाद्गन्तव्यमेवेति चाऽर्थः सूचितः ॥३९॥

खर इति—खरः कीदृक्, (अणुरपि तस्मिन् ममनाभूत् पराक्रमित्वास्थे-[त्य]र्थः) अपि च बाली कपिः=वानरः (अतस्सोपि त्वयानिहत इति किं तव [वी]र्यम् ?) मारीचहतकः कुरङ्गः=मृगः (अतः सोऽपि शरव्यस्तव मभू-[दि]ति न त्वया विकत्थनीयमित्यर्थः) तान्=खरबालिमारीचान्=कथमपि=केना-[पि] प्रकारेण (एतेन तद्धनने कृतमनुचितमाचरणं कटाक्षयति) हत्वा=मनाक् [ईष]त् कथं दृप्यसि=गर्वं करोषि (त्वया तेषु हतेषु तत्फलं मया दीयमानमप्रती-[क्ष्य]ैव गर्वः प्रारब्ध इति मनाक्पदद्योत्यम्) अयम् दशवदननामा सुरपुरीकरी-[न्द्रा]णां=दिग्गजानां हेलारचितकदनः=अनायासकृतबधः पञ्चवदनः सिंहः प्राप्तः [इ]ति) पश्य । अत्र रूपकालङ्कारेण तवावश्यमनेन सिंहेन पञ्चत्वं विधेय-[मि]त्यर्थो द्योत्यते । शिखरिणीवृत्तम् ॥ ४० ॥

कालीति—काली=चण्डिका भगवती तस्याः केसरिणः=तद्वाहनसिंहस्य [के]सराञ्चलसटा=स्कन्धदेशप्ररूढकेशकलापः तया (उत्पाटितया) साटोपम्=गर्वं

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

विद्याधरः—अये, दशवदनवचनकुपितः किमपि वक्तुकाम इव लक्ष्मणः ।

(नेपथ्ये)

किं ते—पञ्चाननतया दशाननतया वा त्वमिदानीं—

दूरान्मुक्तमदो विभीषण इव न्यञ्चाच्छिरः शेखरः
स्वच्छन्दं चरणारविन्दयुगले रामस्य भृङ्गो भवः ।
रे नक्तञ्चर, कुम्भकर्ण इव वा कर्णान्तचक्रीभव-
च्चापोत्सङ्गविमुक्तबाणदहने सद्यः पतङ्गो भव ॥ ४२ ॥

पूर्वक्रम् सम्पादितस्य=निर्मितस्य चामरस्य=बालव्यजनस्य कोमलः=मन्दोऽनि =वातस्तस्य लवेन=कियदंशेन आचान्ताः=शामिताः श्रमाम्भसः=रतिपरि प्रस्वेदस्य कणाः=विन्दवो यस्य तादृशः (कालीशाहनकेसरिणमभिभूय तदी सटा उत्पाट्य विरचितेन चामरेण मन्दं वीज्यमानेन यस्य रतिस्वेदविन्द निश्शेषमवसाय्यन्त इति भावः) एष श्रीमान्=अतिबहुललक्ष्मीको दशान विजयते=सर्वोत्कर्षेण वर्त्तते, तस्य अस्य पञ्चाननः=सिंहस्तद्व्यापारप्रतिपा =तदाचरणसादृश्यवर्णनैरपि कीदृक्=किंविधं यशः=पराक्रमोत्कर्षप्रभवा की समुन्मीलति=प्रसरति । य एवंकर्मा स सिंहेनोपमीयेतेति न तद्यशो वर्णितं हीनेनोपमितत्वं तदीयं लाघवं व्याञ्जयदिति भावः । दशाननस्य पञ्चा व्यापारप्रतिपादनानि नोत्कर्षसूचनानीति शाब्दिकश्चमत्कारः । काली केसरिणस्तस्यास्तत्सम्बन्धसूचनया नभिभवनीयतां सूचयति तेन तदभिभवि रावणस्य प्रभावप्रकर्ष उक्तः, शार्दूलविक्रीडितम् । 'जटा सटाकेसरयोः' मृगेन्द्रः पञ्चास्यः' इत्युभयत्राप्यमरः ॥ ४१ ॥

दूरोन्मुक्तेति—दूरमुन्मुक्तः=अतिशयेन त्यक्तो मदो=गर्वो येन तादृ विभीषणः=स्वानुज इव न्यञ्चन्=नम्रो भवन् शिरसःशेखरः=चूडारत्नं तथाभूतः=मूर्ध्ना प्रणत इत्यर्थः । स्वच्छन्दं=यथास्वाभिलाषं रामस्य चरणा विन्दयुगले=पादपद्मद्वये भृङ्गः=भ्रमरो भव, तदाश्रयेति तात्पर्यम् । रे नक्त वा=अथवा (पक्षान्तरे, प्रागुक्तस्य त्वदनभिलषितत्वे) कुम्भकर्ण इव (राम

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

विद्याधरी—पेक्ख पेक्ख । इदो सरन्धआरं वित्थारअन्तेण णिसामुहायिदं मुहेण । [पश्य पश्य, इतः शरान्धकारं विस्तारयता निशामुखायितं दशमुखेन] ।

विद्याधरः—नन्वितस्तदेव निजविशिखमयूखधारया विनिवारयता चन्द्रायितं रामचन्द्रेण । (पुनः सकौतुकम्) अये, नूनमयं दिव्यास्त्रलीलया प्रतिहतशस्त्रं निकृत्तचापं रावणं किमपि वक्तुकाम इव रामः ।

(नेपथ्ये)

निकृत्तचाप इति मा संक्षोभतरलो भव ।
शस्त्रमन्यदपि स्वैरं ननु रे समरे कुरु ॥ ४३ ॥

विद्याधरी—आकण्णीअदु दाव किं दाणीं भणदि रावणो (आकर्णयतु तावत् किमिदानीं भणति रावणः)

प्रान्ते=श्रवणप्रान्ते चक्रीभवतः=आकर्षणकृतेन चक्रस्येवाकारेण युञ्जानस्य धनुषः=धनुष उत्सङ्गः=अङ्कस्ततः विमुक्तानां=प्रक्षिप्तानां वाणानां=शराणां दहने=वह्नौ सद्यः=अनुक्षणमेव पतङ्गः=शलभो भव=जायस्व । रामं शरणीकृत्य विभीषणवदानन्दमनुभव, अथवा दुर्भाग्यविलसितेन कुम्भकर्णवद्रामनाराचमुक्तशरसमुद्भूतदहने दह्यस्वेत्यर्थः 'दूरोन्मुक्त' इत्यत्र दूरपदं हार्दिकीं भक्तिं, स्वच्छन्दमिति रामशरणागतिमार्गस्य सदाऽपिहितत्वं, तेन त्वदिच्छाया एव विलम्बो विलम्ब इति, रे इति कथयितुरनुक्रोशम्, कुम्भकर्ण इवेति तत्पराक्रमस्मरणद्वारकं रावणस्यावहितत्वं युक्तमिति 'दहने' 'शलभ' इति चाभ्यां नितान्तक्षयः, इत्यादिकं व्यज्यते । पूर्वोक्तमेव वृत्तम् ॥४२॥

निकृत्तचाप इति—निकृत्तः=खण्डितश्चापो=धनुर्यस्य तादृशः=भग्नधनुष्कः (अहं रावणः) इति संक्षोभतरलः=खेदखिन्नतया चपलः मा भव=मा भूः, रे, अन्यदपि शस्त्रम्=प्रहरणं स्वैरं=यथेच्छं समरे कुरु=युद्धे गृहाणेत्यर्थः । चापः खण्डित इति मा व्यथिष्ठाः, शस्त्रान्तरमादेहि । एतेन रामस्य विजये स्वात्मविश्वासो रणोपयुक्तव्यवहारज्ञता चावेदिषाताम् । मा भवेत्यत्र न माङ्शब्दः, किन्तु—'अमानोना निषेधवचनाः' इति प्राचीनोक्तिमूलकोऽव्ययं मापदम्, तेन 'माङि लुङ्' नाशङ्क्य इति ॥४३॥

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(नेपथ्ये)

आकणितस्तव दशानन बाहुदण्ड-
श्रीखण्डकाननफणी नवचन्द्रहासः ।
येन स्वनामभवसाम्यरुषेव पीतः
स्वर्लोकलोलनयनामुखचन्द्रहासः ॥ ४४ ॥

विद्याधरः—लीलादलितचन्द्रहासः सोत्प्रासः किमधुना वदति रा
रामचन्द्रः ।

(नेपथ्ये)

अयि, तावदधुना लङ्केश्वरः खिद्यते ।

विद्याधरी—किंपि दाणीं जप्पिस्सदि रावणो (किमपीदानीं जल्पिष्य
रावणः)

आकणित इति—हे दशानन, रावण, तव बाहुदण्डो=भुजदण्ड
श्रीखण्डकाननं=चन्दनवनं तस्य फणी=सर्पः (आकारेण, बृहत्त्वेन, मारणस्व
च सर्पता चन्द्रहासस्य, यशस्सुरभिततया, बहुत्वेन, भुजगाधिष्ठानतया
भुजदण्डानां काननता बोध्या) नवचन्द्रहासः=तदाख्यः करवालः आकर्णि
=श्रुतः । तद्विषये बहु विविच्यमानं श्रुतमिति भावः । येन स्वनाम
=नामजनितेन साम्येन तुल्यतया (करवालश्चन्द्रहासः, मुखचन्द्रहासश्च)
रुट्=क्रोधस्तया इव स्वर्लोकस्य=स्वर्गस्य लोलनयना=रमणी तस्या मुख
चन्द्रः (आह्लादकत्वात्) तस्य हासः=प्रफुल्लता पीतः=आचान्तः (पीत
मत्यन्तापहरणं लक्षयति, तेन परमा शुगुक्ता) अत्र येन करवालेन त्वं देव
पद्रुत्य तदङ्गनानां मनःखेदितवाँस्तस्य गुणगणो मयाऽऽकर्णित इति भाव
रुषेवेति हेतूत्प्रेक्षा, बाहुदण्ड, श्रीखण्डकाननफणी, मुखचन्द्रेत्यादि
चेत्यनयोः सङ्करः । वसन्ततिलकं वृत्तम् ॥४४॥

लीलया—अनायासेन दलितः=खण्डितश्चन्द्रहासः=तदभिधानोऽसियेन
सोत्प्रासः=सोल्लासः ।

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(नेपथ्ये)

कथमद्यैव लङ्केश्वरः खिद्यते । ननु रे,

विध्वस्ता दशभिर्भुजैर्दशदिशः प्रत्येकमेते पुन-
र्भारायैव दशापरे मम गिरिप्राग्भारभाजो भुजाः ।
आराध्यः शशिमौलिरम्बुधिजले निद्राति नारायणः
किंकर्तव्यतयानयानुदिवसं लङ्केश्वरः खिद्यते ॥ ४५ ॥

विद्याधरी—वअणमेत्तं दाणीं (वचनमात्रमिदानीम्)

विद्याधरः—नहि नहि पश्य नन्वयमिदानीमपि

धनुर्निस्त्रिंशादिप्रहरणगणच्छेदकुपितो
दशास्यः स्वान्मूर्ध्नो रघुपतिशर-श्रोणिदलितान् ।

विध्वस्ता इति—मम=रावणस्य दशभिः=तत्सङ्ख्यकैर्भुजैः=बाहुभिः प्रत्ये- दशदिशः, विध्वस्ताः=जिताः पुनः एते गिरिप्राग्भारं=पर्वतविस्तारं भजन्ते ये =पर्वतवद्विस्तीर्णा मम अपरे=दिग्विजयकृतार्थेभ्यो दशभ्यो मम बाहुभ्यो भिन्नाः भुजा भाराय=वहनजन्यायासाय एव (न फलाय) ननु शिवविष्णू विजित्य किमिति नामीषां भुजानां सार्थक्यं सम्पाद्यत इति चेत्तत्राह-आराध्य इति । शशिमौलिः=चन्द्रशेखरः शिव आराध्यः=समर्चनीयः, (एतेनादरपात्र- तया युद्धानवसर उक्तः) नारायणः=विष्णुः अम्बुधिजले=समुद्राम्भसि निद्राति =शेते (एतेन शयनं नाटयतो विष्णोरयोध्यता निवेदिता) अनया=पूर्वोक्तया किंकर्तव्यतया=करणीयान्तरालाभकृतचिन्तया लङ्केश्वरो=रावणः अनुदिवसं =प्रतिदिनं खिद्यते=व्यथते । अत्र रावणो विंशत्या बाहूनां समृद्धो दशभिरेव भुजैर्दशाशा एकेनैकामिति रीत्या पराभूय, शिवविष्णू च तत्तदुक्तकारणैः प्रतिभटीकर्त्तुमशक्तो भारभूतानपरान्दशभुजान्कथं सार्थकयेयमिति चिन्ताचुम्बि- तचित्ततया प्रतिदिवसमन्तर्व्यथामाप्नोतीति भावः । अत्राऽसम्बन्धे सम्बन्धात्मि- कातिशयोक्तिः । शार्दूलविक्रीडितं वृत्तम् ॥४५॥

धनुर्निस्त्रिंशादीति—धनुर्निस्त्रिंशादीनां=चापखड्गप्रभृतीनां प्रहरणा- नाम्=अस्त्राणां गणः=समूहस्तस्य च्छेदेन=खण्डनेन कुपितः=क्रुद्धः दशास्यः=राव-

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

करैरेकैरेकैर्नभसि भृशमादाय युगप-
त्क्षिपन्नन्यैरन्यैः सफलयति दोर्विंशतिमपि ॥ ४६ ॥

(पुनः सकौतुकम्)

एतान्यस्य यथायथा सुविशिखैः कृत्तानि रक्षःपते-
रुद्गच्छन्ति शिरांसि भीतिपुलकैः साकं दिवौकःपतेः ।
उन्मीलन्ति तथातथा रघुपतेरन्तःप्रमोदोर्मयः
कण्ठच्छेदविनोदकौतुकभरव्यग्रीभवच्चेतसः ॥४७॥

णो रघुपतेः=रामस्य शरश्रेण्या=बाणपरम्परया दलितान्=कृत्तान् स्वान्=निज मूर्द्धः=शिरांसि एकैः एकैः करैः आदाय (करैः) अन्यैः अन्यैः भृशं=पुनः पु नभसि युगपत् क्षिपन्=अस्यन् (आदानक्षेपणयोरेककालिकता बोध्या दोर्विंशति विंशतिसङ्ख्यकान् बाहूनपि सफलयति=सार्थकीकरोति । रामराव रामेण रावणस्य शिरस्सु छिन्नेषु तत्स्थानेषु शिवप्रसादेन पुनरपराणि शिरां प्ररोहन्ति, तानि च पुना रामो निकृन्तति, रावणश्च रामच्छिन्नानि स्वानि शिरां दशैकेन करेणैकमादाय अन्येन पुनस्तन्नभसि क्षिपति, तदेवमेकत्र शिरसि गृ माणे क्षिप्यमाणे च द्वयोः करयोरुपयोग इति रीत्या बाहुविंशतिमपि सार्थ यतीत्याशयः । एतेन रावणस्य शस्त्ररहित्येऽप्यपलायनकृतं धैर्यप्रकर्षं व्य यति । शिखरिणीवृत्तम् । 'निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः' इ कौमुदी ॥४६॥

एतानीति—यथायथा=येन येन क्रमेण सुविशिखैः=तीक्ष्णशरैः कृत्ता =छिन्नानि अस्य रक्षःपतेः=रावणस्य एतानि शिरांसि=मस्तकानि दिवौक =देवानां पत्युः=स्वामिन इन्द्रस्य भीतिपुलकैः=भयकृतरोमोद्गमैः उद्गच्छन्ति =प्रकटीभवन्ति, तथा तथा=तेन तेन क्रमेण कण्ठच्छेदः=रावणशिरःकर्त्तनं स ए विनोदः=क्रीडा तत्र कौतुकम्=उत्कण्ठा तस्य भरः=समुदयस्तेन व्यग्रीभव =सातिशयव्यग्रम् चेतो=हृदयं यस्य तस्य रघुपतेः=रामस्य अन्तः=हृदये प्रमोद र्मयः=आनन्दतरङ्गा उन्मीलन्ति=प्रकटन्ति रामेण रावणस्य शिरांसि एकतरि

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

विद्याधरी—कहं अज्जावि णिसाअरेन्दवन्दीकिदसुरसुन्दरीणं दंसणं दुल्लहं जं-मस्स सीसाइं पुणो पुणो वि उम्मीलन्ति [कथमद्यापि निशाचरेन्द्रबन्दीकृत-सुरसुन्दरीणां दर्शनं दुर्लभं यदस्य शीर्षाणि पुनः पुन रप्युन्मीलन्ति]

विद्याधरः—अलं तापेन, क्रीडति खलु रामः सह रावणेन। न पुनरद्यापि कुप्यति। (पुनर्विलोक्य) (सकौतुकम्) प्रिये, पश्य पश्य।

अन्तःसान्द्रवहन्महेश्वरशिरःशीतांशुलेखोल्लस-
त्पीयूषद्रवशीकरव्यतिकरप्राग्भारभाजामिव ।
छिन्नानामपि रामचन्द्रविशिखैर्भूयः समुद्गच्छतां
काप्यन्यैव निशाचरेन्द्र शिरसां कान्तिः समुज्जृम्भते ॥४८॥

न्तेऽपरतश्च तानि तदीयतपोमहिम्ना पुनः प्ररोहन्ति, छिन्नानि च शिरांसि यदा पुनरुद्भवन्ति तदा देवेन्द्रश्चिन्तया भयेन च सरोमाञ्चः सञ्जायते, रामश्च नवोद्गत-शिरःश्रेणीनिकृन्तनव्यग्रोऽपि युद्धवीरतया परं प्रमोदत इति भावः। अत्र सहोक्तिरलङ्कारः॥ पृषत्कबाणविशिखा इत्यमरः। शार्दूलविक्रीडितं वृत्तम्॥४७॥

अन्तःसान्द्रेति—अन्तः=हृदये सान्द्रं=निबिडं यथास्यात्तथा वहतः=ध्यान-प्रवाहावर्त्यमानस्य महेश्वरस्य=शिवस्य शिरसि=मस्तके यः शीतांशुः=चन्द्रस्तस्य लेखा=कला तत उल्लसतः=प्रस्यन्दमानस्य पीयूषद्रवस्य=अमृतरसस्य ये शीकरा=विन्दवस्तेषां व्यतिकरः=सम्बन्धस्तस्य प्राग्भारः=विस्तारस्तं भजन्ते ये तथा-भूतानामिव हृदयस्थितचन्द्रचूडशेखरापीडशशिकलास्रवत्सुधाविन्दुसम्पर्कशा-लिनामिवेत्यर्थः। रामचन्द्रविशिखैः=रामबाणैः छिन्नानामपि भूयः=पुनः समुद्-गच्छतां=प्ररोहतां निशाचराणां=रक्षसामिन्द्रस्य=(रावणस्य) शिरसां=मस्तकानां कापि अनिर्वचनीया कान्तिः=प्रभा समुज्जृम्भते= प्रकाशते। रामेण छिद्यमानानां हृदयस्थितहरशिरःस्थितेन्दुगलदमृतपृषत्सम्बन्धादिवपुनरुद्भवतां रावणशिरसां का-प्यभिनवैवाभिख्या जायत इति तात्पर्यम्। हेतूत्प्रेक्षालङ्कारः,। सान्द्रवहत्पदेन प्रत्ययप्रवाहानीतता, महेश्वरपदेन सर्वकार्यक्षमता चावेद्यते। तदेव वृत्तम-त्रापि॥४८॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(पुनः सकौतुकम् । विहस्य) अहो अस्य चित्तवृत्तिः ।

अयं यावद्यावत् पृथुहृदयपीठं रघुपतिः
शिरश्छेदासक्तो न दशवदनस्य व्यथयति ।
अयं तावत्तावद्वहति मुदमुच्चैर्दशमुखः
किलैतस्मिन्देवो जनकपतिपुत्री निवसति ॥४९॥

(नेपथ्ये]

अयि प्रिय, राम,

किं क्रीडसि शरस्तोमैर्नन्वेकेनैव पत्रिणा ।
परिपूरय नः कामं यशसा च जगत्त्रयम् ॥ ५० ॥

अयमिति—अय=युद्धनिरतो (रावणस्य) शिरसां=मस्तकानां छेदे=ख‍ण्डने आसक्तः=दत्तावधानो रघुपतिः यावद्यावत्=यदवधि दशवदनस्य पृथु=विशालं णाहि हृदयपीठं=हृत्प्रदेशं न व्यथयति=आहन्ति अयं दशमुखः=रावणः तावत्ता-वत्=तदवधि उच्चैः=महतीं मुदं=प्रमोदं वहति=धत्ते । तत्र हेतुमाह-किलैत-स्मिन्=हृदयपीठे देवी जनकानां=विदेहानां पत्युः=सीरध्वजस्य जनकनाम्नः तस्य राज्ञः पुत्री=तनया जानकी निवसति=वर्त्तते इति । सीतां हृदये कृत्वा रावणेन स्वेषु शिरस्सु च्छिद्यमानेष्वपि उरोदेशस्य रामबाणाघातरहितत्वावस्थ-तदवस्थितजानक्या अकष्टमुत्प्रेक्ष्य प्रमोदोऽनूभूयत इति तात्पर्यमेतेन च राव-प्राणेभ्योऽपि सीता प्रियतमामतेति व्यक्तम् । यावत्तावत्पदयोर्द्विरुक्तिस्तत्त-यीणां त्वरितविधीयमानतां द्योतयति । 'दशवदन'पदेन शिरश्छेदे च्छेद्यसङ्ख्या-कृतो विलम्बः, 'आसक्त'इत्यनेन वेध्यान्तरध्यानशून्यता, चेत्याद्यर्थाः प्रकाश्य-शिखरिणीवृत्तम् ॥ ४९ ॥

किं क्रीडसीति—शरस्तोमैः=शरसमूहैः (वृथा) किं क्रीडसि=खेलसि ननु एकेनैव पत्रिणा=बाणेन नः (देवानाम्) अस्माकम् कामं-मनोरथम्, य-सा=कीर्त्या रावणविजयभवया जगत्त्रयं=लोकत्रितयं च परिपूरय, अस्मा-नन्दनाय लोकत्रयव्यापिकीर्त्तिलाभाय च त्वरितमस्य वधः करणीयो न तु शरासारवर्षणक्रीडया समयो यापनीय इत्यर्थः, एतेन देवानां रावणोपद्रव-डितत्वं व्यक्तम् । तुल्ययोगितालङ्कारः ॥ ५० ॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

विद्याधरः—नूनममी दिवौकसस्त्वरयन्ति रामचन्द्रम्। तच्छृण्वन् किमधुना ...यति रावणः ?

(नेपथ्ये)

रे रे मम भुजाः,

मुक्त्वैकां हरशेखरप्रणयिनीं पीयूषभानोः कलां
दिक्पालावलिमौलिमण्डनमणीन् गृह्णीत सर्वानपि।
तैः काञ्चीं रचितां चिराय वहतु श्रोणीतटे जानकी
गायन्ती कमनीयशिञ्जितभरैर्मद्विक्रमाडम्बरम् ॥ ५१ ॥

विद्याधरः—(विहस्य) लङ्केश्वर, समयज्ञोऽसि यद्भुजानेव नियुक्तवानसि। ...ना हि भुजमण्डलमेव परिवारवर्गस्ते। (विलोक्य साकूतम्) अये, कथमनेन ...ाननवचनेन किंचित्कुपित इव दृश्यते जानकीकान्तः ? (पुनः सहर्षविषादम्) ... भोः !!

मुक्त्वैकामिति—एकां हरशेखरप्रणयिनीं=शङ्करशिरोभूषणीभूतां (तत्र ...वासे रसिकाम्) पीयूषभानोः=सुधाधाम्नश्चन्द्रमसः कलां=लेखामंशं मुक्त्वा ...त्यक्त्वा सर्वान्=निःशेषान् अपि दिक्पालानां=शक्रादिदशदिशारक्षकदेवानामव-...=श्रेणी तस्या मौलिषु=शिरस्सु ये मण्डनमणयः=अलङ्काररत्नानि तान् ...ह्णीत=आदत्त, शिवेन चूडामणितया शिरसि न्यस्तामेकां वैधवीं कलामपहाय ...शामपि दिक्पालानां मूर्द्धसु भूषणतया न्यस्तानि रत्नानि बलादाहरतेति ...ार्दार्थः। तैः=देवशिरोहृतरत्नसमूहैः रचितां=कृतां काञ्चीं=मेखलां, मद्विक्र-...स्य=मदीयपराक्रमस्य डम्बरम्=प्रशंसित कमनीयशिञ्जितभरैः=मधुरकाञ्चीनि-...दैः गायन्ती=प्रकाशयन्ती (वर्णयन्ती) जानकी चिराय=बहुदिवसानां कृते ...श्रोणीतटे=नितम्बमण्डले वहतु। देवशिरोरत्ननिर्मितमेखलामण्डितजघना जानकी ...राय तद्रत्नराजिप्रदमदीयपराक्रमं गायत्विति भावः। अनेन रावणस्य सकल-...परिभवसमर्थतायामात्मविश्वास उक्तः। शार्दूलविक्रीडितं वृत्तम् ॥ ५१

भुजमण्डलमेव—सर्वेषां परेषां तदनुयायितत्पुत्रादीनां विनाशितत्वा-...त्युक्तम् ॥

...jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

विकचकुसुमस्तोमाकीर्णे परागविभूषितः
शशिमणिशिलातल्पेऽनल्पे सलीलमशेत यः ।
अयमयमसौ रोषारूढे क्षणं रघुनन्दने
भुवि दशमुखः शेते धूलिच्छटापरिधूसरः ॥ ५२ ॥

विद्याधरी—ता दाणिं जेव्व जणअणन्दिणी रामचन्देण समं संगमिस्
[तदिदानीमेव जनकनन्दिनी रामचन्द्रेण समं संङ्गस्यते]

विद्याधरः—अथ किम् ?

उद्दामहेतिवलयैः परिदीपिताशं
पश्य प्रविश्य जनकेन्द्रसुता हुताशम् ।
प्रत्युद्गता समधिकां द्युतिमावहन्ती
प्रातर्मयूखकलिकेव दिवाकरस्य ॥ ५३

विकचेति—विकचानि=विकसितानि यानि कुसुमानि=पुष्पाणि स्तोमः=समूहस्तेन आकीर्णे=व्याप्ते शशिमणिः=चन्द्रकान्तोपलस्तस्य शि तस्यास्तल्पे=चन्द्रकान्तमणिशिलाकृते शयनीये अनल्पे=महति यः= सलीलं=यथारुचि परागैः=पुष्परजोभिः भूषितः=अलंकृतः अशेत=शयि अयमयमसौ=स एव दशमुखः=रावणः रघुनन्दने=रामचन्द्रे क्षणं=रोषारू धशालिनि धूलिच्छटापरिधूसरः=पार्थिवरजोरूषितः भुवि=पृथिव्यां 'विकच'पदं कुसुमानां मृदुत्वसूचनाय । 'कुसुमस्तोमाकीर्णे' इत्यनेन शय 'नितान्तकोमलता' 'शशिमणिशिलातल्पे' इति शैत्यम्, स्वच्छता च ' इत्यसङ्कीर्णता, सलीलमिति मनोविनोदपूर्वकशयनस्य निर्भरनिद्राप्र 'अयमयम्' इति द्विरुक्त्या 'तत्तदुपभोगभाग्यवानपि रावणः' इति 'क्षणम् रामप्रतापातिशयः, 'भुवि' इति कठिनता, इत्याद्यर्थाः सूच्यन्ते । हरिणी 'स्तोमौघनिकरव्रातवारसंघातसंचयाः, समुदायः, इत्यमरः ॥ ५२ ॥

उद्दामेति—उद्दामहेतिवलयैः=प्रखरज्वालामण्डलैः परिदीपिताशं=दि तदिगवकाशं हुताशं=वह्निं प्रविश्य जनकेन्द्रसुता=सीता प्रातः=प्रभातसमये

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

विद्याधरी—पेक्ख पेक्ख। इमो असमसमरकअत्थिदं पदेसं अवतरइ रामचन्दो।

[पश्य पश्य, अयमसमसमरकदर्थितं प्रदेशमवतरति रामचन्द्रः]

विद्याधरः— तदेहि। कर्णामृतं पुलोमजायै निवेदयावः।

(इति निष्क्रान्तौ)

(ततः प्रविशति रामः सीतालक्ष्मणौ सुग्रीव-विभीषणौ च)

रामः—अये, कथमुपगत एव भगवानम्बरमणिश्चरमाचलचूडाम्।

लक्ष्मणः—पश्चिमपयोधिवेलां च। नन्विदानीम्—

उद्दामदिग्द्विरदचञ्चलकर्णपूर-
गण्डस्थलोच्चलदलिस्तवकाकृतीनि।
मीलन्नभांसि मृगनाभिसमानभांसि
दिक्कन्दरेषु विलसन्तितमां तमांसि॥५४॥

मयूखकलिका=किरणावलीव समधिकां=प्रचुरां द्युतिं=कान्तिमावहन्तो ... ना प्रत्युद्गता=निष्क्रान्ता (इति) पश्य, वाक्यार्थः कर्म-यथा निशि ... प्रभा बह्नौ निलीय प्रातःकाले तप्ततपनीयकान्तिरधिकदीप्तिशालिनी च ... पुनरुदयते तथैव सीतापि प्रचण्डज्वालाभासितदिगवकाशं समिद्धतमं ... प्रविश्य पातिव्रत्यप्रभावेण पूर्वाधिकसुन्दरीं तनुमवाप्य निर्गतेति पश्ये... । 'अर्चिर्हेतिः शिखा स्त्रियाम्' इत्यमरः॥ ५३॥

अम्बरमणिः—सूर्यः। चरमाचलस्य=अस्ताचलस्य, चूडाम्=शिखरम्।

उद्दामेति—उद्दामानः=मदोद्धताः ये दिग्द्विरदाः=दिग्गजास्तेषां चञ्चले-चपलेभ्यः कर्णपूरेभ्यः=कर्ण भूषणेभ्यः, गण्डस्थलेभ्यः=कपोलफलकेभ्यश्चोच्च-... भ्रमतामलीनां=भ्रमराणां स्तवको=गुच्छः (समुदायः) तस्येवाकृतिः=स्वरूपं येषां, तानि, माद्यद्द्विपचपलकर्णाञ्चलकपोलप्रान्तसञ्चरद्भ्रमरभरसवर्णानी-... । मीलत्=व्याप्यमानं नभः=आकाशो यैस्तादृशानि, मृगनाभिः=कस्तूरिका समाना भाः=कान्तिर्येषां तानि=कस्तूरिकाश्यामानि, तमांसि=अन्धकाराः ... दरेषु=आशागह्वरेषु विलसन्तितमाम्=विराजन्ते। आकाशस्य नीलतया करि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रामः—अये, कथमुज्जृम्भितमेव निशाचरचक्रानुकारिणा तिमिरनि...

विभीषणः—नन्वितोऽपि समुन्मीलितमेव रामनाराचानुकारिणा तुहि... किरणप्रकरेण ।

सुग्रीवः—एवमेतत् । अमीहि—

क्षीराब्धेर्लहरीषु फेनधवलाश्चन्द्रोपलेषु स्रव-
त्पाथः शीकरिणो विकासिकुमुदक्रोडे रजःपिञ्जराः ।
उन्मीलन्ति चकोरचञ्चुगहने छिन्नप्ररूढाश्चम-
त्कुर्वन्तः प्रियविप्रयुक्तरमणीगात्रे सुधांशोः कराः ॥ ५...

कपोलसादृश्यम्, भ्रमरकस्तूर्योश्चापि श्यामतयाऽन्धकारेण तुलना । वसन्त... वृत्तम् ॥ अन्त्यानुप्रासः । विलसन्तितमामित्यत्रातिशायने तरवन्तादाम् ॥ ...

अनुकारिणा—सदृशेन, श्यामतया दिग्भागव्यापकतया च तमोनि... चक्रयोः साम्यम् ।

नाराचः—धनुः, तुहिनकर=चन्द्रः । अत्रापि वक्रतया तमोहरत्वे... चन्द्रधनुषोः सादृश्यं, तमःपदं ध्वान्तदुःखोभयपरं च बोध्यम् ॥

क्षीराब्धेरिति—क्षीराब्धेः=दुग्धसिन्धोर्लहरीषु=तरङ्गेषु फेनधवलाः... उज्ज्वलाः, चन्द्रोपलेषु=चन्द्रकान्तमणिखण्डेषु स्रवन्तः=प्रस्यन्दमानाः पा... राः=जलबिन्दवः सन्त्येषां तादृशाःस्रवत्पानीयबिन्दुवन्तः, विकासिनि=फु... क्रोडे=कैरवाङ्के रजःपिञ्जराः=परागकपिशवर्णाः चकोराणां=तन्नामप्रसि... किरणलुब्धपक्षिविशेषाणां चञ्चवः=ओष्ठपुटा एव गहनं तत्र छिन्नप्ररूढाः... तपुनरुत्पन्नाः, प्रियविप्रयुक्तानां=प्रेयो विरहिणीनां रमणीनां गात्रे चमत्... =प्रकाशप्राचुर्येण द्योतमानाः सुधांशोः=चन्द्रमसः कराः=किरणानि समुन्मी... =विद्योतन्ते । अत्र चकोरैः पीततया छिन्नाः, पुनः प्रसृततया चोत्पन्नाः, ... विप्रयुक्तानां रमणीनां गात्रकान्तेः श्वैत्यं कविसमयप्रसिद्धं मनसि कृत्... चमत्कारातिशय उक्तः । आश्रयवशेनाश्रितस्य गुणभेदमुपपादयितुं चैतादृ... उक्तं च नैषधीये—'शशंस यः पात्रगुणाद्गुणानां संक्रांतिमाक्रान्तगुणातिरेकां'... इति तद्गुणातिशयोक्त्योः सङ्करः । शार्दूलविक्रीडितम् वृत्तम् ॥ ५५ ॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

विभीषणः—एवमेतत्। इदानीं हि—

शंकरार्धतनुबद्धपार्वतीकुङ्कुमाक्तकुचकोरकाकृतिः ।
सूचयते कमलिनीभिरुन्नमत्पद्मकोशकरलीलया शशी ॥५६॥

लक्ष्मणः—(सकौतुकम्) एवमेतत्। अहो,

ध्वान्तौघे शितिकण्ठकण्ठमहसि प्राप्ते प्रतीचीमुखं
प्राचीमञ्चति किञ्च दुग्धलहरीमुग्धे विधोर्धामनि ।
एतत्कोकचकोरशोकरभसम्लानप्रसन्नोल्लसद्
दृक्पातोर्मिकदम्बचुम्बितमिव त्रैलोक्यमाभासते ॥ ५७ ॥

शङ्करेति—शङ्करस्य=शिवस्य तनोरर्द्धमर्द्धतनुस्तत्र बद्धायाः=सततसं-[...]याः पार्वत्याः कुङ्कुमाक्तस्तस्य काश्मीरजरागरञ्जितस्य कुचकोरकस्य=स्तन-[...]लस्याकृतिरिवाकृतिर्यस्य तादृशः (शङ्कराविभक्तपार्वतीसम्बन्धिकुङ्कुमलिप्त-[...]कोरकनिभः) कमलिनीभिः=पद्मिनीभिः उन्नमति=उन्नतिं लभमाने (वहि-[...]रणमुन्नतिः) पद्मकोशे =कमलमुकुले या करलीला=किरणविलासः तया [...]ते। कमलिन्यश्चन्द्रोदये निमीलन्ति, तत्र निमीलितायां कमलिन्यां रक्त-[...]कपतिताश्चन्द्रकराः कुङ्कुमाक्तकुचकोरकशोभां जनयन्ति, उन्नमत् पदं [...]पतितत्वसूचनाय। सर्वतः श्वेताश्चन्द्रकरास्तत् पार्वतीमिलितहरकाय-[...]या पूरणीयं, कमलकोरके यो रक्तिमा सकुचकोरकस्य कुङ्कुमाक्ततयोपपाद्यः। [...] नित्याश्लिष्टायाः पार्वत्याः कुङ्कुमाक्तेन स्तनेन तुल्यः सङ्कुचितकमलिनी-[...] चन्द्रकरस्तत्र प्रतीयत इति भावः। उत्प्रेक्षाऽत्रालङ्कारः ॥ स्वागता-[...] ॥५६॥

ध्वान्तौघ इति—शितिकण्ठस्य=शिवस्य कण्ठस्य=गलस्य मह इव महो [...] तस्मिन्=नीलकण्ठश्यामले ध्वान्तौघे=तमःस्तोमे प्रतीच्याः=पश्चिमा-[...] मुखं प्राप्ते=तद्दिग्गामनि, किञ्च दुग्धलहरीमुग्धे=दुग्धधाराधवले विधोः [...]देस्य धामनि=द्युतौ प्राचीं=पूर्वामाशामञ्चति=प्राप्तोदये इत्यर्थः, तमसि [...]लति, चन्द्रातपे चोन्मीलतीति भावः, एतत् त्रैलोक्यम्=भुवनत्रयम्, कोकाः [...]काः चकोराश्च तेषां शोकेन=दुःखेन रभसेन=प्रसादेन म्लानस्य=दीनस्य

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रामः—वत्स, एवमेतत् । इदानीं हि—

शीतांशुस्फटिकालवालवलयद्रागुल्लसत्कौमुदी—
वल्लीनूतनपल्लवाञ्चितमिव प्राप्य क्षणं ताम्रताम् ।
चञ्चन्मत्तचकोरचञ्चुघटनाच्छिन्नाग्रकाण्डस्रुत—
क्षीरस्यन्दनिरन्तराप्लुतमिव श्वेतं वियद्भासते ॥५८॥

प्रसन्नस्य=हृष्टस्य च दृक्पातस्य=नयनविक्षेपस्योर्मिः तरङ्गस्तस्याः कद
समूहास्तैश्चुम्बितं=युक्तमिव आभासते=प्रकाशते । पश्चिमायां तमसि पूर्व
चन्द्ररोचिषि च वर्त्तमाने कोकानां शोकस्य, चकोराणां प्रमोदस्य चोद
प्रथमानां म्लानाः, परेषां प्रसन्नाश्च नयनपाताश्चन्द्रप्रभातमोरूपतयात्रोत्प्रेक्षि
स्वरूपोत्प्रेक्षालङ्कारो यथासंख्यं च । शार्दूलविक्रीडितं वृत्तम् ॥५७॥

शीतांशुस्फटिकेति—शीतांशुः=चन्द्र एव स्फटिकालवालः=श्वेतस्फटिक
मितमम्भोधारणं तस्य वलयः=मण्डलं तत्र द्राक्=अतिशीघ्रतया उल्लसन्ती=उ
त्पद्यमाना कौमुदी=चन्द्रज्योत्स्ना सैव वल्ली तस्या नूतनाः=नव्याः पल्ल
=पलाशास्तैरञ्चितं=शोभितमिव (वियत्) क्षणं=कियत्कालं ताम्रतां=रक्त
प्राप्य लब्ध्वा चञ्चतां=चपलानां मत्तचकोरचञ्चूनां घटना=संयोगविशेषश्छेदन
तया छिन्नं यदग्रकाण्डं=पुरोवर्त्तिप्ररोहस्ततो यः क्षीरस्य=दुग्धस्य स्यन्दः=प्र
स्तेन निरन्तराप्लुतं=सर्वावयवावच्छेदेन व्याप्तं श्वेतं वियत्=नभः भासते
लताया उद्गमस्थानं वियत्, चन्द्रमण्डलं स्फटिकमणिकृतमालवालवलय
(एतेन स्वच्छतापयसः समुचितोल्लतयोपयोगश्च ध्वनितौ) तत्र प्रका
चन्द्रकान्तिर्लता, तस्या नूतनपल्लवाः प्रथमे रक्ताः शशिकराः (तत्र) चकोर
सम्बन्धो ननु कर्त्तरिकाकृतश्छेदः, तेन शशिकराग्रकर्मकं चकोरकर्तृकं पान
प्ररोहच्छेदः, ततः क्षीरस्यन्दः शशिकरप्रसार इत्यन्वेयम् । अन्यापि ल
निजालवालप्ररूढा नवैर्निजपल्लवैः स्वोद्गमप्रदेशं रञ्जयति, सति स्वकाण्ड
स्वस्यन्दमानदुग्धधारया धवलयति चेति मनसि कृत्य साङ्गरूपकमिदं न्यब
'क्षणं ताम्रता' मिति प्रकाशप्रकर्षम् 'घटना'पदं पानचेष्टाम् व्यञ्जयति, उत्प्रे
सङ्कीर्णं साङ्गरूपकमलङ्कारः ॥ शार्दूलविक्रीडितं वृत्तम् ॥५८॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

(पुनर्विलोक्य) (सकौतुकम्) वत्स लक्ष्मण,

पश्योदेति वियोगिनां दिनमणिः शृङ्गारदीक्षामणिः
प्रौढानङ्गभुजङ्गमस्तकमणिश्चण्डीशचूडामणिः ।
तारामौक्तिकहारनायकमणिः कन्दर्पसीमन्तिनी-
काञ्चीमध्यमणिश्चकोरपरिषच्चिन्तामणिश्चन्द्रमाः ॥५९॥

लक्ष्मणः—एवमेतत् । अयमसौ

स्वैरं कैरवकोरकान् विदलयन्यूनां मनः खेदय-
न्नम्भोजानि निमीलयन् मृगदृशां मानं समुन्मीलयन् ।
ज्योत्स्नां कन्दलयन् दिशो धवलयन्नुद्वेलयन् वारिधीन्-
कोकानाकुलयंस्तमः कवलयन्निन्दुः समुज्जृम्भते ॥६०॥

पश्योदेतीति—वियोगिनां=विरहविधुराणां दिनमणिः=सूर्यः (तद्वत्संताप-) शृङ्गारदीक्षा=रसराजशिक्षा तत्र मणिः=प्रकाशकरः (अतिकामदीपकः) =विवृद्धो योऽनङ्गभुजङ्गः=कामसर्पस्तस्य मस्तकमणिः=शिरोरत्नम् (एतेनै- किरणलुब्धजनानां तल्लिप्सया प्रवृत्तौ प्राणभयं सूचितम्) चण्डीशः शिव- चूडायाः=मस्तकस्य मणिः=अलङ्कारः । ताराः=नक्षत्राणि मौक्तिकानि ः तेषां हारः=माल्यं तत्र नायकमणिः=मेरुस्थानीयं रत्नं प्रधानभूत इति यम् । कन्दर्पस्य=कामदेवस्य सीमन्तिनी=बधू रतिस्तस्या या काञ्ची=मेखला मध्यमणिः, चकोराणां परिषद्=मण्डलं तस्याश्चिन्तामणिः=चिन्तारत्नम् अभिमतदातृत्वात्तत्तुल्यः) चन्द्रमाः उदेति (इति) पश्य कर्म वाक्यार्थः । कमालालङ्कारः । तदेव वृत्तम् ॥५९॥

स्वैरमिति—कैरवकोरकान्=कुमुदकुड्मलानि स्वैरं=यथेच्छं विदलयन् कासयन्, यूनाम्=(युवत्यश्च युवानश्च तेषां 'पुमान् स्त्रिया' त्येकशेषः) मनः यन्=पीड़यन् (कामदीपनात्) अम्भोजानि=कमलानि निमीलयन्=सङ्कोच- , मृगदृशां=स्त्रीणां मानं=प्रियापराधभवं कोपं=समुन्मीलयन्=शिथिलयन्

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

विभीषणः—सखे सुग्रीव, पश्य ।

मयूखनखरत्रुटत्तिमिरकुम्भिकुम्भस्थलो-
च्छलत्तरलतारकाकपटकीर्णमुक्तागणः ।
पुरन्दरहरिद्दरीकुहरगर्भसुप्तोत्थित-
स्तुषारकरकेसरी गगनकाननं गाहते ॥६१॥

(चन्द्रोदये हि चन्द्रमुख्यो दीप्तमदना द्रवन्ति) ज्योत्स्नां=चन्द्रिकां क- यन्=अङ्कुरयन् (उद्भावयन्) दिशो धवलयन्=उज्ज्वलयन् वारिधीन्=समु- द्वेलयन्=समेधयन् (सति चन्द्रोदये समुद्रस्य पयोवर्द्धत इति प्राचीना प्र- द्धिरतदभिमानेनेयमुद्वेलतोक्ता) कोकान्=चक्रवाकान् व्याकुलयन् (प्रिय- विरहप्रदत्वात), तमः=अन्धकारम् कवलयन्=अपसारयन् इन्दुः=चन्द्रः ज्जृम्भते=प्रकाशते । 'कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयः' इत्यमरः ॥६०॥

मयूखेति—मयूखा एव=किरणा एव नखराः=नखास्तैस्त्रुटतो=भि- तिमिरमेव कुम्भी=गजस्तस्य कुम्भस्थलात्=सूर्ध्नः उच्छलन्=उत्पतन्, तर- =चञ्चलानां=ताराणां=नक्षत्राणां कपटेन=छलेन कीर्णः=प्रसारितः मुक्तागणो- सः, (निजैर्मयूखैरिव नखैः करिणमिव तमो विदार्य तन्मस्तकमुक्तागण- तारामण्डलं यो विकासितवानित्यर्थः) (सः) पुरन्दरस्येन्द्रस्य हरित्= =प्राची दिक् सैव दरी=गुहा (अतिविस्तृतत्वान्निलयनयोग्यत्वाच्च) त- कुहरे=गर्भे सुप्तः (पश्चात) उत्थित उद्बुद्धश्च तुषारकरः=हिमदीधितिः स- केसरी=सिंहः गगनमेव काननं वनं (दुःसञ्चरत्वात) गाहते=प्रविश- अन्योऽपि दरीसुप्तः सिंहः स्वैर्नखैः करिकुम्भं विपाट्य तत्र स्थितं मुक्ता- विकीर्य काननं प्रविशति तथा चन्द्रः खरैः करै स्तमो विदार्य तारागणं वि- प्राचीदिगुदितो व्योमाभोगमाश्रयतीत्यर्थः । आशाश्च हरितश्च ताः' 'ह- केसरी हरिः, सिंहो मृगेन्द्रः' इति चामरः । नखरो नख इति च हैमः । रूपकमलङ्कारः । पृथ्वीवृत्तम् ॥६१॥

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalga

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सुग्रीवः—सखे विभीषण, पश्य ।

यः श्रीखण्डतमालपत्रति दिशः प्राच्याः, स्मरक्ष्मापतेः
पाण्डुच्छत्रति, दन्तपत्रति वियल्लक्ष्मीकुरङ्गीदृशः ।
केलिश्वेतसहस्रपत्रति रतेः, किञ्च क्षपायोषितः
क्रीडाराजतसीधुपात्रति शशी सोऽयं जगन्नेत्रति ॥६२॥

रामः—(निर्वर्ण्य)

सितकिरणकपोलोमालिमालोकयन्ती
तिमिरविरहतापव्याकुलां व्योमलक्ष्मीम् ।

यः श्रीखण्डेति—यः (शशी=चन्द्रमाः) प्राच्यादिशः (स्त्रीलिङ्गतया नायिकायाः) श्रीखण्डस्य=मलयजस्य तमालपत्रं=विलासविरचितं चित्रं तद्वदाचरति, स्मरक्ष्मापतेः=कन्दर्पस्य राज्ञः पाण्डुच्छत्रति=श्वेतातपत्रायते, वियल्लक्ष्मीः आकाशशोभा सैव कुरङ्गीदृक्=हरिणनयना स्त्री तस्याः केलिः=विलासस्तस्यै श्वेतं=स्वच्छं सहस्रपत्रं=कमलं तद्वदाचरति, (दन्तपत्रति=कर्णाभरणवदाचरति) क्षपा रात्रिरेव योषित्=वनिता तस्या क्रीड़ा=रतिस्तदर्थं यत् राजतं=रजतनिर्मितं सीधुपात्रं=मद्यपानपात्रम् , अमत्रम् तद्वद् भासते, सोऽयं=पूर्वपूर्वप्रोक्तपदार्थविशेषोपमेयः शशी जगन्नेत्रति=संसारदीपकत्वमाश्रयति । लोकाह्लादकतया श्रीखण्डतमालपत्रति, (तिलकरूपतां भजते) कामोद्दीपनात्स्मरक्ष्मापतेः पाण्डुच्छत्रति, आकाशदेशभासनादाकाशलक्ष्म्या दन्तपत्रति, कर्णाभरणीभवति) रतिपोत्साहकतया रतेः केलिश्वेतसहस्रपत्रति, जगन्नेत्रति च प्रकाशकत्वादिति बोध्यम् ॥ उत्प्रेक्षा-रूपकयोः सङ्करः । शार्दूलविक्रीडितं वृत्तम् ॥६२॥

सितकिरणेति – तिमिरात्=अन्धकारात् विरहः=वियोगस्तेन व्याकुलां सितकिरणः=श्वेतद्युतिः कपोलो यस्याः सा तां व्योमलक्ष्मीम्=आकाशश्रियमेव आलिं=सखीं विलोकयन्ती=पश्यन्ती रजनिः=रात्रिः अमलास्तारा एव शीकराः जलविन्दवस्तैः सिक्तम्=आर्द्रीकृतमस्याः=व्योमलक्ष्म्याः सख्या गात्रं चन्द्रिका चान्द्री द्युतिरेव चन्दनं (शैत्याद्धावल्याच्च) तेन परिमलयति=वासयति । यथापि सखी प्रियविरहव्याकुलां स्वां सखीं जलसेकेनाश्वास्य तदीयतापापनुत्तये

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

रजनिरमलताराशीकरैः सिक्तमस्याः
परिमलयति गात्रं चन्द्रिकाचन्दनेन ॥६३॥

(पुनर्विमृश्य, स्वगतम्)

इन्दुरिन्दुरिति किं दुराशया, विन्दुरेष पयसो विलोक्यते ।
नन्विदं विजयते मृगीदृशः, श्यामकोमलकपोलमाननम् ॥६४॥

(पुनः सीतां प्रत्यपवार्य)

तन्वि त्वद्वदनस्य विभ्रमलवं लावण्यवारांनिधे-
रिन्दुः सुन्दरि, दुग्धसिन्धुलहरीबिन्दुः कथं विन्दतु ।
उत्कल्लोलविलोचने, क्षणमयं शीतांशुरालम्बता-
मुन्मीलन्नवनीलनीरजवनीखेलन्मरालश्रियम् ॥६५॥

तदङ्गं चन्दनादिशीतसुगन्धद्रव्येण चर्चयति, तथाऽत्रापि रात्रिः सखी, … लक्ष्मीविरहिणी, तिमिरः प्रेयान्, ताराः पयः पृषताः, चन्द्रिका चन्दनम… गमम् । सितकिरणकपोलीमित्यनेन विरहकृता श्वेतता, 'आलि'पदेन च दु… साहायकविधानौचित्यम्, आवेद्यते । मालिनीवृत्तम् ॥६३॥

इन्दुरिति—इन्दुः=चन्द्रः चन्द्र इति दुराशया=मिथ्यासम्भाव… एषः=दृश्यमानः पयसः=पानीयस्य विन्दुः=शीकरः किं विलोक्यते=दृश्… पयो विन्दुत्व चन्द्रमसस्तुच्छतां प्रकाशयितुम्, पानीयपिण्डता च चन्द्रस्य… प्रसिद्धा । एतादृशानुयोगे साधकमाह—नन्विदमित्यादि । नन्विदं मृगी… =हरिणनयनायाः श्यामः कोमलः=सुन्दरो मृदुलश्च कपोलो यस्य तादृशम… विजयते=सर्वोत्कर्षेण वर्त्ततेऽतश्चन्द्रविषयको दुरभिलाषो वृथेत्यर्थः समर्थि… स्वागताच्छन्दसोपनिबद्धमिदम् ॥६४॥

तन्वीति—तन्वि=सुन्दरि, (सीतासम्बोधनमिदम्) लावण्यं=सौन्द… वा स्तेषां निधेः=समुद्रस्य त्वद्वदनस्य=तव मुखस्य विभ्रमलवं=विलासलेशं दु… सिन्धुः=क्षीरसागरस्तस्य लहरी=तरङ्गस्तस्या विन्दुः क्षुद्रतमो भागस्त… इन्दुः=चन्द्रः कथं विन्दतु=प्राप्नोति, नहि जातु समुद्रसादृश्यमधिगच्छति वि…

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सीता—(लज्जां नाटयति । (विलोक्य, हर्षेण) अहो, कहमिमो उम्मोलिदो [अहो, कथमयमुन्मीलित एव]

मउलीकिदारविन्दो माणवईमाणवारणमइन्दो ।
तिहुअणणअणाराविन्दो रअणीमुहचन्दणो चन्दो ॥६६॥
[मुकुलीकृतारविन्दो मानवतीमानवारणमृगेन्द्रः ।
त्रिभुवननयनारविन्दो रजनीमुखचन्दनश्चन्द्रः ॥६६॥]

रामः—सखे सुग्रीव, पश्य पश्य ।

इन्दोरस्य त्रियामायुवतिकुचतटाचन्दनस्थासकस्य,
व्यामश्रोचामरस्य त्रिपुरहरजटावल्लरीकोरकस्य ।

कृत्वैतादृश्युक्तिः । उत्कल्लोले=समुद्यत्तरङ्गे लोचने=नयने यस्य स्तत्सम्बुद्धौ उत्कल्लोलविलोचने=तरङ्गितदृगञ्चले क्षणं=कियन्तं कालं यावत् अथ शीतांशुः न्द्रः उन्मीलन्ती=विकसन्ती या नवानां=नूतनानां नीलनीरजानां=श्यामकमला-वनी=समूहस्तत्र खेलतः=विहरमाणस्य मरालस्य श्रियं=शोभां (सादृश्यम्) लम्बताम्=आप्नोतु ॥ लावण्यसिन्धोर्मुखमण्डलस्य तव क्षीरसिन्धुतरङ्गविन्दुरयं कथमिव तुलामृच्छतु, त्वयि च दृशं नभसि व्यापारितवत्यां तन्निर्गतप्रभा-के व्योम्नि तन्मध्यगतश्चन्द्रो नीलकमलवनमध्यगतं राजहंसमनुकरिष्यतीति-ः। अतिशयोक्तिरलङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥६५॥

मुकुलीकृतेति—मुकुलीकृतम्=मुद्रित मरविन्दं=कमलं येन तादृशस्तथा नवतीनां=कोपवतीनां मान एव वारणः=करी तस्य मृगेन्द्रः=सिंहस्तन्निवर्त्तक-सति हि चन्द्रोदये तत्कृतकामोद्दीपनेन कामिन्यः स्वं मानमाशु विसृजन्तीति हारमवलम्ब्येदमुक्तम् । त्रिभुवनस्य=लोकत्रयस्य यानि नयनानि तेषामानन्दः ः (अतिशयं व्यञ्जयितुमानन्ददायिनि चन्द्रे आनन्दत्वमारोपितं बोध्यम्) नी=रात्रिस्तस्या मुखे चन्दनः=तत्तुल्य इत्यर्थः, चन्द्र उदयतीत्यध्याहार्यम् ॥ र्याप्रभेदो वृत्तम् ॥६६॥

इन्दोरिति—त्रियामा=रात्रिरेव युवति स्तस्याः कुचतटी=स्तनप्रान्तस्तस्या-न्दनस्थासकस्य=मलयजलेपस्य व्योमश्रीः=आकाशलक्ष्मीस्तस्याश्च मरुत=वाल-

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

कंदर्पक्षोणिपालस्फटिकमणिगृहस्यैतदाखण्डलाशा-

नासामुक्ताफलस्य स्थगयति जगतीं कोऽपि भासां विलासः ॥६७॥

सुग्रीवः—अये रघुनाथ, पुनरुक्तमिदमाचष्टे चन्द्रमसः किरणविलासः।

रामः—कथमिव ?

सुग्रीवः—नन्वत एव।

कर्पूरादपि कैरवादपि दलत्कुन्दादपि स्वर्णदी-

कल्लोलादपि केतकादपि चलत्कान्तादृगन्तादपि।

व्यजनस्य (तत्तुल्यता च श्वैत्येन) त्रिपुरहरः=शङ्करस्तस्य जटेव वल्लरी= तस्याः कोरकस्य=कुड्मलस्य (तत्र वर्तमानतया चन्द्रस्य कोरकत्वारोपयोग्य जटायाश्च परस्परसंबद्धायामशालितन्तुवितानवत्तया लतात्वं बोध्यम्) कन्दर्प क्षोणिपालो=राजा तस्य यत् स्फटिकमणिगृहं=श्वेतशिलानिमितं भवनं (कामोद्दीपकतयेत्थमुक्तिः) एषा= पुरोदृश्या याऽऽखण्डलाशा=प्राचीदिशा नासा=नासिका तस्या मुक्ताफलस्य=मौक्तिकाभरणकल्पस्य अस्य इन्दोः=चन्द्र कोऽपि=वचनातीतः भासां=प्रमाणां विलासः चमत्कारः जगतीं=संसारं स्थग =पूरयति। एतादृशनानाविधरूपरूपितस्य चन्द्रमसः प्रकाशो भुवमभिव्याप्नो भावः। 'त्रियामा क्षणदाक्षपा' 'चर्चा तु चार्चिक्यं स्थासकोऽथ प्रबोधनम्, बोधपत्रलेखा कलिका कोरकः पुमान्' इति चामरः। मालारूपकालङ्कारः शार्दूलविक्रीडि रावृत्तम् ॥६७॥

पुनरुक्तमिदमाचष्टे—कृतं करोतीत्यर्थः, स्वयशसा विकासितस्य जग पुनरुद्भासनं कृतकरणं बोध्यम् ॥

कर्पूरादपीति—कर्पूरात्=घनसारात् अपि, कैरवात्=कुमुदात् अपि, दलतः =विकसतः कुन्दात्=माध्यपुष्पादपि, स्वर्णदी=आकाशगङ्गा तस्याः कल्लोलात् =तरङ्गादपि, चलतः=सञ्चारभाजः कान्तानां ललनानां दृगन्तात्=नयनप्रान्तादपि दूरमुन्मुक्तः=त्यक्तः कलङ्कः=लाञ्छनं येन तादृशो यः शङ्करशिरसः=हरमूर्ध शीतांशुः=चन्द्रस्तस्य खण्डात्=अंशादपि श्वेताभिः=धवलाभिस्तव=रामचन्द्रस्य कीर्तिभिः सप्तार्णवा=समुद्रसप्तकोपेता मेदिनी=धवलिता=शुभ्रीकृता, अत्र

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

दुरोन्मुक्तकलङ्कशकरशिरःशीतांशुखण्डादपि
श्वेताभिस्तव कीर्तिभिर्धवलिता सप्तार्णवा मेदिनी ॥६८॥

रामः — अल तुच्छप्रायजल्पितेन ।

विभीषणः — देव, तुच्छप्रायमेव जल्पितं सुग्रीवेण । यदुक्तं मेदिनी धवलि- ता। ननु त्रिलोकीतलमेव धवलितमिति वक्तव्यम् । सम्प्रति हि—

समुन्नतघनस्तनस्तबकचुम्बितुम्बीफल-
क्वणन्मधुरवीणया विबुधलोकवामभ्रुवा ।
त्वदीयमुपगीयते हरकिरीटकोटिस्फुर-
त्तुषारकरकन्दलीकिरणपूरगौरं यशः ॥६९॥

रामः—अयि लङ्केश्वर, भवानपि किष्किन्धानाथमतमेवानुगतः । (पुन- रवलोक्य, सहर्षं सुग्रीवं प्रति)

संरम्भोद्रिक्तनक्तंसमयदशमुखोच्चण्डदोर्दण्डहेला-
कैलासः सप्तलाकीजयमुदितमनोजन्मवादित्रशङ्खः ।

पदार्थतुल्यत्वतिरस्करणात्मा व्यतिरेकालङ्कारः । शार्दूलविक्रीडितं वृत्तम् । घनसारश्चन्द्रसंज्ञः कर्पूरो हिमवालुका' इत्यमरः । 'कुन्दं माध्य' मिति च कोषः ॥

समुन्नतघनेति—समुन्नतौ=उत्थितात्रौ घनौ=परस्परसंपृक्तौ च यौ स्तनौ तावेव स्तवकौ=गुच्छौ (ऊर्ध्वमुखविकासशीलत्वेन परमानन्दप्रदत्वेन च गुच्छ- त्वोक्तिः) तौ चुम्बति= स्पृशतीति तच्चुम्बि यत्तुम्बीफलं=तेन मधुरं=श्रुतिप्रियं क्वणन्ती=शब्दायमाना या वीणा तया (करणभूतया) विबुधलोकस्य=स्वर्गस्य वामे=मनोरमे भ्रुवौ यस्यास्तया ललनया, हरकिरीटस्य=शिवशिरसः कोट्या अग्रभागे स्फुरन्=प्रकाशमानः तुषारकरश्चन्द्रः तस्य कन्दली=अङ्कुरः (बालचन्द्र- कला) तस्याः किरणाः तेषां पूरः=समुदयस्तद्वत् गौरं=धवलं त्वदीयं=त्वत्सम्बन्धि यशः=कीर्तिः उपगीयते, उन्नतस्तनमण्डले वीणादण्डं निवेश्य मधुरं रणन्तीं वीणामाहत्य देवललनास्तव यशो-यदिन्दुकलामपि हसति, गायन्तीति भावः ॥ पृथ्वीवृत्तम् ॥ उपमालङ्कारः ॥६९॥

संरम्भेति—संरम्भेण=रभसेन उद्रिक्तस्य अवलिप्तस्य नक्तं समयः=निशा-

jGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

लोलाक्षीगण्डपालीलवणिमजलधेरुद्गतः फेनपिण्डः
पश्य व्योमावकाशं विशति विरहिणां दत्तशङ्कः शशाङ्कः ॥७०॥

(निर्वर्ण्य । स्वगतम्)

अयं नेत्रादत्रेरजनि रजनीवल्लभ इति
भ्रमः कोऽयं प्रज्ञापरिचयपराधीनमनसाम् ।
सुधानामाधारः स खलु रतिविम्बाधरसुधा-
रसासेकस्निग्धादजनि नयनात्पुष्पधनुषः ॥७१॥

काल एव दशमुखो=रावणस्तस्य उच्चण्डाः=अत्युग्रा ये दोर्दण्डाः=बाहुदण्डा =कैलासः (जगद्विजयदृप्तनिशासमयरावणस्य कैलासस्वरूपश्चन्द्रः) सप्त =भुवनसप्तकं तस्य जपस्तेन मुदितस्य=प्रसन्नस्य मनोजन्मनः=कन्दर्पस्य वा शङ्खः=विजयघोषणाप्रवीणो वाद्यशङ्खः (कामोद्दीपकत्वेनेत्थं रूपणम्) (कि लोलाक्षीणां=चञ्चलनयनानां वनितानां या गण्डपाली=कपोलदेशस्तस लवणिमा लावण्यं=सौन्दर्यं स एव जलधिः=समुद्रः (अतिप्रवाहवल्लावण्य समुद्रमिति) ततः उद्गतः=उदितः फेनपिण्डः एवम्भूतः विरहिणां=प्रिय हितानां दत्ता शङ्का=जीवनसंशयो येन तादृशः=प्रियविरहिणां जीवनं स समापादयन्नित्यर्थः। 'विरहिणां दत्तशङ्कः' इत्यत्र सम्बन्धसामान्ये षष्ठी (एतादृ शशाङ्कः व्योमावकाशम्=आकाशदेशं प्रविशतीति पश्य=अवलोकय। समस्तो वाक्यार्थः कर्म । अत्र माला रूपकमलङ्कारः । स्रग्धरावृत्तम् ॥७०॥

